[2] जैसे मेवाड़ में एक लिङ्ग जी महादेव राजा माने जाते हैं और महाराजा उनके दीवान इसी भांति ढूंढाहड़ राज्य के राजा श्री राधेगोविन्द जी माने जाते हैं और महाराजा उनके दीवान। इसलिये यहां में 'दीवान वचनात्' लिख जाता है।
(ख) श्री गोविंद सी निधि जहां, जैपुर नगरी मांझ।
जिहि वह सुख दृग् ना लह्यो ताको जननी बाझ॥ 64 व्रजनिधि ब्रज शृंगार।

[3] (क) प्रतिष्ठातिथि–मिति वैशाख शुक्ल 6 शुक्रवार वि० सं० 1849
(ख) ये इक मन्दिर पुनि किये निज महलनि के पास॥
व्रजनिधि पधरायें तहां हिय में बढै हुलास। व्रजनिधि का गणपति भारती ग्रन्थ सं० 760

भाव, भाषा-वैभव, रस व अलङ्कारों से पूरित होते थे। तत्कालीन कीर्तनियों से ज्ञात हुआ हैं कि महाराजा के उक्त पदों का एक संग्रह है जिसमें पाँच हजार पदों से भी अधिक पद हैं। महाराजा प्रतापसिंह के गायन की रचनाओं का यह संग्रह चार भागों में विभक्त किया हुआ है,[1] जो निम्नलिखित हैं—

१. व्रजनिधि मुक्तावली २. व्रजनिधि पद संग्रहः।
३. हरिपद संग्रह तथा ४. रेखता संग्रह।

रेखता उर्दू का शब्द है। उर्दू में सुढाल व सुन्दर गजलों व शेरों की रचना रेखता कहलाती है।[2] महाराजा प्रतापसिंह के दरबार में संस्कृत व हिन्दी के विशिष्ठ कवियों के साथ साथ उर्दू (रेखता) के शायर भी आश्रय पाये हुए थे। रेखते की धुन अच्छी लगाने के कारण महाराजा ने अपनी कई रचनाओं को रेखता के रूप में रचा है। उनके पदों के कुछ उदाहरण निम्नलिखित हैं—

१. हमारे इष्ट हैं गोविन्द,
राधिका सुख साधिका संग रमत वन स्वच्छन्द ॥१६३॥[5]

२. जिनके श्रीगोविन्द सहाई तिनके चिन्ता करे बलाई।
करुणासिधु कृपालु करहिं नित सब व्रजनिधि मन भाई ॥४३॥[6]

महाराजा सवाई प्रतापसिंह के शासन काल में साहित्य संगीत और कला के क्षेत्र में जो भी रचनाएं हुई हैं उन्हें तत्कालीन सुलेखकों द्वारा लिखलाकर उन्होंने तत् तत् विषयक साहित्य की अतुलनीय सेवा की है। कई विषयों पर उन्होंने अपनी अपने गुणीजन कुल से ग्रन्थों की रचना करवाई है। संगीत विषयक कई ग्रन्थ जो आज हमें संगीत साहित्य के प्रतिनिधि स्वरूप प्रतीत होते हैं वे उनकी सत्प्रेरणा के ही प्रतीक हैं। निम्नलिखित ग्रन्थ सवाई प्रतापसिंह की सदाशयता के फल तो हैं ही साथ ही संगीत शास्त्र की अमूल्य धरोहर भी हैं—

१. स्वर सागर — बुद्धप्रकाश
२. राग रत्नाकर — कृष्णा कवि ग्रन्थ संख्या ३८२५
३. राग संकेत — रस राशि रामनारायण ग्रन्थ संख्या ३४२५

---

1. पुरोहित हरिनारायण व्रजनिधि ग्रन्थावली पृ० सं० 32 (प्रस्तावना)
2. ,, ,, ,, ,, पृ० सं० 19 ,,
3. हरिपद संग्रह ,, ,, पृ० सं० 262
4. ,, ,, ,, ,, पृ० सं० 296

४. संगीत सागर — गणपति भारती ग्रन्थ संख्या ३४७२
५. श्री राधागोविन्द संगीतसार – नन्दकिशोर तिवाड़ी. श्रीकृष्ण भट्ट, चुन्नीलाल भट्ट और रामराय इन्दौरिया ग्रन्थ संख्या ७६८९ से ७६९३ तक।

महाराजा प्रतापसिंह को साहित्य संगीत एवं कला के अतिरिक्त धर्मशास्त्र ज्योतिषशास्त्र आदि गूढ़ विषयों का ज्ञान भी अपरिमेय था। तत् तत् विषयक उनकी रचना एवं ज्ञान इस बात का प्रमाण है। और इसका मुख्य कारण उनका प्रत्येक कार्य में नियमित रहना था। उनकी दिनचर्या सुनियोजित थी जिससे उनका समय निर्धारित कार्य सम्पादन में ही व्यय होता था।

श्रीकृष्णदत्त जो अपने प्रताप प्रकाश ग्रन्थ में महाराजा सवाई प्रतापसिंह की दिनचर्या भी लिखी है। ढूंढारी गद्य में लिखी गई यह दिनचर्या महाराजा के दैनिक जीवन पर तो प्रकाश डालती ही है इसके साथ उनकी अन्य विशेषताओं को भी प्रकट करती है। यहाँ महाराजा प्रतापसिंह की दैनन्दिनी पर प्रकाश डालने वाले कृष्णदत्त के प्रताय प्रकाश से उद्धृत निम्न परिच्छेद द्रष्टव्य हैं—

(अ) च्यार घड़ी राति रह्यां वंदी जन विरद वंस को पढैं। आप सुणि ब्रह्ममुहूरत में ऊठैं, गुरां को ध्यान करैं। गऊ को दरस करैं। छाया दान करैं[1] पग पृथ्वी पर धरैं। रतनासू जड़ी चौकी जीं पर विराजें। दांतण करैं। अरज वेगी आज करैं। आपका बनाया पद गुणीजन भैरों निवास[2] में गावें। दांतण करी प्रतिकृत्य करैं।

(ब) फेट सिटे दरबार की त्यारी को हुक्म होय। दोय पहर सरु होय। आप भी हजूर गादी विराजैं। राज काज करैं। देस देस का वकील अरज करैं राजकाज करि गुणीजन पर नजर होय,[3] पण्डित षट्सास्त्र की चरचा करैं, कवीश्वर जस पढैं, भाट चारण विरद पढैं। कलावन्त छः राग, तीस रागिणी गावैं,[4] पहर मेक दरवार करैं, सर्वतो भद्र महल से पधारैं[5], सगलां नै सीष होण।

---

1. घृत अथवा तेल से भरे कांस्य पात्र में मुख मण्डल एवं नाखूनों की छाया देखकर दान करने से अनिष्ट दूर होता है।
2. प्रातः काल गाई जाने वाली राग और रागनी।
3. गुणीजन यहां संगीतज्ञों के लिये ही प्रयुक्त हुआ है।
4. गायन कला विशारद को कलावन्त कहा जाता था।
5. सर्वतो भद्र–सभी ओर से खुला हुआ एक सभा मण्डप। इसकी रचना शास्त्रीय तान्त्रिक सर्वतोभद्र मण्डल के आधार पर हुई है। इसे सवाई जयसिंह ने बनवाया था। आजकल इसे दीवाने खास भी कहते हैं।

(स) दरोगा हुकम पाई सुष निवास महल को चांदणी में बिछातो करैं[1]। अरज होय, श्री हजूर पधारैं। गादी विराजैं, सतरंज षेलैं। हुकुम नाच की तैयारी को करैं। दरोगा हुकम महार चन्न की आड़ होय गुणीजन आवैं[2]। सलाम करैं, साज मिलावै, मृदंग, सितार, ताज ऋताल, वीणा, किन्नर, कानूर, दायरा, टुकड़, सारंगी, बंसी, अलगोजा। साज मिलाय अलाप करैं। ऊंचा गला करि नखा संगीत नाचैं।[3] सात सुर तोनी ग्राम सों रति असी। रंभा असी। इन्द्र को अप्सरा, महाप्रवीण कोई गोरी कोई सांवली, चम्पक वरणी, महा चंचल केस षुल्यां नाचैं। कोई जील में गावै कोई षरज में गावै,[4] आदि।

इस प्रकार महाराज प्रतापसिंह के ब्रह्ममुहूर्त से मध्य रात्रि तक की दैनन्दिनी को देखते हुए स्पष्ट हो जाता है कि उनकी प्रत्येक क्षेत्र में गहरी रुचि ही नहीं पैठ भी थी। यद्यपि यह दिनचर्या शान्तिकालीन ही है। तथापि यह इतिहास विदित है कि जयपुर राज्य में प्रायः अशान्ति नहीं रही है। इसलिये महाराजा का राज्य एवं प्रशासन के प्रत्येक क्षेत्र से सुपरिचित होना ही प्रथम आवश्यकता है। जयपुर की प्रजा का सौभाग्य रहा कि यहां का शासक प्रायः शस्त्रज्ञ के साथ शास्त्रज्ञ भी होता था। बिना शास्त्र ज्ञान के कोई प्रशासक इस प्रकार की दिनचर्या नहीं चला सकता। महाराजा प्रताप सिंह का शास्त्र ज्ञान का साक्षी उनकी प्रेरणा से तैयार अनेक शास्त्रीय ग्रन्थों का प्रणयन है। उन्हें ग्रन्थों के प्रणयन के साथ-साथ प्राचीन पाण्डुलिपियों के संरक्षण संवर्द्धन का भी पूरा शौक था। यों तो आमेर राजघराने के समय से ही राजाओं द्वारा हस्त लिखित ग्रन्थों का संग्रह एवं संरक्षण होता रहा है। यह संग्रह आज भी जयपुर राजप्रासाद में "खासा पोथी खाना" के नाम से प्रसिद्ध है। यह जयपुर राज्य के 36 विभागों में से एक है। एक समय इसमें लगभग 16000 हस्तलिखित ग्रन्थ संग्रहीत हैं।

इनमें से प्राचीनतम पाण्डुलिपि विक्रम सम्वत् 1307 की है। इस ग्रन्थ संग्रह की समय समय पर अभिवृद्धि होती रही है। मिर्जा राजा जयसिंह, रामसिंह प्रथम सवाई जयसिंह और प्रतापसिंह आदि का इस संग्राहालय की अभिवृद्धि में विशेष

---

1. सुष निवास—चन्द्रमहल का द्वितीय खण्ड का नाम सुष निवास है।
2. चत्र की आड़—जय निवास बाग के पश्चिम की ओर एक लघु द्वार।
3. नटवा—नाचने वाले लड़के।
4. जील—बहुत धीमा स्वर। सारंगी के मुख्य दो तारों के नीचे कसे हुए 17 तार जील कहलाते हैं।

योगदान रहा है। इसकी पाण्डुलिपियों की सुरक्षा का पूरा पूरा ध्यान रखा गया है। सवाई प्रतापसिंह को इसका सर्वाधिक श्रेय है जिन्होंने अपने अल्पावधिक जीवन में ही इस ग्रन्थागार में अनेक ग्रन्थ रत्नों का संग्रह करा कर इसे वृहदाकार दिया है। इनके समय सुलेख का अच्छा विकास था। प्रसिद्ध राज्यनामा की प्रति (महाभारत का अरबी अनुवाद जो बादशाह अकबर की आज्ञा से फैजी ने तैयार किया था) इन्हीं के समय में संगृहीत हुआ था। अकबर के दरबार में उच्चकोटि के चित्रकारों द्वारा चित्रित शाही रामायण भी सवाई प्रतापसिंह की ही उपलब्धि थी। प्रसिद्ध "आइने अकबरी" का हिन्दी अनुवाद जो मालीराम कायस्थ द्वारा किया गया था भी आप ही की देन है। वास्तव में महाराजा सवाई प्रतापसिंह को प्राचीन ग्रन्थों से अगाध प्रेम था।

यदि उनके कार्य काल के विभिन्न विषयों के ग्रंथों की यदि सूची तैयार की जाय तो वह संख्या सहस्त्रों में होगी। जबकि उन्हें जीवन के चालीस वसन्त भी देखने को नहीं मिले। प्रस्तुत लेख यद्यपि प्रामाणिक वाक्यों पर आधारित है तथापि उनकी रचनाओं एवं प्रेरणा प्रसूत ग्रंथों का पूरा उल्लेख इसमें सम्भव नहीं हुआ। यही नहीं प्रासङ्गिक विषय अभी इसमें स्पष्ट भी नहीं हुआ।

महाराजा सवाई प्रतापसिंह की पण्डित वाईसी के एक रत्न थे पण्डित विश्वेश्वर पौण्ड्रीक। जयसिंह कल्प द्रुमकार श्री रत्नाकर भट्ट के वे प्रपौत्र थे। पोथी खाना में संगृहीत पौण्ड्रीक साहित्य के आधार पर विश्वेश्वर पौण्डरीक अनेक ग्रंथों के प्रणेता थे। डा. व्रजमोहन जावलिया द्वारा तैयार ज्योतिष ग्रन्थ सूची में अनेक ग्रंथ विश्वेश्वर पौण्ड्रीक द्वारा विरचित हैं। इसी तरह अनेक अन्य विद्वानों की रचनाएं भी महाराजा प्रतापसिंह के कार्यकाल की हैं।

विश्वेश्वर पौण्ड्रीक का प्रसिद्ध "प्रतापार्कः" धर्मशास्त्र विषयक ग्रन्थ आपकी प्रेरणा का ही प्रसाद है। लेखक ने मङ्गलाचरण के बाद राजवंश वर्णन के अवसर पर तथा प्रत्येक मयूख की समाप्ति पर "श्री प्रतापभूपाज्ञया" इस प्रकार का उल्लेख कर इस ऐतिहासिक सत्य को उद्भासित करते हुए महाराजा के प्रति अपनी श्रद्धा व्यक्त की है।

प्रतापार्क जयसिंह कल्पद्रुम का ही संक्षेप है। जयसिंह कल्पद्रुम की रचना भी भारत में अन्तिम अश्वमेध के आयोजक श्री मिर्जा राजा जयसिंह की आज्ञा से ही हुआ था। ये दोनों ही ग्रन्थ रत्न धर्मशास्त्र विषयक होते हुए भी एक संवत्सर में आने वाले प्रत्येक व्रत उपवास महोत्सव जयन्ती आदि का सम्यक् रूप प्रस्तुत करते हुए उसके कार्य कलाप का निर्णय प्रस्तुत करते हैं। जहां जयसिंह कल्पद्रुम में विस्तार से विषय विवेचन हुआ है वहीं विश्वेश्वर पौण्डरीक ने

विषय वस्तु में परिवर्तन किये बिना उसे संक्षेप में प्रस्तुत कर विषय की सार्वजनीन उपादेयता सिद्ध की है।

इस श्लाघनीय प्रयत्न का श्रेय ग्रन्थकार विश्वेश्वर पौण्डरीक को अवश्य है तथापि मूल प्रेरणा के स्रोत थे महाराजा सवाई प्रताप सिंह। उन्हीं की सत्प्रेरणा से ग्रन्थकार यह प्रयत्न इतना स्तुत्य हो सका।

साहित्य संगीत और कला जहां जीवन के ऐहिक पक्ष का स्पर्श करते है वहां अन्य शास्त्र पारलौकिक सत्य के दर्शन कराते हैं। इसलिए यह विषय दुष्कर होने से प्रायः अछूता रह जाता है। लेकिन महाराजा प्रतापसिंह का यह पक्ष भी अत्यन्त उज्ज्वल है। उन्होंने शास्त्रों की उपेक्षा नहीं की अपितु उन्हें भी पूरा संरक्षण देकर उनके रहस्यों की समुद्घाटित करने का प्रयत्न किया है। प्रतापार्क भी उनमें से एक ऐसा ही सत् प्रयास है। और उस ओर वे द्रुतगति से बढ़ रहे थे लेकिन क्रूर विधाता को यह स्वीकार्य नहीं था।

जीवन के 39 वर्ष की अल्पायु में ही विक्रम सम्वत् 1860 में क्रूर विधाता ने उस यशस्वी राजा को अपनी प्रजा से छीन लिया। अस्वस्थता के कारण जयपुर में ही उन्होंने अपने पार्थिव शरीर को छोड़कर परम धाम को प्रस्थान किया। महाराजा प्रतापसिंह एक अलौकिक प्रतिभा से सम्पन्न मनस्वी नरेश थे। अन्यथा अल्पायु में ही राज्याभिषेक और राज सुरक्षा के भार के साथ शासन व्यवस्था चलाते हुए भी इतनी व्यापक साहित्य की श्रीवृद्धि करना किसके वश की बात है ? परम प्रतापी महाराजा प्रतापसिंह यद्यपि छोटे समय में ही अपनी लोक यात्रा सम्पन्न कर गये लेकिन इतने में ही उन्होंने जो अलौकिक यश सम्पदा अर्जित की है उससे वे युग युगान्त तक इस देश के इतिहास में अमर रहेंगे।

—●—

प्रतापार्कः

।। मङ्गलाचरणम् ।।

अंगरङ्गपरिनृत्यदनङ्गं सीतया रहसि कल्पितसङ्गम् ।
सन्नमामि कृतभार्गवभङ्गं राघवं [1]कलितकेलितरङ्गं सदैव ।।१।।

राजप्रशस्तिः

स्वस्ति श्रीमनुराजराजितमहावंशावतंसोऽखिल–
क्षोणीपालविशालसद्गुणगणैर्भूमण्डले विश्रुतः ।
आसिन्धुस्फुरदुज्ज्वलोज्ज्वलयशः स श्रीभृतो भूभृतां
भूषा श्रीजयसिंहभूपतिरभूद्भूमण्डलाखण्डलः ।।२।।

येन श्रीश्रुतिमार्गपंकजवनी सूर्येण धर्मादरा—
ल्लुप्तप्राय इहाखिलः श्रुतिपथः प्राकाशि धर्मावहः ।
येनाकारि तुरङ्गमेधनुदितां शास्त्रोक्तमार्गान्युज—
र्भूदेवामरशाखिना सुकृतिना काले कलावप्यहो ।।३।।

तस्यासीत्तनयः प्रसिद्धविनयः श्रीमाधवो माधव—
श्रीपादाब्जरतिर्धरासुरनतिर्भूमीपतिः सन्मतिः ।
यत्सौन्दर्यकलां विलोक्य विफलः कामोऽपि कामं मुदा–
लोकैराकलिकल्पनापटुतरैः शोभाभरान्निर्भरम् ।।४।।

तत्सूनुर्विलसत्प्रतापमहिमा श्रीमत्प्रतापाभिधो—
भूपो भूपतिभूषणाखिलगुणग्रामाभिरामोत्सवः ।
वैरिव्रातविधातको बहुकलावैदग्धविद्यानिधि—
र्भूविख्यातयशाः क्षितौ विजयते युद्धोद्भटो जिष्णुवत् ।।५।।

---

[1] ख पाठे द्वितीयश्लोकात् षष्ठश्लोकपर्यन्तं पञ्चश्लोकाः न सन्ति ।

सद्गीतागमशुद्धमुग्धरमणी नृत्यद्ध्वनाशको,
रासोल्लासविलासकृत्यकलितानन्दादरावम्बरः ।
राज्यश्री शुभचिन्तकक्षितिसुराभीष्टैककल्पद्रुमः,
चातुर्योच्चयचञ्चुचारुचरितो रामाभिरामा कृतिः ॥६॥

निजवंशपरिचयः

श्रीशाण्डिल्यमुनेः कुले किल महाशब्दोपनामाजनि,
श्रौतस्मार्त्तसमस्तकर्मनिपुणः श्रीदेवभट्टो महान् ।
रामांघ्रिप्रवणस्ततोऽजनि सुधीः सम्राट् स रत्नाकरः,
काशीस्थो बहुविश्रुतो निजकुलालंकारचूडामणिः ॥७॥

कृत्वा येन सतां मतेन विधिवत् सद्वाजपेयं[1] पुनः,
चक्रे वैदिकसत्कृतेन कृतिना श्रीपुण्डरीकः[2] क्रतुः ।
विप्रेभ्यो विधिवत्प्रदाय बहुशो ग्रामाग्निकामाथदा,
न्कीर्त्ति येन च संविधाय विमलां ब्रह्मास्पदं प्रापितम् ॥८॥

स्वस्ति श्रीजयसिंहनामनृपतेर्नामाङ्कितो भूतले,
ग्रंथः पंडितसम्मतोऽतिललितः कल्पद्रुमाख्यः कृतः ।
विद्याविश्रुतसत्कुशाग्रमतिना तत्तद्गुणाम्भोधिना,
श्रीरत्नाकरशर्मणा[3] जयति स क्षोदक्षमो धीमताम् ॥९॥

तत्सूनुः सुकृती कृती समभवद्भूदेव देवद्रुमो,
गङ्गाराम इति प्रथामधिगतः श्रीमान्सहाजेयकः ।[4]
येन क्षोणिपतिप्रपूजितपदाम्भोजेन काश्यां मुदा—
दत्ता ब्रह्मपुरी विधाय विधिवद्भूमेः सुरेभ्यो चिरात् ॥१०॥

---

१. सप्तसोमसंस्थासु वाजपेयोऽपि समाम्नातः ।

२. पुण्डरीकक्रतुः बौ. श्रौ. सू १७ प्रश्ने समुल्लिखितो वर्तते । अयं हि एकादशरात्रोऽयुतदक्षिणोऽश्वसहस्रदक्षिणो वा भवति । असौ मूलतो राजसूयस्य विकल्पः । महाभारतेऽपि (सभा. ५:१००, वन ३०:१७) यज्ञस्यास्य वर्णन लभते । महाभारतानुसारं चास्यानुष्ठानं दुर्योधनेन कृतम् ।

३. श्रीरत्नाकरशर्मा प्रसिद्धधर्मशास्त्रसंग्रहग्रन्थस्य "जयसिंहकल्पद्रुमस्य" कर्त्ता विश्वेश्वरपौण्डरीकस्य प्रपितामह आसीत् ।

४. जापक' इति 'ख' पाठः ।

आसीत्तत्तनुजो निजान्वयगुणावासोऽतिशान्तो मही—
भूषाभूसुरमण्डनं मुनिरिव ख्यातः स रामेश्वरः ।
येनालं परकामिनीपरधनाकांक्षाऽपि नाराधिता—
स्वप्नेऽपि स्फुटकीर्त्तिना कलयता श्रीशंभुना तुल्यताम् ॥११॥

जातस्तत्तनयो द्विजातिविनयो विश्वेश्वरः सन्मतिः,
स्वस्ति श्रीसुमतिप्रतापधरणीपालाज्ञया धर्मधीः ।
आदाय प्रपितामहेन रचितात्कल्पद्रुमाद्विस्तृता—
त्सारं सन्तनुते बुधोपकृतये सोऽर्कप्रतापादिकम् ॥१३॥

क्षम्यतां साहसं धीरैर्गुणवद्भिरमत्सरैः ।
यदर्थं[1] सुष्ठु तद्ग्राह्यं यदसल्लोच्यतामिह ॥१३॥

बहवो हि बुधाः सन्ति तन्निबन्धाः सहस्रशः ।
तथाप्यस्य तु वैदग्ध्यं सुहृद्भिः संविचार्यताम् ॥१४॥

परिभाषा—प्रकरणम्

कालमीमांसा

तत्र कालो द्विविधः नित्यः खण्डश्च । नित्यस्त्वीश्वररूपश्च[2] अनादिरेष भगवान्कालोऽनन्तोऽजरोऽमर इति कूर्मपुराणवचनात् खण्डः क्षणादिपरार्धान्तः । तत्र नित्यस्य न निर्णयोऽनुपयोगात् । खण्डस्तु संवत्सरायनर्त्तुमासपक्षदिवसादिभेदादनेकविधः । तत्र संक्त्सरस्यायनाद्यवयवित्वात् आदौ तन्निर्णयः क्रियते । स च संवत्सरः सम्यग्वसन्त्यस्मिन्मासादय इति व्युत्पन्नेन संवत्सरशब्देन योगः केवलयोगाङ्गीकारेवासाधिकरणग्रामादेरपि सवत्सरशब्देन प्रतीतिः स्यादतो योगसहिता रूढिरङ्गीकार्या । रूढ्याभिधीयमानो द्वादशमासात्मकः कालविशेषः । द्वादशमासाः संवत्सर इति श्रुतेः । स च मासत्रैविध्यंन चान्द्रः सावनः सौर इति त्रिविधः । तदुक्तं ब्रह्मसिद्धान्ते "चान्द्रसावनसौराणां मासानान्तु प्रभेदतः । चान्द्रसावनसौरास्तु त्रयः संवत्सरा अपि ॥" इति तत्र चान्द्रः संवत्सरश्चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शान्तः । सावनः षष्ट्युत्तरशतत्रयाहोरात्रात्मकः । सौरस्तु मेषादिमीनान्तः । यदात्वधिकमासो भवति तदा षष्ठ्या तु दिवसैर्मासः कथितो बादरायणैरिति स्मृत्यन्तरवचनान्मासद्वयात्मक एक एव मास इति द्वादशमासत्वमविरुद्धम् । अस्ति त्रयोदशो मास इत्यादि श्रुतिस्तु त्रिंशद्दिनात्मकमासाभिप्रायेण ।

---

[1] यदर्थ्यं इति 'ख' पाठः

[2] ईश्वररूप एव इति 'ख' पाठः

माधवमते त्वब्दः पञ्चधा । अब्दः पंचविधश्चान्द्रो व्रतादौ तिलकादिके । सुजन्मादौ व्रते सौरो [1]गौ-सूत्रादिषु सावनः । त्रयोऽप्याचार्यसेवादौ विकल्प्यन्ते निजेच्छया । आयुर्दाये तु नाक्षत्री बार्हस्पत्योऽधिवत्सर इति (कालमा० १, पृ०३) तेनोक्तत्वात् ।[2] गुरोर्मध्यमराशिभोगेन बार्हस्पत्यः । स च ज्योतिः शास्त्रे प्रसिद्ध-नाक्षत्रबार्हस्पत्यौ सुधर्मशास्त्रेऽनुपयोगान्नदर्शित एतेषां पञ्चानामपि संवत्सराणां दिनसंख्योक्ता आयुर्वेदवचने-सौर बार्हस्पतिसावनशशधर नाक्षत्रिकाः क्रमेण स्युः । मातुलपातालातुलविमलवरांगानि वत्सराः पंचेति । मः ५ तः ६ लः २।। ३६५ पः १ तः ६ लः २।३६१ अः ० तः ६ लः ३।३७० वः ८ मः ५ लः ३।३ ४। वः ४२ः २ ग ३।।३२८—पं०[3] तत्र यस्य ५४ दिवसात्मकस्य चान्द्रसंवत्सरस्य तिलकव्रतादावुपयोगः । शुक्लपक्षप्रतिपत् तिथ्योस्तूल्लिगत्वात् । न हि शुक्ल-कृष्णपक्षौ प्रतिपदादितिथयश्च सौरसावनमासोपजीवनेन प्रवृत्ताः पञ्चषष्ट्यधिकशतत्रय ३६५ दिनात्मकसौरस्य सुजन्मावासिव्रतादौ तद्व्रतस्य मेषसक्रमणमारभ्य मीनान्तसंवत्सरपर्यन्तमनुश्रेयत्वात् । षष्ठ्यधिकशतत्रय ३६० दिनात्मकस्य सावनस्य सत्रादौ तत्र त्रिंशद्दिनसाध्यषडहपचकस्य प्रतिमास सम्वत्सरपर्यन्तमनुष्ठेयत्वात् । तस्य च चान्द्रसौरयोरसिद्धः चतुर्विंशत्यधिकशतत्रय ३२४ दिनात्मकनाक्षत्रस्य पुरुषायुषपुष्यं स्नानादौ निमित्तत्वेनोपयोगः एकषष्ठ्यधिकशतत्रय ३६१ दिनात्मकबार्हस्पत्यस्याध्यब्दलुप्ताब्दसिंहस्य मकरस्थादावुपयोगः ।

तत्र चान्द्रोऽब्दः षष्ठिभेदः—

"प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अंगिरा श्रीमुखो भावो युवा धातेश्वरस्तथा ।।
बहुधान्यः प्रमाथी च विक्रमोऽथ वृषस्तथा ।
चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ।।
सर्वजित्सर्वधारी च विरोधी विकृतः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ।।
हेमलवो विलवोऽथ विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ।।
प्लवङ्गः कीलकः सौम्यः साधारणो विरोधकृत् ।
परिधावी प्रमाथी च आनन्दो राक्षसो नलः ।।

---

[1] गोसत्रादिषु इति 'ख' पाठः

[2] गुरोर्मध्यमराशि—स च ज्योतिषशास्त्रे इति 'ख' पाठे नास्ति ।

[3] तत्र यस्य ५४ दिवसात्मकस्य इत्यारभ्य मकरस्थादावुपयोगः इत्यन्तः 'ख' पाठे नास्ति ।

पिंगलः कालयुक्तश्च सिद्धार्थौ रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षः क्रोधनः क्षयः ।" इत्येतेनोक्तः[1] ।

यद्यपि ज्यौतिषे गुरोर्मध्यमराशिभोगेन प्रभवादीनां मासादौ प्रवृत्तिरुक्ता, तथापि प्रभवादीनां चान्द्रत्वमप्यस्ति । चान्द्राणां प्रभवादीनां पंचके पचके युग इति माधवेनोक्तेः तेन चान्द्राब्दादिश्चैत्रसिते प्रवर्तते, बार्हस्पत्यस्तु माघादौ तयोर्विनियोगो ब्रह्मसिद्धान्ते व्यावहारिकसञ्ज्ञोऽयं कालः स्मृत्यादिकर्मसु, योज्यः । सर्वत्र तत्रापि जैवो वा नर्मदोत्तरे आर्ष्टिषेणः स्मरेत्सर्वत्रकर्मादौ चान्द्रसम्वत्सर सदा । नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तितेति इति सम्वत्सरनिर्णयः ।

अथायनम्

तच्च सौरमृतुत्रयं सौरर्तुत्रितयं प्रदिष्टमयनमिति दीपिकोक्तेः अयनपदव्युत्पत्तिर्माधवीये-अयते यात्यनेनऋतुत्रयेण सूर्यो दक्षिणाशामुत्तराशां चेत्यृतुत्रयमयनमिति । केचित्तु चान्द्रमासेनायनद्वयमभ्युपगच्छन्ति । मार्गशिरमासादिकैस्त्रिभिर्ऋतुभिः कल्पितः कालः षण्मासात्मकमुत्तरायणं ज्येष्ठमासादिकैर्दक्षिणायनमिति । तत्र प्रमाणं ज्योतिः शास्त्रादौ मृग्यं, तच्च द्विविधं-दक्षिणमुत्तरं चेति । कर्कसंक्रान्तिमारभ्योत्तरम् मतान्तरपि वेदाङ्गज्योतिषे प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावदक् सार्पार्द्धे दक्षिणार्कस्तु माघश्रावणयोः सदा सूर्याचन्द्रमसोर्धनिष्ठादेराश्लेषामध्याच्चोत्तरदक्षिणे अयने । यद्वा रवेर्माघश्रावणयोरादितस्ते भवत इति । अनयोर्विनियोगो मदनरत्ने सत्यव्रतेनोक्तः : देवतारामवाच्यादिप्रतिष्ठोदङ्मुखे रवौ दक्षिणाशामुखे कुर्वन्नतत्फलमवाप्नुयादिति वैखानसः । "मातृभैरववाराहनरसिंहत्रिविक्रमाः । महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने ।" वै शब्दोप्यर्थे निषेधप्रतिविधिच्युतस्य विधौ प्रवेशः प्रतिप्रसवः । प्रसवोऽयं देवविशेषे इत्ययनम् ।

अथ ऋतुः

तत्र ऋतुशब्दार्थो माधवीये ऋतुशब्दः ऋगतावित्यस्माद्धातोर्निष्पन्नः । इयर्ति गच्छति अशोकपुष्पविकासादि असाधारणलिङ्गमिति वसन्तादिकालविशेषऋतुः समासद्वयात्मकः । सोऽपि द्विविधः सौरश्चान्द्रश्च । अनयोश्च विनियोगः उक्तस्त्रिकाण्डमण्डने" श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रमसर्तुषु । तदलाभे तु सौरर्तुष्विति ।।" स चोभयविधोऽपि प्रत्येकं षड्विधः । वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरभेदात् । यत्तु द्वादशमासाः पञ्चर्तव इति तत्तु हेमन्तशिशिरयोरेकीकरणविवक्षयेति ज्ञेयम् । एषामारम्भश्च वसन्ताद्बोध्यः । मुख वा एतदृतूनां यद्वसन्त इति श्रुतेः । तत्र चान्द्रा वसन्तादयश्चैत्रारम्भाः निरूपिताश्च, ते क्रमेण

---

[1] इत्यन्तेनोक्तः इति 'ख' पाठः

श्रुतौ मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रीष्मावृत् तत्रस्थश्च वार्षिकावृतू इति ।[1] अत्र ऋतू इति द्विवचनं ऋत्वयवमासद्वित्वाभिप्रायेण सौरा वसन्तादयस्तु । मीनादिसौरमासद्वयात्मकामेषादिसौरमासद्वयात्मका वा बौधायनेन मीनमेषयोर्मेषवृषयोर्वा वसन्त इत्यभिधानात् । एतदनुसारेणोत्तरेषामपि द्वैविध्यकल्पना । विनियोगस्तु वसन्ते बाह्मणोऽग्नीनादधीतेत्यादिवाक्येभ्योऽवगन्तव्यः । हेमाद्रौ यदा त्वधिकमासो भवति तदा चान्द्रमानेन मासत्रयात्मकोऽपिकश्चिदृतुः सम्पद्यते । तथा च त्रिकाण्डमण्डनेनोक्तं-"चाद्रमाने यदा चैत्रमासादिर्मलिनस्तदा शुद्धेऽपि मलिने चैत्र वैशाखेऽपि वसन्तता" इत्युक्तं इत्यृतुः ।

अथमासनिर्णयः—माधवीयमदनरत्नयोः, स च मासो मस्यते परिमीयते चंद्रवृद्धिक्षयादिनेति व्युत्पन्नेन मासशब्देन योगरूढ्या केवलयोगाङ्गीकारे द्रोणादिना परिच्छिन्नस्य धान्यादेरपि मासशब्देन बोधायति रतोयोगयुक्ता रूढिरङ्गीकार्याभिधेयः । अन्यदपि माधवीये-सकारान्तं मासितिप्रातिपदिकं चन्द्रवाचितस्यायंकाल इति मासः । स च मासश्चतुर्द्धा सावनः सौरश्चान्द्रो नाक्षत्रश्चेति त्रिंशद्दिनः सावनः संक्रान्तिमारम्य सक्रान्तिपर्यन्तः सौरः । शुक्लादिरमान्तः कृष्णादिः पौर्णिमान्तश्च चान्द्रः । चन्द्रस्य सर्वनक्षत्रभोगेन नाक्षत्रः । तदुक्तं ब्रह्मसिद्धान्ते—

"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशतादिनैः । एकराशौ रविर्यावत्कालं मासः स भास्कर" इति, विष्णुधर्मोत्तरे "सर्वतुं परिवर्त्तैस्तु नाक्षत्रो मास उच्यत" इति चित्रानक्षत्रयुक्ता पौणमासो यत्र स चैत्र इति चान्द्र एव मुख्या चैत्रादिसंज्ञा । एवं वैशाखादिष्वपि । द्विविधचान्द्रमध्येऽपि शुक्लादिर्मुख्यः कृष्णादिर्गौणः । शास्त्रे चैत्रशुक्लप्रतिपद्येव चान्द्रवत्सरारम्भोक्तेः । न हि ये कृष्णादिं मन्यन्ते तेषां वत्सरारम्भो भिद्यते । अतः शुक्लादिर्मुख्यः कृष्णादिना मलमासासंभवाच्च । तयोश्च चान्द्रोऽपि शुक्लपक्षादिः कृष्णादिर्वेति तत् विघेत्युक्तादेशभेदेन व्यवस्थामाह ।

त्रिकाण्डमण्डनः कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति, केचन । येऽपीच्छन्ति न तेषामपीष्टो विन्ध्यस्य दक्षिण इति । तथा च विन्ध्यदक्षिणे कृष्णादिमासनिषधे सत्युत्तरतो द्वयोरभ्यनुज्ञा गम्यते । एवं च गौणस्यापि पौर्णिमान्तमासस्य पौर्णमास्या हि मासान् संपश्यन्तीति श्रुतेः । कलाभिः पूर्णो मासो यस्यां तिथौ सा पौर्णमासीति व्युत्पत्तिः । कलाभिः पूर्णोमास इति व्युत्पत्यङ्गीकाराच्च तस्य मुख्यतुल्यत्वमेवेति विन्ध्योत्तरे सङ्कल्प-विवाह-मासनामादिषु तस्योपयोग इति ध्येयं ज्योतिर्गर्गः ।

---

[1] इषश्च अजश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू, तपश्च तपस्यश्च शैशीरावृतू इति अधिकः पाठः 'ख' पाठे ।

"सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः । "अब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ।।" ऋष्यशृङ्गः विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते । पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके । स्मृत्यन्तरे एकोद्दिष्टविवाहादावृणादौ सौरसावनौ । ज्योतिर्गर्गः । "आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा । सावनेनैव कर्त्तव्या शूद्राणां चाप्युपासना ।।" विष्णुधर्मे नक्षत्रसंत्राण्ययनानि चेन्दोर्मासेन कुर्याद्भगणात्मकेनेति ब्राह्मे । तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव चेत्यादि ।

यत्तु अमावस्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोरिति वचनं तद्यत्र कर्मविशेषे ब्राह्मणादीनां वचनान्तरेण वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यादिवन्मास उक्तस्तत्र दर्शान्तत्वमात्रनियमार्थं न तु सर्वकर्मसु दर्शान्त एवेति विधिलाघवात् त्रैवर्णिकानां सर्वकर्मसु मासविशेषविधेः सावनादीनां शूद्रानुलोमादिपरत्वापत्तेश्चेति दिक् इति शुद्धमासनिर्णयः।

अथ मलमासनिर्णयः–

तस्त्वं चैकमात्रसंक्रान्तिरहितत्वं तत्क्षयमासाधिकमाससाधारणं स द्विविधः अधिकमासः क्षयमासश्च । आद्यमाह भृगुः "एक राशिस्थिते सूर्ये यदा दर्शद्वयं भवेत् । हव्यकव्यक्रियाहन्ता तदा ज्ञेयोऽधिमासकः ।" इति । अयं च त्रयोदशोमासश्चान्द्र एव, न तु सौरः[1] स्यान्नास्ति सौरस्त्रयोदशं इति । अयं च त्रिंशन्मासादूर्ध्वं षड्त्रिंशन्मासमध्ये भवति । तथा च ज्योतिस्सागरे–"त्रिंशत्षड्विंशमासस्य बाह्याभ्यन्तरयोर्द्वयोः । अधिमासोऽवकल्पेत् बादरायणकीर्तितः ।।" इति । यत्तु मासे त्रिंशत्तमे भवेदिति वचनं तत् त्रिंशत्तमेऽतीते इति व्याख्येयं, यदपि "द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा । घटिकानां चतुष्केण पतत्यधिकमासकः ।।" इति वासिष्ठं वचनम् । तत्संभवार्थं, न तु नियमार्थम् । तथात्वे षोडशादिनाऽधिक द्वात्रिंशन्मासानन्तरं कृष्णपक्षनियमेन शुक्लादित्वभङ्गापत्तेः । अयं कर्मफलनाशकत्वान्मलिम्लुच[2] इत्युच्यते । उक्तञ्च ज्योतिःशास्त्रे–"रविणा लङ्घितो मासश्चान्द्रः ख्यातो मलिम्लुच इति । मलिम्लुचत्वं च तस्य कर्मफलचौरैः राक्षसादिभिराक्रान्तत्वात् । तदुक्तं शातातपेन–

"वत्सरान्तर्गतः पापो यज्ञानां फलनाशकृत् ।
नैरृत्यैर्यातुधानाद्यैः समाक्रान्तो विनाशकः ।।
मलिम्लुचैः समाक्रान्तं सूर्यसंक्रान्तिवर्जितम् ।
मलिम्लुचं विजानीयाद् गर्हितं सर्वकर्मसु ।।" इति

---

[1] तदुक्तं निर्णयामृते अस्ति त्रयोदशोमासः स च श्रुत्या निगद्यते असौ चान्द्रो न सौरः इति 'ख' पाठे अधिकः पाठः।

[2] मलिम्लुचो मलमासभेदेष्वेकः।

अस्य मलत्वं चाधिकमासत्वात् तदुक्तं गृह्यपरिशिष्टे । मलं वदन्ति कालस्य मासं कालविदोऽधिकमिति । अयं नपुंसक [1]इत्युक्तं ज्योतिःशास्त्रे ।' असंक्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः । कालान्तरात्समायाति स नपुंसक उच्यते ॥" इति । नपुंसकत्वं च मासपुंस्त्वप्रयोजकसूर्यस्याभावात् । तदपि तत्रैवोक्तं "मासेषु द्वादशादित्यास्तपन्तेह यथाक्रमम् । नपुंसकेऽधिके मासि मण्डलन्तपते रवेः" । इति । द्वितीयस्यापि स्वरूपमुक्तं ज्यौतिषे–

> "असंक्रान्तिमासोऽधिमासः स्फुटः स्याद्द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् ।
> क्षयः कार्तिकादित्रयेनान्यतः स्यात्तदा वर्षमध्येऽधिमासद्वयं च ॥ इति

स्फुटः स्फुटमानलग्नः[2] वर्षं चात्र पूर्वां संक्रान्तिमारभ्य चान्द्रं द्वादशमासात्मकं बोधव्यम्, न चैत्रादिः । अयं च मलमास एव नाधिमासः । तदाह सत्यव्रतः– "राशिद्वयं यत्र मासे सङ्क्रमेत दिवाकरः । नाधिमासो भवेदेष मलमासस्तु वैमलम् ॥ इति । द्विसंक्रान्तिमासो यत्र भवति तत्र वर्षमध्ये मासद्वयमधिकं भवति । तत्र परो दुष्टः आद्यः श्रेष्ठः शुद्धश्च । तदुक्तं जाबालिना–"एकस्मिन्नपि वर्षे चेद् द्वौ मासावधिकमासकौ । पूर्वो मासः प्रशस्तः स्यादपरस्तु मलिम्लुचः ॥ इति ।

सोऽयं क्षयमाससंज्ञा[3] मासो प्रपिषादिसंक्रान्तयश्चैत्रादिसंज्ञानां प्रयोजिकाः । तथा च ज्योतिश्शास्त्रेऽभिहितं–"मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते ।" चीङ् चैत्राद्यः स ज्ञेय इति योजक संक्रान्तिद्वययुक्तत्वान्मासद्वयात्मकः । स एवाहंस्पतिसंज्ञकः । अस्मात्पूर्वभावो असंक्रान्तमासः संसर्पः । उत्तरभावी असक्रान्तमासोऽधिमासः ।

तथा च, ज्योतिर्बृहस्पतिः यस्मिन् मासेन संक्रान्तिः सङ्क्रातिद्वयमेव वा । संसर्पाहंस्पती मासावधिमासश्च निन्दिता इति । अत्र पूर्वासंक्रान्तिद्विसंक्रान्तयोः संसर्पाहंस्पतिसंज्ञकत्वमुक्त्वासङ्क्रान्तमासस्य चाधिमासत्वं क्रमेणाभिधानादवगम्यते । क्षयमासपूर्वभावी संसर्पोऽसंक्रान्तोऽपि न मलमासः किन्तु शुद्धतुल्यः । उत्तर एवासंक्रान्तो मलमास इति ज्ञेयः । इदं च पूर्वासंक्रान्तस्य शुद्धत्वप्रतिपादनं विवाहादिव्यतिरिक्त[4]क्षयाहादिश्राद्धादि विषयं यद्वर्षमध्येऽधिकमासयुग्मं तत्कार्तिकादि त्रितये क्षयाख्यः । मासत्रयं त्याज्यमिदं प्रयत्नाद्विवाहयज्ञोत्सवमंगलेष्विज्योतिः शास्त्रवचनात् क्षयागमनकालोऽपि सिद्धान्तशिरोमणौ–'गतो-

---

१. ख पाठे अपि इति अधिकः पाठः ।

२. मानलब्धः इति ख पाठे

३. प्रपिषादि संक्रान्तयश्चैत्रादि संज्ञानां प्रयोजिका इति पाठः 'ख' पाठे नास्ति ।

४. क्षणहादि इति 'ख' पाठे

ऽध्यदिनन्दैर्मितेनै[1]ककाले, तिथोशैर्भविष्यत्पथाङ्गाक्षसूर्यैः । गवा[2]द्र्यग्निभूमिस्तथा प्रायगोऽयं, कुवेन्देन्दुवर्षै क्वचिद्गोकुभिश्चेति ।”

अस्यार्थः–अध्यब्धयश्चत्वार अद्रयः सप्त, नन्दा नव एषां प्रातिलोम्यपाते चतुःसप्तत्यधिकनवशतवर्षैरेकः पूर्वजातः । तिथयः[3] पंचदशाधिकंकादशशत १११५ एव मिते याते कश्चिद्भविष्यतीत्यर्थः । अंगदं अक्षसूर्याः १२ एकत्र १२५६ गजाः ८ अद्रयः ७ अग्निभूः · एकत्र १३७८ कु. १ वेदाः ४ इन्दुः १ एकत्र १४१ गावः ९ कुः १ एकत्र १९ एतैंमितेवर्षे याते कश्चिद्भविष्यतीत्यर्थः इतिमलमासस्वरूपनिर्णयः ।

अथ मलमासे कार्याकार्यनिर्णयः– परिशिष्टे मलिम्लुचस्तु मासो वैमलिनः पापसम्भवः गर्हितः पितृदेवेभ्यः सर्वकर्मसु तं त्यजेदिति पैठीनसिः । श्रौतस्मार्तक्रियायाः सर्वा द्वादशे मासि कीर्त्तिताः । त्रयोदशे तु सर्वास्ताः निष्फला इति कीर्त्तिताः । “तस्मात् त्रयोदशे मासि कुर्यात्तान्न कथञ्चन । कुर्वन्ननर्थमेवाशु कुर्यादात्मविनाशनमिति । अत्र यद्यपि साधारण्येनैव सर्वकर्मणां निषेधः प्रतीयते, तथा[4] ह्यावश्यकानां प्रतिप्रसवात् काम्या नावश्यकपर एव सः । तथा च प्रजापतिः– “न कुर्यादधिके मासि काम्य कर्म कदाचन ।” स्मृत्यन्तरे च “इष्ट्यादि सर्वकाम्यन्तु मलमासे विवर्जयेद्” इति । अत्र काम्यग्रहणं नित्यानामप्यनावश्यकानामुपलक्षणं तथा च काठकगृह्ये “मले न न्यगति कुर्यान्नित्यां नैमित्तिकीं क्रियामिति तादृशानि नित्यानि कानिचित्परिशिष्टेऽनुपलक्षणतया[5] दर्शितानि “अवषट्कारहोमाश्च पर्व चाग्रयणन्तथा । मलमासेऽपि कर्त्तव्याः काम्या इष्टीर्विवर्जयेदिति ।”

अवषट्कारहोमा अग्निहोत्रौपासनवैश्वदेवादयः पर्वदर्शपौर्णमासौ पार्वणस्थालीपाकश्च, आग्रयणकर्त्तव्यता च पुराणान्नालाभे नैमित्तिकान्यपि कानिचित् तादृशानि यमादिभिर्दर्शितानि–“चन्द्रसूर्यगृहे स्नानं श्राद्धदानजपादिकम् । कार्याणिमलमासेऽपि” इति चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि । मलमासेऽपि देयं स्याद्दत्तमक्षयतां व्रजेदिति ।” चन्द्रसूर्यग्रहणं कपिलषष्ठ्याद्यलभ्ययोगानामप्युपलक्षणं, सगतिकानि तु नित्यनैमित्तिकान्यपि तत्र न कार्याणि । तादृशान्यपि कानिचिद्दर्शितानि काठकगृह्यपरिशिष्टे सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे पुत्रेष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि “महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ।

---

[1] शाककाले इति ख पाठः

[2] गजाद्यग्निः इति ख पाठः

[3] पञ्चदश, ईशा एकादश इति ख पाठोऽधिकः ।

[4] प्यावश्यकानां इति ख पाठः

[5] उपलक्षणतया इति ख पाठः

स्पष्टमासविशेषाख्या विहितं वर्जयेन्मल:” इति पुत्रेष्टिः पुत्रगतपूजत्वादिफलार्था जातेष्टिरेव तस्या नैमित्तिकत्वेन नित्यत्वात् शेषिविरोधान्निमित्तानन्तर्यबाधेन शौचकालसरूपाङ्गोपसग्रहव्यवस्थापने न च सगतिकत्वात् । कामान्यपि यानि शेषिबाधापत्तेः कालाविलम्बासहत्वादगतिका[1]तिकारी राक्षोघ्न्यभिचारप्रत्यभिचारज्वरादिरोगशान्तिग्रहदौस्थ्यादिनिमित्तानीत्यादीनि तानि मलमासेऽपिकार्याण्येव । न्यायाद्रागे च लभ्ययोगे च सीमन्ते पुंसवनेऽपि च “यद्दानादिसमुद्दिष्टं पूर्वत्रापि न दुष्यता” तिमरीचिवचनाच्च ।

दक्षोऽपि नैमित्तिकानि काम्यानि निपतति यथा[2] तथा कार्याणि न कालस्तु विधीयत इति । गृह्यपरिशिष्टे नेहे तत्र विशेषेज्यामन्यत्रावश्यका द्विधेरिति संगतिकानामपि काम्यानां यां निषेधः साऽप्यारम्भसमाप्तिविषय एव “असूर्यानाम ये मासा न तेषु मम सम्मताः । व्रतानां चैवयज्ञानामारम्भाश्च समाप्तयः” इति वचनात् अनुवृत्तिस्तु कर्त्तव्यंत्र, प्रारब्धं कर्म यत्किंचित्तत् कार्यं मलिम्लुच इति ब्रह्मसिद्धान्तात् । अतएव चातुर्मास्यव्रतोपक्रमसमाप्तिकालमध्येऽधिमासपाते तत्र तस्या विच्छेदेनानुष्ठानमुक्तम् । अधिमासनिपातेऽपि ह्येष एव विधिक्रम इति ।

यत्तु काठकगृह्ये प्रवृत्त मलमासात्प्राग्यत्काम्यमसमापितम् । आगते मलमासेऽपि तत्समाप्यमसंशयमिति । मलमासेऽपि काम्यकर्मणः समाप्तिप्रतिपादन तत्सावनमानोपजीविकृच्छ्रचान्द्रायणाहीनसत्रादिविषयन्तदेवमावश्यकानि काम्यान्यपि नित्यनैमित्तिकानि चागतिकानि मलमासे आरम्भणीयानि समाप्यानि च सावनमानसाध्यानि काम्यान्यपि [3]प्रागारब्धानि समापनीयानि, तदितरेषान्त्वारम्भः समाप्तिश्च न कर्त्तव्या । अनुवर्तनमात्रन्तु कर्त्तव्यमेवेति सामान्यतो मलमासे वर्ज्यावर्ज्यविवेके सिद्ध विशेषतो वर्ज्यावर्ज्यानि संगृह्य प्रदर्श्यन्ते ।

तत्र पुंसवन-सीमन्तोन्नयन-जातकर्माद्यन्नप्राशनान्तानि कर्माण्येतत्सर्वनिमित्तकाभ्युदयिकश्राद्धं चन्द्रसूर्यग्रहप्रयुक्तस्नानश्राद्धदानजपादिकमुपद्रवशान्त्यर्थंकर्मार्द्धोदयावलभ्ययोगनिमित्तश्राद्ध[4]दानव्रतादिकमन्त्येष्टिदहनोदकदानपिण्डदानस्थि – सचयननवश्राद्धैकादशाहिकवृषोत्सर्गषोडशश्राद्धसपिण्डीकरण[5]निषेद्यात्रयोदशीश्राद्धं सन्ध्यावन्दनाग्निहोत्राव्यतिपातगोवधादिनिमित्तप्रायश्चित्तमग्निनाशादिनिमित्तकं पुनराधानं प्रतिमादिसस्कारनाशहेतुका पुनः प्रतिष्ठ पूर्वंदृष्टतीर्थश्राद्धगज-

---

[1] अगतिकानि इति “ख” पाठः

[2] यथः यथा तथा तथैव कार्याणि इति ख पाठ अधिकः

[3] प्रगादब्धानि इति ख पाठे लेखः प्रागारब्धानि

[4] द्ध इति ख पाठे लेखः

[5] सपिण्डीकरणानिमद्या इति ख पाठः

च्छायाश्राद्धादीनि निमित्तवशान्मलमासे शुद्धमासे वा कर्त्तव्यानि । स्मृत्यन्तरे श्राद्धजातकनामानि ये च संस्कारसव्रताः मलिम्लुचेऽपि कर्त्तव्याः काम्या इष्टिर्विवर्जयेदिति ।

श्राद्धं जातककर्मादिनिमित्तमाभ्युदयिकं संस्काराः पुंसवनान्नप्राशननिष्क्रमणादयः सव्रताः पूर्वसङ्कल्पितचातुर्मास्यादिव्रतविशेषाः यस्तु नामान्नप्राशनं चौलं विवाहं मौञ्जिबन्धनं निष्क्रमणं जातकर्मापि काम्यवृषविसर्जनं अस्तङ्गते च गुरौ शुक्रे वा[1] मलिम्लुचे उद्यापनमुपारब्धव्रतानां नैव कारयेदिति गार्ग्यवचनेनाऽन्नप्राशननामकर्मजातकम निष्क्रमणानां निषेधः । सोऽतिक्रान्तस्वकालतद्विषयः, जातकर्मविधायकवाक्यविरोधाद्गभस्ति जातकर्मणि यच्छ्राद्धं नवश्राद्ध तथैव च ग्रहणे पुंसवादो चातत्पूर्वत्रपरत्र चेति । निमित्तवशादिविशेषः, "यमः गर्भे वार्धुषिके भृत्ये श्राद्ध कर्मणि" मासिके ।

"सपिण्डीकरणे नित्ये नाधिमासं विवर्जयेत् ।
तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः ॥
जातकर्मान्त्यकर्माणि नवश्राद्धं तथैव च ।
मघा त्रयोदशी श्राद्धं श्राद्धान्यपि च षोडश ॥
चन्द्रसूर्यग्रहे स्नानं श्राद्धं दानं जपादिकम् ।
कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा ॥'

इति गर्भे गर्भमासप्रयुक्त्या विहिते पुंसवनादौ मासिके श्राद्धकर्माणि अमावस्या श्राद्धकर्मणेत्यर्थः नित्ये नित्यदाने होमोऽऔपासनहोमः । काठकगृह्ये मघात्रयोदशीश्राद्धं प्रत्युपस्थितहेतुकं अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुच इति प्रत्युपस्थितहेतुकमित्यनेन सग्रहदर्शितप्रायश्चित्तपुनराधानप्रतिष्ठादेः संग्रहः । बृहस्पतिः—

"नित्यनैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे ।
तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धन्तथैव च ॥"

इत्यत्र गजस्य या पूर्वस्यां दिशि छाया सा गजच्छाया । गजच्छायो परमान्नन्तुयो दद्यात् पितृणां मधुना सह । छायायां तु गजेन्द्रस्य पूर्वायां दक्षिणामुख इति विश्वामित्रोक्ता मुख्या ग्राह्या, न पारिभाषिकी असम्भवात् अब्दोदकुम्भश्राद्धं मन्वादियुगाद्दिकल्पादिदर्शश्राद्धानि अहरहः श्राद्धं मासिकश्राद्धं मन्वादियुगादिविहितदानं, दैनन्दिनं, तिलगोभूहिरण्यानां दान संध्योपासनम् औपासनहोमं नित्याग्निहोत्रं देवताऽतिथिपूजनंस्नानविधिना स्नानंपूर्वारब्धदर्शपूर्णमासयागपक्षा-

---

[1] बाले वृद्धे इति ख पाठः अधिकः

दिस्थालीपाकाननित्यतर्पणवैश्वदेवादीन्मलमासे शुद्धमासे च कुर्यात् । तत्र कौथुमिः—

"अष्ट[1]मम्बुघटं दद्यादन्नं चापि सुसञ्चितम् ।
सम्वत्सरे विवृद्धेऽपि प्रतिमासं च मासिकम् ॥" इति ।

त्रिवृद्धे त्रयोदशात्मके[2] प्रतिमासं मृताहे च श्राद्धं यत्प्रतित्वरपरं । मन्वादौ च युगादौ च तन्मासोरुभयोरपीति ।

प्रतिसम्वत्सरश्राद्धं प्रतिसम्वत्सरक्रियमाणं कल्पादिप्रभृतिश्राद्धं न तु क्षयाहश्राद्धं वक्ष्यमाण विरोधात्........स्मृतिसग्रहेऽपि यौगादिकं मासिकं च श्राद्धं चापरपाक्षिकं मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि चेति । आपरपाक्षिकं प्रतिकृष्णपक्षं विहितमश्राद्धं न तु महालयश्राद्धं तस्य निषेधात् मत्स्यपुराणे दर्शे चाहरहः श्राद्धं दानं च प्रतिवासरे "गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचः" इति । व्यासः—

"जातकर्मणि यच्छ्राद्धं दर्शश्राद्धं तथैव च ।
मलमासेऽपि तत्कार्यं व्यासस्य वचनं यथा ॥" इति ।
यत्तु संवत्सरातिरेकेण मासेभ्यः[3] स्यान्मलिम्लुचः ।
तस्मिँस्त्रयोदशे श्राद्धं न कुर्यादिन्दुसंक्षयः ।" इति ।

ऋष्यशृङ्गवचनं तत्तिथिनक्षत्रादिविहितामवास्याप्राप्तकाम्यश्राद्धविषयम् । पूर्वविरोधाच्छुद्धमासमृतानां प्रथमाब्दकं मलमास एव कार्यम तथा च यमः, आब्दिकं प्रथमं यत्स्यात् तत्कुर्वीत मलिम्लुचे । त्रयोदशे तु सम्प्राप्ते कुर्वीत पुनराब्दिकमिति । पुनराब्दिक द्वितीयादिवार्षिकं त्रयोदशेऽतीते चतुर्दशाद्यदिने कुर्यादित्यर्थः ।

लघुहारीतोऽपि, "प्रत्यब्दं द्वादशे मासि कार्या पिण्डक्रिया द्विजैः । क्वचित्त्रयोदशेऽपि स्यादाद्यमुक्तात्तुवत्सरमिति द्वादशे त्रयोदशेऽतीत इत्यर्थः । अयं चाद्यायाब्दिकस्य त्रयोदशमासाद्यदिनकर्त्तव्यतानियमो मध्येऽधिमासपाताभाव एव ज्ञातव्यः, अन्यथा ज्येष्ठ मृतस्य वैशाखे आद्याब्दिकापत्तेः तेन तादृशस्थले मासिकस्य द्विरावृत्तिः कृत्वा, त्रयोदशेऽतीते च चतुर्दशाद्यदिन एवाद्याब्दिकं यत्तु "वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि । मासद्वयेऽपि तत्कुर्याद् व्याघ्रस्य वचनं यथेति गालववचनं तत्प्रथमाब्दिकं मलो द्वितीयादिकं तु

---

[1] अब्द इति ख पाठे
[2] प्रतिमास इत्यारभ्य वक्ष्यमाणविरोध इति पाठः ख पाठे नास्ति ।
[3] मासो यः इति ख पाठे ।

शुद्ध इत्येवं मासद्वय इत्येतदर्थकमित्युक्तं मदनरत्ने । मासद्वयात्मके क्षयमास इत्येवं व्याख्यया क्षयमासपरं गालावीयमित्युक्तं निर्णयामृते । मलमासमृतानां प्रत्याब्दिकं च तत्सङ्ग[1] अधिमासस्य मलमासत्वे मलमास एवाऽन्यदा शुद्धमासे कुर्यात् ।

तथा च पैठीनसिः श्राद्धचन्द्रिकायाम्–मलमासमृतस्य[2] कालान्तरे पुनः कदाचित्स एव मलमासो भवेत्तदा मलमास एव प्रत्याब्दिकं कार्यं "मलमासमृतानां च श्राद्धं यत्प्रतिवत्सरम् । मलमासे तु कर्त्तव्यं नान्येषान्तु कदाचन ॥" तत्रापि, मलमासकृष्णपक्षमृतानां तु कृष्णादिमासपक्षपरिग्राहिणामपि मलमासस्य शुद्धत्वाच्छुक्लादिगणनया यस्तन्मासकृष्णपक्षः । तत्रैव कार्यंयदपि "श्राद्धीयाहनि सम्प्राप्ते त्वधिमासो भवेद्यदि । श्राद्धद्वयं प्रकुर्वीत एवं कुर्वन्तमुह्यति" इति वृद्धवसिष्ठवचनं तन्मासिकपरम् । तस्य मासद्वये कर्त्तव्यत्वोक्तेः यत्तूत्तरे देवकार्याणि पितृकार्याणि चोभयोरिति गौतमवचनं तद्दर्शश्राद्धपरम् ।

केचित्तु 'प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरम् । मन्वादौ च युगादौ च तन्मासोरुभयोरपी" ति मरीचिवचनात् वर्षे वर्षे तु यच्छ्राद्धमित गालवोक्तेश्च इत्यादिकं मासद्वये कार्यमित्याहुः । तत्तुच्छ प्रतिमास मृताहे क्रियमाणं मासिकम् । प्रतिसम्वत्सरं क्रियमाणं कलादि श्राद्धमिति मरीचिवचसो मदनरत्ने न व्याख्यानात् । गालवीयस्य च मासद्वयात्मके क्षयमास इति माधवेन व्याख्यानाद्यदपि निर्णयामृते पूर्वोक्तकालादर्शवचनान्मलमासे श्राद्धदिनस्य वंध्यत्वनिरासार्थं पितृदेशे न ब्राह्मणान् भोजयित्वा शुद्धमासे सपिण्डकं श्राद्धं कुर्यात् ।

"पिण्डवर्जंयसङ्क्रान्ते सङ्क्रान्ते पिण्डसंयुतम् ।
प्रतिसम्वत्सरं श्राद्धमेव मासद्वयेऽपि च" ॥ इति

वृद्धपराशरोक्तेरिति । तदपि चिन्त्यम् । पूर्वोक्तवचनस्य क्षयपूर्वभाव्यधिकमासविषयत्वात । तत्र हि मासद्वये श्राद्धमुक्तम् । तथा च शातातपाः–

"एक एव [3]क्षयमासः संक्रान्तिद्वयसंयुतः ।
मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते" ॥ इति

मासद्वयगतं पूर्वासंक्रान्तगतं क्षयगतं च । मलमासे क्षयमासे अपि शब्दात्पूर्वाधिमासे चेति हेमाद्रिः । तथाचायमर्थं, पूर्वासंक्रान्तमासे मृतस्य तत्र क्षये च श्राद्ध कुर्यात् । क्षये मृतस्य तु तत्र पूर्वत्र च श्राद्धं कुर्यादिति । तथा च दीपिकायाम्–

---

[१] तत्सम्बन्धि इति ख' पाठः

[२] मलमासमृतस्य इत्यारभ्य प्रत्याब्दिकं कार्यमित्यन्त पाठः 'ख' पाठे नास्ति ।

[३] यदा मास इति 'ख' पाठः ।

तत्प्राक्संग्रधिमासको यदि भवेत्तत्र्त्य सांवत्सरम्,
तस्मिन् शुद्धतया क्षये च वचनात्कुर्याद्द्वयोः कोविदः ।। इति

¹कालादर्शोऽपि कथञ्चिदेतद्विषयनयैव व्याख्येयः–²मलमासे वर्ज्याः–नित्यनै-
मित्तिकातिरिक्तमहादानादिदानानि, अग्न्याधान, अग्निष्टोमादियागान्, पूर्वोक्त-
व्रतानिरिक्तव्रतानि, प्राथमिकदर्शपूर्णमासपक्षादिस्थालीपाकान्, अपूर्वतीर्थयात्रां,
प्रसिद्धस्वयम्भ्वादिदेव प्रथमदर्शनं, देवताऽऽरामतटाकवापीकूपादिप्रतिष्ठां,
अग्निहोत्रहोमारम्भं, काम्यवृषोत्सर्गं, प्रथमं राजाभिषेकम्, अतिक्रान्तस्वकाल-
जातकर्माद्यन्नप्राशनांतानि चौलोपनयनवेदव्रतसमावर्तनविवाहान्, आश्रमस्वीकार,
गृहग्रामपुराद्यारम्भप्रवेशौ वसन्तरथोत्सवादिरूपान् देवमहोत्सवान् । व्रतारम्भो-
द्यापने पूर्वोक्तातिरिक्तनिमित्तकाभ्युदयिकश्राद्ध, देशान्तरयात्रां जातेष्टिं, पुष्टी-
ष्ट्यादि काम्येष्टीः, अनापत्कालीनाग्रयणं श्रौतानि चातुर्मास्यपशुबन्धादीनि सर्वे-
पापप्रायश्चित्तादीनि । उपाकर्मोत्सर्गजन्मदिनोत्सवान् पवित्रारोपणं दमनका-
र्याणि । अष्टकाकर्म विष्णुशयनपरिवर्तनोत्थानानि, दुर्गाया इन्द्रस्य च स्थापनो
त्थापने शक्रध्वजोत्थापनं शुद्धमासमृतद्वितीयाद्याऽब्दकम्, महालयापरपक्षश्राद्धं,
अन्यान्यपि मासविशेषाख्या विहितानि श्रवणाकर्मदीपावल्यादीनि च मलमासे न
कुर्यात् । उपाकर्मादिकानि दीपावल्याद्यन्तानि मासविशेषप्रयुक्तानि कर्माणि
तूत्तरे मास्यवश्यं कुर्यात् । तत्र ज्योति पाराशरः–

³"अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च ।
विदंव्रतवृषोत्सर्गं चूडाकरणमेखलाः ।।
माङ्गल्यमभिषेकं च मलमासे विवर्जयेत्" । इति महाभारतात् ।
"अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवो ।
मलमासेऽयमावृत्तो⁴ तीर्थयात्रां विवर्जयेत्" ।। इति गार्ग्यवचनात् ।
वसिष्ठस्तु–"वापीकूपतडागादि प्रतिष्ठां यज्ञकर्म च ।
न कुर्यान्मलमासे तु महादानव्रतानि च ।। इति स्मृतिसंग्रहे ।
"आरम्भदर्शपूर्णेष्ट्योरग्निहोत्रस्य चादिमम् ।
प्रतिष्ठापंचकूर्माद्या मलमासे विवर्जयेत्" ।। इति शातातपः ।
"अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
व्रतारम्भापवर्गं च न कुर्यान्मौञ्जिबन्धनम् ।।

---

१. व्यत्रोक्तेः यतूत्तरे देव कार्याणि पितृकार्यणि चोभयोरिति गौतमवचनमिति पाठ ख पाठे अधिकः ।

२. मलमासे वर्ज्या इति ख पाठे नास्ति ।

३. वेदव्रत इति 'ख' पाठः ।

४. नावृत्त इति 'ख' पाठः ।

ज्योतिःशास्त्रे–

"न यात्रां न विवाहं च न च वास्तुनिवेशनम् ।
न प्रतिष्ठां देवतानां प्रासादग्रामभूरुहाम् ॥
न हिरण्यं न वासांसि कारयेदिति निश्चयः ।

काठकगृह्यपरिशिष्टे–

"सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे ।
पुष्टीष्ट्याग्रयणाधानं चातुर्मास्यादिकान्यपि ॥
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ।
स्पष्टं मासविशेषाख्या विहितं वर्जयेन्मले" ॥

अत्र मलमासे पूर्ववाक्ये यदाग्रयणविधानं तत् दुर्भिक्षेण श्यामाकं व्यतिरिक्तवान्या सम्भवे जीवनार्थं ज्योतिःपराशरः–

"उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ पराःकार्या वर्जयित्वा तु पैतृकम्" ॥ इति

पैतृकं प्रथमाब्दिकादिप्रसवाहोत्सवो जन्मदिनोत्सवो वर्द्धमानसंज्ञको जातेष्टिश्च । अतएव गार्ग्यः–

"नाम कर्म च जातेष्टिः यथाकालं समाचरेत् ।
अतिपाते तु कुर्वंति प्रशस्ते मासि पुण्यभः" ॥ इति

नामकर्मपदं निःक्रमाद्युपलक्षकम् । नागरखण्डे–

"नभो वाऽथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः" ॥ इति

"आषाढीमवधिं कृत्वा सप्तमं पञ्चमोऽष्टमकौ ।
आषाढ्या पञ्चमे पक्षे" इति वचनात्कालादर्शः–

"अनित्यमनिमित्तं च दानं च महदादिकम् ।
अग्न्याधानाच्च पूर्वं तीर्थयात्रामरेक्षणम् ॥

अन्नप्राशनमारम्भो गृहाणां च प्रवेशनम् ।
स्नानं विवाहो नामानि व्रतं देवमरोत्सवः ॥

प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत् ।
उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ॥
अवरोहश्च हैमन्तः सर्पाणांबलिरष्टका ।

ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् ॥
पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम्" । इति

इदं च वर्ज्यावर्ज्यादिक्षयमासेऽपि ज्ञयम् । तथा च काठकगृह्ये—

"रविसङ्क्रमहीने यो वर्ज्यावर्ज्यविधिः स्मृतः ।
स एव तु द्विसङ्क्रान्ते मलमासेऽप्युदीरितः" ॥ इति

तत्र विशेषः, अत्र काम्यव्रतादिकर्मणां प्रथमारम्भमेव न कुर्याद्द्वितीयाद्यारम्भसमाप्तौ च कुर्यादेव अन्यथा पौषमार्गशीर्षयोः क्षयमासान्तःपाते पूर्वपूर्ववर्षसम्बन्धिनि पौषे इत्यर्थः ।

पौषे प्रारब्धस्य माघस्नानव्रतस्य पुनरनारम्भः प्रसज्येत । तथा कार्तिकस्य क्षयमासान्तःपाते चातुर्मास्यव्रतानामसमाप्तिः प्रसज्येत । प्रारब्धकर्मणश्चासमाप्तौ पुनरनारम्भे च स वर्षे वर्षेऽहं माघस्नानं करिष्ये इत्यादि सङ्कल्पविरोधः कल्पविरोधः । आरम्भान्नियमे दोषश्चासमाप्तौ स्यादिति कात्यायनवचनविरोधश्च मासद्वयसंबन्धीनि क्षयाहादिश्राद्धान्यपि क्षयमास एव कर्त्तव्यानि । तदाह सत्यव्रतः—

"एक एव यदा मासः सङ्क्रान्तिद्वयसंयुतः ।
मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते ॥" इति ।

एवं मासद्वयसम्बन्धोन्यावश्यकान्यन्यान्यपि कर्माणि तत्रैवानुष्ठेयान्यनन्यगतिकत्वात् । "मासद्वयोदितं कर्म तत्र कुर्याद्धि निर्णयः । 'एकस्मिन् मासि मासौ द्वौ यदि स्यातान्तयोर्द्वयोः । तावेव पक्षौ ता एव तिथयस्त्रिंशदेव हि ॥" इति स्मृत्यन्तरवचनाच्च क्षयमासस्य मासद्वयात्मकत्वे न क्षयमासे यावती या तिथिस्तस्याः पूर्वार्द्धे मृतस्य जातस्य च क्रमेण वर्षान्तरे क्षयाहश्राद्धं वर्द्धापनोत्सव च क्षयमासान्तर्गतपूर्वमाससञ्ज्ञके मासे कुर्यात् । तिथ्युत्तरार्द्धे मृतस्य जातस्य च क्रमेण क्षयाहश्राद्धवर्द्धापनोत्सवौ क्षयमासान्तर्गतोत्तरमाससंज्ञके मासे कुर्यात् । तदुक्तम् -

"तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयेऽर्द्ध तदुत्तरः ।
मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ ॥" इति ।

इदं क्षयमासतिथिपूर्वोत्तरार्द्धयोः क्रमेण पूर्वोत्तरमाससम्बन्धित्वस्य व्यवस्थापकं वचन न क्षयमासकर्त्तव्यमासद्वयसम्बन्धिश्राद्धव्रतादिविषयं अपराह्णमध्याह्नादिकालविधायकानेकवचनबाधप्रसङ्गात् । तस्मात्कार्त्तिकमार्गशीर्षयोः क्षयमासान्तःपाते कार्त्तिकसम्बन्धीनि मार्गशीर्षसम्बन्धीनि च यानि श्राद्धव्रतादीनि यस्मिन पक्षे यस्यान्तिथौ यस्मिन्नपराह्णादिकाले विहितानि तानि क्षयमासे तत्रतत्रैव कर्त्तव्यानि । एवं क्षयमासान्तरेऽपि द्रष्टव्यम् । ततश्च कार्त्तिकशुक्लप्रति-

पत्प्रयुक्तं पितृक्षयाहैकोद्दिष्टं मार्गशीर्षशुक्लप्रतिपत् प्रयुक्तं मातृक्षयाहैकोद्दिष्टं च क्षयमासशुक्लप्रतिपदि मध्याह्न एव कर्त्तव्यम् । एवमन्यान्यपीति दिक् ।

मलमासे यानि वर्ज्यानि तानि सर्वाण्यपि शुक्राद्यस्तादावपि वर्ज्यानि । तथा च वृहस्पतिः—

"बाले वा यदि वा वृद्धे शुक्रे चास्तंगते गुरौ ।
मलमास इवैतानि वर्जयेद्दैवदर्शनम् ॥"

इति । अस्तादिलक्षणं ब्रह्मसिद्धान्ते—

"रविणाऽऽसत्तिरन्येषां ग्रहाणामस्तउच्यते । ततोऽर्वाग्वार्धकं प्रोक्तमूर्ध्वं-बाल्यं प्रकीर्तितम्" वार्धक्यबाल्ययोर्मानमपि तत्रैव । "पक्षं प्राग्दिशिवृद्धत्वं पश्चात्पञ्चदिनं कवेः । शैशवं प्राक्तु पंचाहं पश्चाद्दशदिनं स्मृतम् ॥ शैशवं वार्धकं पक्षं प्राक्पश्चाच्च बृहस्पतेरिति । कविः शुक्रः । संहिताप्रदीपे स्यात्सप्तरात्रं गुरुशुक्रयोश्च बालत्वमहादशकं च वार्ध्यम ।

"वृद्धौ सिते ज्योवशुभौ शिशुत्वे शस्तौ यतस्तावुपचीयमानौ ।"

वृत्तशते । "बालः शुक्रोदिवसदशकं पंचकं चैव बृद्धः, पश्चादह्नत्रितय-मुदितः पक्षमैन्द्र्या क्रमेण । जोवो बृद्धः शिशुरपि तथा पक्षमन्यैः शिशू तौ, बृद्धौ प्राक्तौ दिवसदशकं चापरैः सप्तरात्रम् ॥" पश्चिमत उदये दशदिनानि बालः, अस्ते पंचदिनानि वृद्धः, पूर्वतो दिनत्रयं बालम, पक्षं च बृद्ध इत्यर्थः ।

जीवो गुरुः अन्यत्र त्वन्यथोक्तम्—

"प्राक्पश्चादुदितः शुक्रः पंच सप्त दिनं शिशुः ।
विपरीतं तु बृद्धत्वं तद्वदेव गुरोरपि ॥" इति । रत्नमालायामपि—

"प्रागुद्यतः शिशुरहस्त्रितयं सितः स्यात्पश्चाद्दशाहमथ पंचदिनानिबृद्धः ।
प्राच्यां तु पक्षममरेन्द्रगुरोस्तुपक्षं प्रागप्यवागपि वदन्ति वसिष्ठमुख्याः ॥"

अत्र विशेषः—"पक्षं वृद्धो महास्ते तु बालश्चात्र दशाहिकः ।
पादास्ते तु दशाहानि वृद्धो बालो दिनत्रयम् ॥

महास्तपादास्तलक्षणन्तु—"द्वात्रिंशद्दिवसाश्चास्ते जीवस्य भार्गवस्य च ।
द्वासप्ततिर्महत्यस्ते पादास्ते द्वादशक्रमात् ॥"

एवं वक्रातीचारसिंहराशिगतोगुरुरस्तंगत इव शुभकर्मसु वर्ज्यः । तदुक्तं लल्लेन—

"नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालबृद्धास्तगे वा,
संन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधोऽपि दीक्षा ।

मौञ्जीबन्धोऽथचूडापरिणयनविधिर्वासुदेवप्रतिष्ठा,
वर्ज्या सद्भिः प्रयत्नात्त्रिदशप । तिगुरौ सिंहराशिस्थिते च ।।" इति

नीचस्थो मकरस्थः विशेषमाह माण्डव्यः श्रुतिवेधजातकान्नप्राशनचूड़ादिकं सर्वम् । रविभवनस्थे जीवे कार्यं वर्ज्यो विवाहस्त्विति तथा—

"रविक्षेत्रं गते जीवे जीवक्षेत्रं गते रवौ ।
वर्जयेत्सर्वकर्माणि व्रतस्वस्त्ययनानि च ।।"

तथा—"गुर्वादित्ये गुरौ सिंहे शुक्रे चास्तमुपागते ।
त्यज्येद्यानं महादानं व्रतं देवविलोकनम् ।।"

लल्ल—"गुरुक्षेत्रगतो भानुर्भानुक्षेत्रगतो गुरुः ।
गुर्वादित्यः स विज्ञेयः सर्वकर्मसु गर्हितः ।।"

शौनक—"एकराशिगतौ सूर्यजीवौस्यातां यदा पुनः ।
व्रतबंधविवाहादिशुभं कर्माखिलं त्यजेत् ।।"

सिंहस्थे गुरौ विशेषमाह शातातपः —"माघ्यां यदि मघा नास्ति सिंहेगुरुरकारणमिति" । लल्लोऽत्र पुनर्विशेषमाह—

"उपप्लवे शीतलभानुभान्वोरर्धोदये वा कपिचाख्यषष्ठ्याम् ।
सुरासुरे ज्यास्तमये च तीर्थे, यात्राविधिः संक्रमणेऽपि शस्तः ।।"

गुरुशुक्रास्तमयादिनिषिद्धकाले ग्रहणादौ न दोष इति लल्लोदाहृतवचनार्थः।

"अतिचारगतो जीवस्तद्राशिं नैति चेत्पुनः ।
लुप्तः संवत्सरो ज्ञेयः सर्व[1]कर्मबहिष्कृतः ।।"

अस्यापवादः—"वृषे मेषे झषे कुम्भे यद्यतीचारगो गुरुः ।
न तत्र काललोपः स्यादित्याह गालवो मुनिः ।।" इति

काललोपः संवत्सराख्यकालस्य न लोपः, लुप्तसंवत्सरो नास्तीत्यर्थः ।
वक्रातीचारयोर्दिनसंख्यामाह राजमार्त्तण्डः—

"वक्रातिचारगे जीवे वर्जयेत्तदनन्तरम् ।
व्रतोद्वाहादिचूडायामष्टाविंशति वासरान्" ।। इति

---

[1] धर्म इति 'ख' पाठः

गयाविषये वायुपुराणे विशेष उक्तः–

“गयायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः।
अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः॥

न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ”। तथा
“गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये।
सुरासुरगुरूणां च मौढ्यदोषो न विद्यते”॥

ग्रहणद्वये तन्निमित्तककुरुक्षेत्रयात्रादानादावित्यर्थः। [1]यत्प्रयुक्तं मातृक्षयाहैकोद्दिष्टं च क्षयमासशुक्लप्रतिपदि मध्याह्न एव कर्त्तव्यम्। एवमन्यान्यपि इति दिक्।

इति पौण्डरीकयाजि-विश्वेश्वरविरचिते प्रतापार्के मलमासवर्ज्यावर्ज्यनिर्णयः।

⁂

---

१. यत् प्रयुक्तं इत्यारभ्य–एवमन्यान्यमीतिदिक् पर्यन्तः पाठः ‘ख’ पाठे नास्ति।

अथ पक्षः

तत्र 'पक्ष' शब्दः पक्षपरिग्रह इत्यस्माद्धातोर्निष्पन्नो देवकार्यार्थं पितृकार्यार्थं वा पक्ष्यते परिगृह्यते यः कालविशेषस्तं वदति । अथवा चन्द्रस्य पंचदशानां कलानामापूरणं क्षयो वा परिगृह्यते यत्र स पक्षः । स द्विविधः शुक्लः कृष्णश्च । चन्द्रकलावृद्ध्युपलक्षितः शुक्लः, चन्द्रकलाक्षयोपलक्षितः कृष्णः । एतौ शुक्लकृष्णपक्षौ पूर्वापरपक्षावित्यप्युच्येते ।

"पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ" इत्यमरसिंहेनाभिधानात्-शुक्लपक्षश्चापूर्यमाणपक्ष इत्यप्युच्यते । अनयोश्च विनियोगो ज्योतिःशास्त्रादौ दर्शितः– "उभौ नियुक्तौ खलु शुक्लकृष्णौ, शुभाशुभे कर्मणि तौ प्रशस्तौ" इत्यादिभिः । इति पक्षनिर्णयः ।

अथ दिवसनिर्णयः । स चतुर्विधः–चान्द्रसौरसावननाक्षत्रभेदात् । एतेषां स्वरूपभुक्तं विष्णुधर्मोत्तरे–

"तिथिनैकेन दिवसश्चान्द्रे माने प्रकीर्तिता ।
अहोरात्रेण चैकेन सावनो दिवसः स्मृतः" ।।
"आदित्यभागभोगेन सौरो दिवस उच्यते ।
चन्द्रनक्षत्रभोगेन भाक्षत्रो दिवसः स्मृतः ।। इति

तिथिभागयोर्लक्षणं तत्रैव दर्शितम्–

"त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते ।
आदित्याद्विप्रकृष्टस्तु भागद्वादशकं यदा ।।
चन्द्रमाः स्यात्तदारामतिथिरित्यभिधीयते" । इति दिवसः ।

इति प्रतापार्के संवत्सरादिनिर्णयः समाप्तः ।

अथः सामान्यतः सर्वतिथिनिर्णयः

तत्र तिथि शब्दस्तनोतेर्धातोर्निष्पन्नः । तनोति विस्तारयति वर्द्धमानां क्षीयमाणां चन्द्रकलामेकां यः कालविशेषः सा तिथिः । यद्वा यथोक्तकलया तन्यत इति तिथिः । तदुक्तं सिद्धान्तशिरोमणौ–

"तन्यन्ते कलया यस्मात्तस्मात्तास्तिथयः स्मृताः" इति सा च तिथिर्द्वेधा-सम्पूर्णा खण्डा च । तत्र सम्पूर्णा स्कन्दपुराणे दर्शिता । प्रतिपत्प्रभृतयः सर्वाः उदयादोदयाद्रवेः सम्पूर्णा इति विख्याता इति । नारदीये तु–

"आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः । सम्पूर्णा इति विख्याता" इत्युक्तम् । सूर्योदयास्तमयव्यापित्वेनापि तिथेः सम्पूर्णत्वमहर्मात्रसाध्यकर्मानु भवति । तदुक्त –

"अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते" ।। इति

अतएव च तिथ्यन्तरवेधोऽप्युदयास्तमयान्तराल एव प्रायो व्यवह्रियते, न तूदयात्पूर्वमस्तमयोत्तरं वा ।

'असम्पूर्णा दिनद्वयसम्बन्धिनी खण्डा, तत्र सम्पूर्णा या अनिर्णेयत्वात खण्डा निर्णीयते । तस्यां दिनद्वयसम्बन्धिन्यां सत्यां व्रतादौ पूर्वापरा वा ग्राह्ये-त्यादि सन्देहे निर्णयः क्रियते । तत्रादौ तस्याः सामान्यतो वेधमाह पैठीनसिः– पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तरां त्रिभिर्मुहूर्तैर्विध्यन्ति, सामान्योऽयं विधिः स्मृत इति उदयानन्तरे स्थिता त्रिमुहूर्त्ता पूर्वतिथिरुत्तरतिथिर्विध्यति । अस्तमाया प्राक् स्थिता त्रिमुहूर्त्तोत्तरतिथिः पूर्वतिथिर्विध्यतीति सामान्यतो वेध इत्यर्थः । हेमाद्रिमदनरत्नादौ तु द्विमुहूर्तोऽप्युक्तः ।[1]

"उदिते दैवतं भानौ [2]पैत्र्यं वास्तमिते रवौ ।
द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः" ।। इति

विष्णुधर्मोक्तेः । अयं त्वनुकल्पः, 'द्विमुहूर्त्ताऽपि कर्त्तव्या या तिथिर्वृद्धि-गामिनी' इति दक्षेणापि शब्दोक्तेः । अय वेधः प्रातरेव, सायं तु त्रि[3]मुहूर्त्तवेध एव । सायं तूत्तरयातदून्यूनया तु न विध्यत इति माधवोक्तेः ।

निषिद्धपूर्वतिथिवेधस्तूपवासविषये स्वल्पोऽपि त्याज्यः, घटिकामात्रवेधोऽपि दूषयत्युत्तरां तिथिमिति स्मृत्यन्तरात् यदा तूत्तरदिने उपवासतिथिः स्वल्पापि न लभ्यते तदा निषिद्धं पूर्वतिथिविद्धाप्युपोष्या । तथा च ऋष्यशृङ्गः अविद्धानि निषिद्धैश्चेन्न लभ्यते[4]तानि तु–

---

१. अहः सम्बन्धिद्विमुहूर्तं त्रिमुहूर्तं चेत्यन्वयः, दैवतं दैवकर्म योग्यं पित्र्यं पित्र्यकर्म योग्यं, अतः सा तिथिः क्रमेण हव्यकव्ययोः ग्राह्य इत्यर्थः इति 'ख' पाठोऽधिकः ।

२. पित्र्यमिति 'ख' पाठः ।

३. त्रिमुहूर्त इति 'ख' पाठः ।

४. लभ्यन्ते दिनानि तु इति 'ख' पाठः ।

"मुहूर्त्तैः पञ्चभिर्विद्धा ग्राह्येवैकादशी" तिथिः । तदर्द्धविद्धान्यन्यानि दिनान्युपवसेन्नर इति । तेन दिनमध्य एव पूर्वोत्तरतिथ्योः प्रवेशे वेधः । यस्तु जन्माष्टम्यादौ रात्रियोगमात्रे वेधव्यवहारः स गौणः । तेनाहोरात्रमध्येऽन्यनिथिप्रवेशे न वेधवदभ्रान्त इत्युपेक्ष्यः । यानि तु व्रतोपवासस्नानादौ घटिकैकाऽपि या भवेदित्यादीनि वचनानि तानि त्रिमुहूर्त्तादि प्रशंसापराणीति न्यायविदः । कासुचित्तिथिषु वेध विशेषः स्कान्दे "नागो द्वादशनाडीभिर्दिक्यं च दशभिस्तथा । भूतोऽष्टादशं नाडीभिर्दूषयत्युत्तारां तिथिमिति । अयं चोपवासातिरिक्तविषयः इति वेधः । [2]तत्र सर्वा तिथिः कर्मकालव्यापिनी ग्राह्या । कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः । तया कर्माणि कु[3]र्वंति ह्रासवृद्धी न कारणमिति विष्णुधर्मोक्तेस्तत्र परेद्युरेव कर्मकालव्याप्तिः पूर्वद्युरेवोभयेद्युरनुभयेद्युरुभयत्र साम्येन वैषम्येणेति षट्पक्षाः । तत्रान्य अन्यतरान्यतमाशब्दावव्युत्पन्नौ स्वभावाद्द्विबहुविषये निर्धारणे वर्तेते । [4]इतरदिने कर्मकालव्याप्ता चेत्सैवग्राह्या । कर्मणो यस्य यः काल इति पूर्वोक्तवचनात् वैषम्येण कर्मकालव्याप्तौ त्वाधिक्येन निर्णयः । उभयत्र सम्पूर्णव्याप्तावव्याप्तौ तथोभयत्र साम्येन व्याप्तौ युग्मवाक्यान्निर्णयः ।

युग्मवाक्यन्तु निगमसंज्ञके परिशिष्टे "युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः । रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा ॥ प्रतिपदप्यमावस्या तिथ्योर्युग्मं महाफलम् । एतद्व्यस्तं महादोषं हन्ति पुण्यं पुराकृतम् ॥" इति ।

अत्र रन्ध्रान्ताः शब्दा द्वितीयादि–नवम्यन्ततिथिवाचकाः रुद्रैकादशी द्वितीयातृतीयायुता सा च द्वितीयायुतेति सप्तयुग्मानीत्यर्थः। एवं यदा अयुग्मदिने[5] पंचम्यां कर्मकालव्याप्त्यभावः दिने च तदभावस्तदा अयुग्मदिनमेव ग्राह्यमित्यादिहेमाद्रौ स्पष्टम् । अयं च युग्मवाक्यान्निर्णयो व्रतोपवासदानादिदैवकर्मण्येव, पित्र्ये तु पूर्वोक्तपक्षेषु खर्वादिना निर्णयः ।

द्वितीयादिषु युग्मानां पूज्यतानियमादिषु । एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिचोदनेति व्यासोक्तेः । अत्राद्यमादिपदं तिथ्यन्तराणामुपादानार्थं, द्वितीयं सकलदेवकर्मणां, तृतीयं पार्वणस्य, चतुर्थं वृद्धिरादौ येषामित्यत[1]द्गुण-

---

१. वेधंवदभ्रान्त इति 'ख' पाठः ।
२. दिनद्वयसम्बन्धिन्या तिथौ इति ख पाठेऽधिकः ।
३. कुर्वीत इति 'ख' पाठः ।
४. तत्रान्यतरदिने इति 'ख' पाठः ।
५. यथा चतुर्थ्यां विनायकव्रते गणितयुग्मभिन्नत्वादयुग्मदिने तृतीयायां कर्मकालव्याप्तियुग्मदिने इति 'ख' पाठेऽधिकः ।

संविज्ञानबहुव्रीहिणा सर्वदैवश्राद्धानां, मुख्यवृद्धिश्राद्धस्या[1]तिथ्यप्रयुक्तत्वेन तन्निर्णयानुपयोगः । वृद्धिपदं स्वनिमित्तकश्राद्धलक्षकम् । पञ्चमं साम्यस्य । ह्रासवृद्ध्यादिचोदनाखर्वदर्यादिवाक्यमित्यर्थः । ह्रासादिकन्त्वाह व्याघ्रः—

"खर्वोदर्यस्तया हिंसा त्रिविधं तिथिलक्षणम् ।
खर्वदर्यौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी ॥"

इति खर्वः साम्यं दर्यो वृद्धिः । हिंसा क्षयः । एते च वृद्धिसाम्यक्षयाः, पूर्वतिथ्यपेक्षया । यथा—एका पूर्वेऽह्निमध्याह्नादधिका वर्धतेऽन्याऽप्यन्यस्मिंस्तथैवपूर्वतिथेरधिका । खर्वः समतिथिः । पूर्वदिने मध्याह्नव्यापिन्यन्याऽप्यन्यस्मिन्दिने तावत्येवेति । हिंसातिथेर्ह्रासः । तद्योगात्तिथिरपि हिंसेत्युच्यते । यथैका पूर्वदिने मध्याह्नान्न्यूनाऽन्याऽप्यन्यस्मिंस्तथैव पूर्वतिथेर्न्यूनेति ।

ततश्च वृद्धिसाम्ययोरुत्तराक्षये तु पूर्वेत्यर्थः । कर्मकालव्याप्त्यलाभे तु कर्मोपक्रमकालगा तिथिर्ग्राह्या । कर्मोपक्रमकालगा तु कृतिभिर्ग्राह्या, न युग्मादर इति दीपिकोक्तेः ।

"यां तिथिं समनुप्राप्य उदयं यातिभास्करः ।[2]
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥"

इति च देवलवचनाभ्यां यदुक्तमुदयास्तमय गततिथेः साकल्यप्रतिपादनं तत्प्रमाणान्तरेण पूर्वस्या उत्तरस्या चातिथेर्ग्राह्यत्वे सिद्धे तदहर्भागे तिथेरभावेऽपि तत्रैव तत्कर्मानुष्ठानार्थमुपोद्बलकं च यथेदं सूर्योदयादूर्ध्वमस्तमयात्पूर्वं वा वर्तमानायास्तिथेर्वक्ष्यमाणशुक्लकृष्णवाक्यम् । युग्मवाक्यात्खर्वादिवचनाद्वा ग्राह्यत्वं साकल्यप्रतिपादनं च तत्तत्र त्रिमुहूर्त्तावरसत्वेन तु ततो न्यूनसत्त्वे उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ । द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति विष्णुधर्मोत्तरवचनात् ।

उदिते भानौ द्विमुहूर्तं दैवतं अस्तमिते अस्तङ्गन्तुमारब्धेऽह्नस्त्रिमुहूर्त्तं पित्र्यमित्यर्थः । अत्र यद्यप्युदये द्विमुहूर्त्तसत्ताप्युक्ता । तथापि सानुकल्पः त्रिमुहूर्त्तो[3]मायातिथिः क्षयगामिनी । द्विमुहूर्ताऽपि कर्त्तव्या या तिथेर्वृद्धिगामिनीति दक्षवचने अपि शब्देन न द्योतनात् । पूर्वार्द्धेऽप्यपि शब्दान्वयात्तस्य प्रतिषधेन तात्पर्यं, किन्तूत्तरार्द्धगतानुकल्पविधावेवापौर्वाह्निकास्तु तिथयो दैवे कार्याः प्रयत्नत इति याज्ञवल्क्यवचनाच्च ।

---

[1] श्राद्धस्यतिथ्य प्रयुक्तेन इति "ख" पाठः ।

[2] यां तिथिं इत्यारभ्य दानाध्ययनकर्मसु इति यावत् पाठः 'ख' पुस्तके नास्ति ।

[3] त्रिमुहूर्ता न कर्त्तव्या इति "ख" पाठः ।

त्रिमुहूर्त्तसत्त्वमावश्यकं पूर्वाह्न्शब्दो ह्ययमह्नः पूर्वोभाग इति योगेन पंचधा विभक्तदिनाद्यभागवचनः प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकमिति च त्रिमुहूर्त्तात्मकस्य प्रातःकालस्य कर्मोपक्रमरूपसंकल्पकालत्वाद्यो यस्य विहितः कालः कर्मणस्तदुपक्रमे । विद्यमानो भवेदङ्गं नोज्झितोपक्रमेण तु ॥"

इति च उपक्रमकालीनतिथेर्ग्राह्यत्वाभिधानादप्युदये त्रिमुहूर्त्तसत्त्वमावश्यकं द्विमुहूर्त्तसत्वं त्वनुकल्पोदानस्नानादिविषयः । अस्तमयात्पूर्वं तु त्रिमुहूर्त्तसत्वमेवापेक्षितम । यां प्राप्यस्तमुपेत्यर्कः, सा चेत्स्यात्त्रिमुहूर्त्तम् ।[1] 'धर्मकृत्येषु सर्वेषु संपूर्णान्तां विदुर्बुधा' इति शिवरहस्यादिवचनात् । व्रतोपवासस्नानादौ घटिकैकाऽपि या भवेत् । उदये सा तिथिर्ग्राह्या विपरीता तु पैतृक इत्यादीनि स्कान्दादिवचनानि तु कैमुतिकन्यायेन त्रिमुहूर्त्तसत्त्वप्रशंसापराणीते बहवः गौरीव्रतैकादशीव्रतपर्वस्नानादिपराणीति तु युक्तं[2] नक्षत्रवारादिभिः प्राशस्त्योक्तौ तु—'त्रिमुहूर्त्तगाऽप्युपवासादौ ग्राह्या, या तिथिर्ऋक्षसंयुक्ता या च योगेन नारद । मुहूर्त्तत्रयमात्राऽपि सापि सर्वा प्रशस्यत इति गोभिलोक्तेः । क्वचित्तु तत्कालव्यापिनी तिथिर्ग्राह्या, स्कान्दे—"अभ्यंगे चोदधिस्नाने दन्तधावनमैथुने । जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥"

तथा "मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः । व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया" इति मन्वादिषु स्नानदानश्राद्धादिक्रियामन्वाद्यादि काल एव । कर्त्तव्या न कालान्तर इति मन्वादावित्यर्थः । यदा त्वेकैव तिथिः पूर्वा ग्राह्येत्येकेन वचनेनोच्यते, उत्तराग्राह्येत्यन्येन तदा 'शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः । कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रवि' रिति वचनं व्यवस्थापकमिति दिक् इति सामान्यतः सर्वतिथिनिर्णयः ।

अथैकभक्तकालनिर्णयः

एकभक्तं च त्रिविधं, स्वतन्त्रमन्यव्रताङ्गमुपवासप्रतिनिधरूपं चेति । तत्र स्वतन्त्रैकभक्तस्वरूपं तन्निर्णयश्च स्कान्दे–"दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हि ॥" इति । तस्य च मध्याह्नो मुख्यकालः, "मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथि" रिति पाद्मोक्तेः । सोऽपि न सम्पूर्णः किन्तु दिनार्धसमयेऽतीत इति वचनादुत्तरभागः मध्याह्नश्चात्र त्रेधाविभक्तदिनस्य पंचमुहूर्त्तात्मको द्वितीयो भागो ग्राह्य इति हेमाद्रिः । पञ्चधाविभक्तदिनतृतीयभाग इति माधवः ।

वस्तुतस्तु विभागान्तरेऽपि मध्याह्नसंज्ञाकरणस्य कार्यं व्रतादौ नियोग उपयोगस्तदर्थत्वादित्यर्थः । कार्यनियोगार्थत्वाद्यनेकेनापि विभागे न मध्याह्नो

---

[1] त्रिमुहूर्त्तगा धर्मं इति ख पाठ

[2] दर इति दी

ग्राह्य इति वक्तुं युक्तम् । तेन पंचधा विभागे सार्द्धमुहूर्त्तात्मकश्चतुर्धा विभागे किञ्चिन्न्यूनमुहूर्त्तद्वयात्मकस्त्रेधा विभागे सार्द्धमुहूर्त्तद्वयात्मकः सर्वथा वर्तनोपरितनो मध्याह्नोत्तरभागस्तस्य मुख्यः कालः । तदुत्तरोऽस्तमयावधिर्गौणकालः । अत्राहोरात्रयोस्त्रिंशन्मुहूर्त्ताः अह्नि पंचदशरात्रौ पंचदश, एतेषां मुहुर्त्तानां नामानि ज्योतिःशास्त्रे कश्यपेनोक्तानि-“गौरीवल्लभसर्पमित्रपितरो वस्वम्बुधिश्वाह्वया,[1] ब्रह्माम्भोरुहसम्भवेन्द्रऋत[2]भुग्देवेशनक्तञ्चराः । तोयेशार्यमयोनयो दश तथा पंचक्षणा वासरे.” इति । रात्रौ तु--“रुद्रात्रौ[3] अजः अजपात् जाहिर्बुध्न्यपूषाश्विनाः स्युः कीनाशोऽग्निर्धातृचन्द्रादितीज्याः । विष्णुर्भानुस्त्वाष्ट्रवातामुहूर्त्ता, रात्रौ, क्रूरास्त्वन्तकालाग्निरुद्धा । इति ।

रात्रौ रात्रिमुहूर्त्तेषु अन्तकालाग्निरुद्धसंज्ञका मुहूर्त्ताः क्रूराः निषिद्धाः ।

स्मार्त्तनामानि तु पुराणे—“रौद्रः श्वेतश्च मैत्रश्च तथा सारभटः स्मृतः । सावित्रो वैश्वदेवश्च गान्धर्वः कुतपस्तथा ।। रोहिणस्तिलकश्चैव[4] विभवा निर्ऋतिस्तपाः । शांबरो विजयश्चैव भेदाः पंचदश स्मृताः । इति । एते पंचदश सूर्योदयादारभ्य क्रमाद्दिवा मुहूर्त्ताः । तथा रात्रिमुहूर्त्ताः—“शंकरश्चाजपाच्चैव तथाहिर्बुध्न्यपूषकौ । आश्विनौ याम्यवाह्नेयो वैधात्रश्चान्द्र एव च ।। आदितेयोऽथ जैवश्च वैष्णवः सौर एव च । ब्राह्मो नाभस्वतश्चैव मुहूर्त्ताः क्रमशो निशि ।। इति । अत्र दिन रात्रिमानस्य पचदशो भागो मुहूर्त्तो ज्ञेयः ।

तदुक्तं रत्नमालायाम्—“दिनस्य यः पंचदशो विभागो, रात्रेस्तथा तद्धि मुहूर्त्तमानम् । इति । तत्र पंचदशमुहूर्त्तात्मकस्य सकलस्याह्न आवर्तनात्तु पूर्वाह्नो ह्यपराह्नस्ततः पर इति स्कान्दे पर्वनिर्णयादावुपयुक्तो द्वेधा विभाग उक्तः । श्रुतौ पूर्वाह्णो वै देवानां अपराह्णः[5] पितृणां इति मुहूर्तपंचकैः श्राद्धाद्युपयुक्तस्त्रेधा विभाग उक्तः । चतुर्धा विभागमाह गोभिलः—“पूर्वाह्णः प्रथमं सार्धं मध्याह्नः प्रहरन्तथा । आतृतीयादपराह्णः सायाह्नश्च ततः परः ।। इति ।

एतस्य च यत्र कर्मविशेषे गमकसद्भावस्तत्रोपयोगः । पञ्चधा विभागस्तु [6]यास्केनोक्तः—यथा, “मुहूर्त्तत्रितयं प्रातः तस्वानेवतु संगवः । मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्नश्च तादृशः । सायाह्नस्त्रिमुहूर्त्तश्च सर्वकर्मसु गर्हितः।” इति । अत्र बहुसम्मतत्वाद्बहुव्यवहारानुगणत्वाच्च पंचधा विभाग एव त्रित्रिमुहूर्त्तात्मक उत्सर्गतो

---

१. “वस्वम्बुविश्वाह्वया” इति ‘ख’ पाठः

२. हुतभुक् इति ‘ख’ पाठः

३. “रुद्राजः अणपात् जाहिर्बुध्न्यपूषाश्विना स्युः” इति ‘ख’ पाठः

४. रोहिणास्तिलकश्च रोहिणश्चविरञ्चिश्चेति माधवीये पाठः इति ‘ख’ पाठः

५. मध्याह्नो इति ‘ख’ पाठः

६. व्यासेन उक्तः इति ‘ख’ पाठः ।

ग्राह्यः । द्वेधा विभागादयस्तु यत्र किञ्चिद् द्योतकं, तत्रैव गृहीतव्याः । अत्रापि त्रिमुहूर्त्तमित्यह्नः पंचमभागोपलक्षणम् । अतश्चाह्नां ह्रासवृद्धौ न दोषः । एवं सति यदान्यतरैव मध्याह्नोत्तरदलव्यापिनी तदेकदेशस्पर्शिनी वा तदा तस्यामेव कर्मकालव्याप्तेर्लाभात्सैव ग्राह्या । दिनद्वये तद्व्याप्तौ युग्मवाक्यान्निर्णय इति हेमाद्रिः । माधवस्तु पूर्वेऽह्नि गौणमुख्यकालव्याप्तेः सत्वात्पूर्वैवेत्याह इदमेव युक्तम् दिनद्वयेऽपि मध्याह्नोत्तरदलव्याप्त्यभावे पूर्वैव गौणकालव्याप्तेः सत्त्वात् मुख्यकाले तिथ्यभावेऽपि चेकभक्तानुष्ठानं तु मुख्यकाल एव कर्त्तव्यम् ।

"तिथ्यादिषु भवेद्यावान् ह्रासो वृद्धिः परेऽहनि ।
तावान्ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ।" इति

[1]वचनेन पूर्वतिथेः हेमाद्र्युदाहृतोऽपि तावतो ह्रासस्य कल्पनेन मुख्यकालेऽप्येकभक्तादितिथिसम्भवात् एतदर्थमेव हीदं वचनमुदयास्तमात्रसत्त्वेन शाकल्यवचनं च पूर्वेद्युः पूर्वतिथ्यादिषु स्वकर्मणि उत्तरतिथिप्रयुक्तकर्मानुष्ठाननिमित्तमित्यर्थः ।

ह्रासवृद्धिसाम्यानि च षष्ठिघटिकापेक्षया, न तु पूर्वतिथ्यपेक्षया । त्रिंशच्चतुर्विंशत्यष्टादशद्वादशघटिकादिक्रमेण सूर्योदयोत्तरं तिथीनां सत्त्वे चतुःपंचाशद्घटिकाव्यापित्वेन तिथीनां परस्परं साम्येऽप्युत्तरोत्तरह्रासव्यवहारात् तिथेः परस्या घटिकाश्च याः स्युर्न्यूनास्तथैवात्र्याभ्यधिकाश्च तासां अर्द्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने स्यादिति लौगाक्ष्युक्तोऽर्द्धह्रासवृद्धिप्रक्षेपस्तूपसंहारादिष्ट्युपयोगिसंधिनिर्णयार्थः । दिनद्वये साम्येनैकदेशस्य[2] पूर्वैव ग्राह्या । गौणकालस्यापि व्यापनात् वैषम्येण मुख्यकालैकदेशव्याप्तौ त्वधिक[3]तदव्यापिनी ग्राह्या । अयं निर्णयः । स्वतंत्रैकभक्तविषयः अनन्तव्रताद्यंगभूतमन्यव्रतांगं त्वेकभक्तं प्रधाने निर्णीतायां तिथौ कर्त्तव्यं, यत्र तु मध्याह्ने पूजयेन्नृपेत्यादिवचनैर्मध्याह्ने पूजोक्ता तत्राह अंगशब्देनात्र प्रधानं लक्ष्यते । अंगगुणविरोधे प्रधानगुणयोर्विरोधे तादर्थ्यात्प्रधानार्थत्वात् । तथा चांगेन प्रधानानुरोधेन स्वकालं विहाय प्रधानकालोऽनुरुध्यते । यथा दीक्षणीयेष्टिः प्रधानसोमयागानुरोधेनेष्टिकालात्पर्वणः प्रच्युताकालान्त क्रियते । गुणविरोधे च तादर्थ्यादिति न्यायेन मुख्यकालात्प्रच्युतमप्येकभक्तं गौणकाले कर्त्तव्यम् । "एकभक्ते न नक्ते न बालवृद्धातुरः क्षिपे"दित्येकादश्यादिविषये उक्तमुपवासोपवासप्रतिनिधिरूपन्त्वेकभक्तमुपवासदिने मध्याह्ने उपवासतिथेः सद्भावेऽपि वा तत्रैव कर्त्तव्यं तिथिर्यथोपवासे स्यादेकभक्तेऽपि सा तथेति सुमन्तुवचनात् इत्येकभक्तनिर्णयः ।

---

१. हेमाद्रि उदाहृतवचनेन इति 'ख' पाठः ?
२. देशस्पर्शे इति 'ख' पाठः
३. मुख्यकालव्यापिनी इति 'ख' पाठेऽधिकः

अथ नक्तकालनिर्णयः

तत्र नक्तं नाम दिवाभोजनाभावविशिष्टरात्रिभोजनम् । तत्र प्रदोषव्यापिनी तिथिर्ग्राह्या । "प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।" इति व्यासोक्तेः[1] । निर्णयामृतप्रतापमार्तण्डे तु "नक्तं नामाहरशनं वर्जयित्वा रात्रौ भोक्तव्यमितिनियमाद्दिवारात्रिव्रतं तस्मादेतत् दिवारात्रिव्यापिन्यामेव तिथौ कर्त्तव्यम् । "दिवारात्रिव्रतं यच्च एकमेकतिथौ स्मृतः । तस्यामुभययोगिन्यां कुर्यादेव व्रतं व्रतोति स्कान्दोक्तम् ।

अत्रोभयव्यापिन्यामेवेत्यन्वयः । दिवारात्रिव्यापिन्या अलाभे प्रदोषव्यापिन्यां कार्यमित्युक्तम् । प्रदोषश्च सूर्यास्तोत्तरं मुहूर्त्तत्रयं, "त्रिमुहूर्त्तः प्रदोषः स्याद् भानावस्तंगते सति । नक्तं तत्र तु कर्त्तव्यमिति शास्त्रविनिश्चयः ।" इति व्यासवचनात् । तत्रापि घटिकात्रयमुत्तमः कालः घटिकाषट्कं मध्यमः कालः । एतदेवाभिप्रेत्य वचनं स्मर्यते । "प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमिष्यते" इति त्रिमुहूर्त्तः प्रदोषः स्यादिति च निशीथपर्यन्तो जघन्यः कालः नक्तं प्रकुर्वीत रात्राविति सामान्येनाभिधानात् कालतत्त्वविवेचनकारास्तु मुख्यकालेऽपि त्रिमुहूर्त्तात्मके-आद्यमुहूर्त्तद्वयं मुख्यतरं "निशानक्तं तु विज्ञेयं यामार्द्धे प्रथमे सदा" इति स्मृत्यन्तरादित्याहुः । दिनान्त्यमुहूर्त्तस्त्वनुकल्पः "मुहूर्त्तो न दिनं नक्तं प्रवदन्ति मनोषिणः । नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिपेति भविष्यत्पुराणे नक्षत्रदर्शनोत्तरप्रदोषभागस्य शिवेनाहं मन्ये इति स्वाभिमतत्वेनान्यस्य च परमतत्त्वेनाभिधानात् । माधवेन त्वस्य कालद्वयस्याधिकारिभेदेन व्यवस्थामाह देवलः ।

> "नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम् ।
> यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते ।।" इतित्युक्तम् ।

अन्तिममुहूर्तपूर्वभाव्यपि मुहूर्त्तद्वयं गौणतरः कालः । "प्रदोषव्यापिनी यत्र त्रिमुहूर्त्ता दिवा यदि । तदा नक्तव्रतं कुर्यादिति कूर्मपुराणे तस्यापि नक्तकालत्वेनाभिधानात् यद्यपि सायं सन्ध्यात्रिघटिका अस्तादुपरि भास्यते" इति स्कान्दे दण्डत्रयस्य संध्यात्वोक्तेस्तत्र च चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत् । आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति भोजनं निषिद्धम् । तथापि निषेधस्य मैथुनादि समभिव्याहाराद्रागप्राप्तभोजनगोचरत्वेन वैधाबाधकत्वान्नक्षत्रदर्शनोत्तरक्षण एव भोजनं कार्यमिति कालतत्त्वविवेचन–मयूख–मदनरत्न–हेमाद्र्यादयः ।

---

[1] वत्सोक्ते इति 'ख' पाठः

[2] भास्वत इति 'ख' पाठः ।

निर्णयामृते–नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिपेति भविष्यपुराणवचनान्नक्षत्रदर्शनानन्तरं प्रदोषभागस्य नक्तव्रतकालत्वे स्थिते चत्वारोमानीति निषेधात्सन्ध्या नक्षत्रदर्शनपर्यन्त एवानुष्ठेयं,[1] नक्तं[2] तु द्वितीयदिने तत्तिथेः सायंकाले गौणे सत्त्वे द्वितीयदिने नैव ग्राह्या । घटिकात्रयात्मकः सन्ध्याकालस्तु संध्यागर्जितादावनध्यायप्रयोजके द्रष्टव्य इत्युक्तम् ।

निर्णयसिन्धुकारस्तु–विधिनिषेधयोर्विरोधेः प्राबल्यात्कपिंजलानालभेतेत्यत्र "न हिंस्यात् सर्वाणि भूतानी"ति निषेधाप्रवृत्तौ त्रिवृभ्योऽधिकानामपि हिंसनं स्यात् । अतस्त्रिभ्यांऽधिकेषु निषेधस्य सत्त्वात्त्रिषु विधिना अविरोधेर्निषेधस्य चाविरोधाद् दण्डत्रयोर्ध्वं तदनुष्ठानेऽपि नक्षत्रदर्शनोत्तरभावित्वाविरोधाद्दण्डत्रयोर्ध्वं नक्तं कुर्यादित्याहुः । इदमेव युक्तं, अन्यथा प्रत्यागातारकोदयादिति वचनेन सायं सन्ध्याया नक्षत्रदर्शने समाप्तिनियमात्तदुत्तरक्षणे भोजने सत्यग्निहोत्रहोमवैश्वदेवादेरकरणापत्तेरिति ध्येयम् ।

तत्र पूर्वेद्युरेव परेद्युरेव वा कार्त्स्न्येनैकदेशेन वा प्रदोषव्याप्तौ सैव ग्राह्या । दिनद्वये तद्व्याप्तौ तु परा यदि स्यादुभयोस्तिथ्योः प्रदोषव्यापिनी तिथिः । तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यतः" इति जाबालिवचनात । उभयत्र रात्रौ दिने चेत्यर्थः । एवं त्रयोदश्यां पक्षप्रदोषव्रतेऽपि दिनद्वये प्रदोषव्याप्तौ परैव ततस्तु लोहिते भानौ स्नात्वा सनियमो व्रती पूजास्थानं ततो गत्वा प्रदोषे शिवमर्चयेदिति, परदिने तादृशकर्मकालव्याप्तेर्लाभात् । तेन तत्र "त्रयोदशी तु कर्त्तव्या द्वादशी सहिता मुनेः" इति सामान्यवाक्या"द्यदा[3] शुक्लत्रयोदशी पूर्वा परा कृष्णत्रयोदशी"ति विशेषवाक्यान्निर्णयं वदन् भ्रान्त इत्युपेक्ष्यः । दिनद्वये "प्रदोषव्याप्त्यभावेऽपि परा सायाह्न एव च" तत्र भोजनकार्यं गौणकाल व्यापित्वात् "प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते । आत्मनो द्विगुणाश्छाया मन्दीभवति भास्करे" ।। तन्नक्तं नक्तमित्याहुर्न नक्तं निशिभोजनम् । एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुजिक्रियाम् । कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितमिति स्कन्दपुराणाच्च––"दिनद्वयेऽपि साम्येन वैषम्येण वा तदेकदेशस्पर्शिन्यपि गौणकालव्याप्तेरधिकत्वादुत्तरेव ।" सप्तमी भानुवारादिविहितं सौरं नक्तं तु रात्रौ निषेधात्सायाह्न एव कार्यम् । तथा च सुमन्तुः––"त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः । तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनम्" इति । एवं यतिविधवाधिकारिकमपि नक्तं सायाह्न एव । 'नक्तं निशायां कुर्याद् गृहस्थो विधिसंयुतः । यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरम् ।।[4] दिवाकरं तु तत्प्रोक्तमन्तिमे

---

१. पर्यन्त एव ग्राह्या इति 'ख' पाठः ।

२. नक्तं तु द्वितीयदिने इत्यारभ्य–द्वितीयदिनेनैव ग्राह्य इति पाठः 'ख' पाठे नास्ति ।

३. 'द्वा' इति 'ख' पाठः ।

४. 'स' इति ख पाठेऽधिकः ।

घटिकाद्वये ।" इति स्मृत्यन्तरात् । सौरनक्तं यतिनक्तं च परेद्युरेव सायाह्नव्यापिनी केवलं परैव । इतरपक्षेषु तु पूर्वैव । तत्र सायाह्नस्य मुख्यकालत्वात्प्रदोषस्य च गौणकालत्वात् । अन्यनक्तन्त्वादित्यवारसंक्रान्त्यादिष्वपि रात्रावेव भवति । निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधावाधकत्वात् ।

माधवेन तु—"ये त्वादित्यदिने ब्रह्मन् नक्तं कुर्वन्ति मानवाः । दिनान्ते तेऽपि भुंजीरन्निषेधाद्रात्रिभोजनम् ॥" इति भविष्यत्पुराणवचनादेतादृशविषये सायाह्न एव नक्तं कार्यम् । अस्मिंश्च, दिवाभोजने उत्तमोऽन्तिममुहूर्त्तो मध्यः[1] स उपान्त्यस्ततः प्राचीनो जघन्य इत्युक्तम । एकादश्यां तु यन्नक्तं तत्रोदयव्यापिनी तिथिर्ग्राह्या । तदुक्तं स्कान्दे—"उदयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति । अन्यांगे उपवासप्रतिनिधौ च नक्ते तादृशैकभक्तन्याय एव द्रष्टव्यः एकभक्तनक्तयोरेकस्मिन् दिने प्रसक्तावेकभक्तस्य प्राथम्यादेकभक्तं मुख्यकाले एवानुष्ठेयम् । भक्तं तु द्वितीयदिने तत्तिथेः सायंकाले गौणे सत्वे द्वितीयदिनेऽनुष्ठेयम् । द्वितीयदिने गौणकालेऽपि तत्तिथेरसत्वे तु भार्यापुत्रादिना वा तद्दिने कारणीयम् । नक्तकर्तुर्नियमा गारुडे "हविष्यंभोजनं स्नानसत्यमाहारसेवनम् ।[2] अग्निकार्यमधः शय्यां नक्तभोजी षडाचरे"दित्यग्निकार्यं व्याहृतिहोमः । इति नक्तनिर्णयः ।

अथायाचितनिर्णयः

तच्च याचितभोजन[3]निषेधरूपं [4]याचितभिन्नभोजनरूपं वा । तत्राद्यपक्षं गौतम आह—अथापरं त्र्यहं न कंचन याचेतेति । [5]द्वितीयं तु बृहस्पतिराह—"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितमिति ।" एतच्चोपवासवदहोरात्रसाध्यत्वादुभययोगिन्या कर्त्तव्यम् । दिवा रात्रिव्रत यच्चेति स्कान्दात् । यदा तु तत्तिथिरेकस्मिन्दिने दिवैवान्यस्मिन् रात्रावेव तदाहर्व्यापिन्यां कार्यम् । "अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा । नक्तव्रते तु सर्वत्र रात्रियोगः प्रशस्यते ॥" इति जाबालिवचनात् संभावितपक्षांतरेष्वप्युपवासवदेव तत्तिथिर्निर्णेतव्या । अयाचितान्न भोजनम् तु यदैव तल्लाभस्तदैव दिने रात्रौ वा अनिषिद्धकाले सकृदेव कार्यम् । अलाभे तूपवासेऽपि न व्रतक्षतिः ।

माधवस्तु यथाप्येकभक्तादिदन्नकालो विशेषणीयः । प्रतिषेधे कालविशेषानपेक्षणात् । पर्युदासे पराधीनत्वात् । असति तु कालविशेषविधौ न

---

[1] "मध्यम उपान्त्यस्ततः" इति 'ख' पाठः ।

[2] "सत्यमाहार लाघवम्" इति 'ख' पाठः ।

[3] 'अहोरात्रेयाचितमन्नं योक्ष्ये इति निषेध' इति 'ख' पाठेऽधिकः ।

[4] याचनं विनान्येन दत्तं भोक्ष्ये इत्येव रूपं इति ख पाठेऽधिकः ।

[5] स्वगृहस्थितान्नस्य याचितभिन्नत्वेनभोजनप्रसक्तेरिदं मतम्" इति ख पाठेऽधिकः ।

कर्मकालव्याप्तिवचनमत्र प्रवर्तते, किन्तु युग्मवाक्येनैव निर्णय इत्याह । मयूखे त्वयाचिते विशेषवचनाभावादुपवासवन्निर्णय इति केचित्तन्न । "एकभक्तायाचितयो यो विंशद्घटिकावधिः । सा तिथिः सर्वदा ज्ञेया नक्ते सायाह्नसंगता ॥" इति शार्ङ्गधरीये नारदोक्तेरित्युक्तम्, तच्चिन्त्यम् ।

एतद्वचनस्य हेमाद्रयादिनिबन्धादावदर्शनान्निर्मूलत्वात् एकभक्तादिषु ग्राससंख्ये[1] पराशरः—"सायं तु द्वादशग्रासाः प्रातः पंचदश स्मृताः । चतुर्विंशतिरायाच्याः परे निरशनास्तु ये ॥" आपस्तम्बस्त्वन्यथाह "साय द्वाविंशति ग्रासाः प्रातः षड्विंशतिः स्मृताः । चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥ चतुर्विंशतिमते प्रातस्तु द्वादश । ग्रासा नक्तं पंचदशैव तु ॥ ‘‘अयाचिते तु द्वौ चाष्टौ प्राजापत्यो विधिः स्मृतः ।" या तिथिरुदयादारभ्य दिनार्द्धव्यापिनी न स्यात्सा खण्डा । तस्यां एतेषां एकभक्तादिव्रतानां प्रारम्भं समाप्तिञ्च न कुर्यात् । तदाह सत्यव्रतः—‘‘उदयस्था तिथिर्या हि न भवेद्दिनमध्यगा । सा खण्डा न व्रतानां स्यात्तत्रारम्भः समापनम् ॥" इति । इत्ययाचितकालनिर्णयः । अत्रैव प्रसंगान्नक्षत्रव्रतकालनिर्णयः । तत्र विष्णुधर्मोत्तरे—‘उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः । यत्र वा युज्यते रामः निशीथे शशिना सह ॥" इति । अत्रास्तमयो योगोमुख्यः, निशीथयोगो गौणः ।

एवं च यदा पूर्वंकरेव[2] नक्षत्रस्यास्तमययोगो मुख्यो यदा वा दिनद्वयेऽप्यस्तमययोगस्तदा मुख्यगौणोभयकालव्याप्तिलाभात्पूर्वंकरे[3]वोपवासः कार्यः । यदा तूत्तरस्मिन्नेव दिनेऽस्तमययोगस्तदा मुख्यकालव्यापित्वात्संकल्पकालमारभ्य सत्त्वादुत्तरेद्युरेवोपवासः । यदा तु दिनद्वयेऽप्यस्तमययोगाभावस्तदा निशीथरूपगौणकालव्याप्तिलाभात्पूर्वेद्युरेवोपवासः । तथा च सुमन्तुः—"यदार्द्धरात्राद्दर्वाक्तु नक्षत्रं प्राप्यते तिथौ । तत्र त्र्यक्ष[4]व्रतं कुर्यादतीते पारणं भवेदि’ति नक्षत्रप्रयुक्तनक्तैकभक्तयोरप्युपवासवदेव निर्णयः । तथा च स्कान्दे—" तत्र चोपवसेदृक्षंयन्निशीथादधो भवेत् । उपवासे यदृक्षं स्यात्तद्धि नक्तैकभक्तयो’’रिति । यत्तु ‘सा तिथिस्तच्च नक्षत्र यस्यामभ्युदितो रविः" । इत्यादि नक्षत्रविधायकं विष्णुधर्मोत्तरन्तन्नक्षत्रप्रयुक्तस्नानदानादिविषयमिति नक्षत्रव्रतनिर्णयः । दानहोमादिदैवकर्माणि तु पूर्वाह्णे वै देवानामितिश्रुतेः पूर्वाह्णव्यापिन्यां तत्तत्तिथौ कर्त्तव्यानि ।

---

[1] ग्रास संख्ये पराशरः इत्यारभ्य परेनिरशनास्त्रयः इत्यन्त पाठः ख पाठे नास्ति ।

[2] पूर्वेद्युरेव इति ‘ख’ पाठः ।

[3] पूर्वेद्युरेवोपवासः कार्यं इति ‘ख’ पाठः ।

[4] ऋक्षव्रतमिति ‘ख’ पाठः ।

अथ व्रतादिसन्निपाते निर्णयः

तत्र तिथिद्वयसंनिपाते उक्तम्-"दानहोमादिक्रमेणानुष्ठेयम्, अविरोधात् ।" यत्र तु नक्तैकभक्तादौ विरोधस्तत्रैव प्राथम्यादेकभक्तं कार्यम् । नक्तन्तु परेक[1] स्तत्तिथौ गौणकाले कार्यम् । समकालीनविरुद्धव्रतादौ त्वेकं स्वयं कृत्वाऽन्यद्द्वार्यादिना कारयेदिति माधवमदनरत्नादयः । यत्र तु चतुर्दश्यादौ एकभक्तादिनाह्निभोजनं प्राप्तभूताष्टम्योर्दिवाभुक्ता रात्रौ भुक्ता च पर्वणि । एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेदिति । तन्निषेधश्च तत्रैकभक्तादेर्वैधत्वाद्दिवैव भोजनम् । निषेधस्तु रागप्राप्तभोजनविषयः । एवं चतुर्दश्यां शिवरात्रिपारणायापि वैधत्वाद्दिवैव भोजनम । एवमष्टम्यादिनक्तव्रते संक्रान्त्यादौ रवौ सङ्कष्टचतुर्थ्यां च रात्रौ भोजनं, यत्रत्वष्टम्यादौ दिवाभुञ्जिनिषेधः संक्रमे च रात्राविति निषेधद्वयन्तत्रोपवास एव कार्यः । यद्यपि पुत्रिण उपवासोऽपि निषिद्धस्तथाप्युपवासनिषेधे तु किं द्रक्ष्यं[2] प्रकल्पयेदिति वचनात्किंचिद्भक्षयित्वोपवासः कार्यः । यत्तु निर्णयसिंधौ चांद्रायणमध्ये एकादश्यादौ तु भोजनं कार्यमेव चांद्रायणस्य काम्यत्वेन नित्यबाधकत्वादित्युक्तं, तन्मृग्यं फलाद्यशनेनापि चांद्रायणव्रतसम्यक्तावेकादश्यां भोजननिषेधवाक्यानामानन्त्येन बाधानौचित्यात् इति व्रतादिसन्निपाते निर्णयः ।

अथ व्रतनिर्णयः

एतावता प्रबन्धेन व्रतानुष्ठानोपयोगिनं काल सामान्यतो निरूप्येदानीं व्रतोपयोगि निरूप्यते । तत्रादौ व्रतप्रशंसा-विष्णुधर्मोत्तरे व्रतोपवासैर्यैर्विष्णुर्नान्य-जन्मनि तोषितः ते नरा मुनिशार्दूलग्रहरोगादिबाधिता इति ।

अथव्रताधिकारिणःस्कंदपुराणे—"निजवर्णाश्रमाचारनिरतः शुद्ध मानसः । अलुन्छः[3] सत्यवादी च सर्वभूतहिते रतः ।। व्रतेष्वधिकृतो राजन् अन्यथा विफलश्रमः । श्रद्धावान् पापभोगश्च मददम्भविवर्जितः ।। पूर्वंनिश्चयमाश्रित्य यथावत्कर्मकारकः । अवेदनिन्दको धीमानधिकारी व्रतादिषु ।।" इति निश्चयोऽनुष्ठेयस्य निजवर्णाश्रमाचारेत्यनेन चतुर्णामपि वर्णानां व्रतादिष्वधिकारः, क्वचिन्म्लेच्छादीनामप्यधिकारः । वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैरिति नवरात्रप्रकरणे देवीपुराणेऽभिधानात् । जीवत्पतिका स्त्रीपत्यनुज्ञयैव नित्यं काम्यं वा व्रतादि कुर्यात् । "भार्या भर्तुर्मतेनैव व्रतादीन्याचरेदि"[4]ति कात्यायनवचनात् । तथा च, "पत्यौ जीवति या नारी उपवास व्रतं चरेत् । आयुष्यं हरते भर्तुर्नरकं चैव गच्छतीति" विष्णुवचने यत्तस्या उपवासमात्रे

---

[1] परेद्यु स्तत्तिथौ इति पाठः ।

[2] कश्चिद् इति 'ख' पाठः ।

[3] अलुब्धः इति 'ख' पाठः ।

[4] चरेत् सदेति 'ख' पाठः

दोषश्रवणं तत्पत्यनुज्ञाभावविषयम् । अतएव स्पष्टं मार्कण्डेयपुराणे—“नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा । निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकम् ॥” इति । तेन विधवाऽपि यदधीना तदनुज्ञयैव सत्रं कुर्यात् । अतएव सामान्यतो निषेधः, न स्वातन्त्र्य क्वचित्स्त्रिया इति स्त्रीणामपि[1] व्रतादिष्वधिकारः ।

एवं ‘नरो वा यदि वा नारीत्यादि तत्र तत्राभिधाने, यत्तु अनग्नयस्तु ये विप्रास्तेषां श्रेयो विधीयते ।” व्रतोपवासनियमैर्नानादानैस्तथा नृपेति भविष्यत्पुराणवचनं तदनग्नीनामिष्ट्याद्यनधिकाराद्व्रतादिभिरेव तेषां श्रेय इति प्रतिपादनार्थं न तु साऽन्यधिकारबाधनार्थं दानेऽप्यनधिकारापत्तेः । निर्णयसिन्धौ तु अत्रानग्निग्रहणमुपवासविषयम् । अतएव देवलः—“आहिताग्निरनड्वांश्च ब्रह्मचारी हि ते त्रयः ।” अश्नन्तयः[2] अश्नन्त एव सिद्ध्यन्ति नैषां सिद्धिरनशनतामिति । एकादश्यादौ तु विशेषवचनेन तेषामप्युपवासेऽधिकारो वक्ष्यत इति सभर्तृकस्त्रीणां[3] तु भर्त्तुः पृथग्व्रते भर्त्रननुज्ञातानां तु पृथगप्यधिकारः ।

यथाह व्यासः—“पत्नी पत्युरनुज्ञाता व्रतादिष्वधिकारिणीति । यत्तु—नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । भर्तृ शुश्रूषयैवैतां लोकानिष्टान्व्रजन्ति हि ॥” इति तद्भर्त्रननुज्ञाविषयम् । एवं च “पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् । आयुः सा हरते भर्तुर्नरकं चैव गच्छति ॥” इति विष्णूक्तः सामान्यत उपवासनिषेधोऽप्यननुज्ञातायाः पृथगुपवासविषयः शुद्धोपवासविषय इति तु सारव्रतभेदा वाराहपुराणे । “अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्मषम् । एतानि मानसान्याहुः व्रतानि व्रतधारिणि ॥ एक भक्तं तथा नक्तमुपवासादिकं च यत् । तत्सर्वं कायिकं पुंसा व्रतं भवति नान्यथा ॥” क्वचित्त्रैविध्यमप्युक्तम्—“कायिकं वाचिकं चैव मानसं त्रिविधं स्मृतम् । यज्ञो दानं तपश्चैव वदतस्तच्छृणुस्व मे ॥” “अहिंसा ब्रह्मचर्यश्च तपः कायिकमुच्यते । वाचिकं सत्यवचनं भूतद्रोहविसर्जनम् ॥ मानसं मनसः शान्तिः सर्ववैराग्यलक्षणम् ।” इति ।

अथाधिकारिधर्माः

भविष्यपुराणे—“क्षमः सत्यं दया दानं शौचमिन्द्रियनिग्रहः । देवपूजाग्निहवनं सन्तोषः स्तेयवर्जनम् ॥ सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्थितः ।” शौचम् पाखण्डादिसंसर्गवर्जनम्, स्नानं च मनसादि च इन्द्रियानग्रहः अवलोकनादिवर्जनं देवलः । “ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनम् । व्रतेष्वेतानि चत्वारि

---

१. स्त्रीणामपि–इत्यारभ्य तत्र तत्राभिधाने इति यावत् पाठः ख पाठे नास्ति ।

२. ख पाठे नास्ति ‘अश्नन्तयः’

३. सभर्तृक स्त्रीणामित्यारभ्य शुद्धोपवास विषय इति यावत् पाठः ‘ख’ पाठे नास्ति ।

चरितव्यानि नित्यशः ।। ब्रह्मचर्यं स्मरणं कीर्तनं केलिः प्रेक्षणम् । गुह्यभाषणं संकल्पोऽध्यवसायश्च क्रिया ।। निष्पत्तिः एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।" इति दक्षोक्ताष्टविधमैथुनत्यागः । अभिलाषपूर्वकं स्मरणकीर्तनप्रेक्षणानि निषिद्धानि । केलिः परिहासादिबाह्यचेष्टाः । गुह्यभाषणं सम्भोगार्थं रहोमन्त्रणम् । संकल्पो मानसं कर्म । अध्यवसायः सम्भोगनिश्चयः । इति देवलः ।। "स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि । विपद्यते ब्रह्मचर्यं न दारेष्वृतुसगमादिति । स्वदारेष्विति पाठो निर्णयामृते । ऋतुशब्देनात्र षोडशनिशाया अर्वाचीनः सावकाशः कालो विवक्षित इति च तत्र व्याख्यातम् । परस्त्रीणामपि मात्रादितुल्यदर्शनेन दोषः । निषेधस्तु सरागप्रेक्षणादिविषयः । षोडशदिवसात्यकः ऋतुकालस्तत्र सर्वथा असंभवे व्रतदिने ऋतुर्द्वयस्तत्र सरागप्रेक्षणेऽपि न दोषः निर्णयामृते कात्यायनः "रेत.सेकात्मकं भोगमृतेऽन्यत्र क्षयः स्मृतः" इति । अतः स्वदाराणां स्पर्शनादिभिरपि ब्रह्मचर्यभंगो नास्तीति तत्सिद्धान्तः । "सर्वभूतभयं व्याधिः प्रमादो गुरुशासनम । अव्रतघ्नानि पठ्यन्ते सकृदेतानि शास्त्रतः ।।" सर्वभूतभयं व्याघ्रादिसत्वेभ्यो भूनेभ्यो भयं व्याधिः प्रतिबंधक्षमः । प्रमादो विस्मरणं गुरुशासनं गुरोराज्ञा सकृदित्याभिधानादेष्वपि निमित्तेषु पुनः पुनस्त्यागे दोष एव । ब्रह्मपुराणे, "व्रतस्थः प्राणरक्षार्थं कदाचिदुदकं पिबेत् । फलमूले यवाक्षीरं यज्ञशिष्टन्तथा हविः ।। व्रतमध्ये च रोगार्तो वैद्यप्रोक्तमथौषधाम् करोति च गुरोर्वाक्यं व्रतस्थस्तु[1] क्षणादपि ।। ब्राह्मणस्याभिलषितं साधयेदविचारयत् । 'एतान्यष्टौ व्रतस्थानां न व्रतघ्नानि कुत्रचित् ।।" पयः पानादीनामव्रतघ्नत्वं स्त्रीबालाद्यत्यन्तपीडितविषयं वसिष्ठः—"जपहोमोपवासेषु धौतवस्त्रधरो भवेत् । अलंकृतः शुचिर्मौनी श्रद्धावान्विजितेन्द्रियः ।।"

बौधायनः "काषायवासाः कुरुते जपहोमपरिग्रहम् । सर्वं तद्राक्षसं विद्याद्दैवे पित्र्ये च वर्जयेत ।।"

याज्ञवल्क्यः—"परिधानाद्बहिः कक्षानिवद्धवाह्यासुरी भवेत् । धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ।।" बहिः कक्षा बहिर्निर्गतेत्यर्थः । "गोयानमुष्ट्रयानं च कथंचिदपि नाचरेत् । खरयानं च सततं व्रते चाप्युपसंकरम् ।।' उपसंकरोऽस्पृश्यस्पर्शः ।

विष्णुधर्मोत्तरे—"सर्वेषु तूपवासेषु पुमान् वाऽथ सुवासिनी । धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च ।।" एतच्च मंगलादिव्रतविषयम्, "पादुकार्थस्तृणैः कार्यः सर्वदा व्रतके सति । उपवासेऽपि च विधिरेष एव प्रकीर्तितः ।। अञ्जनं रोचनं चापि गन्धान्सुमनसस्तथा । व्रतके चोपवासे च नित्यमेव विवर्जयेत ।।" रोचनं कुंकुमादिना, मुखोज्ज्वलीकरणं, "दन्तकाष्ठं शिरः स्नानं मुहूर्त्तमथापि

---

[1] तत् क्षणादपि इति 'ख' पाठः ।

वा । विवर्जितं मृदा सर्वं शौचार्थं तु विधीयते ।। तिलामलफलैर्नित्यं श्रीफलेश्च विधीयते । प्रक्षालनं तु शिरसः स्यात्सदामृन्मिश्रितैः जलैः ।। शिरसोऽभ्यंजन सौम्ये नैवमत्र प्रशस्यते । न पादयोर्न गात्रस्य स्नेहेनेति स्थितिः स्मृता ।।" इति । अत्र गंधादिवर्जनाभिधानमेकादश्यादि पुण्यकव्रतविषयं सोभाग्याद्यर्थं क्रियमाणनवरात्रत्रिरात्रादिव्रतान्तरे तु सभर्तृकाया न दोषः । 'अंजनं च स ताम्बूलं सिन्दूरं रक्तवाससी । बिभृयात्सोपवासापि अवैधव्यकर परम् ।।" इति भविष्यपुराणात् । "बहिर्ग्रामान्यजात्सूतिं पतितं च रजस्वलाम् । न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ।। उपवासस्वरूपं च विष्णुधर्मोत्तरे—"उपावृतस्य पापेभ्यो यस्तु वासो गुणैः सह । उपवासः स विज्ञेयः सर्वभोगविवर्जितः ।।" इति ।

निषिद्धानि सुमन्तुराह—"विहितस्याननुष्ठानमिन्द्रियाणामनुग्रहः । निषिद्धसेवनं जैह्म्यं वर्जनीयं प्रयत्नतः ।।" अन्यान्यपि पतितपाखण्डिनास्तिकसम्भाषणादीनि बोध्यानि गुणैः सहवास इत्युक्तं, तत्र गुणाः विष्णुधर्मोत्तरे उक्ताः— "तज्जप्यजपनं ध्यानं तत्कथाश्रवणादिकम् । तदर्चनं च तन्नामकीर्तनश्रवणादयः । उपवासकृतामेते गुणाः प्रोक्ताः महर्षिभिः" इति । तच्छब्देनात्र प्रोक्तत्वाद्विष्णुरेवोच्यते ।

उपवासकृतां नियमा उच्यन्ते—[1]उपवासव्रती दंतधावनं हिंसामनृतं द्यूतं चौर्यंभसकृज्जलपानं सकृत्ताम्बूलभक्षणं स्त्रीसंयोगं दिवास्वापं मांसं च वर्जयेत् ।।

विष्णुधर्मोत्तरे—"असकृज्जलपानं च दिवास्वाप च मैथुनम् । ताम्बूलचर्वणं मांसं वर्जयेद् व्रतवासरे ।।" यत्तु कैश्चिदुक्तं—मांसनिषेधः पारणदिने पारणान्तव्रतं ज्ञेयमित्युक्तेः न तु प्रधानदिने प्रसक्त्यभावादिति, तन्न । ताम्बूलमांसभक्षणनिषेधस्यैकवाक्योपात्तत्वाद् व्रतदिन एव न्याय्यत्वात् रागप्रसक्तेः सत्त्वाद्वर्जयेत्पारणे मांसमिति पारणदिने पृथग्निषेधस्य वैयर्थ्यापत्तेश्च अशक्तौ तु देवलः— "अत्यये चाम्बुपाने च नोपवासः प्रणश्यति ।।" इति । अत्यये प्राणात्यये । हेमाद्रौ "प्रवृत्तमन्यथा कुर्याद्यदि मोहात्कथंचन । यतस्तदन्यथाभूतं तत एव समापयेत् ।।" प्रवृत्तमारब्धं अन्यथाभूतं क्रमाद्यन्यत्वेनयद्वैपरीत्यमापन्नम्, "समासे यदि जानीयान्मयैतदयथाकृतम् । कुर्यान्नावृत्ति सर्वकर्मणः ।" एतत्तु कर्मासमा तावन्यथाकरणज्ञानविषयं "प्रधानस्याक्रिया यत्र सांगन्तत् क्रियते पुनः । तदंगस्यं क्रियायां तु नावृत्तिर्न च तत्क्रिया ।।" यत्र प्रधानस्य कर्मणोऽकरणं तत्र सांगमेव पुनः कर्त्तव्यं, तदंगीकरणे तु न सांगप्रधाना वृत्तिः । नाति तावन्मात्रस्यांगस्य करणं किन्तु प्रायश्चित्तमेव कार्यम्, गृहीतव्रतत्यागे दोष उक्तो मदनरत्ने छागलेयेन 'पूर्वंव्रतं गृहीत्वा यो नाचरेत्काममोहितः। जीवन्भवति चाण्डालो मृतःश्वा चाभिजायते ।।' इति । तत्त्यागे प्रायश्चित्तमप्युक्तं गारुडे—"क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो

---

[1] उपवास व्रती दन्तधावनमित्यारभ्य मांसञ्च वर्जयेत् इत्यन्तः पाठः 'ख' पाठे नास्ति

भवेद्यदि । दिनत्रयं न भुंजीत मुण्डनं शिरसोऽथवा ।।" इति । प्रायश्चित्तानन्तरमुपक्रांतानुष्ठानं कार्यम्, "प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ।।" इति वायुपुराणोक्तेः ।

स्त्रीव्रते विशेषो हरिवंशे—"स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत्सती ।" तथा 'गृहीत्वौदुम्बरं पात्रं सकुशं साक्षतं तथा । गोशृंगं दक्षिणं सिच्य प्रगृह्णीयाच्च तज्जलम् ।।" औदुम्बरं ताम्रमयं "ततो भर्त्तुः सती दद्यात्स्नातस्य प्रयतस्य च । आत्मनश्चाभिषेक्तव्यं भर्त्तुः शिरसि तज्जलम् । त्रैलोक्ये सर्वतीर्थेषु स्नातमेतदुदाहृतम् ।। उपवासेषु कर्त्तव्यं एतद्धि व्रतकेषु चेति । सर्वव्रतेषु संकल्पविधिः भारते, ' गृहीत्वौदुम्बर पात्रं वारिपूर्णमुदङ्मुखः । उपवासं तु गृह्णीयाद्यथा संकल्पयेद्बुधः ।." देवलः—"अभुक्ता प्रातराहारं स्नात्वा चान्यसमाहितः । सूर्याय देवताभ्यश्च निवेद्यव्रतमाचरेत् ।"[1] इति सम्बन्धः । प्रधानक्रियान्वयस्याभ्यर्हितत्वादिति वीरमित्रः । "व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शनात् ।" इति विष्णूक्तम् । प्रकरणात् प्रायश्चित्तविषयम्—अन्यव्रतेष्वपि यत्र पूर्वदिने व्रतग्रहणं श्रूयते । तत्र पूर्वदिन एव व्रतग्रहणम् ।

अथ व्रतारंभकालः

मदनरत्ने गार्ग्यः, "अस्तंगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे । उद्यापनमुपारम्भं व्रतानां नैव करयेत् ." रत्नमालायां "सोमसौम्यगुरुशुक्रवासराः, सर्वकर्मसु भवन्ति सिद्धदाः भानुभौमशनिवासरेषु च, प्रोक्तमेव खलुकर्म सिद्ध्यति ।।" अन्यत्सर्वं ज्योतिषाज्ज्ञेयम् । टोडरानन्द देवीपुराणे—" व्रते च तीर्थेऽध्ययने श्राद्धेऽपि च विशेषतः । परान्नभोजनाद्देवि यस्यान्नं तस्य तत्फलम् ।।" ब्राह्मे—"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते । मंत्रस्य देवतायाश्च प्रजापतिरिति स्थितिः । व्रतोद्यापनानुक्तौ तु पृथ्वी चन्द्रोदये नंदिपुराणे—" यदि चोद्यापनं नोक्तं व्रतानुगुणतश्चरेत् । वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते ।। गाश्चैव कांचनं दद्याद्व्रतस्य परिपूर्तये ।" अशक्तौ तु नारदीये—"सर्वेषामप्यलाभे तु यथोक्तकरणं विना । विप्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्तये ।। वृथा विप्रवचो यस्तु गृह्णाति मनुजः शुभम् । अदत्वा दक्षिणां पापः स याति नरकं ध्रुवम् ।।".

अथ दानविभागनिर्णयः ।

हेमाद्रावंगिराः—"बहुभ्यो न प्रदेयानि गोगृहं शयनं स्त्रियः । विभक्तदक्षिणा ह्येता दातारं पातयन्ति हि ।। एका एकस्य दातव्या न बहुभ्यः कथंचन । सा तु विक्रयमापन्नादहत्यासप्तमं कुलम् ।।" विक्रेतुरेवैतद्दोषप्रदर्शनं न दातुरिति, कात्यायनः ।" कन्या शय्या गृहं चैव देयं यद्वो स्त्रियादिकम् । तदेकस्मै प्रदातव्यं न

---

[1] अत्र प्रातः व्रतमाचरेत् इति 'ख' पाठेऽधिकः ।

बहुभ्यः कथञ्चन ।। इति बैजवापः ।" शिवनेत्रोद्भवं यस्माद्रजतं पितृवल्लभं । अमंगलं तद्यत्नेन देवकार्येषु वर्जयेत् ।"

अथ व्रते सूतकादिनिर्णयः

तत्र शावसूत्याशौचयोः सर्वस्मार्तकर्म निवृत्तिः ।" सूतके च समुत्पन्ने ज्वरकर्मणि मैथुने । धूम्रोद्वारे तथा वांतौ नित्यकर्माणि सन्त्यजेत् ।' द्रवे भुक्तेत्वजीर्णे च नैव भुक्ताऽपि किंचन । कर्म कुर्यान्नरो नित्यं सूतके मृतके तथा ।।" इति कालिका पुराणात् । गौडास्तु क्षताशौचादावपि तामाहुः पठन्ति च—" जानूर्ध्वं क्षतजे जाते नित्य कर्म न चाचरेत् । नैमित्तिकं च तदधःस्रवद्रक्तो न चाचरेद् ।।" इति हेमाद्रौ । पाद्मे—"गर्भिणी सूतिकादिश्च कुमारी वाथ रोगिणी । यदाऽशुद्धा तदानेन कारयेत्प्रयता स्वयम्" इति, पुंसोऽप्येष विधिः लिंगस्याविवक्षितत्वात् । तेन यस्मिन् व्रते यत्पूजाद्युक्तं तदन्येन कारयेत् शारीरनियमान् स्वयं कुर्यादिति हेमाद्रिः । शुद्धितत्त्वे विष्णुः—"बहुकालिकसंकल्पो गृहीतश्च पुरा यदि । सूतके मृतके चैव व्रतं तन्नैव दुष्यति ।" एतत् काम्यपरं नित्यं त्वनारब्धमपीह वा ।। इति गौडा । मदनरत्ने" पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः तत्कर्त्तव्यं नरैः श्राद्धदानार्चनविवर्जितम् ।" इति माधवीये । कौर्मे—"काम्योपवासे प्रक्रान्ते त्वन्तरामृतसूतके । तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ।। इति सत्यव्रतः । 'प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् । न तत्रापि व्रतस्यस्यादुपरोधः कदाचन ।।" इति तत्प्रतिनिधिना कारयेदित्येदत्परं, तदुक्तं मदनरत्ने ।

मात्स्ये—"अन्तरा तु रजोयोगे पूजामन्येन कारयेद्" इति । प्रतिनिधियश्च निर्णयामृते पैठीनसिनोक्ताः । 'भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतम् । असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते ।।" इति । कालतत्त्वविवेचने । ब्रह्मवैवर्ते-"उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत् । तावद्धनादि वा दद्याद्युक्ताद्विगुणं भवेत् ।। सहस्रं सम्मितां देवीं जपेद्वा प्राणसंयमान् । कुर्याद द्वादशसंख्याकान् यथाशक्तिः व्रते नरः ।।" इति । "राज्यस्थ क्षत्रियार्थे च एकादश्यामुपोषितः । पुरोधा क्षत्रियस्यार्थं फलं प्राप्नोति निश्चितम् ।। पितामहादीनुद्दिश्य एकादश्यामुपोषिते । सुते तु तत्फलं विप्राः समग्रं समवाप्नुयुः ।। कर्त्ता दशगुणं पुण्यं प्राप्नोत्यत्र न संशयः । यमुद्दिश्य कृतं सोऽपि सम्पूर्णं फलमाप्नुयाद् ।।" इति । स्कान्देऽपि—पुत्रं वा नियमोपेतं भगिनीं भ्रातरं तथा । एषामभाव एवान्यं ब्राह्मणं वा नियोजयेत् ।।" माधवीये स्मृत्यंतरेऽपि-"पितृमातृपितृभ्रातृश्वश्रूगुर्वादिभूभुजाम् । अदृष्टार्थमुपोषित्वात्स्वयं च फलभाग्भवेत् ।। नारी च पतिमुद्दिश्य एकादश्यामुपोषिता । पुण्यं क्रतुशतस्यार्द्धं[1] मुनयः पारदर्शिनः ।।

१: शतस्याहुः इति 'ख' पाठः ।

हेमाद्रौ कात्यायनः—"पितृमातृभ्रातृपतिगुर्वर्थे च विशेषतः । उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत् ॥ दक्षिणा नात्र दातव्या शुश्रूषा विहिता हि सा ।" मदनरत्ने प्रभासखण्डे-"भर्त्ता पुत्रः पुरोधाश्च भ्राता पत्नी सखाऽपि च । यात्रायां धर्मकार्येषु कर्त्तव्याः प्रतिहस्तकाः ॥ एभिः कृतं महादेवि स्वयमेव कृतं भवेत् । स्वयं कर्त्तुमशक्तश्चेत्कारयेच्च पुरोधसा ।" दक्षस्मृतौ-"स्वयं होमे फलं यत्स्यान्न तदन्येन जायते । ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विद्वतिः ॥ एभिरेव हुतं यत्तु तद्धुतं स्वयमेव तु ।" शूद्रस्य ब्राह्मणः प्रतिनिधिर्युक्तः—'जपस्तपस्तीर्थसेवा प्रव्रज्या मंत्रसाधनम् । विप्रैः सम्पादित यस्य सम्पन्नं तस्य तत्फलम् ॥" इति मरीचिवचनात् । यत्तु निर्णयसिन्धावुक्तं प्रव्रज्यादीनां शूद्रेऽसम्भवान्नेदं वचनं ब्राह्मणस्य शूद्रप्रतिनिधित्वपरं किन्तु सम्पूर्णतावाचनपरम् इति, तन्न । प्रव्रज्यामात्रस्य शूद्रेऽसम्भवेऽपि जपादीनां सम्भवे न तद्विषये संकोचायोगादेतद्वचनस्य प्रतिनिधिप्रकरणे पाठेन सम्पूर्णतावाचनपरत्वायोगाच्च ।

हेमाद्रौ कात्यायनः—"पुरोधास्तु क्षत्रियो वा द्वयोः सममितीरितम् उपवासफलन्ताभ्यां समग्रं समवाप्यते ॥" वायुपुराणे—"उपवासे ह्यशक्तस्तु आहिताग्निरथापि वा । पुत्राद्वा करयेदाद्याद् ब्राह्मणाद्वाऽपि करयेत् ॥ अथवा विप्रमुख्येभ्यो दानं दद्यात्स्वशक्तितः । उपवासफल तेन समग्रं समवाप्यते ॥ तत्र भोजनदोषोऽपि तत्क्षणादेव नश्यति द्रव्यदानोपवासस्य फलं प्राप्नोत्यसंशयम् ॥ कर्त्ता न तदवाप्नोति नात्र कार्या विचारणा । [1]वृणुयाच्चान्यमुद्दिश्य एकादश्यामुपोषितः ॥ यमुद्दिश्य कृतं विप्रास्तस्य पूर्णं कृतं भवेत् ।" अत्र विशेषमाह त्रिकाण्डमण्डनः- "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः । काम्येऽप्युपक्रमादूर्ध्वं केचित्प्रतिनिधिं विदुः ॥" अयमर्थः—नित्यनैमित्तिके तु प्रतिनिधिनाऽपि[2] तत्कारयेदिति ।[3] "न स्यात् प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु । स देश कालयोर्नास्ति नारणेरग्निरेव सा ॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ।" हिरण्यकेशिसूत्रेऽपि—न स्वामित्वस्य भार्यायाः पुत्रस्य देशस्य कालस्याग्ने र्देवतायाः कर्मणः शब्दस्य च प्रतिनिधिर्विद्यत इति ।

इति पौण्डरीकयाजि विश्वेश्वरविरचिते प्रतापार्के परिभाषा-प्रकरणं समाप्तम् ।

—□—

---

[1] घृणया वा इति 'ख' पाठः ।

[2] प्रतिनिधिनाप्युपकारयेदिति इति 'ख' पाठः ।

[3] काम्यं तु स्वसामर्थ्यं परीक्ष्य स्वयमेवोपक्रम्य कुत्रचित् असामर्थ्ये तूपक्रमादूर्ध्वं प्रतिनिधिना तत् कारयेदिति इति 'ख' पाठेऽधिकः ।

अथ प्रतिपत्तिथिनिर्णयः

अथ प्रतिपदादितिथिनिर्णयः प्रस्तूयते । तत्र निर्णयो नाम विसन्देहजनकानामित्यर्थः[1] । विप्रतिपन्नानां वाक्यानां परस्परं विरोधपरिहारः । तदेव तत्त्वदर्शनमुच्यते । तदुक्तम्–"तत्त्वे विप्रतिपन्नानां वाक्यानामितरेतरम् । विरोधपरिहारोऽत्र निर्णयस्तत्त्वदर्शनम् ।।इति। तत्र प्रथमं प्रतिपत्सामान्यतो निर्णीयते । अस्याश्च नामनिरुक्तिर्भविष्योत्तरे—'तिथीनां प्रवरा यस्माद् ब्रह्मणा समुदाहृता । प्रतिपाद्या पदे पूर्वे प्रतिपत्तेन सोच्यते ।।" इति । तत्र शुक्लप्रनिपदुपवासातिरिक्तदैवकर्मसु पंचधा विभक्तदिनचतुर्थभागापराह्णव्यापिनी चेत्तदा पूर्वा ग्राह्या । प्रतिपद्यप्यमावस्येति युग्मवाक्यात् शुक्ला स्यात्प्रतिपत्तिथिः । प्रथमतश्चेत्साऽपराह्णे भवेदिति दीपिकोक्तेश्च । तदभावे सायाह्नव्यापिनी ग्राह्या । "तदभावे तु सायाह्नव्यापिनी परिगृह्यताम् ।" इतिमाधवोक्तेः मदनरत्ने तु अपराह्णोत्तरकाले प्रवृत्तावुत्तरविद्धैव ग्राह्या । प्रतिपत्संमुखी कार्या या भवेदापराह्णिकीति स्कन्दपुराणवचनादित्युक्तम् । मदनरत्ने[1] कृस्नातु पराक्कृष्णातूत्तरतोऽखिले' ति दीपिकोक्तेः कृष्णापि पूर्वैवेत्यनन्तभट्ट इति । निर्णयसिधौ–उपवासे तु शुक्ला कृष्णा वा प्रतिपत्पूर्वैव ग्राह्या ।"प्रतिपत्पञ्चमी चैव उपोष्या पूर्वसंयुता" इति जाबालिवचनात् ।

अथ प्रतिपद्विशेषनिर्णयस्तत्कृत्यं च [2]लिख्यते—[3]तत्रादौ संवत्सरारम्भे प्रथमोपस्थितत्वात्प्रतिपन्निर्णीयते । अस्यां कृत्यविशेषो भविष्योत्तरे–"चैत्रे मासि महाबाहो ! पुण्या प्रतिपदा परा । तस्यां यः श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः ।। न तस्य दुरितं किञ्चिन्नाधयो व्याधयो नृप । तथा कृत्वा चावश्यकार्याणि सन्तर्प्य पितृदेवताः । वन्दयेद्धोलिकामूर्त्तिः सर्वदुःखोपशान्तये ।।" अत्र

---

१. "मदनरत्ने" इति पाठः 'ख' पाठे नास्ति ।

२. ख पाठे निरूप्यते इति लेखः ।

३. तत्र तिथिकृत्ये तु कृष्णादि व्रते शुक्लादिमेव चेति वचनात् चैत्रकृष्णा प्रतिपन्निर्णीयते इति 'ख' पाठेऽधिकः । किन्तु "तत्रादौ संवत्सरारम्भे प्रथमोपस्थितत्वात् प्रतिपन्निर्णीयते" इति पाठः 'ख' पाठे नास्ति ।

प्रतिपदौ[1] च "शुक्ल प्रतिपदि वत्सरारम्भस्तत्रोद्व्यापिनी ग्राह्या । "चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि । शुक्लपक्षं समग्रं तु तया सूर्योदये सति ।।" इति हेमाद्रौ ब्राह्मोक्तेः दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वैव, "वत्सरादौ वसन्तादावलिराज्ये तथैव च । पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदा बुधैः ।।' इति[3] वसिष्ठोक्तेः ।[4] अत्र तैलाभ्यङ्गो नित्यः । "वत्सरादौ वसन्तादौ वलिराज्ये तथैव च । तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते ।।" इति वृद्धवसिष्ठवचनात् ।[5] शकादि श्रवणमप्यत्रोक्तं ज्योतिःशास्त्रे–"शकवत्सरभूपमंत्रिणां, रसधान्येश्वरमेघपतीनां । श्रवणात्पठनाच्च वै नृणां, शुभतां यात्यशुभं सह श्रिया ।।" इति चैत्रस्य मलमासत्वे वत्सरारम्भप्रयुक्तं कार्यं तत्रैव कर्तव्यम् । तस्या एव संवत्सराद्यतिथिश्चात्रैव[6] वत्सरारम्भादिति सिंधुकृत्यरत्नावल्याम् । निर्णयसिंधुकारादयोऽप्येवं विधा न पारिजातकारादयः ।" "षष्ट्यातु दिवसैर्मासः कथितो बादरायणैः । पूवमर्द्धं परित्यज्य कर्त्तव्या चोत्तरे क्रिया ।।" इति वाक्येन पूर्वमासीयकर्त्तव्यस्योत्तरत्र कर्त्तव्यताभिधानाच्छुद्धचैत्रशुक्लप्रतिपद्येव तत्कार्यमिति मयूखकारः ।

"वत्सरादौ वसन्तादावलिराज्ये तथैव च ।
तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते ।।" इति

वृद्धवसिष्ठवचनाद्वत्सरारम्भनिमित्तकार्यस्य तैलाभ्यंगादेर्नैमित्तिकत्वान्नित्यनैमित्तिके कुर्यान्नियतः सन्मलिम्लुचः ।।" इति शास्त्रादकरणे दोषश्रवणाच्च मलमासेऽप्यनुष्ठानं चैत्रशुक्लप्रतिपत्प्रयुक्तस्य ब्रह्मपूजाशान्त्यादेः काम्यकर्म-

---

१. इय वसन्तोत्सवे औदयिकी ग्राह्या । प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ इति भविष्योक्तेः । इति ख पाठ ।

२. तथात्वे पूर्वा इति पाठः ।

३. वशिष्ठ वचनात्केचित् इति 'ख' पाठः ।

४. निर्णयामृते सुचैत्रकृष्णाप्रतिपदि पूर्वविद्धायां नीराजनादिकर्मं कर्त्तव्यम् । तस्य होलिकानन्तरं कर्त्तव्यत्वात् होलिकायाः च पूर्वविद्धाया एव प्रशस्तत्वात् एतदपि पूर्वविद्धायामेवेत्यवसीयत इत्युक्तम् । तिथ्यर्केऽप्येवम् । कृत्यरत्नावल्यामपि होलिकादीपनाव्यवहितोत्तरदिनं ग्राह्यमिति युक्तमित्युक्तम् । अस्यामेव प्रतिपदि पूर्वं विद्धायां कौस्तुभमते गोविन्ददोलोत्सव इति फाल्गुनी प्रकरणे वक्ष्यते । इति 'ख' पाठे अधिकः ।

५. अत्र चैत्र शुक्लप्रतिपदिवत्सरारम्भस्तत्रोदयव्यापिनी ग्राह्या । चैत्रमासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि । शुक्लपक्षे समग्रं तु तदा सूर्योदते सति । इति हेमाद्रौ ब्रह्मोक्तेः । दिनद्वये तद् व्याप्तावव्याप्तौ वा पूर्वैव वत्सरान्तादौ वशिष्ठोक्ते तथैव च" इति ख पाठेऽधिकः ।

६. अतिथित्वादिति कृत्यरत्नावल्यां इति 'ख' पाठः ।

णास्तूत्तरत्रानुष्ठानमिति भेदस्तु स्मृतिकौस्तुभे—“अत्र तैलाभ्यंगो नित्यः वत्सरादाविति वृद्धवसिष्ठोक्तेः। शकादिश्रवणमप्यत्रोक्तं ज्योतिःशास्त्रैः” शकवत्सरभूपमन्त्रिणां, रसधान्येश्वरमेघपतीनाम्। श्रवणात्पठनाच्च वै नृणां शुभतां यात्यशुभं सह श्रिया॥” इति।

नवरात्रारम्भनिर्णयः—अस्यामेव नवरात्रारम्भः। तदुक्तं मार्कण्डेय पुराणे—“शरत्काले महापूजा क्रियते या च वार्षिकी” इति मलमासपाते तूत्कर्ष इति कृत्यरत्नावल्याम्। तत्रातिथिः परयुतैव ग्राह्या। अमायुक्ता न कर्त्तव्या प्रतिपच्चण्डिकार्चनम्। मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता॥” इति देवीपुराणात्। विशेषस्तु शारदनवरात्रे वक्ष्यते। अत्र प्रपादानमुक्तमपरार्के भविष्ये—“अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे। पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेत्॥” इति। प्रपादानासामर्थ्ये घर्मघटदानमुक्तम्। तत्रैव प्रपां दातुमशक्तेन विशेषाद्धर्ममीप्सुना। प्रत्यहं घर्मघटको वस्त्रसंवेष्टिताननः॥ ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः॥” इति इयमेव श्वेतकल्पादिः।

अस्यामेवश्वेतकल्पारम्भस्तत्प्रयुक्तश्राद्धे पार्वणातिदेशप्रातरपराह्णकालिकी।” अथात्र प्रसंगात्कल्पादय उच्यन्ते। तदुक्तं हेमाद्रौ नागरखण्डे—“अथ कल्पादयः पुण्या कथ्यन्ते तिथयः शुभाः। यासु श्राद्धे कृते तृप्तिः पितॄणामक्षया भवेत्॥ चैत्रशुक्लप्रतिपदि श्वेतकल्पः पुराऽभवत्। तस्य शुक्लत्रयोदश्यामुदानः समजायत॥ कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत्।” अथ कृष्णत्रयोदश्यां गौरीकल्पोऽप्यकल्पत। वैशाखस्य द्वितीयायां शुक्लायां नीललोहितः॥ चतुर्दश्यां तु शुक्लायां प्रवृत्तो गारुडाभिधः। समानस्तु द्वितीयायां कृष्णायामुदपद्यत॥ माहेश्वरश्चतुर्दश्यां कृष्णपक्षे समागमत्। ज्येष्ठशुक्लतृतीयायां वामदेवस्य संभवः॥ पौर्णमास्यां तु तस्येव कौर्मः प्रववृते नृप। कृष्णपक्षे तृतीयायामाग्नेयः समगच्छत॥ पंचदश्यां तु कृष्णायां पितृकल्पः समागमत। शुक्लां चतुर्थीमायाते[1] प्राप्यराथन्तरोऽभवत्॥ चतुर्थ्यां तस्य कृष्णायां सोमकल्पः समापतत्। श्रावणे शुक्लपंचम्यां रौरवः समवर्तत॥ तस्यैव कृष्णपंचम्यां मानवः प्रत्यपद्यत। षष्ठीं प्रौष्ठपदे शुक्लां प्राप्य प्राणाभिधोऽभवत्॥ सितेतरायां षष्ट्यां तु तस्य तत्पुरुषाह्वयः। वृहत्कल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य तु॥ कृष्णायामपि वैकुण्ठ प्रविवेश विशांपते। कार्तिकस्य सिताष्टम्यां कल्पः कन्दर्पसञ्ज्ञकः॥ असितायां पुनर्जज्ञे लक्ष्मी कल्पस्य कल्पना। मार्गे शुक्लनवम्यां तु कल्पः सद्योऽभ्यपद्यत॥ असितायां तु सावित्री कल्पः प्रारम्भमभ्ययात्। पौषे दशम्यां शुक्लायामीशानः प्रादुरास ह॥ असितायामघोरस्य कल्पस्योपक्रमोऽभवत्। एकादश्यां तु शुक्लायां माघे व्यानः प्रजग्मिवान्॥ तस्यामेव तमिस्रायां वाराहः

---

[1] माषाढ़े इति ‘ख’ पाठः।

प्रत्यभूयत । सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य च ।। कृष्णायामपि वैराजो विरराज महामनाः ।'' इति । "त्रिंशदमी कल्पास्तिथयः परमेष्ठिनः । आरंभतिथयस्तासु शुक्लाः पुण्यतमा मताः ।। तासु श्राद्धे कृते पुण्यामाकल्पस्थाऽपि कल्पते ।।" इति । एतत्कर्त्तुमसमर्थमानवे—"ब्राह्मणो यद्दिनादर्वाक् कल्पस्यादिः प्रकीर्तिता । वैशाखस्य तृतीयायां कृष्णायां फाल्गुनस्य च ।।" पंचमी चैत्रमासस्य तस्यैवां नत्या[1] अमात्यां तथापरा । तस्यैव चैत्रस्यैव पराकल्पादिरित्यर्थः। "शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी । नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ।। कल्पानामादयो ह्येतादत्तस्याक्षयकारिका ।" इति । अत्र पक्षविशेषानुपादाने शुक्लोज्ञेयः । अत्र श्राद्धादिमहाफलं, तत्र शुक्लाः पौर्वाह्णिक्यः कृष्णा आपराह्णिक्य इति युगादिवदष्यवस्था । अत्र ब्रह्मपूजोक्ताहेमाद्रौविष्णुधर्मोत्तरे । "चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत् । तदह्निब्रह्मणः कृत्वा सोपवासस्तु पूजनम् ।। संवत्सरमवाप्नोति सौख्यानि भृगुनन्दन ।" इति । स्मृतिकौस्तुभे तु इयमेव मत्स्यजयन्तो कृते च प्रभवे चैत्रे प्रतिपच्छुद्धपक्षगा–

"रेवत्यां योग विष्कम्भे दिवाद्वादश नाडिकाः ।
मत्स्यरूपी कुमार्यां तु अवतीर्णो हरिः स्वयम् ।।"
इति मात्स्त्यादित्युक्तम् ।

वैशाखकृष्णप्रतिपन्नारसिंहकल्पादिः । ज्यैष्ठशुक्ल प्रतिपत्करवीरव्रते दिनोदयव्यापिनी–

"ज्यैष्ठे मासि सिते पक्षे प्रथमेऽह्नि दिनोदये ।
देवोद्यानभवं हृद्यं करवीरं समर्चयेद् ।।"
इति भविष्योत्तरात् ।

अस्यामेव दशहरास्नानाद्यु[2]क्तमारम्भः इति क.शी खण्डे–

"ज्यैष्ठे मासि सिते पक्षे प्राप्याथ प्रतिपत्तिथिम् ।
दशाश्वमेधस्नानादिमुच्यते सर्वपातकैः ।।

एवं सर्वासु तिथिषु क्रमलः[3] पीनरोत्तमः ।
आशुक्लपक्षदशमी प्रतिजन्माद्यमुत्सृजेत् ।।

इति भाद्रपदशुक्लप्रतिपन्महत्तमाख्ये शिवव्रते पूर्वविद्धा सायाह्नमात्रव्यापिन्यपिग्राह्या । तदुक्त निर्णयामृते ब्रह्मवैवर्त्ते–

"रुद्रव्रतेषु सर्वेषु कर्त्तव्या सन्मुखी तिथिः ।" इति

---

[1] तस्यैवां अन्त्या अमा तथा परा इति 'ख' पाठः ।

[2] स्नानाद्यारम्भ इति ख पाठः ।

[3] क्रम स्थायी नरोत्तमः इति 'ख' पाठः ।

तदेव मौनव्रतमित्युच्यते । आश्विनशुक्लप्रतिपद्याचाराज्जीवत्पितृकेण दौहित्रेण महालयापरपक्षनिमित्तकं मातामहश्राद्ध कार्यम् । तदुक्तं हेमाद्रौ संग्रहे च–

"जातमात्रोऽपि दौहित्रो विद्यमानेऽपिमातुले ।
कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ।।"

इति जातमात्रोऽधिकारी जात इत्यर्थः ।

"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ।"

इत्यत्रेवाधिकारो जायमान इत्यर्थः । तेनोपनयनात्प्रागेतच्छ्राद्धानुष्ठानमिदानीन्तनानां दुराचारएवेति मयूखे, इयं संगव्यापिनी ग्राह्या ।

"प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणम् ।
श्राद्धं मातामहं कुर्यात्सपिता संगवे सिते ।।"

इति वचनादित्युक्तं निर्णयदीपे ।

एतद्वचनं निर्मूलमिति सर्वनिबन्धकाराः । तेन पार्वणश्राद्धत्वादत्रापराह्णव्यापिनी ग्राह्या । अत्र च सपत्नीकानां मातामहानां देवतात्वं [1]अमावस्याश्राद्धाद्यन्तर्गतमातामहपार्वणवदिहापिसत्यपि पितृपार्वणविकृतित्वे सपत्नीकत्वगुणलम्भकस्य प्रमाणस्य स्वभर्तृपिण्डमात्रेभ्यस्तृप्तिरासां यतः स्मृतेत्यस्यानेन प्रतिबन्धासंभवात् । इदं मलमासे न कार्यं "स्पष्टमासविशेषाख्या विहितं वर्जयेन्मलः" इति निषेधात् एतज्जीवत्पितृकेणैव कार्यमिति शिष्टाः । इदं च शिष्टाचारात्सपिण्डकं कार्यमिति केचित् । पिण्डरहितं तु युक्तंजीवत्पितृकस्य–

"मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।
न जीवत्पितृकः कुर्याद्गुर्विणी पतिरेव च ।।

इति दक्षेण पिण्डनिषेधादान्वष्टक्यवद्विशेषवचनाभावाच्च पिण्डदानरहितं कार्यमितिकेचित् । अन्ये तु न जीवत्पितृकं प्रति पिण्डदानमात्रमनेन निषिध्यते । किन्तु–

"दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम् ।।" इति

पित्र्यं जीवत्पितुर्नेष्टमित्यादिवचनैकवाक्यतया श्राद्धमेव निषिध्यते । एवं च तत्र विशेषवचनप्राप्तं श्राद्धं सपिण्डमेव भवतीत्याहुः । अस्यामेव प्रतिपदि शरन्नवरात्रारम्भः ।

हेमाद्रौधौम्यः– "आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ।।

---

१. द्रष्टव्यमिति ख पाठोऽधिकः ।

तत्र प्रातःकालव्यापिनी तिथिः ग्राह्या। तथा च तिथि तत्त्वे देवीपुराणे–

"प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च सम्पूज्य प्रातरेव विसर्जयेत्॥"

अत्र प्रातः शब्दो दशघटिकापरः। तथा च भविष्ये–

भास्करोदयमारभ्य यावत्तु दशनाडिकाः।
प्रात.काल इति प्रोक्तः स्थापनारोपणादिषु॥" इति। एवं
"आश्विनस्य सिते पक्षे नवरात्रमुपोषितः।
सुस्नातस्तिलतैलेन पूर्वाह्णे पूजयेच्छिवम्॥"

इति देवीपुराणवाक्ये तु पूर्वाह्णशब्दोऽपि प्रातःकाल पर एव। तत्रापि 'कर्मणो यस्य यः काल०" इति वाक्यान्मुहूर्तमात्रसत्वेऽपिदिनेगौरीव्रतं परे" इति-। यथागौरीव्रते मुहूर्त्तशब्द उपलक्षणं न तथा प्रकृतेऽपीतिसमानाधिकरण एव दृष्टान्त इति भावः।

मुहूर्तमात्रा कर्त्तव्या द्वितीयादि गुणान्विते"त्यादिवाक्येषु मुहूर्त्तशब्दस्योपलक्षणत्वे मानाभावादमायोगस्य निंदितत्वाच्च मुहूर्तमात्राऽपि द्वितीया युक्तैव प्रतिपद् ग्राह्या। न तु प्रतिपद्यप्यमावास्येति युग्मवाक्यात्पूर्वा विशेषशास्त्रस्य युग्मवाक्यबाधकत्वान्मुहूर्त्तान्यूनत्वे तु परा न ग्राह्या। गौडास्तु मुहूर्त्तोऽत्र घटिकेत्याहुः। निर्णयसिंधुकारास्तु–द्विमुहूर्त्ता चेत्परैव ग्राह्या।

"व्रतोपवास[2] विषये घटिकैकाऽपि या भवेत्॥"

इति देवलवचने घटिकैकेत्यस्य द्विमुहूर्तस्तुतित्वोक्तेः, उदिते दैवतं भानावित्यत्र द्विमुहूर्त्ता त्रिरह्नश्चेति वचनादौदयिक्या द्विमुहूर्ताया एव ग्राह्यत्वनियमनाच्च तेनोदये द्विमुहूर्त्तापीत्याद्यनुसारोऽपि मुहूर्त्तमात्रा कर्त्तव्येति तु द्विमुहूर्त्तस्तुतिरित्याहुः। केचित्तु– "प्रतिपत्त्रिमुहुर्त्ता चेत्परैव ग्राह्या। ततो न्यूनत्वे त्वमाविद्धाऽपि पूर्वैव उदये द्विमुहूर्त्तापीत्यादिवचांसि[3] तु त्रिमुहूर्त्तविधमेव स्तुवन्ति। यत्तु वदन्ति घटिकामुहूर्त्तवचसां द्विमुहूर्त्तस्तावकत्वं न तु द्विमुहूर्त्तवचसस्त्रिमुहूर्त्तस्येति तन्न, प्रमाणाभावात्। न हि वैश्वा..राधिकरणऽष्टाकपालादिकास्तुतिर्नवकपालस्यैव न द्वादशकपालस्येति युक्तिमत्। यदप्याहुरुदये द्विमुहूर्ताऽपीत्यादि[4] तदपि विपरीतम्। [5]अपि शब्दस्य स्वार्थे तात्पर्याभावादित्यप्याहुः। उदयकालिक

---

१. इति वन् इति पाठोऽधिकः 'ख' पाठे।

२. नियमे इति उल्लेखः 'ख' पाठे।

३. वचनानि इति 'ख' पाठः।

४. पीत्याद्यनुसार इति 'ख'।

५. द्विमुहूर्तापि ग्राह्या किं पुनस्ततोऽधिका त्रिमुहूर्तें इत्यत्र तात्पर्यात् यथाश्वादोपि सद्यः सवनाय कल्पत इत्यादो इति पाठः ख पाठेऽधिकः।

तिथेः सविस्तरपूजाऽपर्याप्तत्वे पंचोपचारैः संक्षेपपूजैव कर्त्तव्या । [1]यच्चोक्तं कालिकापुराणे क्षेपपूजा तथा वस्त्रादिकं पुनरिति या पूर्वदिने षष्टिदण्डा भूत्वा परदिने त्रिमुहूर्ताऽपिवर्धते । सा सम्पूर्णत्वादमायोगाभावाच्च पूर्वैव ग्राह्या ।

"आदित्योदयवेलायामारभ्य षष्ठिनाडिकाः ।
तिथिस्तु सा हि शुद्धास्यात्सार्वतिथ्यो ह्ययं विधिः ॥"
इति नारदीयात् ।

द्वितीया शेषसंयुक्ता प्रतिपच्चन्द्रिकार्चने ।
मोहादथोपदेशाद्वा कृता पुत्रविनाशकृत् ॥

इत्यादीनि द्वितीयायोगनिषेधकानि लल्लसंहितादिवचनान्यपि शुद्धादिकनिषेधपराणि । परदिनप्रतिपदोऽत्यन्तासत्त्वे तु प्रतिपदप्यमावस्येति युग्मवाक्याद्दर्शयुतैव ग्राह्या ।

"न दर्शकलया युक्ता प्रतिपच्चन्द्रिकार्चने ।
उदये मुहूर्त्ताऽपि ग्राह्या सोदयगामिनी ॥"
इति अमायोगनिषेधकानि ।

देवीपुराणादिवचनात्तु—"प्रतिपदः खण्डत्वे पूर्वविद्धानिषेधकानि बोध्यानि । यत्तु कैश्चिदुक्तममायोगनिषेधकानि द्वितीयायोग निषेधकानि च वचनानि निर्मूलानि । समूलत्वेऽपि वा परस्परं सत्प्रतिपक्षत्वादनिर्णायकानीति । तत्प्रौढिवादमात्रम् । प्रत्यक्षतो देवीपुराणे सर्वेषामेवोपलम्भात् ।

[2]साध्याभावसाधकं हेत्वन्तरं यत्र स सत्प्रतिपक्षः ।
"उपवासेऽपि परैव पूर्वाह्णे पूजयेच्छिवाम् ॥"

इत्यादि हेमाद्र्युदाहृतवाक्यैः पूजायाः परदिने विधानादुपवासस्य च तदंगत्वेन तदनुरोधेन[3] खण्डा प्रतिपत्प्रदोषव्यापिनी ग्राह्या । नक्तव्रतत्वं च न नक्तभोजनरूपत्वेन एव[4] तु विन्ध्यवासिन्यां नवरात्रोपवासतः "एकभक्तेन नक्तेन स्वशक्त्याऽयाचितेन च' इतिवचनात्पक्ष उपवासैकभक्तादीनामपि संभवान्नक्तस्य पाक्षिकत्वादंगत्वाच्च । किन्तु पूजारूपस्य प्रधानस्य रात्रिपर्यायनक्तकालसाध्यत्वात् । रात्रिगालत्वं च "निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः" इत्यादिसामान्यवचनात् ।

---

१. सच्चोक्तं इत्यारभ्य पुनरिति पर्यन्तः पाठः ख पाठे नास्ति ।
२. उक्त पाठः ख पाठे नास्ति ।
३. निर्णयात् स्मृतिकौस्तुभकालतत्वविवेचनकारादयस्तु माधवहेमाद्र्याद्युक्तनक्तव्रतत्वानुरोधेन इति पाठः 'क' पाठे नास्ति ।
४. उक्त पाठ अधिकः ख पाठात् ।

"आश्विनेमासि [1]मेषान्ते महिषासुरमर्दिनीम् ।
निशासु पूजयेद्भक्त्या सोपवासादिकं क्रमात् ॥"

इत्यादिविशेषवचनेभ्यश्चावगम्यते । एव च पूजारूपस्य प्रधानस्य रात्रिकालत्वे स्थिते "कर्मणो यस्य यः काल" इति वचना"त्प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा" इत्यादिवचनाच्च प्रदोषव्यापिनी प्रतिपन्नवरात्रव्रतेग्राह्या । अयमेव निर्णयो द्वितीयादिषु रात्रिपूजने द्रष्टव्यः । तत्र पूर्वदिन एव प्रदोषव्याप्तौ पूर्वा । एतद्विषयाण्येव–

अमायुक्तैव कर्त्तव्या प्रतिपच्चण्डिकार्चने ।
न ग्राह्या परसंयुक्ता शुद्धसंतानकांक्षिभिः ॥"

इत्यादिभिर्नृसिंहप्रसादोदाहृतवचनैः[2] ।
द्वितीयाशेषसंयुक्तेत्यादिवचनानि च । इतरपक्षेषुतूत्तरैव एतद्विषयाण्येव,

"मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता"

इत्यादीनि द्वितीयायुक्तविधायकान्यमायुक्तनिषेधकानि वचनानि ।

"दिनदर्शकलया युक्ता प्रतिपच्चण्डिकार्चने ।"

इति वचनस्य दिनद्वये तदव्याप्तौ सत्यां दर्शस्य सायाह्न व्यापित्वेन कलाशब्देन सह विरोधोऽतो द्विमुहूर्त्ताऽपि ग्राह्या । किं पुनस्ततोधिकेति कैमुत्यन्यायेन प्रदर्शनान्न दर्शकलया युक्तेत्यादौ कलादिशब्दा अपि बहुमुहूर्त्तोपलक्षणाद् दर्शकलयापि, विद्धा प्रतिन्न गृह्यते किं पुनरधिकयेत्यर्थपर्यवसानात्कलादिशब्दा अविरुद्धा इत्यर्थः । मुहूर्त्तापीत्यापिशब्देन कैमुत्यन्यायप्रदर्शनात्कलादिशब्दा अविरुद्धाः । यत्त्वाद्यास्तु नाडिकास्त्याज्याः षोडशद्वादशापि वा ।

"अपराह्णे च कर्त्तव्यं शुद्धसन्ततिकांक्षिभिः ।" इतिवचनं
"तदाद्याः षोडशनाडीस्तुलब्ध्वा यः कुरुते नरः ।
कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवम् ॥"

इति वचनान्तरैक्यवाक्यतया कुलाचारप्राप्तकलशस्थापनविषयमित्येवमाहुः ।

श्रीरामकल्पद्रुमकारास्तु–यत्तु माधवाचार्यैर्नवरात्रव्रतस्य नक्तव्रतत्वमुक्तम्-

"तदेकभक्तेन नक्तेन [3]तृप्त्यैवायाचितेन च ।
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥"

---

१. मेषान्ते इति ख पाठः ।

२. वचनानि इति ख पाठः ।

३. तथैवायाचितेन च इति ख पाठः ।

इत्युपवासप्रतिनिधिभूतनक्ताभिप्रायेण, न तु नक्तव्रतत्वाभिप्रायेण। तथात्वे-एवं च विन्ध्यवासिन्यां नवरात्रोपवासत इत्यादेरनुपपत्तेः। अतश्चोपवासप्रतिनिधेस्तिथिः स्यादुपवासवदिति वचनात्पूजाद्यनुसारेण निर्णयाच्च नक्तव्रतेऽपि द्वितीयैव प्रतिपन्नत्वमायुक्तं [1]तिष्ययमित्याहुः। प्रतिपदि चित्रावैधृतियोगे सति तदन्ते कलशस्थापन कुर्यादित्युक्तं देवीपुदाणे।"

"त्वाष्ट्रवैधृतियुक्ता चेत्प्रतिपच्चण्डिकार्चने।
तयोरन्ते विधातव्यं कलशारोपणं गुहा॥" इति।

यदा तु चित्रावैधृतिरहिता प्रतिपन्नलभ्यते तदा कात्यायनेनोक्तम्—

"प्रतिपद्याश्विने मासि भवो[2] वैधृतिचित्रयोः।
आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम्॥"

भविष्येऽपि—

"चित्रावैधृतिसंयुक्ताप्रतिपच्चेद्भवेन्नृपः।
त्यज्या ह्यंशास्त्रयस्त्वाद्यास्तुरीयांशे तु पूजनम्॥"

रुद्रयामले—

"संपूर्णा प्रतिपदेव चित्रायुक्ता यदा भवेत्।
वैधृत्याद्यापि युक्ता स्यात्तदा मध्यं दिनेरवौ॥
अभिजित्तु मुहूर्त्तं यत्तत्र स्थापनमिष्यते।" इति

द्वितीयायोगेऽप्रतिप्रसव[3]दुक्तं दुर्गोत्सवे।

"भद्रान्विता चेत्प्रतिपत्तु लभ्यते, विरुद्धयोगैरपि संगतासती।
सैवापराह्णे विबुधैर्विधेया, श्रीपुत्रराज्यादिविवृद्धिहेतुः॥"

इति रात्रौ चित्रावैधृत्योरन्तलाभेऽपि कलशस्थापनं तु दिवैव कार्यम्।

"न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनम्।"
इति मात्स्योक्तेः।

केचित्तु—वस्तुतस्तु चित्रावैधृतिनिषेधेन[4] ह्यवस्थायां च मूलं चिन्त्यमेवेत्याहुः। अत्रकेचिन्नवरात्रशब्दो न वाऽहोरात्रपरः वृद्धौ समाप्तिरष्टम्यां ह्रासे अमायुक्ताया प्रतिपत्तस्या निशि रात्रौ, नवचंण्ड्याः प्रारम्भमित्यर्थः ह्यंप्रति-

---

[1] आयुक्त इति ध्येयम् इति ख पाठः।
[2] संभव इति ख पाठोऽधिकः।
[3] उक्तो इति ख पाठः।
[4] तद्व्यव इति ख पाठः।

पन्निशि । "प्रारम्भो नवचंड्यास्तु नवरात्रमतोऽर्थवत्" इति देवीपुराणादित्याहुः । तन्न अत्रातिह्लासवृद्धिपदाभ्यां प्रतिदिनं जायमानावपचयोपचयौ ग्राह्यौ । ह्लासवृद्ध्योर्न्यूनाधिकत्वापत्तेरवृद्धौ समाप्तिरष्टम्यामिति वचनं निर्मूलमिति भावः । अत्र मूलाभावाच्च तेन तिथिवाच्येवाय, तदुक्तम्–

"तिथि वृद्धौ तिथिह्लासे नवरात्रमपार्थकम् ।
अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षये ।।" इति ।

स च नवरात्रशब्दः क्वचिल्लक्षणया कर्मवाचो, यथा प्रारंभो नवरात्रस्येत्यत्रेति दिक् । तिथिह्लासे तंत्रेणोपवासस्तिथिद्वयनिमित्तं पूजादिमहालयश्राद्धवदेकदिने आवृत्त्या कार्यम् । वृद्धौ तद्वदेवावृत्तिरिति निर्णयसिन्धौ । एवमष्टमीनवम्योरपि एककाल कर्त्तव्यत्वेनोपवासवत्पूजापि तंत्रेण कार्येति कालतत्त्वविवेचने । अत्रोपवासादि बहुकर्माभिधानेऽपि प्रधानं देवीपूजनमेव । तत्र तु[1] पूजाया एव फलसम्बन्धश्रवणात् ।

तथा च कालिकापुराणे–

"कृत्वैव परमामायुर्निर्वृत्ति त्रिदिवौकसः ।"
एवमन्यैरपि सदा देव्याः कार्यं प्रपूजनम् ।
"विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम् ।।" इति
"यो मोहादतीतस्य कामान्निष्टान्निहन्ति च" ।[2]

अकरणे प्रत्यवायश्रवणात् पूजाया एव नित्यत्वावगमाच्च ।

"शरत्काले महापूजा क्रियते या च वार्षिकी ।"

इति मार्कंडेयपुराणे ।

पूजाया एव नित्यत्वमवगम्यते । इदं चाश्विनशुक्लप्रतिपदमारभ्याग्रिमनवमीपर्यन्तं कार्यमिति मुख्यः कल्पः । कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकामित्यारभ्य महानवम्यां पूजेयं स्वर्गमोक्षप्रदायिनीति[3] देवीपुराणात् । मुख्यकल्पेऽसमर्थस्य पक्षान्तराण्यप्याह धौम्यः । अथवा नवरात्रं च सप्तपंचत्रिकादिवा

"एकभक्तेन नक्तेनायाचितोपोषितः क्रमात्" । इति ।

अत्र सप्तरात्रपक्षे तृतीयायामारम्भः । पंचरात्रपक्षे पंचम्याम् । तत्र प्रकारविशेषः शास्त्रान्तरे

---

[1] तत्र इति शब्दोंधिकः ख पाठे ।

[2] यो मोहादथवालस्याद्देवीं दुर्गामहोत्सवे, रपूजयति दुष्टात्मा द्वेषाद्वाप्यथ पार्थिवः, क्रुद्धा भगवती तस्य कायानीष्टानि हन्ति वेति पाठः ख पाठेऽधिकः; ।

[3] अन्तात् इति ख पाठोऽधिकः ।

"एकभक्तस्तु पंचम्यां षष्ठ्यां नक्तं प्रवर्तयेत् ।
अयाचितस्तु सप्तम्यां अष्टम्यां स्यादुपोषितः ॥
नवम्यां पारणं कुर्यात्पंचरात्रमितीरितम् ।" इति ।

षष्ठ्यादिपक्षोऽप्युक्तः कालिकापुराणे—

बोधयेद्विल्वलशाखायां षष्ठ्यां देवीफलेषु च ।
सप्तम्यां विल्वशाखां तामाहृत्य प्रतिपूजयेत् ॥

पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्वलिदानं महानिशि ॥

प्रभूतबलिदानं च नवम्यां विधिवच्चरेत् ।
ध्यायेद्दशभुजां देवीं दुर्गां तन्त्रेण पूजयेत् ॥"

सप्तम्यादिपक्षो भविष्यपुराणे—

"व्रती प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये ।" इति ।

अष्टमीनवम्योरेव वा देवीं पूजयेत् ।

"अष्टम्यां च नवम्यां च जन्ममोक्षप्रदां शिवाम् ।
पूजयित्वाश्विने मासि विशोको जायते नरः ॥" इति ।

केवलाष्टमी नवमी च कल्पावुक्तौ कालिकापुराणे ।

"वस्त्वेकस्यामथाष्टम्यां नवम्यां वाऽथ साधकः ।

पूजयेद्वरदां देवीमिति ब्रह्मपुराणेऽपि केवलाष्टमी पूजोक्ता ।

"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनी कोटिभि सह ॥
अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवैः ।
उपोषितैर्धूपदीपवस्त्रैर्माल्यानुलेपनैः ॥" इति ।

अत्र च न चतुर्णामिव वर्णानामधिकारः किन्तु म्लेच्छादीनामपीत्युक्तं भविष्योत्तरे—

एवं च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन स्वशक्त्याऽयाचितेन वा ॥

पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
गृहे गृहे भक्तियुक्तैः[1] ग्रामे ग्रामे वने वने ॥
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ।
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥

---

१. भक्ति परैः इति ख पाठः ।

स्त्रीभिश्च कुरु शार्दूल ! तद्विधानमिदं श्रृणु ।" इति ।
स्कान्दे भविष्ये च त्रिविधापूजाऽभिहिता ।
"शारदी चण्डिका पूजा त्रिविधा परिगीयते ।
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।।

राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा ।
सुरामांसाद्युपहारैर्जपयज्ञैर्विना तु या ।
विना मंत्रैस्तामसी स्यात्किरातानां च सम्मता ।। इति ।

अत्र सात्त्विकपूजाविधानं ब्राह्मणविषयं, राजसीविधानं क्षत्रियवैश्यशूद्रादिविषयं, एवं च त्रयाणां वर्णानां जपयज्ञाधिकारे सति शक्ता स्वयं कुर्युरशक्तास्तु ब्राह्मणद्वारा कारयेयुः ।

"स्वयं वाऽप्यन्यतो वापि पूजयेत्पूजयीत वा ।"

इति देवीपुराणात् । शूद्रस्तु जपादिं ब्राह्मणद्वारैव कारयेत् । यत्र तु समंत्रकपूजाविधानेऽपि स्पष्टं वचनमुपलभ्यते । तत्र तु निषादरौद्रं चरुं निर्वपेन्निषादस्थपतिं या जयेन्नात्र निषादस्थपतिपदे बहुव्रीहितत्पुरुषावन्यपदार्थपूर्वपदयोर्लक्षणापत्तेः ।

किन्तु लाघवात्कर्मधारयस्तदानीं तस्यानधिकारित्वेऽपि यागेऽधिकारः पूर्वमीमांसायां षष्ठे निरूप्यत इत्यलं पल्लवितेन ।

स्थपतिवदस्त्वधिकारः साक्षादेव शूद्रस्य किरातम्लेच्छादीनामपि शूद्रवद्वचनादधिकारो ब्राह्मणद्वारा समन्त्रकपूजायां जपे होमे च, किन्तु तैस्तदुपचाराणां सुराद्युपहारसहितानां पश्वादिबलीनां च मनसोत्सर्गमात्रं देवीमुद्दिश्य विधेयं विस्तरेण पूजाऽशक्तावुदयकालिकतिथेः सविस्तरपूजाऽपर्याप्तत्वे च पंचोपचारैरेव पूजयेत् ।

"सम्यक्कल्पोदितां पूजां यदि कर्त्तुं न शक्नुयात् ।
उपचारांस्तथा दातुं पंचैतान्विचरेत्तदा ।।

गन्धपुष्पं च धूपं च दीपं नैवेद्यमेव च ।
अभावे तोयपुष्पाभ्यां तदभावे तु भक्तितः ।।

संक्षेपपूजा कथिता तथा वस्त्रादिकं पुनः ।।"

इति कालिकापुराणात् ।

तत्रापि प्रातर्मध्याह्नयोः संक्षेपपूजनं तु रात्रावेव रात्रौ शक्तिपूजनस्य फलाधिक्यात् । अष्टम्यां च विशेषतो रात्रौ पूजा कार्या । "तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेदि"ति वचनात् । इदं च नवरात्रव्रतं शुक्रास्तादावपि कार्यम् । तथा च धर्मप्रदीपे—

नष्टे शुक्रे तथा जीवे सिंहस्थे च बृहस्पतौ ।
कार्या चैव स्वदेव्यर्चा प्रत्यब्दं कुलधर्मतः ।।" इति ।

आद्यारम्भस्तु तत्र न भवति । तदुक्तम् मयूखे विश्वरूपनिबन्धे–

"आद्यारम्भे विरामः स्याद्द्वितीयादौ न चिन्तयेत् ।"

इति [1]अत्रोदाहृतत्वान्मलमासे तु द्वितीयाद्यारम्भोऽपि न भवति । तथा चोक्तं विश्वरूपनिबन्धे ।

"मलमासे न कर्त्तव्यं न वै दुर्गोत्सवव्रतम् ।"

इति अत्र नव च ताः दुर्गाश्चेति व्युत्पत्तिः । अत्राशौचे विशेषे निर्णयामृते विश्वरूपनिबन्धे–

"आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ।
शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः ।।

देवीपूजा प्रकर्त्तव्या पशुयज्ञविधानतः ।
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ।।

देवीमुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते ।। इति ।

गौडनिबन्धे तिथितत्त्वेऽप्युक्तं–"आश्विनकृष्णनवम्यादि शुक्लप्रतिपदादि-षष्ट्यादि सप्तम्यादि चैकं कर्म । अतश्च मध्ये आशौचपातेऽपि न दोषः । संकल्पो व्रतसत्रयोरिति विष्णूक्तेः । "आरब्धं स्वयमेव कार्यमनारब्धं त्वन्येन कारयेत्" इति दिवोदासः । प्रपितामहचरणास्तु–

"सूतके मृतके वापि वर्तमाने तु नारद ।
कामतः पूजिते मंत्रे शान्तिकादौ च कुत्रचित् ।।

जपेत्पंचशतं मंत्री सिद्धमन्त्रं च भक्तितः ।
शतत्रयमकामा च प्रायश्चित्तविधौ जपेत् ।।"

इति नारदपंचरात्रवचने नैमित्तिक-काम्य-तांत्रिकपूजायां विप्राणामप्यनधिकारात्–

सूतकात्प्राक्तनमारब्धमनेकाहन्तु यद्व्रतम् ।
कायिकं तत्तु [2]कर्त्तव्यं न तु दानार्चनं जपम् ।।

सूतकाहेतुर्यत्किंचिद्दानाद्यन्तरितं भवेत् ।
सूतकानन्तरे त्वह्नि तत्कर्त्तव्यमतन्द्रितैः ।।"

---

१. उक्त पाठः ख पाठे नास्ति ।
२. कुर्वीत इति 'ख' पाठः ।

इति कृत्यरत्नावल्युदाहृतमात्स्याच्च सूतकिभिः पूजनं कार्यं प्रतिनिधि द्वारा तु कार्यमेव । विश्वरूपनिबन्धादिवचनं तु णिजर्थान्तर्भाविणान्यद्वारा पूजा कारणीयेत्यर्थकत्वेन व्याख्येयम् । अतएव सूतके शिष्टंः पूजनं न क्रियते इत्याचारोऽपीत्याहुः । भट्टोजीदीक्षिता अप्येवं 'रजस्वला त्वन्येन कारयेत् सूतकादिवद्विशेषवचनाभावात् स्त्रीणां च नवरात्रे ताम्बूलचर्वणादिर्भवति' इति परिभाषया इष्टव्यम् । अस्यामेव शाश्वस्याश्च पूजनमुक्तं मदनरत्ने देवीपुराणे–आश्वयुक्तशुक्लप्रतितस्वातियोगे शुभे दिने पूर्वमुच्चैः श्रवानां प्रथमं श्रियमावहेत् । तस्मा" त्साश्वैर्नरैस्तेऽत्र पूज्यौ सौश्रद्धया सह । पूजनीयाश्च तुरगाः नवमी यावदेव हि" इति । अत्रैव प्रतिपदाद्यष्टमीपर्यन्तं जयार्थिना नृपेण लोहाभिसारिकाख्यं कर्म कर्त्तव्यम् । तथा च भविष्योत्तरे—

"जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।
लोहाभिसारिकं कर्म कारयेद्यावदष्टमीम् ॥"

इति कार्त्तिकशुक्लप्रतिपत्पूर्वविद्धा ग्राह्या ।

"श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिबलेर्दिनम् ॥"

इति बृहस्पतिवच[1]नोक्तैः ।

हेमाद्रौ स्कान्दे–

"प्रातर्गोवर्धनः पूज्यो द्यूतं चापि समाचरेत् ।
पूजनीयास्तथा गावस्त्याज्ये वाहनदोहने ॥

ब्राह्मे तस्मात्द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ।
तस्मिन् द्यूते जयो यस्य[2] संवत्सरं जयस्तदा ॥

पराजये विरुद्धं तु लब्धनाशस्ततो भवेत् ।
दयिताभिश्च सहितैर्नेया सा च भवेन्निशा ॥ इति ।

गोक्रीडनादि तु–यस्यां प्रतिपदि षण्मुहूर्त्तव्यापिनी द्वितीया भवति, तत्र चन्द्रदर्शनदोषात् पूर्वप्रतिपदि कार्यम् ।

"गवां क्रीड़ादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून हन्ति सुरभीपूजकाँस्तथा ॥" इति ।

पुराणसमुच्चयोक्तेः ।

"प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् ।
परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः ॥" इति ।

---

[1] इति बृहद्यमोक्तेः इति 'ख' पाठः ।
[2] तस्य इति ख पाठोऽधिकः ।

देवलवचनाच्च चन्द्रदर्शनपर्यन्तं प्रतिपद्वृद्धौ तु परञ्चैव कार्यम् ।

"त्रियामिकादर्शतिथिर्भवेच्चेत्, सार्द्धत्रियामाप्रतिपद्विवृद्धौ ।
दीपोत्सवे ते मुनिभिः प्रदिष्टे, अतोऽन्यथा पूर्वयुते विधेयः ।।" इति ।

निर्णयामृते वचनात् । दिनद्वये सायाह्नव्यापित्वे तु परैव ग्राह्या ।

"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका ।
द्वितीया वृद्धिगामित्वादुत्तरा तत्र चोच्यते ।।"

इति वचनात् दिनद्वये प्रतिपदः सायाह्नव्याप्त्यभावे तु पूर्वैव रात्रौ बलिपूजाविधानेन कर्मकालव्यापित्वात् परदिने चन्द्रोदये तन्निषेधात् गोवधनश्च गोमयमयो गणे कार्यश्चित्रैवेति निर्णयसिधुकाराः ।

स्मृतिकौस्तुभे तु – "प्रातर्गोवर्धनः पूज्यो द्यूतं चापि समारभेत्" इति गोवर्धनपूजाविधौ पठितमपि तस्यामिव द्यूते द्वितीयावेधप्रयुक्तापवादाभावात्परदिन एव कार्यमित्युक्तं—नारी कर्तृकनीराजनमंगलमालिके तु मुहूर्त्तमात्रायामपि द्वितीया-विद्धायामेव प्रतिपदि कार्ये न तु स्वल्पामायुक्तायाद्यपि पूर्वस्यां, लभ्यते यदि वा प्रातः प्रतिपद्घटिकाद्वयं तस्यां नीराजनकार्यं–'साय मंगलमालिके' ति भविष्यपुराणात्—

"कार्त्तिके शुक्लपक्षादावमावस्याघटीद्वयम् ।
देशभङ्गभयान्नैव कुर्यान्मंगलमालिका ।।"

इति देवीपुराणेऽमावस्यायुक्तायां प्रतिपदि निषेधाच्च । अत्र तैलाभ्यंगो नित्यः, वत्सरादाविति वृद्धवसिष्ठोक्तेः । तत्र पूर्वविद्धा ग्राह्या, वलिराज्ये तस्योक्तेः । 'बल्युत्सवे च पूर्वेद्यु' रितिवचनेन च बल्युत्सवे पूर्वविद्धाया एव पूर्वग्राह्यत्वोक्तेः । यत्तु तिथ्यर्के—

"नन्दायामुदयेऽभ्यंगं कृत्वा नीराजनन्ततः ।
सुवेषः सत्कथागीतैर्दानैश्च दिवसं नयेत् ।।" इति ।

इति वचनादभ्यगे उत्तरविद्धा ग्राह्येत्युक्तं, तन्न । एतद्वचनस्य हेमाद्र्याद्यादिसकलनिबन्धकारैरलिखनान्निर्मूलत्वात् । मार्गशीर्षकृष्णप्रतिपदि कृत्यं [1]तिर्थिमत्वे भविष्ये—

"रोहिणी प्रतिपद्युक्ता मार्गे मासि सितेतरा ।
गंगायां यदि लभ्येत सूर्यग्रहशतैः समा ।।" इति ।

---

[1] तत्वे इति 'ख' पाठः ।

[1]चैत्र[2]कृष्णप्रतिपदि वसंतोत्सवः । तत्रौदयिकी सा ग्राह्या । 'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ ।" इति भविष्योक्तेः । दिनद्वये तथात्वे पूर्वा वत्सरादौ वसन्तादाविति पूर्वोक्तवृद्धवसिष्ठवचनादिति केचित् । निर्णयामृते तु चैत्रकृष्णपक्षप्रतिपादि पूर्वविद्धायां नीराजनादिकर्म कर्त्तव्यम् । अस्य च होलिकानन्तरं कर्त्तव्यत्वाद् होलिकायाश्च पूर्वविद्धाया एव प्रशस्तत्वादेतदपि पूर्वविद्धायामेवेत्यवसोयत इत्युक्तम् । तिथ्यर्केऽप्येकम् । कृत्यरत्नावल्यामपि होलिकादीपनाव्यवहितोत्तरदिन ग्राह्यमिति तु युक्तमित्युक्तम् । अस्यामेव प्रतिपदि पूर्वविद्धायाः कौस्तुभमते गोविन्ददोलोत्सव इति फाल्गुनीप्रकरणे वक्ष्यामः । अत्र तैलाभ्यंगो नित्यः वत्सरादाविति पूर्वोक्तवचनादन्यमासप्राप्तसुव्रतादिविशेषोऽपि युग्मवाक्येन पूर्वविद्धायामेव कार्यः । नक्तादिव्रतविशेषे तु तत्कालव्यापिनी ग्राह्येति सिद्धान्तः ।

इति पौण्डरीकयाजिविश्वेश्वररचिते प्रतापभूपाज्ञया प्रतापार्के
विद्वद्विनोदकन्दे मयूख आद्योगतः ।

* * *

---

१. अन्यमासप्रतिपदिव्रतादि विशेषोऽपि युग्मवाक्येन पूर्वविद्धायामेव कार्यः इति 'ख' पाठेऽधिकः ।

२. चैत्रकृष्णा प्रतिपदि इत्यारभ्य ग्राह्येतिसिद्धान्तः यावत् पाठः (पूर्वपठितोऽपि) 'ख' पाठे अत्र नास्ति ।

अथ द्वितीया निर्णयः

तत्र शुक्ला पराकृष्णा तु पूर्वाह्णे चेत्तदा पूर्वा ग्राह्येति हेमाद्रिः । कृष्णद्वितीयादिमापूर्वाह्णे यदि सा सिता तु परतः सर्वेति दीपिकोक्तेः । मदनरत्नेऽपि शुक्ला पराकृष्णापूर्वेत्युक्तम् । माधवस्तूपवासे पूर्वेद्युस्त्रिमुहुर्त्तात्मकप्रातःकालेऽसतीपरदिनेत्रिमुहुर्त्तगा सा पराऽन्या तु सर्वाऽपि पूर्वैवेत्याहुः ।

"पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा ।
सा द्वितीया परोपोष्या पूर्वविद्धा न तेऽ[1]परा ॥" इति तदुक्तेः ।

केचित्तु युग्माग्नीतिवचना–देकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशो ।
त्रयोदशी अमावस्या उपोष्यास्युः परान्विता ॥" इति ।

विष्णुधर्मोत्तराच्च सर्वापि द्वितीया परैवेत्याहुः ।

अथ द्वितीयाविशेषनिर्णयः–

तत्र चैत्रकृष्णद्वितोया काममहोत्सवे पूर्वविद्धा ग्राह्या "प्रतिपत्सद्वितीया स्यात् द्वितीया प्रतिपद्युता ।" इति युग्मवाक्याच्चैत्रशुक्लद्वितीयायामुमाशिवाग्निपूजा कार्येत्युक्तम् भविष्योत्तरे ।

"चैत्रशुक्लद्वितीयायामुमापूजा फलार्थिभिः ।
शिवपूजाग्निपूजा च कर्त्तव्या मुनिसत्तम ॥" इति ।

इयमेव बालेन्दुव्रते नक्तकालीना "घृतेन हवनं कृत्वा नक्तं भुंजीत वाग्यतः" इति लिंगाद्वैशाखशुक्लद्वितीयानीललोहितकल्पादिः । इयमेव कूर्मजयन्ती । सा सायंकालव्यापिनी ग्राह्या ज्येष्ठकृष्णद्वितीयासमानकल्पादिः । ज्येष्ठशुक्ल द्वितीया कल्किजयन्ती । तदुक्तम्–"ज्येष्ठशुक्लद्वितीयायां बौद्धकल्की भविष्यती" ति । इयं सोपपदा, तदुक्तं कालादर्शे—

"सि[2]ता ज्येष्ठद्वितीया च आश्विने दशमी सिता ।
चतुर्थीद्वादशीमाघे एताः सोपपदः स्मृताः ॥" इति ।

---

१. ततो परेति तदुक्तेः इति 'ख' पाठः ।

२. सिता ज्येष्ठद्वितीया च आश्विने दशमी सिता इत्यारभ्य एतन् यते बलभद्रस्यापि अवतारमध्ये गणनं बोध्यमित्यन्तः पाठः ख पाठे नास्ति ।

अत्र वेदाध्ययननिषेधो नारदीये —

"युगादिषु च सर्वासु तथा मन्वन्तरादिषु ।
अनध्यायं प्रकुर्वन्ति तथा सोपपदास्वपि ।।"

इति आषाढशुक्लद्वितीयायां श्रीरामयात्रोत्सवः कार्यः । तथा च स्कांदे—

"आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं सौभभद्रया सह ।।"

यात्रोत्सवप्रवृत्त्यर्थं प्रीणयेच्च द्विजान् बहून् ।
ऋक्षाभावे तिथौ कार्या यात्रा सा प्रीतये मम ।।" इति ।

श्रावणकृष्णद्वितीयासु चतसृष्वप्यशून्यशयनव्रतं, तत्र सा पूर्वविद्धा ग्राह्या । तदाह संवर्त्तः ।

"कृष्णाष्टमी बृहत्तपा सावित्री घटपैतृकी ।
कामत्रयोदशी रम्भादुपोष्याः पूर्वसंयुताः ।।" इति ।

केचित् बृहत्तपाऽशून्यशयनद्वितीया मदनरत्न-कौस्तुभ-निर्णयामृतादिषु तु यदैव चन्द्रोदयव्यापिनी तदैव कार्या ।

"एकभक्ते दिवा नक्त निशिचन्द्रोदयव्रते ।
तिथिस्तात्कालिकी ग्राह्यापारणेत्वपरा तिथिः ।।"

इति स्मृतिसंग्रहवचनाच्चन्द्रोदयव्रतं तु अर्चास्यकंचद्राय चार्घ्यो दातव्यो-दध्यक्षतफलादिभिरिति पुराणान्तरवचनाद्दिनद्वये तत्र सत्त्वेऽसत्त्वे वाऽपरचतुर्थसित-पक्षषु श्रावणादिषु "अशून्याख्यं व्रतं कुर्याज्जयया तु फलाधिकम्' इति वचनादित्युक्तम् ।

अत्र पूर्णिमान्तो मासो ग्राह्य इति हेमाद्रौ भाद्रपदशुद्धद्वितीया बलभद्र-जयन्तीति केचित् । "नभस्येतु द्वितीयायां बलभद्रोऽभवद्धरिः" इति वचनात् । एतन्मते बलभद्रस्याप्यवतारमध्ये गणनं बोध्यम् । अथाश्विनशुक्लद्वितीया स्कंदपुराणे ।

"आश्विने मासि वै पुण्या द्वितीया शुक्लपक्षगा ।
दानं प्रदत्तमेतस्यामनन्तफलमुच्यते ।।" इति ।

कार्त्तिकशुक्लद्वितीया यमद्वितीया । साऽपराह्णव्यापिनी ग्राह्या ।

"ऊर्जेशुक्लद्वितीयायामपराह्णेऽर्चयेद्यमम् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति ।।"

इति स्कन्दपुराणेऽपराह्णे यमपूजाविधानात् तत्र पूर्वदिनएवापराह्णव्यापित्वे पूर्वा, पक्षान्तरेषु तु परैव युग्मवाक्यान्मयूखकृत्यरत्नावल्यादावप्यपराह्णव्यापिनी-ग्राह्येत्युक्तम् । अपराह्णश्चाष्टधाविभक्तदिनपंचमभ.ग इति स्मार्त्तः । द्वेधाविभक्त-

दिनोत्तरभाग इति कृत्यरत्नावलीकाराः । मध्याह्नव्यापिनी पूर्वविद्धा चेयं ग्राह्येति तु हेमाद्रिः । निर्णयामृतेऽपिपूर्वविद्धा ग्राह्येत्युक्तम् । अस्यां भगिनीगृहे भोक्तव्यमिति भविष्ये—

"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर !
यमो यमुनया पूर्वं भोजितः स्वागृहेऽर्चितः ।।"

अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ।
अस्यां निजगृहे विप्र ! न भोक्तव्यं ततो नरैः ।।

स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः ।।

स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः ।
सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नका ।। इति ।

"प्रतिपन्नकाः प्रतिपन्ना भगिनीत्वेनव्यवहृता" इत्यर्थः । मित्रभगिनी इति हेमाद्रिः । पितृव्यभगिन्य इत्यपि हेमाद्रिः । गौड़ास्तु विशेषमाहुः—

"यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् ।
चित्रगुप्तस्य पूजां च कुर्याज्ज्ञानस्य वृद्धये ।।

मषीपात्रं लेखनीं च पूजयेच्च प्रयत्नतः ।
सर्वान् कामानवाप्नोति यमलोकं न पश्यति ।।' इति ।

"मार्गशुक्लद्वितीयायां पितृपूजनकार्यम्—

"वृश्चिके च द्वितीयायां शुक्लायां पितृपूजनम् ।
यो न कुर्याद्विनश्यन्ति भ्रातरः सप्तजन्मगाः ।।" इति ।

लैंगा[1]च्चैत्रकृष्णद्वितीयाकाममहोत्सवे पूर्वविद्धा ग्राह्या ।
"प्रतिपत्सद्वितीयास्या द्वितीया प्रतिपद्युता ।।" इति ।

युग्मवाक्यात् बृहस्पतिवारयुक्तद्वितीयासु विधिपूजनं कृत्वा नक्तं समश्नीयाल्लभते भूतिमुत्तमां विधिर्ब्रह्मा अन्यमासद्वितीयासु व्रतादिविशेषोऽपि युग्मवाक्येन पारविद्धायामेव कार्यः । नक्तव्रतविशेषेषु तत्कालव्यापिन्येवेति सिद्धान्तः ।

इति विश्वेश्वररचिते प्रतापभूपाज्ञया प्रतापार्के विद्वद्विनोदकंदेमतो
मयूखो द्वितीयाख्यः तिथिनिर्णयाख्यो द्वितीयो मयूखः ।

—□—

---

[1] बृहस्पतिवारयुक्ता द्वितीया सुविधि पूजनमुक्तं ब्रह्मपुराणे । बृहस्पतौ द्वितीयायां विधिवद्विधिपूजनं कृत्वा नक्तं समश्नीयात् लभते भूतिमुत्तमाम् इति 'ख' पाठः ।

अथ तृतीया-निर्णयः

सा च रम्भाव्रतातिरिक्तेषूपवासादिसकलदैवकार्येषु चतुर्थीयुतैव ग्राह्या । तदुक्तं ब्रह्मवैवर्त्ते—

"रम्भाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम !
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ।।" इति ।

गणश्चतुर्थी द्वितीयावेधनिषेधो ब्रह्मवैवर्त्ते —

"द्वितीया—शेषसंयुक्तां या करोति विमोहिता ।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः ।।"

अयं च द्वितीयावेधो गौरीदैवत्यव्रतेषु न सामान्यरूपस्त्रिमुहूर्त्तात्मक एव निषेधप्रयोजनः किन्तु दशम्या इव कलाकाष्ठादिरूपोऽपि । अतएव मदनरत्ने स्कन्दपुराणे—

"कलाकाष्ठाऽपि वाचैव द्वितीया संप्रदृश्यते ।
सा तृतीया न कर्त्तव्या, कर्त्तव्या गणसंयुता ।।" इति ।

अतएव च तृतीयाऽपि चतुर्थीयुताऽल्पाप्येकादशीवद्ग्राह्या, न तु त्रिमुहूर्त्तसत्त्वकर्मकाल-व्याप्त्यादरस्तस्यां मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति माधववचनात् ।

केचित्कलाकाष्ठेति स्कान्दा "सर्वप्रकारवेधोऽयमुपवासस्य दूषकः" इति स्मृत्यन्तराद् घटिकैकापि या भवेदिति देवलोक्ते "ग्राह्या त्वौदयिकी घटी परिमिताऽप्यल्पान्विता निन्द्यया तिथ्याद्येऽह्नि चेदिति दीपिकोक्तेऽर्घटिकामात्रापि परा माधवोक्तौ मुहूर्त्तशब्दस्तु योगमात्रस्योपलक्षणार्थं इत्याहुः ।" व्रतान्तरेषु तु सामान्यविधिनिषेधाभ्यां त्रिमुहूर्त्तद्वितीयाविद्धाया एव वर्जनं त्रिमुहूर्त्ताया एव चतुर्थी-युक्ताया ग्रहणं यदा तु चतुर्थीयुक्ता किंचिदपि न लभ्यते तता गौरीव्रतेष्वपि[2] मुहूर्त्तालाभे चेतरेष्वपि द्वितीयायुतापि ग्राह्या । तथा च वृद्धवसिष्ठः—

---

१. कला-काष्ठादि-परिमितापि परेति कौस्तुभे इति 'ख' पाठेऽधिकः ।
२. 'त्रि' इति 'ख' पाठे अधिकः

"एकादशी तृतीया च षष्ठी चैव त्रयोदशी
पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्परेऽहनि ।।" इति ।

रम्भाव्रते तूपवासरूपेऽनुपवासरूपे च द्वितीया विद्धैव ग्राह्या । कृष्णाष्टमी बृहत्तपेति पूर्वोक्तनिगमात् । एवं सति युग्माग्नोति युग्मवचनं रम्भाव्रतविषयमेव ।

अथ तृतीया-विशेषनिर्णयः

तत्र चैत्र-कृष्णा-तृतीया कल्पादिः, चैत्रशुक्लतृतीयायां श्रीरामचन्द्रदोलोत्सवारम्भ उक्तो रामार्चनचन्द्रिकायाम् । गारुडे—

"मधौ शुक्लतृतीयायां जानकीरमणं प्रभुम् ।
राजोपचारैः सम्पूज्य मासमान्दोलयेत्कलौ ।।
दक्षिणाभिमुखं देवं दोलमानसुरेश्वरम् ।
सुपूजितं सकृद्भक्त्या सर्वपापैः प्रमुच्यते ।।
चैत्रे मासि सिते पक्षे तृतीयायां रमापतिम् ।
दोलारूढं समभ्यर्च्य मासमान्दोलयेत्कलौ ।।
दोलारूढं प्रपश्यन्ति ये कृष्णं मधुमाधवे ।
अपराधसहस्रैस्तु मुक्तास्ते नात्र संशयः ।।
दोलारूढस्य देवस्य येऽग्रे कुर्वन्ति जागरम् ।
सर्वपुण्यफलावाप्तिर्निमिषे निमिषे भवेत् ।।
अयं च नित्यः ।
ऊर्जे व्रतं मधौ दोलां श्रावणेऽन्तं तु पूजनम् ।
चैत्रेदमकारोऽयमकुर्वाणो व्रजत्यधः ।।"

इत्यकरणे दोषश्रवणात् । अस्यामेव गौरीमीश्वरयुतां संपूज्यां दोलयेत् तथा च देवीपुराणे—

"तृतीयायां च यजेद्देवी शङ्करेण समन्विता ।
आन्दोलये ततो वत्स ! शिवो मा तुष्टये सदा ।।" इति ।

इयं मुहूर्त्तमात्रापि परा ग्राह्या ।[1] "मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरी व्रतं परे" इति माधवोक्तेः । सत्यपि वैधृत्यादि योगे द्वितीयानिषेध एव बलवान् । तस्य विशेषविषयत्वादिति कौस्तुभे ततो मासमान्दोलयेत् । दाक्षिणात्यस्त्रियस्त्वाचारान्मासपर्यन्तं हिन्दोलके गौरीं पूजयन्ति । अत्रैव सौभाग्यशयनव्रतमुक्तं मात्स्ये ।

---

[1] 'ख' पुस्तके चायं पाठो नास्ति ।

“वसन्तमासमासाद्य तृतीयायां जनप्रिये ।
सौभाग्याय सदास्त्रीभिः कार्यं पुत्रसुखेप्सुभिः ॥” इति ।

तत्रापि परयुतैव । इयं च मन्वादिः, तदुक्तं मत्स्यपुराणे—

“अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिके सिता ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्य त्वमावस्या पौषस्यैकादशी सिता ।
श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा ॥
आषाढे शुक्लदशमी तथा माघस्य सप्तमी ।
कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी तथा ॥
मन्वन्तरादयस्त्वेतादत्तस्याक्षयकारका ।” इति ।

अत्रामावस्याष्टमीव्यतिरिक्तास्तिथयः शुक्ला ज्ञातव्याः । श्रवणशब्दोभदर्शान्तमासाभिप्रायेण । अतएव—“नभस्ये चाष्टमी कृष्णे” ति पूर्णिमान्तमासाभिप्रायेण वचनानन्तरं निर्णयामृते तु मत्स्यपुराणमेवान्यथा पठितम् । “अश्वन्युक्शुक्लनवमीद्वादशी कार्त्तिके सिता ।”[1] इत्यादिपुराणान्तरे त्वाश्विने दशमी शुक्लेति स्थितम् । अत्र च विशेषो युगादिनिर्णये वक्ष्यते । सा च श्राद्धादावपि पूर्वाह्णव्यापिनी ग्राह्ये ति युगादिनिणंये वक्ष्यते । अत्र श्राद्धमुक्तं मात्स्ये—

“कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानां द्विसाहस्रं पितृणां तृप्तिदं भवेत् ।:” इति ।

अधिकमासे शुद्धे चापीदं कर्त्तव्यमित्यपि युगादिनिर्णये वक्ष्यते । अत्र पिण्डदानं नास्ति । तथा च कालादर्शे—

“विषुवायनसंक्रान्तिमन्वादिषु युगादिषु ।
विहाय पिण्ड[2]निर्वाणं सर्वश्राद्धं समाचरेत् ॥” इति ।

मन्वादिश्राद्धं च नित्यम् । एतदकरणे प्रायश्चित्तविधानात् । यथा ऋग्विधाने- “त्वं भुवः प्रतिमंत्रं च शतवारं जले जपेत् । मन्वादयो यदान्यूनाः कुरुते नैव ता

---

१. “तृतीय चैत्र मासस्य तथा भाद्रपदस्य च ।
श्रावणे चाष्टमी कृष्णा, पौषे चैकादशी तथा ॥
सिताषाढस्य दशमी, माघमासस्य सप्तमी ।
श्रावणे चाप्यमावास्या, ज्येष्ठे पञ्चदशी तथा ॥
आषाढ़ी कार्तिकी माघी चैत्री चैव विशेषतः ।”
इति ‘ख’ पाठेऽधिकः ।

२. निर्वापमिति ‘ख’ पाठः ।

यदि । एवं षण्णवतिश्राद्धान्यपि नित्यानि । तेषामयं संग्रहः—अमा–१२, मनु– ४, युग–४, क्रांति–१२, धृति–१३, पात–१३, महालयाः–१६, अान्वष्टक्य च–४, पूर्वेद्युः–४, षण्णवत्यो–९६, अष्टका–४ स्तथेति ।[1] अथ मन्वादिसंख्या, तदुक्तं-मत्स्यपुराणे—

"अश्वयुक् शुक्लनवमी द्वादशी कार्तिके सिता ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्य त्वमावस्या पौषस्यैकादशी सिता ।
श्रावणस्याष्टमीकृष्णा तथाषाढस्य पूर्णिमा ॥
आषाढे शुक्लदशमी तथा माघस्य सप्तमी ।
कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी तथा ॥
मन्वन्तरादयस्त्वेतदितस्या क्षयकारकाः ॥" इति ।

अत्रामावास्याष्टमीव्यतिरिक्तास्तिथयः शुक्ला ज्ञातव्याः । श्रावण-शब्दोऽत्रदर्शान्तमासाभिप्रायेण । अतएव नभस्येवाष्टमीकृष्णेति पूर्णिमान्तमासाभिप्रायेण वचनान्तरम् । निर्णयामृते तु मत्स्यपुराणमेवान्यथा पठितम्

"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिके सिता ।
तृतीया चैत्र मासस्य तथा भाद्रपदस्य च ॥
श्रावणे चाष्टमी कृष्णा पौषे चैकादशी तथा ।
सिताषाढस्य दशमी माघमासस्य सप्तमी ॥
श्रावणे चाप्यमावस्या ज्येष्ठे पंचदशी तथा ।
आषाढी कार्त्तिकी माघी चैत्री चैव विशेषतः ॥"

इति पुराणान्तरे त्वाश्विने दशमीशुक्लेति स्थितम् । अत्र च विशेषो युगादिनिर्णये वक्ष्यते । इयमेवमत्स्यजयन्ती । अत्रैव प्रसंगाद्दशावतारजयन्त्य उच्यन्ते । पुराणसमुच्चये—

"मत्स्योऽभूच्छुतभुग्दिने मधुसिते कूर्मो विधौ माधवे,
वाराहो गिरिजासुते नभसि यद्भू तेसिते माधवे ।
सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे,
रामो गौरिति धावतः परमभूद्रामो नवम्यां मधोः ।
कृष्णोऽष्टम्यां नभसि सितपरैश्चाश्विने यद्दशम्याम् ।
बुद्धःकल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण ।

---

[1] अथ मन्वादि संख्या इत्यारभ्य अत्र च विशेषो युगादि निर्णये एव वक्षते इत्यन्तः पाठः 'ख' पाठे नास्ति ।

अह्नो मध्ये वामनो रामरामौ मत्स्यः क्रोडश्चापराह्णे विभागे ॥
कूर्मः सिंहोबौद्धकल्की[1] भवेयुः कृष्णो रात्रौ कालसाम्ये च पूर्वे । इति

केचित्तु स्फुटान् श्लोकान् पठन्ति । यथा––

चैत्रे तु शुक्लपंचम्यां भगवान् मीनरूपधृक् ।
ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः ॥

चैत्रे कृष्णनवम्यान्तु हरिर्वाराहरूपधृक् ।
नरसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके ॥

मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः ।[2]
माघशुक्लतृतीयायां रामो भार्गवरूपधृक् ॥

चैत्रशुक्लनवम्यां तु रामो दशरथात्मजः ।
नभस्ये तु द्वितीयायां बलभद्रोऽभवद्धरिः ॥

श्रावणे बहुलेऽष्टम्यां कृष्णोऽभूल्लोकरक्षकः ।
ज्येष्ठे शुक्लद्वितीयायां बौद्धःकल्की भविष्यति ॥" इति ।

अन्येतु वाराहपुराणस्थत्वेन वाक्यानि पठन्ति––

"आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ ।
जयन्ती मत्स्यनाम्नीति तस्यां कार्यमुपोषणम् ॥

नभो मासि तृतीयायां हरिः कमठरूपधृक् ।
नभस्ये शुक्लपचम्यां वाराहस्य जयन्तिका ॥

वैशाखे तु चतुर्दश्यां नृसिंहः समपद्यत ।
वैशाखे शुक्लपक्षे तु तृतीयायां भृगूद्वहः ॥

मासिभाद्रपदे शुक्लैकादश्यां वामनो हरिः ।
चैत्रनवम्यां रामोऽभूत्कौसल्यायां परः पुमान् ॥

श्रावणे बहुलेऽष्टम्यां वासुदेवो जनार्दनः ।
पौषशुक्ले तु सप्तम्यां कुर्याद्बौद्धस्यपूजनम् ॥

माघशुक्लतृतीयायां कल्किनः पूजनं हरेः ।
प्रातः प्रातस्तु मध्याह्ने सायं सायं तथा निशि ॥
मध्याह्ने मध्यरात्रे च सायंप्रातरनुक्रमात् ॥" इति ।

अत्र समूलत्वनिर्णये सति कल्पभेदेन व्यवस्था द्रष्टव्या । एताश्च तत्तदुपासकानां नित्या अन्येषां काम्याः । अत्र विशेषस्तत्तत्प्रकरणेज्ञेयः । वैशाखशुक्लतृतीया-अक्षय्यतृतीयोच्यते । तदुक्तं भविष्ये—

---

[1] च सायं ज्ञाने 'ख' पाठेऽधिकः ।

[2] राघ इति 'ख' पाठः

"या त्वेषा कुरुशार्दूल ! वैशाखे तु महातिथिः ।
तृतीया साऽक्षया लोके गीर्वाणैरभिवंदिता ॥"

"यत्किंचिद्दीयते दानं स्वल्पं वा यदिवा बहु ।
तत्सर्वमक्षये यस्मात्तेनेयमक्षया स्मृता ॥" इति ।

सा पूर्वाह्णव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तौ परैव, तदुक्तं निर्णयामृते नारदीये—

"वैशाखे शुक्लपक्षे तु तृतीया–रोहिणीयुता ।
दुर्लभा बुधवारेण सोमेनापि युता तथा ॥

रोहिणी बुधयुक्तापि पूर्वविद्धा विवर्जिता ।
भक्त्या कृतापि मान्धाता पुण्यं हन्ति पुराकृतम् ॥

गौरीविनायकोपेता रोहिणी बुधसंयुता ।
विनापि रोहिणीयोगात्पुण्यकोटिप्रदा सदा ॥" इति ।

चैत्रशुक्लतृतीयातः आन्दोलनव्रते मासं या गौरी पूजिता, तामप्यस्यामेव विसर्जयेत् । तत्र च मुहूर्त्तमात्राकलाकाष्ठादियुक्तोऽप्युत्तरा कार्या । यदा तु चतुर्थीयुता न लभ्यते तदा द्वितीया विद्धापि ग्राह्या । इयं च त्रेतायुगादिरपि युगादयश्चोक्ता भविष्योत्तरे—

"नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात्कृतम् ।
त्रेतासिततृतीयायां वैशाखे समपद्यत ॥

दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम् ।
कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः ॥
युगादयः स्मृता ह्येते दत्तस्याक्षयकारकाः ।" इति ।

यत्तु ब्रह्मपुराणे—

"वैशाखे मासि शुक्लायां तृतीयायां जनार्दनः ।
ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयत् ॥
यवानुत्पादयामास युगं चारब्धवान् कृतम् ।" इति ।

यदपि हेमाद्रौ, "माघस्य पौर्णमास्यां तु घोरं कलियुगं तथा" इति । यच्च बृहन्नारदीये, "कार्त्तिके नवमीशुद्धे माघमासे च पूर्णिमा" इति । तदपि कल्पभेदेन व्यवस्थाप्यम् । अत्र श्राद्धं नित्यं काम्यं च युगाद्यादीन् प्रक्रम्य तद्विधानासम्भवे—

"पानीयमप्यत्रतिलैर्विमिश्रं, दद्यात् पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समाः सहस्रं, रहस्यमेतत्पितरो वदन्ति ॥"

इतिविष्णुरहस्येऽनुकल्पविधानात्—

"युगादयः स्मृता ह्येताः पितृणां तृप्तिहेतवः"

इति मत्स्यपुराणाच्च । एताश्च युगादयः पूर्वोक्ता मन्वादयश्च ।

"पूर्वाह्णे तु सदा कार्याः शुक्लामनुयुगादय ।
दैवे कर्मणि पित्र्येव कृष्णे चैवापराह्णिकाः ॥"

इति पाद्मोक्तेः शुक्लपक्षस्थाः पौर्वाह्णिक्यः कृष्णपक्षस्था आपराह्णिक्यो ग्राह्या इति हेमाद्रिः । दीपिका-स्मृत्यर्थसार-निर्णयसिन्ध्वादावप्यैवं दिवोदासीये गोभिलश्च ।

"वैशाखस्य तृतीयां यः पूर्वविद्धान्तरोति वै ।
हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥" इति ।

तेनेयं श्राद्धेऽपि पूर्वाह्णव्यापिन्येव दिनद्वये तत्त्वे परैवेति हेमाद्र्यादिमतनिर्णयः । उपवासे तु -पूर्वाप्त "वैधृतिर्व्यतीपातौ[1] युगमन्वादयस्तथा । सम्मुखादुपवासे स्युर्दानादावन्तिमाः स्मृता ।" इत्यनन्तभट्टोदाहृतवचनात् दानादाविति श्राद्धसंग्रहः ।

"द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पौर्वाह्णिके ज्ञेये कृष्णे चैवापराह्णिके ॥"

इति वचने तृतीयपादेन शुक्ले दैवकर्मसु पूर्वाह्णस्य प्राप्तत्वेन तदतिरिक्ते श्राद्धेऽपराह्णबाधेन पूर्वाह्णकालविधानाच्चतुर्थचरणेन कृष्णे श्राद्धकर्मस्वपराह्णकालस्य प्राप्तत्वे न तदितरदैवकर्मस्वपराह्णकालविधानाच्छुक्लयुगादिकार्यं सर्वमपि पूर्वाह्णेऽनुष्ठेयम् । कृष्णयुगादिकार्यमपराह्णे दैवाच्छुक्लयुगादिश्राद्धस्य प्रतिबन्धात्पूर्वाह्णे अननुष्ठाने तदुत्तरभूतमपि मध्याह्नकालमतिक्रम्यापराह्णे एवानुष्ठानं अपवादाभावेऽतिदेशप्राप्तापराह्णत्यागे प्रमाणाभावात् एतदभिप्रायेणैव वक्ष्यमाणापराह्णग्राह्यत्वोक्तिरिति हेमाद्र्यनुसारिणः कौस्तुभकारादयो नवीनाः । कृत्यरत्नावल्यां तु इयं श्राद्धेऽपराह्णव्यापिनी ग्राह्या । तस्यापराह्णकालत्वात् कालव्याप्तिशास्त्रस्यैव सर्वापेक्षयाबलवत्वात् । अतएवामावस्याश्राद्धनिर्णयमुक्तोक्तम् । कालादर्शे एवं मन्वन्तरादीनां युगादीनां विनिर्णयः ।

"महालयस्य पक्षस्य अष्टकानामपि स्मृतः ।" इति :

यत्तु 'द्वे शुक्ले०' इत्यादि वचनं तदपि उपक्रमकालपरम्—

"शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षेऽपराह्णे तु रौहिणं न च लंघयेत् ॥" इति वायवीयवचनवत् ।

---

[1] सवैधृति व्यतीपाती इति 'ख' पाठः

यद्वा--यदा शुक्लपक्षगता युगादितिथिः पूर्वदिने कुतपोत्तरार्द्धमेवारभ्य प्रवृत्तोत्तरदिने वृद्ध्याऽपराह्णेऽपि किंचिद्वर्तते तदाप्तं पूर्णाऽपराह्णव्यापित्वेन पूर्वदिनगताया एव ग्राह्यत्वे प्राप्ते तदपवादत्वेन कुतपपूर्वार्द्धरूपपूर्वाह्णव्यापिनी, अल्पापराह्णस्पर्शिन्यप्युत्तराग्राह्येति विधीयते । न च तदाऽपराह्णशास्त्रस्याप्यत्यन्तबाधः । अपराह्णेऽपि किञ्चित्तस्या विद्यमानत्वात्–

"या मन्वाद्या युगाद्याश्च, तिथयस्तासु मानवः ।
स्नात्वा हुत्वा च जप्त्वा च, दत्त्वाऽनन्तं फलं लभेत् ।।"

इति भारतोक्तस्नानादौ तूत्तरा । केचित्तु 'वैशाखस्य तृतीयां य' इति गोभिलवचनात् "पूर्वाह्णे तु सदा कार्याः शुक्लामनुयुगादयः" इति नारदवचनाच्च "श्राद्धेऽपि पूर्वाह्णव्यापिन्युत्तरा कार्या" इति वदन्ति तत्कालादर्शादिविरुद्धमयुक्तं च । अपराह्णः पितृणां, अपराह्णे तु पैतृकं, अपरा ह्णे पितृक्रियेत्यादिवचनैरपराह्णकालत्वाभिधानात् 'कर्मणो यस्य यः कालः०' इति वाक्यादपराह्णव्यापिन्या एव श्राद्धे ग्राह्यत्वात् पूर्वलिखितगोभिलवचनन्त्वनाकरं साकरत्वेऽपि पित्र्युद्देशेन क्रियमाणतर्पणादिविषयं व्याख्येयम् । नारदवचनं तु 'द्वे शुक्ले०' इति वचनवदेव व्याख्येयमित्युक्तम् । निणयामृतेऽप्येवं युगमन्वादिप्रयुक्तदानहोमपूजनादिमलमासेष्वपि[1] तत्रैव कार्यम्—

"दशहरासुमोत्कर्षश्चतुर्धापि युगादिषु ।
उपाकर्म महाषठ्योरेतदिष्टं वृषादितः ।।" इति

ऋष्यश्रृंगोक्तेः । अब्दोदकुंभमन्वादिमहालययुगादिष्विति कालादर्शे मलमासकर्त्तव्येषु परिगणानाच्च श्राद्धं मात्रं तु––

"यौगादिकं मासिकं च श्राद्धं चापरपाक्षिकम् ।
मन्वादिकं तैर्थिकं च कुर्यान्यासद्वयेऽपि च ।।" इति :

स्मृतिचन्द्रिकोक्तेर्मासद्वयेऽपि कार्यम् । अपरपक्षो नाम कृष्णपक्षोऽत्रगृह्यते, न तु महालयः । मलमासे महालयस्य निषेधात् । इदं च युगादिश्राद्धमपिण्डकं कार्यम् । तथा च हेमाद्रौ पुलस्त्यः—

"अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
युगादिषु च सर्वासु पिण्डनिर्वपणादृते ।।" इति ।

इदं च युगातिकृत्यं युगादितिथिमध्य एव कर्त्तव्यम् ।

"मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपातेवैधृतौ च तत्कालव्यापिनी क्रिया ।।"

---

[1] सति इति 'ख' पाठः ।

इति स्कंदपुराणवचनात् । ननु यदा त्रिमुहूर्त्ता द्विमुहूर्त्ता वाऽपरेऽह्नि तृतीया तदा तावत्यां कथमतिविततश्राद्धमनुष्ठेयमिति चेन्न, पलमात्रद्वादश्यामखिलाह्निककर्मानुष्ठानवदुपपत्तेः । अत्र विशेषो भविष्ये—

"वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ।
गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्विषैः ॥

तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ।
यवान् दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवान् ॥" इति ।

अत्र दानविशेषो भविष्ये इमां प्रक्रम्य—

"उदकुम्भान् सकनकान् सान्नान् सर्वरसैः सह ।
यवगोधूमचणकान् सक्तून् दध्योदनन्तथा ॥
ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते ॥" इति ।

अत्र रात्रिभोजने प्रायश्चित्तमुक्तं ऋग्विधाने—

"रात्रौ भुंक्ते वत्सरे तु मन्वादिषु युगादिषु ।
अभिस्वमृष्टिमंत्रं च [1]जपेद्दशनक्तकम् ॥" इति ।

अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं ऋग्विधाने—

नयस्य द्यावामन्त्रं च शतवारं तदा जपेत् ।
युगादयो यदा न्यूनाः कुरुते नैव पातकम् ॥" इति ।

अत्र समुद्रस्नानं प्रशस्तं, तदुक्तं सौरपुराणे—

"युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ ।
गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं च यत् ॥
तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवम् ॥" इति ।

अत्रैव लक्ष्मीसहित विष्णुपूजा भविष्योत्तरे विहिता ।

"वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुम् ।
नारायणं पूजयेथाः पुष्पधूपविलेपनैः ॥" इति ।

अत्र त्रिलोचनयाऽत्रोक्ता काशीखण्डे—

[2]"माघ शुक्लतृतीयायां स्नात्वा वैलिप्पिले ह्रदे ।
सन्तर्पयेत्पितृदेवान्त्रिलोचनमथार्चयेत् ॥" इति ।

---

[1] जपेद्दशनपातकम् इति 'ख' पाठः ।
[2] राध इति ख पाठः ।

अथ प्रसंगाद्युगान्तादुच्यते हेमाद्रौ ब्रह्मपुराणे—

"सूर्यस्य सिंहसंक्रान्त्यामन्तः कृतयुगस्य तु ।
अथ वृश्चिकसंक्रान्त्यामतस्त्रेतायुगस्य तु ।।
ज्ञेयस्तु वृषसंक्रान्त्यां द्वापरान्तस्तु संख्यया ।
तथा तु कुम्भसंक्रान्त्यामंतः कलियुगस्य तु ।।"

आदित्यपुराणे—

"दिनर्क्षं द्वितीयत्र[1] गमनं चैव राशिषु ।
युगान्तदिवसं विद्धि तत्रदानमनन्तकम् ।।
ग्रहणे विषुवे चैव सौम्ये वा मिहिरो यदि ।
सप्तमी शुक्लकृष्णा वा युगान्तदिवसं विदुः ।।

सौम्ये उद्गयने ब्रह्मपुराणे—

"युगार्धेषु युगान्तेषु श्राद्धमक्षयमुच्यते ।"

तत्रैव—

"युगादिषु युगान्तेषु स्नानदानजपादिकम् ।
यत्किंचित्क्रियते तस्य युगान्तफलसाक्षिता ।।"

इयमेध तृतीया परशुरामजयन्ती । सा प्रदोषव्यापिनी ग्राह्या । तदुक्तं भार्गवार्चनदीपिकायाम्, स्कान्दभविष्ययोः—

"वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ ।
निशायाः प्रथमे यामे रामाख्यः समये हरिः ।।

रेणुकायास्तु-योगर्भादवतीर्णो हरिः स्वयम् ।" इति । दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा, अन्यथा पूर्वैव । तदुक्तं भविष्ये—

"शुक्लातृतीया वैशाखे शुद्धोपोष्या दिनद्वये ।
निशायाः पूर्वयामे चेदुत्तरन्यत्र पूर्विका ।।" इति ।

"अह्नो मध्ये वामनो रामरामौ' इति वचनान्मध्याह्नस्योत्पत्तिकालत्वपक्षे तु तद्व्यापिनी [2]ग्राह्या । मध्याह्नस्य तत्कालत्वपक्षे तद्व्यापिनो । उभयत्रापि पूर्वदिन एव तद्व्याप्तौ पूर्वाऽन्यथा परैव । पूर्वोक्त तृतीयानिर्णयादित्युक्तम्, कल्प-

---

[1] रेवती यत्र इति 'ख' पाठः ।

[2] स्मृति को स्तुभे तु निशा प्रथमयामस्योत्पत्तिः कालत्वपक्षे तद् व्यापिनी इती 'ख' पाठोऽधिकः ।

भेदेन व्यवस्थेति पूर्वोक्तम्[1] । रामकल्पद्रुमकारास्तु—"नभस्ये तु द्वितीयायां बलभद्रोऽभवद्धरिः" इति पुराणान्तरे बलभद्रस्याप्यवतारमध्ये गणनया 'अह्नो मध्ये वामनो रामरामा'वित्यत्र द्वितीय रामशब्दस्य तत्परत्वान्मध्याह्नोत्पत्तिपक्षस्त्वयुक्तः इत्याहुः । ज्येष्ठकृष्णतृतीयाकल्पादिः ज्येष्ठशुक्लतृतीयायां रम्भाव्रतम् । तदुक्तम् माधवीये भविष्ये—

"भद्रे ! कुरुष्व यत्नेन रम्भाख्यं व्रतमुत्तमम् ।
ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा ॥" इति

सा सर्वमते पूर्वविद्धा ग्राह्या—

"बृहत्तया तथारंभातृतीया वटपैतृकी ।
कृष्णाष्टमी च भूता च कर्त्तव्या संमुखी तिथिः ॥"

इति स्कान्दोक्तेः । इयमेव वामदेवकल्पादिः । आद्या[2] कृष्णतृतीयाग्नेयकल्पादिः श्रावणकृष्णतृतीया कज्जलीसंज्ञा । सा परेति दिवोदासीये-क्वचित्तु भाद्रकृष्णतृतीया कज्जली उक्ता—

"भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिका ।"

इति दिवोदासोदाहृतवचनादित्युक्तम् । अस्यामेव श्रवणयुक्तायां विष्णुपूजा कार्या । तदुक्तं हेमाद्रौ विष्णुधर्मोत्तरे—

"तृतीया श्रावणे कृष्णा या स्याच्छ्रवणसंयुता ।
तस्यां सम्पूज्य गोविन्दं तुष्टिमग्र्यामवाप्नुयात् ॥"

इति श्रावणशुक्लतृतीया मधुश्रवाख्या गुर्जरेषु प्रसिद्धा । सा परयुता ग्राह्येति दिवोदास इति निर्णयसिन्धौ । इयमेव कूर्मजयन्तीति केचित् । सा प्रातःकाल-व्यापिनी ग्राह्या । भाद्रपदकृष्णतृतीया विशालाक्षी याऽत्रोक्ता काशीखण्डे-

"भाद्रकृष्णतृतीयायामुपवासपरैर्नृभिः ।
कृत्वा जागरणं रात्रौ विशालाक्षी समीपतः ॥" इति ।

अत्र रात्रिव्यापिनी ग्राह्या । रात्रौ जागरणविधानात् । भाद्रशुक्लतृतीया मन्वादिः । अस्यामेव तृतीयायां हरितालिका[3] । तत्र मुहूर्त्तमात्राऽपि परा ग्राह्या । [4]मुहूर्त्तमात्रसत्त्वेऽपीति माधवोक्तेः ॥ यदापि द्वितीयदिने घटिका मात्रा तदा—

---

१. उक्त एव इति ख पाठः ।

२. आषाढ इति ख पाठः ।

३. व्रतमिति 'ख' पाठः ।

4. उक्त पाठः 'ख' पाठे नास्ति ।

"व्रतोपवास नियमे घटिकैकाऽपि या भवेत्" इति देवलवचनात्पूर्वदिने द्वितीयायोगस्य निन्दितत्वाच्चतुर्थीसहिता या तु सा तृतीया फलप्रदा इति साहित्यमात्रश्रवणाच्च एषैव ग्राह्यो, विशेषस्तु तृतीया सामान्यनिर्णय एवोक्तः। आश्विनकृष्ण-तृतीयायां ललितादेव्या याऽत्रोक्ता काशीखण्डे—

[1]"पूषकृष्णतृतीयायां ललितां प्रतिपूज्य वै।
नारी वा पुरुषो वापि लभते वाञ्छितं फलम् ॥" इति।

तत्र चतुर्थीयुता ग्राह्या। रम्भाख्यां वर्जयित्वा एकामिति पूर्वोक्तवचनात् माघशुक्ल तृतीयायामुमामहेश्वरप्रीत्यर्थं गुड्लवणदानं कुर्यात्। तदुक्तं भविष्योत्तरे–

"माघे शुक्लतृतीयायां गुडस्य लवणस्य च।
दानं श्रेयस्करं राजन् स्त्रीणां च पुरुषस्य च ॥
गुडेन तुष्यते देवी लवणेन स्वयं प्रभुः।" इति।

इयमेव कल्किजयन्तीति केचित्। सा प्रातःकाल व्यापिनी ग्राह्या।[2] चैत्रकृष्णतृतीया कल्पादिः। एवमन्यान्यपि तृतीयाव्रतानि चतुर्थीयुक्तायामेव कार्याणीति सिद्धान्तः।

इति विश्वेश्वररचिते प्रतापभूपाज्ञया प्रतापार्के विद्वद्विनोदकन्दे
गतो मयूखस्तृतीयाख्यः।

—□—

---

१. ईश कृष्णा इति 'ख' पाठः।
२. उक्त पाठः ख पाठे नास्ति।

अथ चतुर्थी-निर्णयः

सा च विनायकनागगौरीव्रतान्युपवासपूजादिरूपाणि विहायान्यदेवताप्रीत्यर्थे उपवासे व्रतान्तरे वा पंचमीयुता ग्राह्या । युगभूतानामिति युग्म-वाक्यात्—

"एकादशी तथा षष्ठी अमावस्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥"

इति वृद्धवसिष्ठवचनाच्च, विनायकनागव्रतयोस्तु मध्याह्न व्यापिनी ग्राह्या, तत्र मध्याह्नस्य कर्मकालत्वात् ।

"प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप !"

इति गणपतिकल्पे ।

"युगं मध्यं दिने यत्र तत्रोपोष्य फणीश्वरान् ।
क्षीरेणाप्याय्य पंचम्यां पारयेत्प्रयतो नरः ॥
विषाणि तस्य नश्यन्ति न तं हिंसन्ति पन्नगाः ॥"

इति माधवोदाहृते वचने मध्याह्ने विनायकनागपूजाविधानात् युगं चतुर्थी विनायकव्रतविषये बृहस्पतिवचनं च ।

"चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी सा तु परतश्चेत्परेऽहनि ॥" इति ।

अत्र 'परतश्चेत्परेऽहनि' इति यदा परेद्युरेव मध्याह्नव्याप्तिस्तदैव परविद्धाविधानादितरेषु सर्वपक्षेषु तृतीयायुक्तैव ग्राह्या । एवं च यानि तृतीयायुक्त चतुर्थीविधायकानि पंचमीयुक्तनिषेधकानि वचनानि विनायकव्रतविषयाणि, नागव्रते तु पूर्वेद्युरेव मध्याह्नव्यापिनी पूर्वा, कर्मकालव्याप्तिप्राबल्यात् । अन्येषु सर्वपक्षेषूत्तरा पंचम्यानागतिथित्वेन तद्योगस्य तत्र प्रशस्तत्वात् । गोविन्दार्णवे तु विनायकचतुर्थी च कर्त्तव्या । सम्मुखी तिथिरिति स्कान्दवाक्यानुरोधेन पूर्वेद्युर्मध्याह्नव्याप्ता सायाह्नमात्रव्यापिन्यपि चतुर्थी ग्राह्येति सायाह्नव्याप्तेरपि निर्णायकत्वमुक्तम् ।

निर्णयसिंधुकारास्तु यत्र भाद्रशुक्लचतुर्थीव्रतादौ–‘प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप” इत्यादिना मध्याह्नकालविधानं तत्रैव तद्व्याप्त्या निर्णयो न तु गणेशव्रतमात्रे । संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेः । तेन सर्वत्र गणेशव्रते पूर्वा क्वचिदेव मध्याह्नव्याप्त्यापरा’ इत्याहुः । [1]सकष्टचतुर्थी तु चन्द्रोदयव्यापिनी गाह्या । दिने द्वये तत्त्वे मातृयोगप्राशस्त्यात्पूर्वैवेति केचित् । अन्येतु दिने मुहूर्त्तत्रयादिरूपस्य तृतीयाचतुर्थीयोगस्याभावाद्रात्रीययोगस्य तु ‘मातृविद्धो गणेश्वर’ इत्यादि वाक्येनाप्रतिपादनात्परदिने माधवोक्तमध्याह्नव्यापिसत्त्वात्सम्पूर्णत्वाच्च परेत्याचक्षते । दिनद्वये तदभावेऽप्युत्तरैवेत्याहुः ॥ योऽपि—

“चतुर्थ्यां तु गणेशस्य गौर्याश्चैव विधानतः ।
पूजां कृत्वा लभेत्सिद्धिं सौभाग्यं च नरः क्रमात् ॥” इति

लिंगपुराणादिविहितगौरीव्रते तु—

“सर्वपक्षेषु पूर्वैव (गणेशगौरीबहुले)[2] व्यतिरिक्ताः प्रकीर्तिताः ।
चतुर्थ्यः पंचमी विद्धा देवतान्तरयो गतः ॥”

इतिब्रह्म वैवर्त्तात् । यदा तृतीया सम्पूर्णा पूर्वदिने परदिने तृतीयाऽस्पृष्टा चतुर्थी ह्रासतो न्यूना सती पंचमी विद्धा, तदा च गौरीकृत्यं पंचमीविद्धां चतुर्थीं विहाय केवलायां तृतीयायामेवकार्यम् ।

“जया च यदि सम्पूर्णा चतुर्थी ह्रसते यदि ।
जया सैव हि कर्त्तव्या नागविद्धां न कारयेत् ।”

इति वचनात् विशेषस्तु तत्तत्प्रकरणे वक्ष्यते ।

अथ चतुर्थी विशेषनिर्णयः

तत्र ‘ज्येष्ठ शुक्लचतुर्थ्यां स्त्रीभिः सौभाग्यवृद्धये ।
[1]पूजनीया सदा गौरी” इति भविष्योत्तरे ॥
‘ज्येष्ठशुक्लचतुर्थ्यान्तु जाता पूर्वमुमासती ।
तस्मात् सा तत्र सम्पूज्या स्त्रीभिः सौभाग्यवृद्धये ॥” इति ।

अत्र सामान्य निर्णयः

आषाढशुक्लचतुर्थी राथन्तरकल्पादिः । श्रावणकृष्णचतुर्थी सोम-

---

१. उक्तः रेखाङ्कितः पाठः ख पाठे नास्ति ।
२. उक्त पाठः ख पाठे नास्ति ।
३. पार्वतीपूज्येति उक्तं भविष्ये इति ‘ख’ पाठः ।

कल्पादिः। [1]पूर्णिमान्तमासीये श्रावणे कृष्णचतुर्थी संकष्टचतुर्थीत्युच्यते। तदुक्तं स्कान्दे—

“श्रावणे बहुले पक्षे चतुर्थ्यां च विधूदये।
तस्मिन् दिने व्रतं कार्यं संकष्टाख्य सुरेश्वरि॥” इति।

कृत्यरत्नावल्यां तु भाद्रकृष्णचतुर्थी संकष्टचतुर्थी। ‘श्रावणे बहुले’ इति स्कांदवचने तु श्रावणोऽत्रामान्तमानेन ग्राह्यः। “व्रते शुक्लादिमेवच” इति चचनादित्युक्तम्। तिथ्यर्केऽप्येवं निर्णयस्तु सामान्य एवोक्तः। इयं सोमकल्पादिः श्रावणशुक्लचतुर्थी दूर्वागणपतिव्रते मध्याह्नव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वा चतुर्थी गणनाथस्येतिश्वचनात्। इद च व्रतं श्रावणे कार्त्तिके वारम्भणीयम्।

“चतुर्थी या भवेच्छुक्ला नभोमासस्य पुण्यदा।
तस्यां व्रतमिदं कुर्यात्कार्तिक्यां वा षडानन॥”

इति वाक्यात यद्यपि कार्त्तिक्यामित्यनेन न शुक्लाचतुर्थी प्रतीयते, तथापि शुक्लचतुर्थीप्रतिपादकेन समभिव्याहारात्कार्त्तिकशुक्लचतुर्थी प्राप्यते। तथा च नभोमासस्य तस्यां कार्तिक्यां वा तस्यां व्रतं कुर्यादित्यर्थः। इयमेव वाराहजयन्ती, सा पराह्णव्यापिनी ग्राह्या। भाद्रपदकृष्णचतुर्थी[3]त्युच्यते, तदुक्तं स्कान्दे—

“श्रावणे बहुले पक्षे चतुर्थ्यां च विधूदये।
तस्मिन् दिने व्रतं कार्यं संकष्टाख्यं सुरेश्वरि॥” इति।

श्रावणोऽत्रामान्तमानेन ग्राह्यः। ‘व्रते शुक्लादिमेव च’ इति वचनात्। अत्र[4] शोधपत्रम्—इयमेव बहुलाख्या मध्यदेशे प्रसिद्धा। कृत्यरत्नावल्यां तु श्रावण कृष्णचतुर्थी बहुलेत्युक्तम्। सा च सायाह्नव्यापिनी ग्राह्या। दिनद्वये तथात्वे,

“पूर्वा गौर्याश्चतुर्थी वटधेनुपूजा, दुर्गार्चनं दुर्भरहोलिके च।
वत्सस्य पूजा शिवरात्रिरेताः, पराविता हन्ति नृपं सराष्ट्रम्॥”
इति दिवोदासीयवचनात्।

अत्र वत्सपूजायाः पृथगुपादानाद्धेनुपूजाशब्देन बहुलाख्या गृह्यते इति स एव व्याचख्यौ।

---

१. पूर्णिमान्त इत्यतः इयं सोमकल्पादिः इत्यन्तः पाठः ‘ख’ पाठे नास्ति।
२. वृहस्पति इति ख पाठोऽधिकः।
३. संकष्ठ चतुर्थी इति ख पाठोऽधिकः।
४. अत्र शोधपत्रम् इयमेवबहुलाख्या इत्यारभ्यः भौमेनार्केण वा कार्या इत्यन्त पाठः ‘ख’ पाठे नास्ति।

अत्र गोपूजा यवान्नाशनं च कार्यमिति दिवोदासीयाः। भाद्रशुक्लचतुर्थ्यां सिद्धिविनायकव्रतमुक्तं, स्कन्दपुराणे —

'गजवक्त्रं तु शुक्लायां चतुर्थ्यां तु प्रपूजयेत्।
यदा वोप्तद्युते भक्तिस्तदापूज्यो गणाधिपः॥" इति।
"[1]प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेत् नृपः।
स्वशक्त्या गणनाथस्य स्वर्णरौप्यामथाकृतिम्॥"

अथवा मृण्मयीं कुर्याद्वित्तशाठ्यं न कारयेत्। गणनाथस्य सिद्धिविनायकस्य सा तत्र मध्याह्नव्यापिनी ग्राह्या[2]। हेमाद्रौ भविष्ये मध्याह्ने पूजोक्तेः परदिन एवांशेन साकल्येन वा मध्याह्नव्यापित्वे परा, अन्यथा सर्वपक्षेना[3]त्र पूर्वद्युरेव मध्याह्नव्याप्तौ मुख्यप्रयोजकसद्भावान्मातृविद्धात्वगुणसद्भावाच्चोभयत्र कृत्स्नां मध्याह्नव्याप्तावव्याप्तौ च—"चतुर्थी तु तृतीयायां महापुण्यफलप्रदा" इति पूर्वविद्धाया महापुण्यादिफलप्रदत्वाद्वैषम्येण साम्येन चैकदेशव्याप्तौ परत्र नागविद्धत्वदोषसत्त्वात्पूर्वत्र च तदभावान्मातृयोगप्राशस्त्याच्च पूर्वायुक्तैव पूर्वा चतुर्थी गणनाथस्येति बृहस्पतिवचनात्

"मातृविद्धप्राशस्त्याच्चतुर्थी गणनायके।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते॥" इति माधवीये।

स्मृत्यन्तराच्चेयं रविभौमयोः प्रशस्ता। "भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता। महती चा०"। इयं चन्द्रोदयव्यापिनी ग्राह्या।

"नभस्ये बहुले पक्षे चतुर्थ्यां तु विधूदये।
गणेशं पूजयित्वा तु चन्द्रायार्घ्यं प्रदापयेत्॥"

इति कथायां चन्द्रोदये पूजाविधानात् दिनद्वये सत्त्वे मातृयोगप्राशस्त्यात्पूर्वैवेति केचित्। अन्ये तु दिने मुहूर्तत्रयादिरूपस्य तृतीयाचतुर्थीयोगस्याभावाद्धात्रीययोगस्य तु 'मातृविद्धो गणेश्वरः' इत्यादि वाक्येन प्रतिपादनादपरदिने माधवोक्तमध्याह्नव्याप्तिसत्त्वात्सम्पूर्णत्वाच्च परेत्याचक्षते। [4]दिनद्वये तदभावेऽप्युत्तरैवेत्यप्याहुः।

"यो यस्य विहितः कालकर्मणस्तदुपक्रमे।
तिथिर्याऽभिमता सा तु कार्यानोपक्रमोप्सिता॥"

---

[1] ख पाठे नास्ति

[2] प्रातः शुक्लतिलै इति वाक्यं पुनरावृत्तं नास्ति 'क' पाठे।

[3] सर्वपक्षेषु तत्र इति 'ख' पाठः।

[4] उक्त पाठः ख पाठे नास्ति।

इति बोधायनवचनात्कर्मोपक्रमकालगा तु कृतिभिर्ग्राह्या, न युग्मादर इति दीपिकोक्तेश्च—"तैलाभ्यङ्गं प्रकुर्वीत रात्रौ पूजां समाचरेत्" इत्यत्रोक्तरात्रिरूपकर्मोपक्रमकालव्याप्तिलाभाद्द्वितीय पक्ष एव ज्यायानिति प्रपितामहचरणाः । दिनद्वये तदभावे संकल्पकालसत्त्वेनाहोरात्रसम्बन्धित्वेन—"यां तिथिं समनुप्राप्य" इति भास्करोदयनिमित्तं आपादितसाकल्यमवलम्ब्य चन्द्रोदयेऽपि सत्त्वे न प्राशस्त्यात्परैवेति कोस्तुभकारादयः । [1]दिनद्वये चंद्रोदये सत्त्वेऽसत्त्वे वा पूर्वैवयुक्ता—

"चतुर्थी च तृतीयायां महापुण्यफलप्रदा ।
कर्त्तव्या व्रतिभिर्वत्स ! गणनाथसुनोषिणी ॥"

इति ब्रह्मवैवर्तात्—

"गणेशगौरोबहुला व्यतिरिक्ताः प्रकीर्तिताः ।
चतुर्थ्यः पंचमीविद्धा देवमन्तरयोगतः ॥"

इति [2]वचनाच्च—न च तृतीयाविद्धाविधायकवचनानि दिवात्रिमुहूर्त्तवेधे सत्येव प्रवर्त्तन्ते न रात्रियोगमात्र इति वाच्यम् । रात्रिसाध्यकर्मंतु रात्रावपि वेधस्य जन्माष्टमीप्रकरणे माधवादिभिर्दर्शितत्वात् । अतएव महालक्ष्मीव्रतसमापने दिनद्वयेऽष्टम्याश्चन्द्रोदयकालव्यापित्वे—

"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ॥"

इति वचनात्पूर्वविद्धा ग्राह्येत्युक्तं हेमाद्रौ मदनरत्ने च 'चतुर्थी गणनाथस्य' इत्यादीनि वचनानि तु सिद्धिविनायकादिव्रतविषयाणि । तेषु मध्याह्नस्य कर्मकालत्वात् "प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप" इति वचनात् । अतएव माधवेन मध्याह्नस्य कर्मकालत्वमंगीकृत्यैव विनायकव्रते मध्याह्नव्यापिनी ग्राह्येति[3] कथितम् । तस्मादुभयत्र चन्द्रोदयकाले सत्त्वेऽसत्त्वे वा पूर्वैवेति न्याय्यः पंथा इति । [4]इदं शोधपत्रं—(त्र्यशीतितमपत्रान्तं कष्टस्थ तृतीयपंक्तिस्थ त्रुटिस्थं ज्ञेयम्) । मयूख—कृत्यरत्नावली—व्रतार्कादावप्येवम्[5] ।

---

[1] वयंत्वेवं ब्रूमः इति पाठोऽधिकः ।

[2] ब्रह्मवैवर्तं इति ख पाठोऽधिकः ।

[3] उक्तमिति 'ख' पाठः ।

[4] उक्तस्थले 'ख' पाठे संशोधितं शोधपत्रम् लघ्वक्षरैः मूललेखाद्बहिः लेखितोऽस्ति । सोऽयं पाठः 'क' पाठे भाद्रपदशुक्लचतुर्थी—संकष्टचतुर्थीत्युच्यते, तदुक्तं स्कान्दे इति स्कान्दोद्धरणानन्तरं लेखितोऽस्ति । तत्रैव २ इत्यङ्केन संकेतितशोधपाठः सोऽपि शोधपत्रशोधितत्वात् पूर्वं ३ इत्यङ्केन संशोधित्ते पाठ एव आगतः ।

[5] उक्तस्थाने 'ख' पाठे लेखितपाठः पूर्वे एव लिखितः 'क' पाठे ।

“च[1]तुर्थ्यां गणेशस्य गौर्याश्चैव विधानतः ।
पूजां कृत्वा लभेत्सिद्धिं सौभाग्यं च नरः क्रमात् ।।”

अत्र विघ्नेशमर्चित्वेष्टं लभेन्नर इति निर्णयामृते वाराहोक्तेः । इयमेव चतुर्थी शिवासंज्ञा । “मासि भाद्रपदे शुक्ला शिवा लोकेषु पूजिता ।” इति भविष्योत्तरपुराणात् । अस्यां चन्द्रदर्शननिषेधमाह पाराशरः ।

“कन्यादित्ये चतुर्थ्यान्तु शुक्ले चन्द्रस्य दर्शनम् ।
मिथ्याभिदूषणं कुर्याद्रात्रौ पश्येन्न तं सदा ।।
तद्दोषशान्तये सिंहः प्रसेनमिति वै पठेत् ।”

इति चतुर्थ्यां न पश्येदित्यन्वयः । प्रधानक्रियान्वयलाभात् । तेन न चतुर्थ्यामुदितस्य पञ्चम्यां तन्निषेधः । गौड़ा अप्येवमाहुरिति निर्णयसिन्धौ । अत्र सन्निग्रहणाद्दिवा चन्द्रदर्शनेन दोषः, रात्रौ[2] च चन्द्रप्राधान्यादिति केचित् ।

“उक्तं च—

“भाद्रे मासि सिते पक्षे चतुर्थी स्वातियोगिनी ।
मिथ्याभिशापं कुरुते दृष्टचन्द्रा न संशयः ।।”

इति मार्कण्डेयादिवचनान्तरेषु चतुर्थीमात्रग्रहणाद्दिवापि चन्द्रो न द्रष्टव्य इति प्रतिभाति । निर्णयामृते ब्रह्मपुराणे तु शुक्लचतुर्थ्यां चन्द्रदर्शने विशेष उक्तः—

“वासुदेवोऽभिशस्तस्तु निशाकरमरीचिषु ।
स्थितश्चतुर्थ्यामाद्यायां मनुष्याणां पतिश्च सः ।।
ततश्चतुर्थ्यां चन्द्रं तु प्रयत्नाद्वीक्ष्य मानवः ।
पठेत्पौराणिकं वाक्यं प्राङ्मुखो वाऽप्युदङ्मुखः ।।” इति ।

आद्यायां चतुर्थ्यां शुक्लचतुर्थ्यामित्यर्थः । प्रयत्नात्पठेदित्यन्वयः । वाक्यम्—

“सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः ।
सुकुमारक ! मारोदीस्तव ह्येष स्यमन्तकः[3] ।।”

---

१. चतुर्थ्यां इत्यारभ्य नरः क्रमात् इत्यन्तः पाठः ख पाठे नास्ति ।

२. रात्रावेव इति ‘ख’ पाठः,

३. ‘ख’ पाठे चतुर्थीगणनाथस्य इत्यारभ्य मारोदीस्तव ह्येषस्यमन्तकः इत्यन्त पाठ एकस्मिन् पृथक् पत्रे व्यवस्थितं कृत्वा विलेखितः किन्तु अयं पाठोऽपि ‘क’ पाठेन सह लेखनक्रमे न मिलति । अपितु ‘ख’ पाठकारस्य शोधपत्रं यथास्थाने लिखितमिति ।

इतीति अनेनाभिमंत्रितं जलं पेयं, स्यमन्तकोपाख्यानं च श्रोतव्यमाचारादिति स्मार्त्तः । कृत्यरत्नावल्यां–आश्विनकृष्णशुक्लचतुर्थ्यां देवीप्रबोधनकेशप्रसाधनयोर्देवीव्रतत्वात्पूर्वं एव । कार्त्तिककृष्णचतुर्थी स्त्र्यधिकारिककरक चतुर्थीव्रते चंद्रोदयव्यापिनी ग्राह्या । तस्य कर्मकालत्वात् दिनद्वये तद्व्याप्तौ संकल्पकालमारभ्य सत्त्वात् परा । अस्यामेव कृत्यविशेषः । संवत्सरप्रदीपे—

"आश्विने कृष्णपक्षस्य चतुर्थ्यां रात्रियोगतः ।
मृण्मयेऽवस्थितः पूज्यो राजा दशरथस्त्रिया ॥
दुर्गा च तत्र संपूज्या सर्वसौख्यविवृद्धये ।

आश्विनोऽत्र मुख्यचान्द्रेणेति तत्रैवोक्तः । इयं प्रदोषव्यापिनी ग्राह्या । उभयत्र तथा चेत्परेत्यपि तत्रैवोक्तम्–कार्त्तिकशुक्लचतुर्थ्यां कूर्मपुराणोक्तं नागव्रतं, कार्तिकशुक्लपक्षमुपक्रम्य- -

"तिथौ युगाह्वायायां तु समुपोष्य यथाविधिः ।
शंखपालादिनागानां शेषस्य च महात्मनः ॥
पूजा कार्या पुष्पगन्धक्षीराप्यायनपूर्वकम् ।"

इति युगाह्वयायां चतुर्थ्याम् । अत्र चतुर्थी मध्याह्नव्यापिनी ग्राह्या 'युगं मध्यंदिने यत्र०' इति स्कान्दात् माघकृष्णचतुर्थ्यां संकष्टचतुर्थीव्रतारम्भ इति कश्चित्–

"माघमासे कृष्णपक्षे चतुर्थ्यां व्रतमुत्तमम् ।
प्रतिमासं प्रकुर्वीत व्रतं संकष्टनाशनम् ॥"

इति भविष्योत्तरवचनात् । माघकृष्णचतुर्थ्यां व्रतारंभं कृत्वा प्रतिमासं कार्यमित्यर्थः । इयं चन्द्रोदयव्यापिनी ग्राह्या । पूजा-विधूदये कार्येति तत्रैवोक्तेः। माघशुक्लचतुर्थी कुन्दचतुर्थी । सा प्रदोषव्यापिनी ग्राह्या ।

"माघशुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदाशिवम् ।
संपूज्य यो हि नक्ताशी स प्राप्नोति श्रियं नरः ॥

इति कौर्मोक्तेः ।

इयं वरदाख्या, तदुक्तम् तिथितत्त्वे भविष्योत्तरे— "माघशुक्लमधिकृत्य चतुर्थी वरदानाम तस्यां गौरी सुपूजिता सौभाग्यं मंगलं कुर्यादिति" देवीपुराणे: त्वियं कुन्दचतुर्थीत्युक्तम् ।

'माघमासे तु सम्प्राप्ते चतुर्थी [1]कुंदसंज्ञिता ।
उपोष्या सा सुरश्रेष्ठततो राज्यं भविष्यति ॥ इति ।

---

[1] कुण्ड इति ख पाठः ।

इयमेव सोपदा, इयमेव गणपतिप्रीत्यर्था, तिलचतुर्थीत्युच्यते । तथा च काशीखण्डे—

"माघशुक्लचतुर्थ्यान्तु नक्तव्रतपरायणाः ।
ये त्वां ढुंढे ! ऽर्चयिष्यन्ति तेऽच्यर्याः स्युरसुरद्रुहाम् ॥ इति ।

इयमपि प्रदोषव्यापिनी ग्राह्या । दिनद्वये तत्त्वे पूर्वा, 'मातृविद्धो गणेश्वरः' इतिवचनात् । भौमचतुर्थ्यां तु विशेष उक्तो लैंगे—

"अंगारक चतुर्थ्यां ये स्नात्वोत्तरवहाम्भसि ।
अभ्यर्च्याङ्गारकेशानं नमस्यन्ति नरोत्तमाः ॥
न तेषां ग्रहपोड़ा च कदाचित्क्वापि जायते ।" इति ।

एवं मनोरथविनायकचतुर्थ्यां विनायकव्रतानि, कुंदचतुर्थ्यादि गौरीव्रतानि च तृतीयायुक्तचतुर्थ्यामेव कार्याणि । अन्यानि नागचतुर्थ्यादिव्रतानि पंचमीयुक्तायां चतुर्थ्यामिति सिद्धान्तः । सर्वासु चतुर्थीषु ढुंढियाऽत्रोक्ता काशीखण्डे–"कुर्यात्प्रतिचतुर्थीह यात्रां विघ्नेशितुः सदा । ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदा ॥" इति ।

इति पौण्डरीकयाजिविश्वेश्वरविरचिते प्रतापभूपाज्ञया प्रतापार्क
विद्वद्विनोदकंदे गतो मयूखश्चतुर्थाख्यः ।

—□—

अथ पंचमी निर्णय:

सा चोपवासादि सर्वकर्मसु चतुर्थीविद्धैव ग्राह्या । युगभूतानामिति युग्मवाक्याच्चतुर्थीसंयुतापंचमी परया न तु दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथाऽसिते" इति हारीतोक्तेश्च । स्कंदव्रतं तु स्कांदोपवासे स्वीकार्या । पंचमी परसंयुतेति ब्रह्मवैवर्त्तवचनात्परेति माधवकालादर्शनिर्णयामृतमदनरत्नकारादय: । हेमाद्रिस्तु कृष्णा पूर्वा शुक्ला परा ग्राह्या । युगभूतानामिति युग्मवाक्यस्य पंचमी [1]सुप्रकर्त्तव्या षष्ठ्या युक्ता तु नारद" इति ब्रह्मवैवर्तवाक्यस्य विरोधे शुक्लपक्षे तिथिर्ग्राह्येति कृष्णपक्षेतिथिर्ग्राह्येति च वचनाभ्यां पक्षभेदेन व्यवस्थापनात् । "यद्वा प्रतिपंचमी चैव उपोष्या पूर्व संयुता' इति जाबालिवचनादुपवासे पूर्वविद्धान्यत्रपरविद्धेति व्यवस्थेत्याह । मांधवानुसारिण: कालतत्त्वविवेचनकारादयो हेमाद्रयुक्ता द्विविधा व्यवस्था कैश्चित्पित्र्यदैवविषयत्वेन सोक्ता । तद्व्यवस्थात्रयमपि चतुर्थीसंयुता कार्येति माधवोदाहृतहारीतवचनविरोधात्प्रतिपत्पंचमीभूता सावित्री वटपूर्णिमा । नवमी दशमी चैव नोपोष्या: परसंयुता: ।।" इत्यादि परविद्धा निषेधे उपवासपदस्योपलक्षणत्वादयुक्तम् । ब्रह्मवैवर्तवाक्यं तु स्कान्दोपवासे– स्वीकार्या पंचमी परसंयुता' इति ।

तत्रा[2]न्यवचनान्तरादेव स्कांदोपवासविषयं नागव्रतविषयं च

"श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी ।
तां परित्यज्य पंचम्यश्चतुर्थीसहिता हि ता: ।।

इति मदन रत्नलिखिताचारसंवादिवचनादित्याहु: । स्कांदोपवासेऽपि परेद्युस्त्रिमुहूर्ता विद्यमानैव पराऽन्यथा पूर्वैव स्कांदोपवासे स्वीकार्या । पंचमी परसंयुता, "त्रिमुहूर्त्ता तु षष्ठ्यां स्यात्परापूर्वयुतान्यथेति वचनात्स्कान्दोपवासश्च । क्वचित्षष्ठीविहित स्कंदपू[3]जांगतायां पञ्चम्याम् ।

---

[1] तु इति ख पाठ:

[2] तत्रत्य इति 'ख' पाठ:

[3] स्कन्दपूजाङ्गतया इति ख पाठ:

आषाढे शुक्लषष्ठी तु तिथिः कौमारिलस्मृता ।
कुमारमर्चयेत्तत्र पूर्वत्रोपोष्य वै दिनम् ॥

इति वाराहवचनेन विहितः । क्वचित् षष्ठ्याम–

"कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥

इति वचनेन विहितः स देशभेदेन व्यवस्थापनीयः ।

अथ पञ्चमीविशेषनिर्णयः

तत्र चैत्रशुक्लपंचमी मत्स्यजयन्तीति केचित् । इयं मध्याह्नव्यापिनी ग्राह्या । सा [1]तदुपसक्तानां नित्याऽन्येषां काम्या । अस्यामेव श्रीपूजोक्ता हेमाद्रौ मात्स्ये—

"शुक्लायामथ पंचम्यां चैत्रे मासि शुभानना ।
श्रीब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया ॥
ततस्तां पूजयेतत्र यस्तं लक्ष्मीर्न मुचति ।

इति संकल्पादिरपि वैशाखकृष्णपंचमी कल्पादिः । श्रावणशुक्लपंचम्यां नागपूजनमुक्तं गोविन्दार्णवे भविष्ये –

"श्रावणे मासि पचम्यां शुक्लपक्षे नराधिप ।
द्वारस्योभयतो लेख्या गोमयेन विशोल्बणाः ॥
पूजयेद्विधिवत्क्षीरदधिदूर्वाङ्कुरैः[2] कुशैः ।
गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ॥
ये तस्यां पूजयन्तीह नागान्भक्तिपुरस्सराः ।
न तेषां सर्पतो वीर ! भयं भवति कुत्रचित् ।" इति ।

सा तत्र परविद्धा ग्राह्या ।

"श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी ।
तां परित्यज्य पंचम्यश्चतुर्थीसहिता हि ताः ॥"

इति मदनरत्नोदाहृतवचनात् । तदुक्तं चमत्कारचिन्तामणौ-

[3]पंचमी नागपूजायां कार्या षष्ठी समन्विता ।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ॥ इति ।[4]

---

१. तदुपासकानामिति 'ख' पाठः ।

२. वीर इति 'ख' पाठः

३. पञ्चमी नागपूजायामित्यारभ्य स चतुर्थिका इत्यन्तः पाठः ख पाठे नास्ति ।

४. तां परित्यज्य चतुर्थीविद्धाग्राह्येत्युक्त्या तस्याश्चतुर्थी विद्धायाः निषेधावगमात् इति ख पत्रस्य शोधपाठोऽधिकः ।

अतश्च पूर्वद्युस्त्रिमुहूर्त्तचतुर्थीविद्धा यदा पंचमी-पूर्वत्र चतुर्थीविद्धा परत्र च षष्ठीविद्धा तदा षष्ठीविद्धैव ग्राह्या । यदा तु न चतुर्थीविद्धा तदा षष्ठीविद्धापि त्याज्या । यदापि न षष्ठीविद्धा, तदा चतुर्थीविद्धाऽपि ग्राह्या । वेधश्चात्र त्रिमुहूर्तात्मको बोध्यः ।

"परेद्युस्त्रिमुहूर्त्ता चेन्नागपंचमी परा ।
अन्यत्र[1] तु[2] सर्वेषु मध्याह्नव्यापिनी तिथिः ।।

इति हारीतोक्तेः ।

दिनद्वये तत्त्वे हेमाद्रिमते परा सिता परयुता स्यात्पंचमीति दीपिकोक्तेः । माधवमते तु-पूर्वा, सर्वत्र पंचमी पूर्वेति तदुक्तेः । मदनरत्न-निर्णयसिंधु-कृत्यरत्नावल्यादावप्येवम् । दिनद्वये तदभावे सामान्यनिर्णयात्पूर्वेति मयूखतिथ्यर्कादौ । परेति कौस्तुभे । अत्र ऋषिपूजनमुक्तं ब्राह्मे—

नभस्ये शुक्लपक्षे तु यदा भवति पंचमी ।
नद्यादिके तदा स्नात्वा कृत्वा नियममेव च ।।

ब्राह्मणी क्षत्रिया वैश्या शूद्रा चापि वरानने ।
कृत्वा नैमित्तिकं कर्म गत्वा निजगृहं पुनः ।।
वेदिं सम्पाद्य[3] कुर्वीत गोमयेनोपलिप्यताम् ।
रंगवल्लिसमायुक्ता नानापुष्पोपशोभिताम् ।।
तत्र सप्तर्षीन्दिव्यान् भक्तियुक्ता प्रपूजयेत् ।' इति ।

इयमेव वाराहजयन्तीति केचित्, सा मध्याह्नव्यापिनी ग्राह्या । "आश्विनशुक्लपञ्चम्यां इन्द्राण्या सह कुशमयं नागंपूजये"दित्युक्तं निर्णयामृते भविष्ये—

'तथा चाश्वयुजे मासि पंचम्यां कुरुनन्दन ।
कृत्वा कुशमयं नागमिन्द्राण्या सह पूजयेत् ।। इति ।

---

[1] पूर्वविद्धैवेति वृद्धा अस्यां नागकुण्डे स्नानं उक्तं काशी खण्डे-य स्नातो नागपञ्चम्यां कुण्डे वासुकि सन्निधे, न तस्य विष संसर्गो भवेत्सर्पसमुद्भवः । कर्त्तव्या नागपञ्चम्यां यात्रा वर्षासु तत्र वै । नागा प्रसन्नाः जायन्ते कुले तस्यापि सर्वदेति इयमेव रौरव कल्पादेः । केचित् तु पञ्चमी दयिता राजन् नागानन्दविवर्धिनी पञ्चम्यां स्नपयन्तीह नागान् क्षीरेण ये नराः, तेषां कुले प्रयच्छन्ति अभयं प्राणदक्षिणामिति हेमाद्रौ भविष्यत् पुराणोक्तेः । सर्वापि पञ्चमी नागपञ्चमीत्याहुः । भाद्रकृष्णपञ्चमी माधवकल्पादिः । भाद्रशुक्लपञ्चम्यां ऋषिपञ्चमीव्रतम् । इयं मध्याह्नव्यापिनी ग्राह्या इत्यन्त ख पाठः क पाठादधिकः ।

[2] पूजाव्रतेषु सर्वेषु इति 'ख' पाठः

[3] सम्यगिति 'ख' पाठः

जा सकता है कि, मनुस्मृति के लेखक ने मनु के नाम वाले धर्मशास्त्र की बातों को ही लिया होगा। वर्तमान मनुस्मृति में १२ अध्याय तथा २६४९ श्लोक हैं। भाषा सरल एवं प्रवाहमयी तथा पाणिनीयव्याकरण सम्मत है।

मनुस्मृति के सिद्धान्त गौतम, बोधायन एवं आपस्तम्ब के धर्मसूत्रों से बहुत कुछ अंशों में मिलते-जुलते हैं। इसके बहुत से श्लोक वसिष्ठ-धर्मसूत्र एवं विष्णु धर्मसूत्र में भी पाये जाते हैं। उपलब्ध बाह्यसाक्ष्यों के आधार पर कहा जा सकता है कि द्वितीय शताब्दी के बाद के अधिकतर लेखकों ने मनुस्मृति को प्रामाणिक माना है।

वर्तमान मनुस्मृति याज्ञवल्क्य से बहुत प्राचीन है। मनु ने यवनों, कम्बोजों शकों, पल्लवों का उल्लेख किया है। इस आधार पर मनुस्मृति का रचना काल ई. पू. तृतीयशताब्दी से लेकर तृतीय शदी ई. के मध्य का ठहराता है। मनुस्मृति के बहुत से टीकाकार हो गये हैं। मेधातिथि, गोविन्दराज एवं कुल्लूक, नारायण, राघवानन्द, नन्दन एवं रामचन्द्र, असहाय, उदयकर, भागुरि, भोज, धरणीधर आदि इनमें ख्यातिप्राप्त हैं। मेधातिथि ने अपने पहले के भाष्यकारों की ओर संकेत किया है।

(२४) याज्ञवल्क्य स्मृति और ऋषि याज्ञवल्क्य

याज्ञवल्क्य वैदिक ऋषि परम्परा में जाते हैं। उनका नाम शुक्ल यजुर्वेद के उद्घोषक के रूप में आता है। महाभारत शान्तिपर्व, शतपथब्राह्मण, बृहदारण्यकोपनिषद् आदि ने याज्ञवल्क्य के व्यक्तित्व पक्ष को ग्रहण किया है। इन ग्रन्थों के अनुसार ऋषि याज्ञवल्क्य विदेहराज जनक के समकालीन थे तथा ये योगशास्त्र के प्रणेता एवं सुप्रसिद्ध दार्शनिक भी थे। सूर्य से उन्हें वेदोपदेश प्राप्त हुआ था। ये शुक्लयजुः के प्रतिष्ठापक थे अतः याज्ञवल्क्य स्मृति का शुक्ल यजुर्वेद से घनिष्ठ सम्बन्ध प्रतीत होता है।

याज्ञवल्क्य स्मृति में निर्णयसागर, त्रिवेन्द्रम, आनन्दाश्रम के संस्करणों के अनुसार क्रमशः १०१०, १००३, तथा १००६ श्लोक हैं। विश्वरूप ने मिताक्षरा में आने वाले आचार सम्बन्धी ५ श्लोक छोड़ दिये हैं। अतः यह भिन्नता हो गई है। अपरार्क की प्रति भी इसी प्रकार भिन्न है। गरुडपुराण ने याज्ञवल्क्यस्मृति से बहुत कुछ लिया हैं। गरुडपुराण के कर्त्ता ने याज्ञवल्क्य के ऋण को स्वीकार किया है—

> "याज्ञवल्क्येन यत्पूर्वं धर्मं प्रोक्तं कथं हरे।
> तन्मे कथय केशिघ्न ! याथातथ्येन माधव ॥"

इति निर्णयस्तु श्रावणशुक्लपंचमीवद्बोध्यः । माघशुक्लपंचमी[1] तत्र श्रीपूजा कार्या । तदुक्तं हेमाद्रौ वाराहे–

“माघशुक्लचतुर्थ्यान्तु वरमाराध्य च श्रियः ।
पंचम्यां कुंदकुसुमैः पूजां कुर्यात्समृद्धये ।।” इति

अत्र मदनं सम्पूज्य वसन्तोत्सवः कार्यः तदुक्तं निर्णयामृते पुराणसमुच्चये–

“माघमासे नृपश्रेष्ठ ! शुक्लायां पंचमी तिथौ ।
रतिकामौ तु संपूज्य कर्त्तव्यः सुमहोत्सवः ।।
दानानि च प्रदेयानि तेन तुष्यति माधवः ।।” इति ।

इयं माधवमते पूर्वा । हेमाद्रिमते परा, एवमन्यान्यपि स्कंदोपवासनागपूजाव्यतिरिक्तपंचमीव्रतानि चतुर्थीयुक्तपंचम्यामेव कार्याणीति सिद्धान्तः ।

इति विश्वेश्वरविरचिते प्रतापभूपाज्ञया प्रतापार्के
विद्वद्विनोदकन्दे गतो मयूखोऽत्रभूताख्यः ।

◆

---

[1] श्री पञ्चमीति ख पाठोऽधिकः ।

अथ षष्ठी निर्णयः

सा च स्कन्दव्रतातिरिक्तेषु सर्वेषूपवासव्रतादिषु सप्तमीविद्धाग्राह्या षण्मुन्योरिति युग्मवाक्यात्—

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावस्या तृतीया च ता उपोष्याः परान्विता ।।

इति विष्णुधर्मोत्तराच्च स्कान्देऽपि—

"नागविद्धा न कर्त्तव्या षष्ठी चैव कदाचन ।
सप्तमीसंयुता कार्या, षष्ठी धर्मार्थचिन्तकैः ।।

इति पंचमीवेधश्चात्र न सामान्यरूपस्त्रिमुहूर्त्तात्मको निषेधप्रयोजकः किंतु षण्मुहूर्त्तात्मकः नागो द्वादशनाडिभिर्दूषयत्युत्तरां तिथि" मिति स्कंदपुराणवचनात्। तेन षण्मुहूर्त्त न्यूनपंचमीयोगे परदिने च सप्तमीविद्धषष्ठ्यभावे पूर्वैव । स्कंदव्रतं तु—

"कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ।।"

इति प्राप्ते पंचमीयुताया विधानात् षण्मुहूर्त्तपंचमीयुतायामपि षष्ठ्यां पूर्वस्यामेव कार्यम् । नागो द्वादशनाडीभिरित्यस्य यत्र निषेधस्तत्रैव नाडीविशेषनियमनार्थत्वात्सर्वषष्ठ्यां रविवारयोगे लोलार्कयात्रोक्ता ।

काशीखण्डे—

"कृतानि यानि पापानि नरैः संवत्सरादपि ।
नश्यन्ति क्षणतस्तानि षष्ठ्यर्के लोलदर्शनात् ।।

लोलार्कः वार्षिकयात्राप्युक्ता, तत्रैव—

"मार्गशीर्षस्य सप्तम्यां षष्ठ्यां वा रविवासरे ।
विधाय वार्षिकीं यात्रां नरः पापात्प्रमुच्यते ।।" इति ।

अथ षष्ठीविशेषनिर्णयः

तत्राषाढशुक्लषष्ठी स्कंदषष्ठी ।"आषाढशुक्लषष्ठी तु तिथिः कौमारिका स्मृता" इति वाराहात् । सा पंचमीयुता कार्या । कृष्णाष्टमी स्कंदषष्ठीति पूर्वो-

दाहृतपाद्मवचनात् । श्रावणशुक्लषष्ठी कल्किजयन्ती, सायंकालव्यापिनी ग्राह्या । भाद्रकृष्णषष्ठी हलषष्ठो । सा सप्तमीयुतेति दिवोदास इति निर्णयसिन्धौ । भाद्रशुक्लषष्ठी सूर्यषष्ठी, सा सप्नमीविद्धा ग्राह्येति दिवोदास इति निर्णयसिन्धौ । अत्र स्नानादिकृतमक्षयं भवति । तदुक्तं भविष्योत्तरे –

येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ ।
इयं पापहरा पुण्या शिवा शान्ता शुभानृप ॥
स्नानदानादिकं सर्वं अस्यामक्षयमुच्यते ।
तस्यां पश्यन्ति गाङ्गेयं दक्षिणापथमाश्रितम् ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ।" इति ।

अत्र भास्करपूजनादिकमप्युक्तम् । तत्रैव–

"शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पंचगव्यस्य चाश्वमेघफलप्रदम् ॥" इति ।

इयमेव चम्पाषष्ठी । तदुक्तं हेमाद्रौ स्कान्दे—

"षष्ठी भाद्रपदे शुक्ला वैधृत्या तु समन्विता ।
विशाखा भौमयोगेन सा चम्पेतीह विश्रुता ॥
देवासुरमनुष्याणां दुर्लभा षष्ठिहायनी ।
कृते त्रेतायां पञ्च[1]रात्रायमी द्वापरेपुनः ॥
चत्वारिंशत्कलौ त्रिंशद्धायनी दुर्लभा ततः ।"

इति, ब्रह्माण्डे मल्लारिमाहात्म्ये— एतैरेव श्लोकैरुपक्रम्य–

"यस्तु पश्यति देवेशं मल्लारिं पूजयत्यपि ।
सर्वजन्मकृतं पापं दर्शनात्तस्य नश्यती' त्युक्तम् ॥

इयमेव प्राणकल्पादिः । आश्विनकृष्णषष्ठीभौमवाररोहिणीव्यतीपातैर्युक्ता कपिलेत्युक्तं निर्णयामृते वाराहपुराणे—

"नभस्य कृष्णपक्षे या रोहिणीपातसू .सुतैः ।
युक्ता षष्ठी पुराणज्ञैः कपिला सा प्रकीर्तिता ॥
व्रतोपवास नियमैर्भास्करं तत्र पूजयेत् ।
कपिलां च [2]द्विजेभ्यो यो दत्वा क्रतुफलं लभेत् ॥" इति

पुराण समुच्चये विशेषउक्तः—

भाद्रे मास्यसिते पक्षे भानौ चैव करे स्थिते ।
पाते कुजे रोहिण्या सा षष्ठी कपिला भवेत् ॥ इति ।

---

[1] पञ्चाशद्धायिनी इति 'ख' पाठः ।

[2] तत् इति ख पाठोऽधिकः ।

भाद्रोऽत्रामान्तो बोध्यः तत्रैव रोहिणी व्यतीपातयोगसंभवात् । अतश्चापरपक्षे कपिला षष्ठी भवति । अत्र भाद्रपदमासकृष्णपक्षे षष्ठी रोहिणीनक्षत्रभौमवासरव्यतीपातयोगानां चतुर्णां योगेनैव प्राशस्त्यं न केवलं षष्ठ्या दीनां संयोगे, किन्तु "चतुर्णां तु निर्दिष्टा परमेष्ठिना' इत्युक..त्वात् । सूर्यस्य हस्तस्थितत्वं सति संभवे फलातिशयप्रदम् । अतश्चेयं षष्ठी पूर्वदिने परदिने वा यत्रैव योगचतुष्टयसंभवः सैव ग्राह्या । इयमेव चन्द्रषष्ठीत्युक्तं भविष्ये—

"तद्भाद्रपदे मासि षष्ठी पक्षे सितेतरे ।
चन्द्रषष्ठीव्रतं कुर्यात्पूर्वविधः प्रशस्यते ॥
चन्द्रोदये यदा षष्ठी पूर्वेऽह्नि[1] वा परेऽहनि ।
चंद्रषष्ठ्यसिते पक्षे सैवोपोष्या प्रयत्नतः ॥" इति ।

इयं चन्द्रोदयव्यापिनी ग्राह्या । उभयत्र तथात्वे पूर्वे हलषष्ठ्यपीयम् । सा सप्तमी युता ग्राह्येतिग्रन्थान्तरैः । इयमेव तत्पुरुषकल्पादिः । आश्विनशुक्लपंचमी स्नापिताया देव्याः सप्तम्यां पूजार्थं षष्ठ्यां ज्येष्ठानक्षत्रयुक्तायामसम्भवे केवलायामपि बिल्ववृक्षनिमन्त्रणं कार्यम् । तदुक्तं कालिकापुराणे—

"बोधयेद्बिल्वशाखायां षष्ठ्यां देवीफलेषु च ।" इत्यादि ।

अत्र सर्वत्र तिथिनक्षत्रयोगाय परोमुख्यः कल्पः । तदभावे तु तिथिरेव ग्राह्या ।

"तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् ।
तस्मात्तिथिं प्रशंसन्ति नक्षत्रं न तिथिं विना ॥"
इति विद्यापतिलिखितवचनात् ।

दैवलोऽपि—

"तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि ।" इति ।

अत्र च षष्ठी सायकालव्यापिनी ग्राह्या ।

"षष्ठ्यां बिल्वतरो. बोधं सायं सन्ध्या सुकारयेत् ।"
इति भविष्यवचनात् ।

पत्रीप्रवेशात्पूर्वेद्युः सायंकाले षष्ठ्यभावेन[2] पूर्वेदिनेऽधिवासनं कार्यम् । सायंकालेऽत्यन्तासत्त्वे त्वधिवासनलोपः । "षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम्" इति वचनादिति कल्पतरुः । सायंश्रुतिः फलातिशयमात्रार्था, न तु कर्मलोप इत्याचार्यचूडामणिः, कृत्यरत्नावल्यां कालतत्त्वविवेचने चैवमेव । आमन्त्रणन्तुपत्रीप्रवेशाव्यवहितपूर्वदिने कार्यम् । पत्रीप्रवेशनं रात्रौ न कार्यम् ।

---

१. पूर्वाह्ने इति 'ख' पाठः ।
२. तत् इति ख पाठोऽधिकः ।

“पत्रीविसर्जनं रात्रौ प्रवेशं वा करोति यः ।
तस्य राज्यविनाशः स्याद्वा ना च विप्लवो भवेत् ॥
ऋक्षयोगानुरोधेन रात्रौ पत्रप्रवेशनम् ।
विसर्गं वा चरेद्यस्तु सराष्ट्रः स विनश्यति ॥” इति

तेन च पत्रीप्रवेशनस्याष्टमीविद्धायां सप्तम्यां प्रातः कर्त्तव्यत्वात्तदव्यवहितपूर्वदिन एव सायाह्ने षष्ठ्यभावेऽप्यामंत्रणं कार्यम् ।

“पत्रीप्रवेशात्पूर्वेद्युः सायाह्ने बिल्ववासिनीम् ।
चण्डीमामन्त्रयेद्विद्वान्नात्र षष्ठी पुरस्क्रिया ॥”

इति ब्रह्माण्डपुराणवचनात्कार्त्तिकशुक्लषष्ठ्यां वह्निपूजोक्ता मत्स्यपुराणे ।

“वृश्चिकार्के शुक्लषष्ठी भौमवारेऽप्युपस्थिते ।
महाषष्ठी तु सा प्रोक्ता सर्वपापहरा तिथिः ॥
तस्यां स्वपिति वै वह्निः पूर्वत्रोपोष्य वै दिने ।
षष्ठ्यां वह्निं समभ्यर्च्य कृत्वा वह्निमहोत्सवम् ॥”[1]
इति कालादर्शे ।

मार्गशीर्षशुक्लषष्ठी स्कंदषष्ठी । तदुक्तं भविष्योत्तरे—

“येयं मार्गशिरे मासि षष्ठी स्कन्द[2] शुभाभिधा ।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया ॥
निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत् ।
रराज तेन दयिता कार्त्तिकेयस्य सा तिथिः ॥
स्नानदानादिकं कर्म तस्यामक्षयमुच्यते ।” इति ।

सा च कृष्णाष्टमीति स्कन्दवाक्यात् पूर्वविद्धा ग्राह्येति पूर्वमेवोक्तम् । इयमेव षष्ठी चम्पाषष्ठीति महाराष्ट्रे सुप्रसिद्धा । तस्यां खण्डेरायाख्यमल्लारिपूजा ब्राह्मणभोजनादिः मल्लारिमाहात्म्ये उक्तम् । तच्चोत्तरविद्धायां कार्यम् । षण्मुन्योरिति युग्मवाक्यात् । इयमेव योगविशेषेण चंपाभिधा । तदुक्तं ब्रह्माण्डपुराणेमल्लारिमाहात्म्ये—

मार्गे भाद्रपदे शुक्लाषष्ठी वैधृतिसंयुता ।
रविवारेण संयुक्ता सा चम्पेतीह कीर्त्तिता ॥ इति ।

---

[1] वृश्चिकार्के कार्तिके इति ख पाठोऽधिकः ।

[2] भरत सत्तम इति ख पाठः ।

वैधृतियोगकथनन्तु भाद्रशुक्लषष्ठ्यभिप्रायेण। अस्यां वैधृतियोगस्य सर्वथाऽसम्भवादिति। तिथ्यर्के, विशाखा भौमयोगेन सा चम्पेतीह विश्रुता" इति। मदनरत्ने तथा—

"मार्गशीर्षमले पक्षे षष्ठ्यां वारेँऽशुमालिनः।
शततारागते चन्द्रे लिङ्गं स्याद्दार्ष्टिगोचरम्॥"

इति शिवलिंगदर्शनं कार्यमित्यर्थः। उक्त प्रकारयोगानामन्यतरो यस्यां लभ्यते, सा पूर्वा परा वा ग्राह्या। योगाभावे तु परैव। सामान्यनिर्णयादेवमन्यान्यपि षष्ठीव्रतानि सप्तमीयुक्तायामेव तस्यां कार्याणीति सिद्धान्तः।

इति पौण्डरीकयाजि विश्वेश्वरविरचिते प्रतापभूपाज्ञया प्रतापार्क
विद्वद्विनोदकन्दे गतो मयूखोऽत्र षष्ठाख्यः॥

अथ सप्तमीनिर्णयः

सा चोपवासादौ षष्ठीयुतैव ग्राह्या । षण्मुन्योरिति युग्मवाक्या“त्षष्ठ्या युता सप्तमी च कर्त्तव्या तात सर्वदा” इति स्कान्दाच्च । यदा पूर्वेद्युरस्तमयपर्यन्ता षष्ठी परेद्युश्चक्षयवशादस्तमयादर्वागष्टम्यास्त्रिमुहूर्तसत्त्वादष्टमीविद्धा, तदा गुणानुरोधेन प्रधानलोपस्य न्याय्यत्वान्निषेधमतिक्रम्याप्युत्तरविद्धा गौणकालत्वेन स्वीकृत्य तत्रैवोपवासादि सर्वं कार्यम् । तत्र षष्ठीरविवाराभ्यां युक्तायां सप्तम्यां प[1]द्मक योगो भवति । तदुक्तम्—

‘षष्ठी च सप्तमी चैव वारश्चेदंशुमालिनः ।
योगोऽयं पद्मको नाम सहस्रार्कग्रहैः समः ॥” इति ।

अत्र स्नानदानादिकृतमक्षयफलदं भवति ।[2]सर्वेभ्योविशेषादयं योगो बोधव्य इति निर्णयसिन्धौ । अचला सप्तम्यामित्यन्ये । तत्प्रयुक्ते दिवाकरपूजने पूर्वाह्णव्यापिनी, दिनद्वये तथात्वे पूर्वैव । पूर्णत्वाद्युग्मवाक्याच्चेति कौस्तुभे ।

अथ सप्तमी विशेषनिर्णयः

तत्र चैत्रशुक्लसप्तम्यां दमनकादिभिः सूर्यपूजोक्ता निर्णयामृते देवीपुराणे । चैत्रमासतिथिप्रक्रमे—

“भास्करस्य तु सप्तम्यां पूजां दमनकादिभिः ।
कृत्वा प्राप्नोति भोगादीन्विगतारिर्महातपाः ॥” इति ।

वैशाखशुक्लसप्तम्यां गङ्गोत्पत्तिस्तत्पूजा चोक्ता । ब्राह्मे—

“वैशाखे शुक्लसप्तम्यां जह्नुना जाह्नवी पुरा ।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ॥
तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम् ॥”

---

१. पद्मकाख्यो योग इति ख पाठः ।

२. सर्वेष्वपिमासेषु अविशेषादिति ‘ख’ पाठः ।

तत्र परदिन एव मध्याह्नव्याप्तौ परा ग्राह्या । अन्यथा पूर्वैव शिष्टाः । मयूखे तु पूर्वाह्न-निर्णयसिंधु कृत्यरत्नावली-भट्टोजीदीक्षितीयादावप्येवम् । निर्णयामृते ब्रह्मपुराणे-व्यापिनीग्राह्येत्युक्तम् । आषाढ़शुक्लसप्तम्यां सूर्यपूजोक्ता निर्णयामृते ब्रह्मपुराणे–

"आषाढशुक्लसप्तम्यां विवस्वान्नाम भास्करः ।
जातः पूर्वस्तु तस्मात्तं तत्रोपोष्य यजेत्सदा ॥
रथचक्रा कृतौ रम्ये मंडले सर्वकामदम् ।
भक्ष्यैर्भोज्यैस्तथा पेयैः पुष्पैर्धूपैर्विलेपनैः ॥ इति ।

[1]शुक्लादिश्रावणे भाद्रपदकृष्णसप्तमी गुर्जरेषुप्रसिद्धा । शीतलाव्रतेषु[2] सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये हारीतोक्तेर्मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तत्त्वे पूर्वा ।

अथाश्विनशुक्लसप्तमी. तस्यां मूल युक्तायां केवलायां वा पूर्वदिनामन्त्रितां फलद्वययुक्तां शाखामानीय तया सह पंचम्यां स्नापितां देवीं पूजयेत् । तदुक्तं हेमाद्रौ लैङ्गे—

"मूलाभावे तु सप्तम्यां केवलायां प्रवेशयेत् ।
युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकां तथा ॥
तथैव प्रतिमां देव्याः स्नात्वाऽभ्युक्ष्य प्रवेशयेत् ।"

अत्र चोपवासपूजादावौदयिकी सप्तमी ग्राह्या, न तु युग्मवाक्यात्पूर्वा ।

"युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
[3]रवे हृद्यमीक्षन्ते न तत्र तिथियुग्मता ।।"

इति कृत्यतत्त्वार्णवोदाहृतवचनात् । दुर्गाभक्तितरंगिण्यामप्येवम् । तत्रापि घटिकातो न्यूनत्वे परा न कार्या । "व्रतोपवासनियमे घटिकैकापि या भवेत्" इति देवलोक्तेः इति गौड़ाः । दाक्षिणात्यास्तु युग्मवाक्यात्पूर्वां कुर्वन्ति । पत्रिका-पूजा च पूर्वाह्णे कार्या न तु [4]पूजानुरोधात् मध्याह्नादाविति कृत्यतत्त्वार्णवे उक्तः ज्यौतिषेऽपि—

"पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धप्रदा ।
आरोग्यं धनदा करोति विजयं चण्डिप्रवेशे शुभौ ।
मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा ।
सायाह्ने वधबन्धनादिकलहं सर्वक्षत सर्वदा ।।

---

[1] शुक्लादि श्रावणेति पाठः ख पाठे नास्ति ।

[2] पूजाव्रतेषु इति ख पाठोऽधिकः ।

[3] रवेरुदय इति ख पाठः ।

[4] मूलानुरोधान् इति 'ख' पाठः ।

सप्तम्यां चास्तगायां यदि विशति ग्रहं पत्रिका श्रीफला[1]ग्रा ।
राज्ञः सप्तांगराज्यं जनसुखमखिलं हन्ति मूलानुरोधात् ॥
तस्मात्सूर्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य वेवीं ।
भूपालो वेशयेत्तां सकलजनहितां राक्षसर्क्षं विहाय ॥" इति ।

अस्यामेव त्रिरात्रारम्भः कार्यः "त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रमम्" इति धौम्योक्तेः । अत्र सावित्रीव्रतवन्नवम्यनुरोधेन त्रिरात्रं कार्यमिति केचित् । केचिन्मतेऽहोरात्रत्रयसाध्यव्रतं बोध्यम् । वस्तुतस्तु नवरात्रे वृद्धिक्षयवशाद्दशरात्राष्टरात्रवदत्रापि चतुःरात्रे द्विरात्रेज्ञेयेति स्वमतमित्युक्तं तु प्रतिपन्नवरात्रारम्भवत् सप्तम्यामेवारम्भणीयमिदम् । तदुक्तं भविष्योत्तरे–

"व्रते च पूजयेद्देवी सप्तम्यादिदिनत्रये ।
द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात्तिथे ॥
भवानीतुष्टये पार्थ ! सम्वत्सरसुखाय च ।
भूतप्रेतपिशाचानां नाशार्थं चोत्सवाय च ॥" इति ।

इदं च त्रिरात्रानुष्ठानं काम्यंफलश्रवणात् । अत्रैव दारुसदनस्थापितां दुर्गां पूजयेत्' इत्युक्तं निर्णयामृते भविष्ये—

"सप्तम्यां नवगेहानि दारुजानि नवानि च ।
एक वा वित्तभावेन कारयेत्सुसमाहितः ॥" इत्याद्युक्ता ।

"तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुताम् ।
पूजयेत्प्रयतो देवीं नरो नियममास्थितः ॥" इति ।

अत्रैव मूलनक्षत्रे सरस्वतीस्थापनमुक्तं रुद्रयामले—

"मूल ऋक्षे सुराधीश ! पूजनीया सरस्वती ।
पूजयेत्प्रत्यहं देव यावद्वैष्णवमृक्षकम् ॥
नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देवि ! विद्याकामो द्विजोत्तम ॥" इति ।

मूलस्याद्यपादे आवाहनमिति शिष्टाः ।श्रावणाद्यपादे च विसर्जनम् ।

"आदिभागो निशायां तु श्रवणस्य यदा भवेत् ।
संप्रेषणं तदा देवा[2] दशम्यां च महोत्सवः ॥"

इति चिन्तामणौ ब्रह्माण्डपुराणात् । इयमेव बृहत्कल्पादिः । कार्तिककृष्णसप्तमी वैकुण्ठकल्पाद्रिः । कार्त्तिकशुक्लसप्तमी कल्पादिरिति केचित् । मार्ग-

---

[1] फलाढ्या
[2] देव्या इति ख पाठः

शीर्षशुक्लसप्तमी मित्रसप्तमी । तस्यां मित्रपूजा प्रोक्ता निर्णयामृते ब्रह्मपुराणे सप्तमी प्रकरणे—

"यद्विष्णोर्दक्षिणं नेत्रं तदेवाकृतिमत्पुनः ।
अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः ॥
सप्तम्यां तेन सा ख्याता लोकेऽस्मिन् मित्रसप्तमी ॥"

इति पौषादि चतुर्मासेषु कृष्णपक्षसप्तमीषु पूर्वेद्युः श्राद्धं कार्यम् । तदुक्तं कालादर्शे—

"मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने ।
कृष्णपक्षेषु पूर्वेद्युरान्वष्टक्यस्तथाष्टका ॥" इति ।

अष्टकाश्राद्धात्पूर्वेद्युरित्यर्थः । अष्टकात्वष्टमीनिर्णये वक्ष्यते । अत्राष्टमीश्राद्धानुरोधेन पूर्वेद्युः श्राद्धं कार्यं नापराह्णादिव्याप्त्या तत्र निर्णयः । मार्गशीर्षादयश्चात्रामान्ता ग्राह्याः ।

[1]मार्गशीर्षशुक्लसप्तमी मित्रसप्तमी, तस्यां मित्रपूजाद्युक्तं निर्णयामृते ब्रह्मपुराणे सप्तमीप्रकरणे—

"यद्विष्णोर्दक्षिणं नेत्रं तदेवाकृतिमत्पुनः ।
अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः ॥
सप्तम्यां तेन सा ख्याता लोकेऽस्मिन्मित्रसप्तमी ।" इति ।

पौषशुक्लसप्तमी बुद्धजयन्तीति केचित् । माघशुक्लसप्तमीस्नानादावरुणोदयव्यापिनी ग्राह्या ।

"सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥"

इति चंद्रिकायाम् [2]दिनद्वयेऽरुणोदये चेत्पूर्वैव षण्मुन्योरिति युग्मवाक्यात् । यत्तु दिवोदासीये—

"अचला सप्तमी दुर्गा शिवरात्रिर्महाभरः ।
द्वादशी वत्सपूजायां सुखदा प्राग्युता सदा ॥"

इति षष्ठीयुतत्वमुक्तम् ।

तद्यदा पूर्वेऽह्नि घटिकाद्वयं षष्ठी सप्तमी च परेद्युः क्षयवशादरुणोदयात्पूर्वं समाप्यते, तत्परं ज्ञेयम् । तत्र षष्ठ्यां सप्तमी क्षयं प्रवेश्यारुणोदये स्नानं कार्यम् । इयं प्रयागे प्रशस्ता ।

---

१. अत्र पाठस्यः पुनरावृत्तिः ।

२. विष्णूक्तेः इति पाठोऽधिकः ख पाठे ।

"अरुणोदयवेलायां शुक्लामाघस्य सप्तमी ।
प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समा ॥"
इति स्मृत्यन्तरात् ।

यत्तु तिथ्यर्के-अयं च स्नानकालोऽरुणोदये माघे स्नान्ति तान्प्रत्येव अन्यान् प्रति तु श्रीसूर्योदयः—

"माघमासस्य सप्तम्यामुदयत्येव भास्करे ।
विधिवत्तत्र च स्नानं महापातकनाशनम् ॥"

इत्यपरार्केविष्णूक्तेरित्युक्तं तन्मृग्यम् । मदनरत्नादि सर्वप्राचीननवीनग्रन्थेष्वेतद्वचनस्यानुपलम्भान्मदनरत्नादिप्राचीनग्रंथविरोधाच्च । अस्यां रथदानमुक्तं भविष्योत्तरे—

"एवंविधं रथवरं रथवाजियुक्तं, हैमं च हैमशतदीधितिभासमेतम् ।
दद्याच्च माघसितसारुणवासरे यः, सोऽसंगचक्रगतिरेव महीं भुनक्ति ॥"

इति निर्णयामृते सप्तमीप्रकरणे ।

"रविवारेण युक्तायां सप्तम्यामुत्तरायणे ।
पुन्नाम्नि च नक्षत्रे पूजयेद्धि[1] दिवाकरम् ॥"

"उत्तरायणे माघे" इति तत्रैव व्याख्यातम् । पून्नामनक्षत्राणि ज्योतिःशास्त्रे उक्तानि—

"हस्तो मैत्रस्तथा तुष्यो मृगशीर्षः पुनर्वसुः ।
पुन्नामधेयनक्षत्राण्येतान्याहुर्मनीषिणः ॥" इति ।

अस्यामेव काशीखण्डे- -

"लोलार्के रथसप्तम्यां स्नात्वा गंगासिसंगमे ।
सप्तजन्मकृतैः पापैर्मुक्तो भवति तत्क्षणात् ॥" इति ।

पद्मकयोगश्चात्र सति संभवे ज्ञेयः । स च सामान्यनिर्णय एवाभिहितः । इयं मन्वादिः, सा शुक्लपक्षस्थत्वात्पौर्वाह्णिकी ग्राह्या । माघस्य मलमासत्वे [2]श्राद्धमुभयत्रापि कार्यम् । मन्वादिकमिति पूर्वोक्तवचनात् । एवमन्यान्यपि सप्तमीव्रतानि षष्ठीयुतायामेव तस्यां कर्त्तव्यानीति सिद्धान्तः ।

इति पौण्डरीकयाजि विश्वेश्वरविरचिते प्रतापभूपाज्ञया प्रतापार्के
विद्वद्विनोदकन्दे गतो मयूखोऽत्र ऋष्याख्यः ॥

◆

---

[1] च इति ख पाठः

[2] मन्वादि श्राद्धमिति पाठो ख पाठेऽधिकः

अथाष्टमीनिर्णयः

सा चोपवासादि सर्वकर्मसु सर्वमते कृष्णापूर्वा शुक्लोत्तरा वर्तमानेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परेतिमाधवोक्तेः । परयुक् शुक्लाष्टमो पूर्वयुक् कृष्णेति दीपिकोक्तेः ।

"शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्त्तव्या, कर्त्तव्या परसंयुता ।। इति ।
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशो ।
पूर्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ।।
उपवासेषु राजेंद्र ! एष धर्मः सनातनः ।"

इति नैगमाच्च ।

मदनरत्ने तु—

"उपवासे तु पक्षद्वयेऽप्यष्टमी परयुतैव ग्राह्या ।
उपवासे सप्तमी तु वेधाद्ध्युत्तरं दिनम् ।।
पक्षयोरुभयोरेष उपवासविधिः स्मृतः ।।"

इति नारदीयादेकादश्यष्टमी षष्ठीति पूर्वोदाहृतभृगुवचनाच्च निगमवचने उपवासग्रहणं रुद्रोपवासविषयम् । "रुद्रव्रतेषु सर्वेषु कर्त्तव्या सम्मुखी तिथिरि" ति स्मृत्यन्तरवचनादित्युक्तम् । शिवशक्तिमहोत्सवे तु पक्षद्वयगताप्यष्टमी नवमीयुतैव ग्राह्या ।

"अष्टमी [नवमी योगे महोत्साहे महोत्सवः ।
शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपि ।।"

इति पाद्मवचनात् ।

शक्तिपूजायान्त्वष्टमी रात्रीव्यापिनी ग्राह्या । तदुक्तं देवीपुराणे—

"निशायां पूजिता देवी वैष्णवी पापनाशिनी ।
तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेत् ।।"

इति दिनद्वये रात्रिव्याप्तावधिकरात्रिव्यापिनी ग्राह्या । तुल्यव्याप्तावुत्तरैव प्रातरारभ्य कर्मकालपर्यन्तसद्भावात्सर्वास्वष्टमीषु भैरवयात्रा प्रोक्ता काशीखण्डे—

“अष्टम्यां च चतुर्दश्यां रविभूमिजवासरे ।
यात्रां च भैरवीं कृत्वा नरः पापात्प्रमुच्यते ॥”

इति तथा—

“अष्टम्यां च चतुर्दश्यां भौमवारे विशेषतः ।
सम्पूज्य सततं काश्यां दुर्गादुर्गतिनाशिनीम् ॥” इति ।

अथाष्टमी विशेषनिर्णयः

[1]तत्र चैत्रकृष्णाष्टम्यप्यष्टका । इमामेवारभ्य चतुर्षु मासेषु शीतलाव्रतं कार्यम् तदुक्तं स्कान्दे—

चैत्रे मास्यसिते पक्षे याष्टमी शीतलाह्वया ।
तामारभ्य प्रकर्त्तव्यं यावन्मासचतुष्टयम् ।।” इति ।

[2]कृष्णाष्टमी, शीतलाष्टमी, फाल्गुनपूर्णिमानन्तराष्टकोक्त वक्ष्यते ।

चैत्रशुक्लाष्टम्यां भवानी यात्रोक्ता काशीखण्डे—

‘‘चैत्राष्टम्यां महायात्रां भवान्याः कारयेत्सुधीः ।
अष्टाधिकाः प्रकर्त्तव्या शतंकृत्वा प्रदक्षिणाः ॥
भवानीं यस्तु पश्येत् शुक्लाष्टम्यां मधौ नरः ।
न जातु शोकं लभते सदानन्दमयो भवेत् ॥” इति ।

---

[1] अत्र ख पाठे एक पृथक् पृष्ठः स्थापितोऽस्ति यस्मिन् शीतलाष्टमी सम्बधी अन्यत् मतं विलिखितमस्ति यद्यथा—राम निबन्धे—चैत्रकृष्णाष्टमी शीतलाष्टमीत्युच्यते । सा सायह्नव्यापिनी ग्राह्या, तदुक्तं स्कान्दे—वृहत्तपाचरं मा च सावित्री वटपैत्रिकी । अष्टमी शीतलायाश्च कर्त्तव्या संमुखी तिथिः । सम्मुखी सायह्नव्यापिनी । दिनद्वये चेत् पूर्वैव तत्कृत्यं तत्रैव चैत्रमास्यसिते पक्षे याष्टमी शीतलाह्वया तामारभ्य प्रकुर्वीत यावन्मासचतुष्टयम् । तावत्तु शीतलादेवी पूजनीयातिभक्तितः । तत्र ध्यानमन्त्रः मन्त्रशास्त्रे—“दिगंवरां मार्जनिकां च शूर्पङ्करद्वये संदधतीं घनाभां श्रीशीतलां सर्वरुजार्त्ति हंत्रीं रक्तांगरागाभरणां नमामि । इति ध्यानम् । ॐ ह्रीं श्रीं शीतलायै नमः । इति मन्त्रेण पाद्यादिभिः संपूजयेत् । शनि भौमौ परित्याज्यौ पञ्चवारा शुभावहाः । शनौ बालमृतिश्चैव भौमे पिटक पीडनम् । शनिभौम दिने यत्र चैत्रकृष्णाष्टमी भवेत् । पूजनीया विशेषेण सप्तम्यां तत्रशीतला इति ‘राम निबन्धे’ शीतलाष्टमी निर्णयः ।

[2] कृष्णाष्टमी इत्यारभ्य वक्ष्यते इत्यन्तः पाठः ख पाठेनास्ति ।

"इयं परयुता ग्राह्या । "अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।" इति ब्रह्मवैवर्त्तयुग्मवाक्याच्च । अत्रैवाशोककलिकायाः प्राशनमुक्तं कौर्मे—

"चैत्रे मासि सिताष्टम्यां बुधवारे पुनर्वसौ ।
अशोककुसुमैः रुद्रं अर्चयित्वा विधानतः ॥
अशोकस्याष्टकलिका मंत्रेणोपतेन भक्षयेत् ।
शोकं नैवाप्नुयान्मर्त्यो रूपवानपि जायते ॥" इति ॥

अत्र बुधपुनर्वसुयोगः प्राशस्त्यार्थः ।

"तिथिः शरीरं देवस्य [1]तिथौ नक्षत्रमाश्रितम् ।
तस्मात्तिथिं प्रशंसन्ति न नक्षत्रं तिथिं विना ॥"
इति ज्योतिःशास्त्रात् ।

लैङ्गपुराणे तु—

"अशोककलिकापानं अशोकतरुपूजनम् ।
शुक्लाष्टम्यां तु चैत्रस्य कृत्वा प्राप्नोति निर्वृतिम् ॥"
इति केवलाष्टम्युपादानम् ।

एतेन नक्षत्रायोगे कर्मलोप इत्युक्तं कैश्चित्तदपास्तम् । अत्र विशेषस्तिथितत्त्वे कालिकापुराणे—

"चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नायाल्लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥" इति ।

लौहित्यो ब्रह्मपुत्रः –

"दृष्ट्वा चन्द्रोदये विष्णुः पुनर्वसुबुधे[3]न च ।
चैत्रे मासि सिताष्टम्यां[4] स्नानदानजपैः प्रातः लभेत्सोऽप्यक्षयं फलम् ॥"इति ।

वैशाखशुक्लाष्टम्यामाम्ररसेन स्नानमुक्तं निर्णयामृते देवीपुराणे—

"सहकारफलैः स्नानं वैशाखे ह्यष्टमीदिने ।
आत्मनो देवतां स्नाप्य मांसीवालकवारिभिः ॥
लेपनं फलं कर्पूरं धूपं दीपं सगन्धकम् ।"

---

[1] उक्त पाठः ख पाठे नास्ति ।
[2] इति कृत्यरत्नावल्यां अतएव इति पाठः 'ख' पाठेऽधिकः ।
[3] बुधोपेत इति 'ख' पाठः ।
[4] चैत्रमासि सिताष्टमी, प्रातस्तु विधिवत् स्नात्वा वा जपेय फलं लभेदिति इति 'ख' पाठः

आत्मन इत्यस्य पूर्वार्द्धे स्नानमित्यनेनान्वयः मांसी जटामांसी, फल जातीफलम्, देवतामपराजिताख्यां देवीमिति व्याख्यातं तत्रैव । सवत्सरप्रदीपे विशेष उक्तः—

"देव्याः पूजां प्रकुर्वीत केतक्या चम्पकेन च ।
शर्कराक्षीरनैवेद्यं कन्याविप्रेषु भोजनम् ॥

आत्मनः पारणं तद्वद्दक्षिणां शक्तितो ददेत् ।
सर्वतीर्थाभिषेकं तु अनेनाप्नोति भार्गवः ॥" इति ।

ज्येष्ठकृष्णाष्टम्यां विशेषो भविष्योत्तरे—

"ज्येष्ठे मासि द्विजश्रेष्ठ ! कृष्णाष्टम्यां त्रिलोचनम् ।
यः पूजयति देवेशमीशलोकं व्रजेन्नरः ॥" इति ।

"ज्येष्ठ शुक्लाष्टम्यां शुक्लां देवीं पूजयेत्' इति उक्तं देवीपुराणे—

"शुक्लाष्टम्यां पुरा जाता शुक्ला देवी महानिशि ।
वधाय दानवेन्द्राणां शुक्लपक्षे ततो यजेत् ॥" इति ।

"आषाढशुक्लाष्टम्यां महिषघ्नीं देवीं पूजयेदित्युक्तं देवीपुराणे ।

"अष्टम्यां च तथाषाढे निशातोयेन स्नापयेत् ।
स्वयं स्नात्वा च कर्पूरैश्चन्दनैस्तां विलेपयेत् ॥

भक्ष्यान् शर्करया पूर्णान् यानकानि शुभानि च ।
शक्तितो दक्षिणां दद्यान्महिषघ्नीं च कीर्तयेत् ॥" इति ।

निशा हरिद्रा । अत्र सामान्यनिर्णयो ज्ञेयः ।[1]श्रावणकृष्णाष्टमी मन्वादिः ।

अथ जन्माष्टमी निर्णीयते

सा चामान्तमासपक्षेण श्रावणकृष्णाष्टमी । पूर्णिमान्तमासपक्षेण भाद्रपदकृष्णाष्टमी उभयथाप्येकैव । उभयविधोऽपि स्मार्त्तव्यवहारो दर्शयिष्यते ।

सा[1] च द्विधा, जन्माष्टमी जयन्ती च । तत्र केवला जन्माष्टमी रोहिणीयुक्ता जयन्ती, तत्राद्योक्ता स्कान्दे—

"अष्टमी श्रावणे मासि कृष्णपक्षे यदा भवेत् ।
कृष्णजन्माष्टमी ज्ञेया महापातकनाशिनी ॥ इति ।

---

१. उक्तपाठः ख पाठे नास्ति

२ इयञ्च द्विविधा इति 'ख' पाठः

जयन्ती तूक्ता वह्निपुराणे—

"कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि ।
जयंती नाम सा प्रोक्ता उपोष्या स्यात्प्रयत्नतः ॥" इति ।

तत्र जन्माष्टमी नित्या,

"ये न कुर्वन्ति जानन्तः कृष्णां जन्माष्टमीव्रतम् ।
ते भवन्ति नराः प्राज्ञा व्याला व्याघ्राश्च कानने ॥"
इति स्कान्देऽकरणेऽनिष्टश्रुतेः

"काम्या च जन्माष्टमी व्रतं ये वै प्रकुर्वन्ति नरोत्तमाः ।
कारयन्त्यथवा लोकांल्लक्ष्मीस्तेषां सदा स्थिता ॥
सिद्ध्यन्ति सर्वकार्याणि कृते जन्माष्टमी व्रते ।"

इति स्कान्दादौ फलश्रवणात् । जयन्त्यपि नित्या काम्या च । तत्र नित्या स्कान्दे—

"शूद्रान्नेन तु यत्पापं शवहस्तस्थभोजने ।
तत्पापं लभते कुन्ति ! जयन्ती विमुखो नरः ॥
न करोति यदा विष्णोर्जयन्ती सम्भवं व्रतं ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥"

इत्यकरणे प्रत्यवाय श्रवणात् ।

काम्याऽप्युक्ता स्कान्दे—

"मया[१] जयार्थं कुरुता जयन्ती मुक्तयेऽथवा ।
धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव ॥
ददाति वांछितानर्थान् ये चान्येऽप्यतिदुर्लभाः ॥"

इति फलविशेषश्रवणात् । अत्र केवलेनोपवासेन तस्मिन् जन्मदिने मम "शतजन्मकृतात्पापात्प्रमुच्यते नात्र संशयः" इति वाक्ये केवलोपवासस्य फलसम्बन्ध प्रतीतेरुपवास एव प्रधानः पूजादेः स्पष्टम् । तृतीया श्रुत्या फलसंबन्धानवगमात्तदङ्गत्वं "तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम्" इत्यादिफलश्रवणन्तु पर्णमयीन्यायेन स्तुतिमात्रमिति प्राञ्चः । कालतत्त्वविवेचनकारादयो—

नव्यास्त्वष्टमी रोहिणी युक्ता निश्यर्धेदृश्यते यदि ।
मुख्यकालः स विज्ञेयस्तत्रजातो हरिः स्वयम् ॥ इति

---

१. महा इति ख पाठः ।

वसिष्ठ वाक्ये मुख्यस्य प्रधानस्य काल इति व्युत्पत्त्यार्द्धरात्रस्य प्रधानकालत्वप्रतोतेः उपवासस्यैव प्राधान्ये तदनुपत्तिः । पूजाया अपि प्राधान्ये, तस्या अर्द्धरात्र एव विधानादर्धरात्रस्य प्रधानकालत्वं संगच्छते । अतरुभयोरपि प्राधान्यमित्याहुः । मयूखकारास्तु 'सोपवासो हरेः पूजां कृत्वा तत्र न सीदति" इत्यत्र

"मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्धरात्रके ।
शशाङ्के वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके ॥
योगेऽस्मिन् वसुदेवाद्धि देवकी मामजीजनत् ।
तस्मान्मां पूजयेत्तत्र शुचिः सम्युगुपोषितः ॥"

इत्यादावुपवासस्य गुणत्वप्रतीतेः सदतोधावतीत्यादिवत्फलिसंस्कारः पूजैव प्रधानमित्याहुः ।स्मृतिकौस्तुभे तूपवासपूजादिक्रिया समूह विषयकसंकल्पापरपर्यायव्रतस्यैव फलसम्बन्धेन प्राधान्यमान्तरात्मिकक्रियाफलपराणि वचनानि त्वार्थवाद इत्युक्तम् । अस्याश्च पूजायाः काल उक्तो विष्णुधर्मोत्तरे—

"रोहिणी सहिता कृष्णा मासि भाद्रपदेऽष्टमी ।
सप्तम्यामर्धरात्राधः कलयापि यदा भवेत् ॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ।
तमेवोपवसेत्कालं तत्र कुर्याच्च जागरम् ॥
अर्धरात्रे तु योगोऽयं तारापत्युदये तथा ।
नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्तयेत् ॥"

इति रोहिणीयोगश्चाहोरात्रे मुख्यतरो निशीथमात्रे मुख्योदिवसादावधमः ।

"अहोरात्रं तयोर्योगो ह्यसम्पूर्णो भवेद्यदि ।
मुहूर्त्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत् ॥"
इति वसिष्ठसंहितोक्तेः ।

"अर्द्धरात्रे तु योगोऽयमिति विष्णुधर्मोक्ते ।
वासरे वा निशायां वा यत्र स्वल्पाऽपि रोहिणी ॥
विशेषेण नभोमासे सैवोपोष्या मनीषिभिः ॥"
इति पुराणान्तराच्च ।

गौडास्तु— 'निशीथ एव रोहिणीयोगे जयन्ती नान्यथा' इत्याहुः । निशीथपरिमाणं चोक्तमादित्यपुराणे—

"अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ॥"

कलाया अतिसूक्ष्मत्वेन दुर्लक्ष्यत्वाद्योगीश्वरः पक्षान्तरमाह—

"अर्धरात्रादधश्चोर्ध्वमेकार्धघटिकान्विता ।
रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिषु ।।" इति ।

एका चार्द्धघटिका चैकार्धघटिकेनाभ्यामन्विता कलामपेक्ष्यार्द्धघटिका स्थूलानामपेक्ष्य घटिकास्थूला ।

तत्रायमर्थः संपद्यते, पूर्वभागावसान एका घटिका उत्तरभागादौ चैकेति मिलित्वा तन्निशीथशब्दवाच्यं मुहूर्त्तं तावत्परिमाणं सर्वैरपि सुलक्ष्यत्वान्मुख्यः कल्पः । तदसम्भवे घटिकार्धघटिकाऽन्वेष्टव्या तस्याप्यसम्भवे कलेति । योऽयं जयन्तीव्रते योगनिर्णयः स एव जन्माष्टमीव्रतेऽपि द्रष्टव्यः । यस्मिन् वत्सरे योगो-नास्ति, तस्मिन् वत्सरे जन्माष्टमीव्रतमेकमेव प्रवर्तते । यदा च पूर्वेद्युपरेद्युर्वाष्टम्यां रोहिणीयोगस्तदा जन्माष्टमी जयन्त्यामन्तर्भूता ज्ञेया, न तु जन्माष्टमीव्रतं पृथक्कार्यम् । तदुक्तं माधवेन—

"यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा ।
अन्तर्भूता जयन्त्यां स्यादृक्षयोगो प्रशस्तितः ।।" इति ।

मदनरत्न-निर्णयामृत-गौड मैथिलमतेऽप्येवम् । हेमाद्रिस्तु—

"रोहीणी संयुतोपोष्या सर्वाघौघविनाशिनी ।
अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत् ।।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ।"

इत्यग्निपुराणादर्धरात्रे एव रोहिणीयोगस्य प्राशस्त्यान्मुहूर्त्तमपि लभ्येत्यादीनां चार्धरात्रयोगेऽप्युपपत्तेर्न जयन्तीव्रतं भिन्नम् । किञ्च—

रोहिण्यामर्धरात्रे च यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ।।"
इति विष्णुधर्मोक्तेः ।

"समायोगे तु रोहिण्यां निशीथे राजसत्तम ।
समजायत गोविन्दो बालरूपी चतुर्भुजः ।।
तस्मात्तं पूजयेत्तत्र यथावित्तानुरूपतः ।"

इति वह्निपुराणाच्चार्द्धरात्रस्य कर्मकालत्वमवसीयते । अतः 'कर्मणो यस्य यः काल०' इत्यादिवचनात्पूर्वत्रैव प्राप्तेः परदिने सतोऽपि रोहिणीयोगस्य न प्रयोजकता । अन्यथा बुधवारादेरपि तत्त्वापत्तेः । किंच जयन्ती शब्दो रात्रिविशेषवचनः ।

"अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी ।
मुहूर्त्तो विजयो नाम यत्र जातो जनार्दनः ॥"

इति ब्रह्माण्डपुराणात् ।

तेन तद्योगि रोहिण्या गौणत्वान्न व्रतभेद इत्यूचिवानिति निर्णयसिन्धौ, वेधश्चात्र तिथ्यन्तरवदष्टम्यार्दिवाप्रवेशे सत्येव न किंतु रात्रिमात्रसत्त्वेऽपि भवत्येव । पूजारूपस्य प्रधानस्यार्धरात्रसाध्यत्वात्—

"अहस्सु तिथयः पुण्याः कर्मानुष्ठानतो दिवा ॥
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ॥"

इति वचनात्

"अष्टमी शिवरात्रिश्च ह्यर्धरात्रादधो यदि ।
दृश्यते घटिका या सा पूर्वविद्धा प्रकीर्तिता ॥"

इति पुराणान्तराच्च ।

तत्राष्टोमी द्विधा—रोहिणीरहिता तद्युना च । आद्यापि चतुर्धा–पूर्वेद्युरेव निशीथयोगिनी, परेद्युरेवोभयेद्युरनुभयेद्युश्चेति । तत्र प्रथमद्वितीय पक्षयोः कर्मकालव्यापित्वेनासन्दिग्धैव । अन्त्ययोः [1]पक्षयोस्तु प्रातः संकल्पकाले सत्त्वाधिक्याद्वर्जनोया प्रयत्नेन सप्तमी संयुताष्टमी"ति ब्रह्मवैवर्ताच्च परैव । एवमंशतो निशीथे समव्याप्तावपि परैव । विषमव्याप्तौ त्वाधिक्येन निर्णयः । रोहिणीयुताऽपि चतुर्धा-पूर्वेद्युरेव निशीथे रोहिणीयुता, परेद्युरेव तादृशी, उभयेद्युरनुभये द्युश्च । तत्र पूर्वेद्युर्निशीथयुता पूर्वैव "कार्या विद्धापि सप्तम्या रोहिण्या सहिताष्टमी ।', इति पाद्मात् ।

'सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि ।
भविता साऽष्टमी पुण्या यावच्चंद्रदिवाकरौ ॥"

इति वह्निपुराणाच्च ।

द्वितीयपक्षे परा, तृतीयपक्षेऽपि परैव ।

"वर्जनीया प्रयत्नेन सप्तमी संयुताष्टमी ।
ऋक्षापि न कर्त्तव्या सप्तमीसंयुता[2] हि सा ॥"

इति ब्रह्मवैवर्तात् ।

चतुर्थ्यंपित्रेधा–पूर्वेद्युर्निशीथेऽष्टमी, परेऽह्नि स्वल्पाष्टमी रोहिणो च । यद्वा परेऽह्न्यष्टमी निशीथादर्वाक् पूर्वेऽह्नि च निशीथोत्तरं प्रवृत्ता[3] रोहिणीयुक्

---

[1] अपि 'ख' पाठोऽधिकः ।

[2] अष्टमी इति 'ख' पाठोऽधिकः ।

[3] अष्टमी इति 'ख' पाठोऽधिकः ।

उभयेद्युरुभयस्य निशीथसम्बन्धो वा । आद्ये पूर्वेद्युः रोहिणीरहिताऽपि निशीथैव ग्राह्या । कर्मकालशास्त्रप्राबल्या[1]दिसमायोगे तु रोहिण्या निशीथे राजसत्तमेति बह्निपुराणे तस्य कर्मकालतोक्तेः । 'कर्मणो यस्य यः कालः०' इतिवचनात्कर्मकालगैव ग्राह्येति मयूखकाराः हेमाद्रिमाधवादयः सर्वनिबंधकारास्तु—

"दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला ।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ॥"

इति पुराणान्तरवचनेन कर्मकालशास्त्रस्य यवस्थाकरणात् ।

"प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्त्तमपि लभ्येत सोपोष्या सा महाफला ॥
मुहूर्त्तमप्यहोरात्रे यस्मिन् युक्तं हि लभ्यते ।
अष्टम्या रोहिणी ऋक्षं तां पुण्यां समुपावसेत् ॥

इति विष्णुरहस्यवचनाच्च ।

"यस्मिन् वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा ।
अन्तर्भूता जयन्त्यां स्यादक्षयोग प्रशस्तितः ॥
उदये चाष्टमी किंचिन्नवमी सकला यदि ।
भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ॥
अपि वर्षशतेनापि लभ्यते यदि मानवः ।"

इत्यादिवचनैः 'परेऽह्नि रोहिणी सहिता निशीथास्पृगपि परैव कार्या" इत्याहुः । निर्णयसिंधौ तूपवासद्वयं कार्यम् । द्वयोर्नित्यत्वादिति तु वयमित्युक्तम् । अन्त्ययोः परैव सप्तमी संयुता[3]ष्टमी गता भूत्वा ऋक्षं द्विजोत्तम ।

"प्राजापत्यं द्वितीयेऽह्नि मुहूर्त्तार्द्धं भवेद्यदि ।
तदाष्ट यामिकं पुण्यं प्रोक्तं व्यासादिभिः पुरा ः।"

इति स्कांदान्मुहूर्तेनापि संयुक्ता सम्पूर्णा साऽष्टमी भवेत् । किं पुनर्नवमीयुक्ता कुलकोद्यास्तु मुक्तिदा" इति पाद्माच्चेति दिक् ।

अथ नृसिंह परिचर्यामतं लिख्यते ।

सूर्योदयादुपरि पलमात्रेणाप्यष्टमीनिर्गमे सत्यामसत्यां वा रोहिण्यां द्वितीय दिन एव जन्माष्टमीव्रतं कार्यम् । "उदयेचाष्टमी किंचित्" इति स्कान्दवचनात् । सप्तमी विद्धा तु सर्वथा त्याज्यैव ।

---

१. आदि समायोगे इत्यारभ्य कर्म कालगैव ग्राह्येति 'ख' पाठोऽधिकः ।
२. उक्त पाठः ख पाठे नास्ति ।
३. अष्टम्यामिति 'ख' पाठः ।

"जन्माष्टमीं पूर्वविद्धां सऋक्षां सकलामपि ।
विहाय नवमीं शुद्धामुपोष्य व्रतमाचरेत् ॥"

शुद्धामृक्षहीनां—

"पलवेधे तु विप्रेन्द्र ! सप्तम्या अष्टमीं त्यजेत् ।
सुरायाविन्दुना स्पृष्टं गंगाम्भःकलशं यथा ॥"

इति वचनात् ।

अष्टम्यनिर्गमे तु सप्तमी विद्धाऽप्युपोष्या । एकादश्या अनिर्गमेऽपि दशमी विद्धापरित्यागेन शुद्धद्वादश्युपवासविधानवच्छुद्धनवम्युपवासविधानाभावात् । रोहिणीयोगस्तु बुधसोमवारादियोगवत्प्राशस्त्यातिरेकपरो नोपवासप्रयोजकः । तथात्वे तदभावे व्रतलापप्रसंगात् । कालनिर्णयकारास्तूभयार्धरात्रे राहिण्यष्टमोयोगे उभयार्धरात्रे, रोहिण्यष्टमायोगाभावे तूत्तरार्द्धरात्र एव । रोहिण्यष्टमीयोगे पूर्वार्द्धरात्रे रोहिणीमात्रयोगे चोत्तरैवोपोष्या । अन्यदा पूर्वा दिनद्वयेऽऋक्षाभावे पूर्वेति व्यवस्थापयिष्णव उदये चतस्य दिनद्वयेऽप्यर्धरात्ररोहिण्यष्टमीयोगपरत्वं वर्णयां बभूवुः । तत्राष्टमीयोग तिरिक्तस्य ऋक्षादियोगस्योपचारविधानायोद्देश्यविशेषणतया विवक्षितत्वे हविर्यस्योभयं, हविरार्त्तिमाच्छेत् । [1]इयं च शरावमोदन निवपेत् । अत्र हविर्विशेषणमुभयत्वं न विवक्षित तेन सायंकालिकस्य प्रातस्तनस्य वोप[2]पद्यतेऽपि प्रायश्चित्तमिति भावः । अत्रोद्देश्यमष्टमीविशेषयाऽस्य ऋक्षादियोगस्य विवक्षायां वाक्यभेदः स्फुटः[3] । अष्टम्यां व्रतं कार्यं ऋक्षादियोगे चेत्येवं रूपः भयत्त्रावदापातत्तो वाक्यभेदस्य परिहारो दिव्यदृष्ट्या शिष्टैरन्वेष्टव्य इति । निम्बादित्यसम्प्रदायिभिर्जन्माष्टमी-रामनवमी-शिवरात्र्यादौ पूर्वेऽह्नि कर्मकालीनां तिथिं त्यक्त्वा द्वित्रिमुहूर्त्ता परैव ग्राह्या । इदञ्च व्रतं प्रतिमासं कृष्णाष्टम्यामप्युक्तं मदनरत्ने ।

वह्निपुराणे तु—

"प्रतिमासं च ते पूजामष्टम्यां यः करिष्यति ।
मम चैवाखिलान्कामान् स सम्प्राप्स्यत्यसंशयम् ॥ इति ।

अथ पारणनिर्णयः

तच्च केवलाष्टम्युपवासे पारणदिने तिथ्यनुवृत्तौ दिवा तिथ्यन्तलाभे दिवैव तिथ्यन्ते कर्त्तव्यम् । तदाह भृगुः—

---

१. ऐन्द्रं पञ्च शराव मोदनं निर्वपेत इति 'ख' पाठः ।
२. वोपघातेऽपि इति ख पाठः ।
३. एव 'ख' पाठोऽधिकः ।

"जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च।
पूर्वविद्धैव कर्त्तव्या तिथिभाने[1] च पारणम्॥"

इति केवलतिथिव्रते तिथ्यन्ते नक्षत्रव्रते नक्षत्रान्ते इति द्रष्टव्यम्। केवलरोहिणीव्रतस्यापि गौडनिबन्धेषु दृष्टत्वात्। रोहिणीयुक्ताऽष्टम्युपवासे तु पारणदिने उभयानुवृतावुभयान्ते तत्कर्त्तव्यम्,

कार्याविद्धा तु सप्तम्या रोहिणीसहिताऽष्टमी।
तत्रोपवासं कुर्यात्तिथिभाने च पारणम्॥"
इति पद्मपुराणात्।

"तिथिरष्ट गुणं हन्ति नक्षत्रं च चतुर्गुणम्।
तस्मात्प्रयत्नतः कुर्यात्तिथिभाने च पारणम्॥"
इति ब्रह्मवैवर्ताच्च।

यदि तिथिनक्षत्रयोरन्यतरान्तो दिवैव लभ्यते। उभयान्तस्तु रात्रौ तदा दिवैवान्यतरान्ते पारणं कार्यम्।

"सर्वेषु चोपवासेषु दिवा पारणमिष्यते।
अन्यथा पुण्यहानिः स्यादृते धारणपारणम्॥"
इति ब्रह्मवैवर्तवचनात्।

"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्।
पारणं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः॥"

इति नारदीयेऽन्यतरान्ते पारणाभ्यनुज्ञानाच्च। यदा तु दिवा नैकस्याप्यन्तस्तदा निशीथादर्वागन्यतरान्ते उभयान्ते वा पारणं कार्यम्। तदुक्तं ब्रह्माण्डे,

"न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्।
तत्र निश्योऽपि तत्कुर्याद्वर्जयित्वा महानिशाम्॥" इति।

नारायणीयधर्मप्रवृत्तौ—

"तिथ्यर्क्षे रात्रिपर्यन्तं स्यातां चेत्पारणं दिवा।
यामत्र योऽर्धगामिन्यां प्रातरेव हि पारणाः॥
त्रियिर्यामत्र यादर्वाक् तिथिभान्ते च पारणम्॥" इति।

इदं महानिबन्धेष्वसत्त्वान्निर्मूलमिति केचित्। यदा तु महानिशाऽव्यवहितपूर्वक्षण एव महानिशाऽथवा एकतरस्योभयोर्वाऽन्तस्तदा महानिशायामपि पारणं कर्त्तव्यम्।

---

[1] तिथि भान्ते इति ख पाठः।

"तिथ्यृक्षयोर्यदाच्छेदो नक्षत्रान्तत[1]श्चापि वा ।
अर्द्धरात्रेऽपि वा कुर्यात्पारणं त्वपरेऽहनि ॥"

इति हेमाद्रिवचनात् ।

अर्धरात्रे महानिशायां तत्रैवभोजनप्रतिषेधात् प्रतिप्रसवस्योचितत्वान्निर्णयसिन्धावपि महानिशातोर्वागन्यतरान्तलाभे महानिशानिषेधो महानिशायामेव लाभे तत्रैव पारणमित्युक्तम् । यत्तु मयूखे उक्तम्- सर्वेषु[2] चोपवासेष्विति ब्रह्मवैवर्ते निषेधात्—

"अन्यतिथ्यागमो रात्रौ तामसस्तैजसो दिवा ।
तामसे पारणं कुर्वंस्तामसीं गतिमश्नुते ॥" इति ।

गरुडपुराणाच्च पारणं रात्रौ न कुर्यात् किन्तु दिवैवेति तत्प्रौढिवादमात्रम् । "अर्धरात्रेऽपिवा कुर्या"दित्याद्यनेकवचनानर्थक्यप्रसंगात्प्राचीनहेमाद्र्यादि सर्वग्रन्थविरोधाच्च । महानिशा च सार्द्धयामादुपरितनो यामः । तदुक्तं— "महानिशाऽनुविज्ञेया मध्यमा मध्ययामयोः" इति । इदमेव हेमाद्रि मदनरत्नमाधवादीनां मतम् । कामधेनौ गर्गस्तु—"महानिशा तु विज्ञेया मध्यमं प्रहरद्वय" मित्याह । वृद्धशातातपास्तु—"महानिशा द्वे घटिके रात्रौ मध्यमयामयो"रित्याहुः वेदपाठपर तदित्यन्ये—अशक्तस्त्वन्यतरान्तस्याप्यभावे उत्सवान्ते प्रातरेव पारणं कुर्यात् ।

"जयन्त्यां पूर्वविद्धायां उपवासं समाचरेत् ।
तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणम् ॥"

इति कालादर्शमाधवाद्युदाहृत वचनात् । 'उत्सव' शब्देन प्रातः पूजनं विवक्षितम् । जन्माष्टमीव्रतस्य यावज्जीविकत्वादनुक्तत्वाच्च उद्यापनं नास्तीति कालतत्त्वविवेचनमयूखकाराः । तन्न,

"उद्यापनं विना यत्तु तद्व्रतं निष्फलं भवेत् ।
यदि चोद्यापनं नोक्तं व्रतानुगुणतश्चरेत् ॥
वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते ।
गाश्चैव काञ्चनं दद्याद्व्रतस्य परिपूर्तये ।"

इति पृथ्वीचंद्रोदये नन्दीपुराणोक्तेः ।

तस्मात् सर्वथोद्यापने कर्त्तव्यमिति जन्माष्टमीनिर्णयः । इदमेव मन्वादिः । भाद्रपद शुक्लाष्टमी दूर्वाष्टमी । तदुक्तं भविष्ये— "शुक्लाष्टमी तिथिर्या तु

---

१. यवापि वा इति ख पाठः ।
२ ष्वेवो इति 'ख' पाठः ।

मासि भाद्र दे भवेत् । दूर्वाष्टमो तु सा ज्ञेया" इति । अत्र स्त्रीणामेवाधिकारो न पुंसाम् ।

"या न पूजयते दूर्वां मोहादिह यथाविधिः ।
जन्मानि त्रीणि वैधव्यं लभते नात्र संशयः ।।
तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैः ।।"
इति पुराणसमुच्चयवचनात् ।

अतएव नित्यमपीदं व्रतं रोहिणसंज्ञकदिननवममुहूर्त्तव्यापिन्यां जेष्ठामूलविवर्जितायामष्टम्यां कार्यम् ।

'मुहूर्त्ते रोहिणेऽष्टम्यां पूर्वा वा यदि वा परा ।
दूर्वाष्टमी तु सा ज्ञेया ज्येष्ठां मूलं विवर्जयेत् ।।"
इति वचनात् ।

अत्र च ज्येष्टामूलविर्वजितायाः परदिन एव रोहिणे व्याप्तौ परा ग्राह्या । दिनद्वये तद्व्याप्तितदव्याप्त्योः पूर्वदिने च ज्येष्ठामूलयुतायां परैव ग्राह्या । दिनद्वयेऽपि निषिद्धयोगरहितायास्तद्व्याप्तौ तदव्याप्तौ तदेकदेशव्याप्तौ वा पूर्वैव ग्राह्या ।

"श्रावणी [1]दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनम् ।।"

इति बृहद्यमवाक्ये दूर्वाष्टम्याः पूर्वविद्धत्वनियमनात्–यदा तु पूर्वदिने रौहिणव्यापिन्यपि निषिद्धनक्षत्रयोगिनी परदिने तादृशनक्षत्रयोगरहितापि रोहिणसंस्पर्शिनी तदा "यांतिथिं समनुप्राप्य' इत्याद्याग[illegible] कल्पमादाय परदिन एव रौहिणमुहूर्त्ते एतद्व्रतं स्त्रीभिरनुष्ठेयम् ।

"ऐन्द्रर्क्षे पूजिता [illegible] दूर्वा हन्त्यपत्यानि नान्यथा ।
भर्त्तु रायुर्हरे [illegible] मूले तस्मात्तां परिवर्जयेत् ।।"

इति निषेधस्य [illegible] गौरीव्रते द्वितीयाविधस्येवानुल्लंध्यत्वात् । तथा कन्यार्केऽगस्त्योदये च नेदं [illegible] व्रतं स्त्रीभिः कार्यम् ।

'शुक्ला भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी ।
सिंहार्क एव कर्त्तव्या न कन्यार्के कदाचन ।।
सिंहस्थे सोत्तमा सूर्येऽनुदिते मुनिसत्तम ।।"
इति मदनरत्ने स्कान्दात् ।

---

[1] उक्त पाठः ख पाठे नास्ति ।

अतएव शुक्लेऽगस्त्योदये भाविनि संनिहिततत्पूर्वकृष्णाष्टम्यामेतद्व्रतं कार्यमिति हेमाद्रिप्रभृतयः । अनिषिद्धकालस्य सर्वथैवालाभे निषिद्धकालेऽपि स्त्रीभिर्व्रतानुकल्पोऽनुष्ठेयः,

"कर्त्तव्या चैकभक्तेन ज्येष्ठा मूलं यदा भवेत् ।
दूर्वामभ्यर्चयेद्भक्त्या न वंध्यं दिवसं नयेत् ॥"
इति पुराणसमुच्चयवचनात् ।

ज्येष्ठामूलग्रहणं सकलनिषिद्धकालोपलक्षणम् । तत्राप्यपेक्षासत्त्वात् । अत्र निषिद्धयोगाभावे स्त्रीभिः स्वयं दूर्वां संपूज्य—

अनग्निपक्वमश्नीयात् अन्नं दधिफलन्तथा ।
अक्षारं लवणं ब्रह्मन्नश्नीयान्मधुनान्वितम् ॥"

इति वचनादनग्निपक्वभक्षणं कार्यम् । निषिद्धज्येष्ठादियोगे तु ब्राह्मणद्वारा पूजां कारयित्वैकभक्तम् कार्यम् । भाद्रपदस्याधिमासत्वे तु नास्योत्कर्षः किन्तु मलमास एवानुष्ठानम् । तदुक्तं निर्णयदीपे स्कांदे—

"अधिमासे तु सम्प्राप्ते नभस्य उदये मुनेः ।
अर्वाग्दूर्वाव्रतं कार्यं परतो नैव कुत्रचित् ॥" इति

अगस्त्योदयश्च सिंहसंक्रान्तिदिनमारभ्यैकविंशतिमे दिने भवति । तदुक्तं दिवोदासीये— 'उदेति याम्यां हरिसंक्रमाद्रवेरेकाधिके विंशतिमे ह्यगस्त्यः" इति । मिहिराचार्यस्तु— सिंहस्थरवेस्त्रयोविंशति[1]मेंशेतमाह— "तच्चोज्जयिन्यामगतस्य कन्यां, भागैः स्वराख्यैः स्फुटभास्करस्य" इति । तदगस्त्यसंदर्शनम् । अगस्त्यार्घ्यकालोऽपि भविष्ये—

"कन्यायामगते सूर्ये अर्वाग्वै सप्तमे दिने ।
कन्यायां समनुप्राप्ते ह्यर्घ्यकालोऽतिवर्तते ॥"

कन्यासंक्रान्तेः पूर्वमगस्त्योदयोत्तरं सप्तदिनमध्येऽर्घ्यदानं कुर्यादित्यर्थः । यत्त्वागमज्योतिषयोः—

"अप्राप्ते भास्करे कन्यां रात्रिभागैस्त्रिभिर्दिनैः ।
अ[2]र्घ्योदकमगस्त्यस्य यद्वसन्ति महोदयः ॥" इति

सप्तविंशादिष्वर्घ्यदानबोधकं वचनं तत्प्राशस्त्यपरं, न तु पूर्वांशनिषेधपरम् । समयप्रदीपे तु ज्योतिःशास्त्रे[3]—सप्तविंशे सिंहांशकेऽगस्त्योदयानुसारा-

---

१. तिमेंऽशे इति ख पाठः ।
२. अर्घ्यं दद्युरगस्त्याय इति 'ख' पाठः ।
३. शास्त्रात्तु इति 'ख' पाठः ।

स्कन्यांशकेऽप्यर्घ्यदानं— "आसप्तरात्रादुदयेऽर्घ्यमस्य, दातव्यमेतत्सकलं नरेण" इति श्रवणात् । आगमे तु—कन्यायां समनुप्राप्ते सूर्येऽर्घ्यः सन्निवर्तते" इति कन्यांशकेऽर्घ्यो निषिद्ध इत्युक्तम् । अस्यामेव ज्येष्ठापूजनमुक्तं कालादर्शे—

"भाद्रे शुक्लाष्टमी ज्येष्ठा नक्षत्रेण समन्विता ।
महती कीर्तिता तस्यां ज्येष्ठां देवीं प्रपूजयेत् ॥" इति ।

तथा भानुवारेणापि प्राशस्त्यमुक्तं स्कान्दे—

"तत्राष्टम्यां यदा भानोर्वारो ज्येष्ठर्क्षमेव च ।
नीलज्येष्ठेति सा प्रोक्ता दुर्लभा च[1] कलौ युगे ॥" इति ।

अत्राष्टम्या दिनद्वयसत्त्वे, या ज्येष्ठानक्षत्रयुता सैव ग्राह्या । दिनद्वयेऽपि नक्षत्रयोगे, परदिने तु मध्याह्नादूर्ध्वं नक्षत्रसत्त्वे परा ग्राह्या । अन्यथा रात्रावपि नक्षत्रयोगे पूर्वैव ।

"यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यहो[2] ।
तस्मिन्नह्विष्यं पूजा च कर्त्तव्या पूर्ववासरे ॥
नवमी सहिता कार्या अष्टमी नात्र संशयः ।
मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुता ।
रात्रिर्यस्मिन् दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥"
इति स्कांदात् ।

अतएव दिनद्वयेऽपि ज्येष्ठानक्षत्रयोगाभावेऽपि परैव । यत्तु ज्येष्ठानक्षत्रमात्रापेक्षं तिथिव्रताद्भिन्नं ज्येष्ठापूजारूपंव्रतं, तद्यस्यां तिथौ ज्येष्ठानक्षत्रं[3] भवति तस्यां तिथौ कर्त्तव्यम् । मासि भाद्रपदे[4] ज्येष्ठार्क्षसंयुते यस्मिन् कस्मिन् दिने ज्येष्ठापरिपूजनं कुर्यादिति स्कांदात् । मात्स्येऽपि –

"प्रत्याब्दिकत्तिथावुक्तं यज्ज्यैष्ठादैवतं व्रतम् ।
प्रतिज्येष्ठाव्रतं यच्च विहितं केवले[4]ऽहनि ॥"
तिथावेवाचरैदाद्यं द्वितीयं केवलर्क्षतः ॥" इति ।

दाक्षिणात्यास्त्वृक्ष एव कुर्वन्ति, तत्र ज्येष्ठानक्षत्रस्य खण्डत्वे[5] नक्षत्रनिर्णये

---

१. बहुकालिका इति 'ख' पाठः ।
२. मप्यणु इति ख पाठः ।
३. शुक्ले पक्षे इति ख पाठोऽधिकः ।
४. केवलोऽह्नि इति ख पाठः ।
५. उपोषितव्यं नक्षत्रं यस्मिन्नभियाद्रविः, यत्र वा पूज्यते रामनिशायें शशिना सहेति पूर्वोक्तेनेत्यर्थः इति ख पाठे शोधपाठोऽधिकः ।

पूर्वं नक्षत्रव्रतकालनिर्णयः प्रोक्तः । नक्षत्रनिर्णयेनेत्यर्थः । न निर्णय इत्येवं माधवानुसारिणां सर्वेषां निर्णय[1]सिंधुप्रभृतीनाम् ।

कालतत्त्वविवेचनकारास्त्वष्टमी भानुवारयुगन्यतरयुग्वा ज्येष्ठानक्षत्रं ग्राह्यम् । तत्राष्टम्यां यदा भानोरिति स्कांदात् । अन्यतरयोगस्याप्यभावे मध्याह्नादूर्ध्वमनुवर्तमानं ग्राह्यम् । यस्मिन्दिने भवेज्ज्येष्ठे[2]ऽत्यत्र भद्रां वर्जयित्वा ज्येष्ठां निमंत्रयेत् । अपरिहारे योगे तु भद्रामुखमात्रं त्यजेत् । संपूर्णा वैधृतिश्चेत्तदा घटिकाद्यो द्वादश वा व्यक्त्वा मंत्रयेत् । विशाखायोगे सति ज्येष्ठानयनमनुराधायां न कार्यम् । तद्योगरहितायां कार्यम् । असभष्वपादमात्रं हित्वाऽस्या ययेत् । केवलर्क्षयोऽनुराधयामावाहनं ज्येष्ठायां पूजनं ज्येष्ठा वा इति निर्णयोद्धारे उक्तम् । अपरिहारयोगे तु—

"वैधृतौ व्यतिपाताख्ये विष्टौ वा भौमवासरे ।
तथैव दुष्टतारासु मध्याह्नात्परतः शुभमि"।। ति स्कांदात्

इत्येव निर्णयः । निर्णीतपूजादिनात्पूर्वदिनेऽनुराधायामावाहनमुत्तरदिने मूले च विसर्जनम् । तथा च स्कांदे—

"मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ।
मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमम् ।।" इति ।

अस्यां महालक्ष्मीयात्रोक्ता काशीखण्डे—

"महालक्ष्म्यष्टमीं प्राप्य तत्र यात्राकृतां नृणाम् ।
संपूजितेह विधिवत्पद्मा [3]सवनमुंचति ।।"

शिष्टा अपि षोडशदिनपर्यन्तं प्रत्यहं सति सम्भवे यात्रां कुर्वन्ति । अस्यामेवाष्टम्यां महालक्ष्मीव्रतारम्भः कार्यः । तदुक्तं मदनरत्ने स्कांदे–"मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठायुताष्टमी प्रारब्धव्यं व्रतम् । तत्र महालक्ष्म्यायत्तात्मभिरिति पुराणसमुच्चयेऽपि —

"श्रियोऽर्चनं भाद्रपदे सिताष्टमीं, प्रारभ्य कन्यामगते च सूर्ये ।
समापयेत् तत्र तिथौ च यावत्सूर्यस्तु पूर्वार्धगतो युवत्याः ।।"

इति सिंहसंक्रान्तौ भाद्रपदसिताष्टमीमारभ्य लक्ष्म्यर्चनमारम्भणीयम् । तत्कन्या संक्रातिपूर्वार्द्धे आश्विनकृष्णाष्टम्यां समापनीयमित्यर्थः । प्रथमारम्भो-

---

[1] निर्णय इति ख पाठः ।

[2] भद्रां वर्जयित्वा इत्यारभ्य स्कान्दात् इत्येवनिर्णयः इत्यन्तः पाठः 'ख' पाठे नास्ति ।

[3] सद्मन इति 'ख' पाठः ।

द्यापनयोरेवायं नियमः । षोडशवार्षिकेतत्प्रयोगगतद्वितीयादिवर्षे तु न नियमः । इदं च व्रतमष्टम्या द्वैधे यत्र ज्येष्ठायोगस्तत्रारब्धव्यम् । तदसंभवे केवलायामपि नवमीयुक्तायां शुक्लपक्षेऽष्टमी चेवेति शास्त्रात् ज्येष्ठायुताष्टमीति स्कांदवचनेन ज्येष्ठायोगस्याष्टम्यां प्राशस्त्यकरत्वज्ञापनात् । कालतत्त्वविवेचनादौ तु ज्येष्ठायुता परा ग्राह्या । तदभावे केवलापीत्युक्तं तिथ्यर्के । मयूखे तु—

"अर्धरात्रमतिक्रम्य वर्तते योत्तरा तिथिः ।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदा ॥"

इति चंद्रप्रकाशे ।

स्मृत्यन्तरवचनादियं निशीथोत्तरवर्त्तिनी ग्राह्येत्युक्तम् ।

अथाश्विनकृष्णाष्टमी

सा महालक्ष्मीव्रतसमापने चन्द्रोदयव्यापिनी ग्राह्या । तत्काले चन्द्रार्घ्यादिविधानेन चंद्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृतेति वचनात् दिनद्वये चंद्रोदयसत्त्वेऽसत्त्वे वा—

कृष्णापक्षेऽष्टमी चैवेति वचनात्पूर्वा ।
यद्युत्तरदिने चंद्रोदयोत्तरं त्रिमुहूर्त्ता तदोत्तरैव ॥

"पूर्वा वाऽपरविद्धा वा ग्राह्या चन्द्रोदये सदा ।
त्रिमुहूर्त्ताऽपि सा पूज्या परतश्चोर्ध्वगामिनी ॥"

इति मदनरत्नाद्युदाहृतवचनात् ।

अत्र चन्द्रोदयादूर्ध्वंगामिनी त्रिमुहूर्त्ता चेत्तदा परतोऽपि पूज्येति नवमीविद्धायाः प्रतिप्रसवो विधीयते । न चेत्पूर्वैवेत्यर्थादुक्तं भवति । समाप्रथमारब्धस्य षोडशदिने समाप्तिः दोषचतुष्टयरहितायामष्टम्यां कार्या । तदुक्तं निर्णयामृते

पुराणसमुच्चये—

"पूजनीया गृहस्थेन अष्टमी प्रावृषि श्रियः ।
दोषैश्चतुर्भिः संत्यक्ता सर्वसम्पत्कारी तिथिरि"॥ ति ।

दोषाश्च—

"त्रिदिने चावमे चैवाष्टमीं नोपवासयेत् ।
पुत्रघ्नी नवमी विद्धा स्वघ्नी हस्तार्द्धपारगा[1] ॥" इति ।

अत्र नवमी वेधो हस्तोत्तरदलगतत्वं, त्रिदिनत्वमवमदिनत्वं चेति दोषचतुष्टयम् । त्रिदिनावमदिनयोर्लक्षणं रत्नमालायामुक्तम्—

---

[1] मेरवा इति ख पाठः ।

"यत्रैकः स्पृशति तिथिद्वयावसानं, वारश्चेदवमदिनं तदुक्तमाद्यैः।
यतस्पर्शाद्भवति तिथित्रयस्य चारः स त्रिस्पृक्कथितमिदं द्वयञ्च।"

नेष्टमिति। एतद्दोषवर्जनमुपक्रमोद्यापनयोरेव प्रायेण ज्ञेयम्। व्रतस्य षोडशाब्दसाध्यत्वेन मध्ये त्यागायोगात्। अस्यामेवाश्वलायनेन माघ्यां वर्षसंज्ञं श्राद्धमुक्तम्। एतेन माघ्यां वर्षं प्रोष्ठपद्या अपरपक्ष इति। [1]इदं च सप्तम्यादिषु त्रिष्वहस्सु अष्टकावत्कार्यमेतेनेति कृत्स्नातिदेशादिति नारायणवृत्तिः। हरदत्तस्तु माघ्यं वर्षमिति पाठमंगीकृत्य मघायुक्तवर्षासु भत्रं त्रयोदशीश्राद्धमिति व्याचख्यौ अस्यामेवाष्टम्यां श्राद्धस्य गयाश्राद्धतुल्यं फलम्। तथा च- पृथ्वीचंद्रोदये ब्राह्मे—

"आषाढ्याः पंचमे पक्षे गया माघ्याष्टमी स्मृता।
त्रयोदशी गजच्छाया गया तु पैतृके इति॥"

इयमष्टकाऽपि। तदुक्तं हेमाद्रौ पाद्मे—

"वसुनामा पिता कन्यां शशापानुग्रहाथ च प्रोष्टपद्यष्टकाभूयः।
पितृलोके भविष्यसि आयुरारोग्यदा नित्यं सर्वकामफलप्रदा॥" इति।

एतस्याः पद्मसंज्ञाऽपि। तथा च जातुकर्णः, शङ्खः प्राहुः—

अमावास्यां क्षीणां सोमां द्विजोत्तमः।
अष्टका च भवेत्पद्मां तत्र दत्तं तथा क्षयम्॥" इति।

अथाश्विनशुक्लाष्टमी महाष्टमी। सा चोपवासादौ परयुता ग्राह्या। वसुरन्ध्रयोरिति युग्मवाक्याच्छुक्लपक्षेऽष्टमी चैवेति ब्रह्मवैवर्तात्—

हरन्महाष्टमी पूज्या नवमी संयुता सदा।
सप्तमी शल्यसंयुक्ता वर्जनीया सदाष्टमी॥
स्तोकाऽपि सा महापुण्या यदा [2]सूर्योदयो भवेत्।
इति स्मृति संग्रहाच्च।

तेन नात्र त्रिमुहूर्तात्मकवेधः, किन्तु कलामात्रात्मकोऽपि सप्तमीयुक्ता तु सा सति सम्भवे सर्वथा वर्जनीया। तत्र महादोषश्रवणात्। यदुक्तं स्मृतिसंग्रह एव—

"पुत्रान् हन्ति पशून् हन्ति हन्ति राष्ट्रं सराजकम्।
हन्ति जातानजातांश्च सप्तमी साहताष्टमी॥" [3]इति।

---

१. इदं च इत्यस्मत् पैतृके इति पर्यन्तः क पाठः ख पाठे नास्ति।

२. यस्यां इति ख पाठः।

१. उक्त पाठः ख पाठे नास्ति।

तेन नात्र त्रिमुहूर्त्तात्मकवेधः, किन्तु कलामात्रात्मकोऽपि निर्णयसिंधावपि घटिकामात्राप्यौदयिकी ग्राह्या । व्रतोपवासनियमे घटिकैकापि या भवेदिति देवलोक्तेरित्युक्तम् । गौडा अप्येवम् । इयं च भौमे[1]ऽतिप्रशस्ता । तथा च मदनरत्ने स्मृत्यन्तरे —

'अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः ।." इति ।

इयं मूलनक्षत्रेण पूर्वाषाढानक्षत्रेण वा युक्ता महानवमीत्युच्यते ।

"अश्वयुक्शुक्लपक्षे तु याऽष्टमी मूलसंयुता ।
पूर्वयाऽऽषाढया वापि ऋक्षद्वययुताथवा ॥
सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभे" ॥ति
हेमाद्रौ स्कान्दात् ।

देवीपुराणे तु केवलाष्टमी नवमी च महापूर्वोक्ता "प्रावृट्काले विशेषेण आश्विने ह्यष्टमी दिने । महाशब्दो नवम्यां च लोके ख्याति गमिष्यती" ति मूलनक्षत्रयुक्ताऽपि सप्तमीलेशसहिता त्याज्यैवेत्युक्तं निर्णयामृते दुर्गोत्सवे ।

"मूलेनापि हि संयुक्ता सदा त्याज्याष्टमी बुधैः ।
लेशमात्रेण सप्तम्या अपि स्याद्यदि दूषिता ॥" इति ।

तथा मूलपूर्वाषाढयोरेव पूजा प्रशस्ता । उत्तराषाढायां तु निषिद्धा । तदुक्तं निर्णयामृते रूपनारायणीये—

"मूले न पूजयेद्देवीं तथा सलिलदेवतैः ।
वैश्वदेवे तु नक्षत्रे पूजिता दुः[2]खिता भवेत् ॥"

इति उत्तराषाढानिषेधश्च सति सम्भवे ज्ञेयः । तदुक्तं दुर्गोत्सवे—

"मूलाभावे तु कर्त्तव्या अष्टमी संयुतैव सा ।
विश्वयुक्तापि कर्त्तव्या अष्टमी नवमी युता ॥" इति ।

अत्र कालतत्त्वविवेचनकाराः—"अत्र पूर्वोक्तविशेषवचनैर्गौरीतृतीयादिवत्कर्मकालव्याप्तिशास्त्रं बाधित्वा नवमीयुतायामेव रात्रौ च[3] सत्यामप्यष्टम्यां नवमीपूजया सह तंत्रेणाष्टमी पूजोचिता' । अतएव कामरूपीयादि निबन्धेषु वचनम्—

---

[1] भौम इति 'ख' पाठः ।
[2] दुखदा इति ख पाठः ।
[2] रात्रावसत्यामपि इति 'ख' पाठः ।

"अष्टम्यां शेषदंड[3]श्च नवम्याः पूर्वं एव च ।
तत्र या क्रियते पूजा विज्ञेया सा महाफला ।।" इति ।
"अष्टमी नवमी सन्धौ तृतीया खलु कथ्यते ।
तत्र पूज्या त्वहं पुत्रि ! योगिनी गण सं[4]युता ।।"

इति कालिकापुराणोक्ता तृतीयासंधिपूजाप्यष्टमी नवमीपूजाभ्यां तंत्रेणैव सिध्यति । 'उपोषितो द्वितीयेऽह्नि पूजयेत्पुनरेव ता'मित्यष्टम्युपवासपरदिनविहिता तु नवमीपूजा प्रातर्वर्तमा[5]वासादीत्याहुः । कौस्तुभकारास्तु नवमीविद्धायां तु तस्यां पूजात्रयस्याप्येककालप्रसक्तेः । अष्टमीपूजां नवमीपूजां तत्सन्धिपूजां च तन्त्रेण करिष्यते' इति संकल्पः । अष्टमीनवमीपूजयोः पूर्वोत्तरदिनगतयोः प्रातःकालस्थयोः पृथक्तां भवे सन्धिकालस्य च ततः पृथक्लाभे संधिपूजापि दिवा रात्रौ वा पृथगेव कार्या ।

"अष्टमीनवमी संधौ तृतीयां खलु कथ्यते ।
तत्र पूज्या त्वहं पुत्र ! योगिनी गण संयुता ।।"

इति कालिकापुराणे देवीवाक्ये तृतीयसंधिपूजाविधानात् । अस्याश्च कालविशेषेण फलतारतम्यं मत्स्यसूक्ते —

"अष्टमीनवमीयोगे रात्रियोगो विशिष्यते ।
अर्धरात्रे दशगुणं सन्ध्यायां द्विगुणं भवेत् ।।" इति ।

संधिश्च तिथ्योरत्त्था च दण्डात्मकः—

"अष्टम्या शेषदण्डश्च नवम्याः पूर्वं एव च ।
तत्र या क्रियते पूजा विज्ञेया सा महाफला ।।"
इति कामरूपीयनिबंधे ।

यदा पूर्वदिनस्थितषष्टिदण्डाष्टम्या नवमीदिने शेषो भवति तदाऽष्टमीपूजा पूर्वेद्युरेव । संधिपूजा नवमीपूजया सह परत्र कार्येत्याहुः । यदा तु नवमीदिने सूर्योदयोत्तरमष्टमी त्रिमुहूर्तं द्विमुहूर्तं वाऽपरदिने च क्षयवशान्नवमी सूर्योदयं न स्पृशति, तदा सप्तमीविद्धैवाष्टमी ग्राह्या यथोक्तं स्मृत्यन्तरे—

"सप्तम्यामुदिते सूर्ये परतश्चाष्टमी भवेत् ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ।।" इति ।

---

[3] दण्डश्च इति ख पाठः ।

[4] संयुतेति 'ख' पाठः ।

[5] प्रातर्वर्तमानायां नवम्यां कर्तुं शक्यैव विसर्जनात् पूर्वमिति न तदनुरोधेनापि सप्तमीयुतायामष्टम्यामुपवासादित्याहुः इति ख पाठोऽधिकः ।

स्मृतिसंग्रहेऽपि—

"यदा सूर्योदये न स्यान्नवमी चापरेऽहनि ।
तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां नृप ! ॥" इति ।

एवं पूर्वदिने संपूर्णाष्टमी, परदिने च नवमीविद्धा तदापि पूर्वाष्टम्येव ग्राह्या । उत्तराग्राह्यत्ववचनानां सप्तमीयुता निषेध साहचर्यवशेन पूर्वदिनयोगे सत्येव प्रवृत्तेः स्वतोऽपि नियमविधिप्रयुक्तलाघवलिप्सया दिनद्वयगततिथेः खंडत्वदशायामेव प्रवृत्तेश्च । यदा तु परदिने क्षयवशादष्टम्यभावस्तदा सप्तमी युतैव कार्या ।

महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्यापि युता कार्या मूलेनापि विशेषतः ॥
इति मदनरत्नोदाहृतवचनात् ।

निर्णयामृत हेमाद्र्योस्तु— 'सप्तम्यामुदिते सूर्यं' इत्यादीनि सप्तमीविद्धाविधायकवचनान्याश्विनीकृष्णाष्टमी विषयाणि कृष्णपक्षेऽष्टमी चैवे'ति पूर्वविद्धायाः कृष्णपक्ष एव प्राशस्त्यात् । कृष्णाष्टम्यां पूजनं च कृष्णपक्षनवम्यां क्रियमाणदेवीप्रबोधनाङ्गम्—

"कन्यायां कृष्णपक्षे च पूजयित्वाष्टमी दिने ।
नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः ॥"
इति देवीपुराणादित्युक्तम् ।

महाष्टमी पूर्वेद्युः पूर्वाह्णव्यापित्वे पूर्वाऽन्यथाऽपरैवेति निर्णयदीपमतमिति निर्णयसिन्धौ । [1]अष्टम्यां च विष्टिमध्य एव पूजनं कार्यम् ।

"विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः ।
तस्य पूजाफलं न स्यात्तेनाहमवमानिता ॥" इति ।

अत्र राजा विजयकामोऽर्धरात्रे विशेषपूजापूर्वकं बलिं दद्यात् ।

"तदर्धयामिनीशेषे विजयार्थं नृपोत्तम ।
पञ्चाब्दं लक्षणोपेतं गन्धधूपस्रगर्चितम् ॥
विधिवत्कालिकालीति जह्वा खड्गेन घातयेत् ।"
इति देवीपुराणात् ।

अत्रोपवासः पुत्रवता न कार्यः ।

उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।
यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेत् ॥"
इति कालिकापुराणोक्तेः ।

इत्याश्विनशुक्लाष्टमीनिर्णयः ।

---

[1] अष्टम्यां इत्यारभ्य तेनाहमवमानिता इत्यन्तः पाठः ख पाठे नास्ति ।

अथ कार्त्तिकाष्टमी निर्णयः

कार्त्तिककृष्णाष्टमी करकाभिधा महाराष्ट्रेष्वन्येषु च प्रसिद्धा । सा चन्द्रोदयव्यापिनी ग्राह्या । अस्यामेव माथुरमण्डलवासिभी राधाकुण्डे स्नानं विधेयम् । सा चारुणोदयव्यापिनी ग्राह्या । तदभावे सूर्योदयव्यापिनी । कार्त्तिकशुक्लाष्टमी । तत्र गोपूजनाद्युक्तं निर्णयामृते कूर्मपुराणे—

"शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः ।
तत्र कुर्याद्गवां पूजां गोग्रासं गोप्रदक्षिणाः ।
गवानुगमनं कार्यं सर्वान्कामानभीप्सिता ।।" इति ।

इयमेव कन्दर्पकलशादिः । मार्गशीर्षकृष्णाष्टमी भैरवाष्टमी । अस्यां भैरवं संपूज्य विघ्नं निवारयेदित्युक्तं काशीखण्डे—

"तीर्थे कालोदके स्नात्वा कृत्वा तर्पणमत्वरः ।
विलोक्य कालराजानं निरयादुद्धरेत्पितृन् ।।
कृत्वा च विविधां पूजां महासंभारविस्तरैः ।
नरो मार्गासिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् ।।" इति ।

उपोषणां जागरणं प्रोक्ते । तत्रैव—

"मार्गशीर्षासिताष्टम्यां कालभैरवसन्निधौ ।
उपोष्य जागरं कुर्वन्सर्वपापः प्रमुच्यते ।।" इति ।

उपोषणाङ्गत्वेनार्घ्यदानमपि कार्यमित्युक्तं शिवरहस्ये— 'उपोषणस्यांगभूतमर्घ्यदानमिह स्मृतम्' इति । अत्रोपवासो जागरणं चेति विशिष्टं प्रधानम् । तस्याहोरात्रसाध्यत्वेन नेयमष्टम्यामहोरात्रयुता पूर्वविद्धा ग्राह्या ।

"अर्णे[1] यत्र व्रतं यच्च एकमेकतिथौ गतम् ।
तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रती ।।" इति स्मृतेः ।

यदा तु पूर्वदिने सायाह्ने उत्तरस्मिन्नपि प्रदोषे तुल्या । तदापि पूर्वैव । "रुद्रव्रतेषु सर्वेषु कर्त्तव्या सम्मुखी तिथि" इति ब्रह्मवैवर्तात् । इदमपि रुद्रव्रतं कालभैरवस्य रुद्रावतारत्वात् । केचित्तु— "मार्गशीर्षासिताष्टम्या'मिति काशीखण्डेऽस्य रात्रिव्रतत्वावगतेः रात्रिव्यापिनी ग्राह्या । दिनद्वये तत्र सत्त्वे रुद्रव्रतेषु सर्वेष्विति वचनात्पूर्वेत्याहुः । अन्ये तु नित्य यात्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ" इति उपक्रम्य तदोग्ररूपादवान्मत्तः श्रीकालभैरवः आविरासीत्तदा लोकान्मीषयन्नखिलानपीति मध्याह्ने भैरवोत्पत्तेः श्रावणान्मध्याह्नव्यापिनी ग्राह्येति

---

१. अहोरात्र व्रतं इति ख पाठः ।

आहुः । स्मृतिकौस्तुभकारास्तूपवासपूजाजागरणानां त्रयाणामपि फलसम्बन्धावगमात्प्राधान्यम् । मध्याह्ने आविर्भूतस्य तस्मिन्नन्तरे देवाः सूर्योऽप्यस्तंगतः । शिवे । ततः संध्यादिकं कृत्वा शिवपूजापरावभूरिति शिवरहस्यवचनेनास्तोत्तरमेव क्षेत्रपालत्वाधिकारस्य तत्प्रयुक्तसाध्यंपूजनस्य विधानात्प्रदोषव्यापिनी ग्राह्या। अत एवाष्टम्यां दिनद्वयेगामित्वे प्रधानकालव्याप्तिलाभात्कृष्णपक्षेऽष्टमी चैवेति शास्त्राद्द्रुद्रव्रतेष्विति वचनाच्च पूर्वैवत्याहुः । [1]तिथ्यर्के तु सिंधुकारज्येष्ठैरुक्तं भैरवसंनिधौ इत्युक्तेर्जागरणोपवासादिकं काश्यामेवकर्त्तव्यमिति तत्प्रमाणा भावादुपेक्ष्यमिति । तदेवोपेक्ष्य मार्गशीर्षासिताष्टम्यामित्युत्पत्तिवाक्ये काल भैरवसन्निधावित्यस्योपात्तत्वेनाविवक्षितत्वं प्रमाणाभावात् । यत्तु निर्णयसिंधौ मार्गशीर्षकृष्णाष्टमी कालाष्टमीत्युक्तं तद्भ्रमसात्कालाष्टमी भाद्रकृष्णाष्टमीति हेमाद्र्युक्तेः तल्लक्षणमपि तत्रैव भाद्रकृष्णाष्टमीप्रकरणे द्रष्टव्यम् । पारणं तु यामत्रयमध्येऽष्टम्यन्तश्चेत्तदन्ते कार्यमन्यथा प्रातरेव "यामत्रयोर्ध्वगामिन्यां प्रात एव हि पारण"मिति वचनात् । इयमेवाष्टमी लक्ष्मीकल्पादिः ।

मार्गशीर्षादिपोर्णमासी चतुष्टयानन्तरा तु पौषकृष्णाष्टमोप्रभृतिषु चतसृष्वष्टमीष्वष्टमाश्राद्धं कार्यम् । तत्पूर्वसप्तमोषु पूर्वेद्युः श्राद्धम् । तदुत्तरनवमीषु चान्वष्टक्यं कार्यम् । अशक्त एकस्यां वा कुर्यात् । हेमंत शिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका । एकस्यां वा पूर्वेद्युः पितृभ्यो दद्यादपरेद्युरान्वष्टक्यमित्याश्वलायनोक्तेः । हेमन्तशिशिर इति ऋतुसञ्ज्ञेति ऋतुनिरूपणप्रस्तावे उक्तम् । तथा च हेमन्तशिशिरयोश्चतुर्ष्वसितपक्षेष्वष्टम्यश्चतस्त्रोऽप्यष्टकाः एकस्यामष्टम्यां वै कार्येति हरदत्तः । क्वचित्पंचम्युक्ता प्रौष्टपद्यष्टका भूयः पितृलोके भविष्यसीति पाद्मवचनात् । कालादर्शेऽपि—

"मार्गशीर्षे च पौषे च माघे प्रौष्टे च फाल्गुने ।
कृष्णपक्षे च पूर्वेद्युरान्वष्टक्यं तथाष्टका ॥" इति ।

एकस्यामिति पक्षे माघ्या उपरिष्टादष्टम्यां क्रियेत। तत्रापि पूर्वेद्युरान्वष्टक्ययोरसम्भवेऽष्टकामात्रमपि य[2]त्तु वै उपरिष्टन्माघ्याः पौर्णमास्या अपरपक्षस्य

---

[1] यत्तु मयूखकृता मध्याह्ने आविर्भावमङ्गीकृत्यापि तत्काल व्यापितिथिग्राह्यत्वं खण्डितं न ह्याविर्भावकालीनातिथिग्राह्येति वाक्यमस्ति येन तन्निर्णयेनैव काल निर्णयः क्रियेत जन्माष्टम्यादौ तु पूजास्य कर्मकालत्वेन निशीथ व्यापिनी ग्राह्येत्युक्तम्, न जन्मकाल तत्रेत्युक्तम् । तच्छ्रीराम नवम्यादावपि उत्पत्तिकालत्वेन मध्याह्न व्याप्यानिर्णयस्य सर्वसम्मतस्य कथं न विरोधमापादयेदिति विभावनीयम्, जन्माष्टम्यादावपि अर्द्धरात्र्यस्य पूजाकालत्वस्य तत्रोत्पत्तेरेव हेतुत्वेन तत् तत् वाक्ये युक्ते उत्पत्ति कालो वात्रापि पूजाया आवश्यकत्वाच्चेति । इति शोधपाठ 'ख' पाठे अधिकः ।

[2] वद्युवै इति "ख" पाठः ।

सप्तम्यामष्टम्यां नवम्यामिति क्रियेतापि वाष्टम्यामेवेति बौधायनोक्तेः। यत्तु विष्णुः अमावस्या तिस्रोऽष्टकास्तिस्रोऽन्वष्टका इति कौर्मेऽपि "अमावास्याष्टकास्तिस्त्रः पौषमासादिषु त्रिष्विति। तच्चतुर्थ्या अप्युपलक्षणम्। या चाप्यन्या चतुर्थी स्यात्तां च कुर्यात्प्रयत्नत इति वायु ब्रह्माण्डपुराणात्। शाखाभेदाद्व्यवस्थेति तत्त्वम्। कालतत्त्वविवेचने केषांचिद्दर्शान्त फाल्गुनाष्टमी त्यागेन तादृशभाद्रपदाष्टमी संग्रहेण चतस्र इत्युक्तम्। आसु श्राद्धं नित्यम्।

"अष्टकान्वष्टकास्तिस्रस्तथैव च नृपोत्तम।
एतान्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः॥
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते॥"

इति हेमाद्रौ विष्णुधर्मोत्तरात्। अत्राष्टम्यपराह्णव्यापिनी ग्राह्या। अथाच्छादनपर्यन्तं श्राद्धं पार्वणवद्भवेदित्याश्वलायनकारिकोक्तेरपराह्णकालत्वात्पार्वणस्य पूर्वेद्युः श्राद्धस्यान्वष्टक्यश्राद्धस्य चाष्टम्यनुरोधेन निर्णयः। पूर्वेद्युः पितृभ्यो दद्यादपरेद्युरन्वष्टक्यमिति सूचनात्। अत्र कामकालसंज्ञकौ विश्वेदेवौ। इष्टि श्राद्धे क्रतुदक्षावष्टम्यां कामकालकाविति सायनोये शंखोक्तेः। अत्र श्राद्धाशक्तावाश्वलायनः। अप्यनडुहो यत्र समाहरेदग्निना वा कक्षमुपोषेदेषामष्टकेति न त्वेवानष्टकः स्यादिति [1]प्रत्यासन्नायांतरमपि वृतिकृतोपन्यस्तम्। अपि वाऽनूचानेभ्य उदकुम्भमाहरेदपि वा श्राद्धमंत्रानधीयेति अकरणे प्रायश्चित्तमुक्तमृग्विधाने।

एभिर्द्युभिर्जपेन्मन्त्रं शतवारं तु दिने दिने।
आन्वष्टक्यं यदा शून्यं सम्पूर्णं याति सर्वथा॥" इति।

आन्वष्टक्यग्रहणमष्टकोपलक्षणम्। मार्गादिषु मलमासपाते तत्राष्टका न कार्या। चतुर्णामिति ग्रहणादिति नारायणवृत्तौ काठकगृह्येऽपि—

"महालयाष्टका श्राद्धोपाकर्माद्यपि कर्म यत्।
स्पष्टमासविशेषाख्या विहितं वर्जयेन्मले॥" इति

पौष[2]पूर्णिमानन्तराष्टम्यष्टको पौष शुक्लाष्टमो बुधवार युता महाभद्रेत्युक्तं निर्णयामृते भविष्योत्तरे—

"पुष्ये मासि यदा देवि! शुक्लाष्टम्यां बुधो भवेत्।
तदा तु सा महापुण्या महाभद्रेति कीर्तिता॥
तस्यां स्नानं जपो होमस्तर्पणं विप्रभोजनम्॥"

कार्यमिति शेषः।

---

[1] प्रत्याम्नायामिति ख पाठः।

[2] उक्त पाठः ख पाठे नास्ति।

इयमेव भरणीयुक्ता जयन्तीत्युक्तं तत्रैव—

"पौषे मासि यदा देवि ! त्वष्टम्यां शुक्लपक्षके ।
नक्षत्रं जायते पुष्यं यल्लोके रौद्रमुच्यते ॥

तदा तु सा महापुण्या जयन्ती अष्टमी शुभा ।
तस्यां स्नानं तथा दानं जपो होमश्च तर्पणम् ॥
सर्वं कोटिगुणं देवि ! कृतं भवति कृत्स्नशः ॥" इति ।

रौद्रं भरणी माघकृष्णाष्टम्यष्टका । माघशुक्लाष्टम्यां भीष्मतर्पणं श्राद्धं चोक्तं पाद्मे —

"माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम् ।
श्राद्धं च ये नराः कुर्युस्ते स्युः सन्ततिभागिनः ॥" इति ।

तेनात्र श्राद्धं काम्यं तर्पणं तु नित्यम् —

"ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं तेषां पुण्यं नश्यति तत्क्षणात् ॥" इति ।

तत्रत्राकरणे प्रत्यवायोक्तेः । एतच्च जीवत्पितृकेणापि कर्तव्यम् । "जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति पाद्मवचनात । यस्तु "सपितुः पितृकृत्येषु नाधिकारः कथंचन" इति निषेधः स पित्र्यकर्मपरः । एतच्चापसव्येन कार्यमिति दिवोदासीय इति निर्णयसिन्धौ । युक्तं तु सव्येनेत्यनुपदं वक्ष्यामः पुण्यतिथिप्रकरणे हेमाद्रिस्तु— "सतिलं भीष्मतर्पणं श्राद्धं च ये नराः कुर्यु"रिति श्राद्धविधिवाक्ये तथा सतिल भीष्मतर्पण इति तर्पणमंत्र वर्मशब्दोपादानाद्वर्मत्वं क्षत्रिये प्रोक्तमिति शंखस्मरणाच्च भीष्मस्त्व[1]क्षत्रियत्वात्तदुद्देश्यकं श्राद्धं तर्पणं च ब्राह्मणेन न कार्यं किन्तु तद्भिन्नैस्तथा च मरीचि—

"ब्राह्मणो हीनवर्णं यः करोत्यौर्ध्वदेहिकम् ।
सतां जातिमवाप्नोति इहलोके परत्र च ॥" इत्याहः ।

एवं च ब्राह्मणाद्याश्च ये वर्णा इत्यत्रातद्गुणसंविज्ञानो बहुव्रीहिरिति तदाशयः । एवं भीष्मपञ्चकेऽपि 'न ब्राह्मणस्य भीष्मतर्पणम्' । नव्यास्तु—

"अष्टम्यां तु सिते पक्षे भीष्माय च तिलोदकम् ।
अन्नं च विधिवद् दद्युःसर्वे वर्णा द्विजातयः ॥"

इति स्मृति वाक्ये सर्वशब्दस्य संकोचे मानाभावाद्वसूनामवतारायेति वस्ववतारत्वेन तस्य देवत्वाच्च वर्मशब्दयुक्तमन्त्रान् विहाय वसूनामवतारायेत्यनेनैव

---

[1] भीष्मस्य इति ख पाठः ।

तर्पणमाहुः द्विजातय इति सम्बोधनम् । अन्ये तु मन्त्रेषूहमाहुस्तत्तुच्छं, प्रकृता, यथा दर्शपूर्णमासयोरङ्गभूताग्नेययागेन कस्याप्यूहः किन्तु तद्विकृतौ काम्ये सौरयागे सूर्यायेत्यस्योहस्तथेयमपि प्रकृतिरेववूहनिषेधात । अतएवेद ब्राह्मणानां सव्येनान्येषां त्वपसव्येनेति युक्तम् । वस्तुतस्तु "अर्घ्यं ददामि भीष्माय" इति मंत्रलिंगान्मंत्रत्रयेणार्घ्यत्रयं तथा च तन्मंत्रान् ते 'भीष्माय तमर्घ्यं समर्पयामि' इत्येवोल्लेखो, न तु भीष्म तर्पयामीति । नेद तर्पण यतो निषेधः स्यात् । यस्तु सतिलं भीष्मतर्पणमित्यादिवाक्येषु तर्पणशब्दः समाप्ताग्निहोत्र उपपद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोतीत्यत्रस्याग्निहोत्रशब्दवद्गौणः अर्घ्यपक्रमात् यमतर्पणे तु तर्पणचोदनासत्त्वादर्घ्यं ददामीत्येतादृशमंत्रलिंगाभावाच्च मुख्यतर्पणत्वमिति ध्येयम् । फाल्गुनकृष्णाष्टमी सीताष्टमी तथा च कल्पतरौ—

"फाल्गुनस्य तु मासस्य या हि कृष्णाष्टमी भवेत् ।
रामपत्नी तु संपूज्या सीता जनकनंदिनी ।।" इति ।

माघपूर्णिमेयमप्यष्टका । इयं चान्याष्टका स्वशक्तस्यावश्यकी । फाल्गुनशुक्लाष्टमी बहुलाष्टमी । तस्यां लक्ष्मी सीता च संपूज्या । तदुक्तं निर्णयामृते ब्रह्मपुराणे —

"फाल्गुने बहुलाष्टम्यां सुस्नातैश्च स्वलंकृतैः ।
लक्ष्मीः सीता च संपूज्या गंधमाल्यादिभिः सदा ।।

ततः प्रदोषसमये दीपादेयाः सहस्रशः ।
दत्तशिष्टन्तदा भोज्य भोजितव्यं च बंधुभिः ।।" इति ।

इयं प्रदोषव्यापिनी ग्राह्या, तत्रैव दीपदानादेरुक्तत्वात् । दिनद्वये तद्व्याप्तावव्याप्तौ वापरैव "शुक्लपक्षेऽष्टमी चैव" इति नैगमात् । [1]फाल्गुनपूर्णिमानन्तराष्टम्यप्यष्टका । प्रतिमासं शुक्लाष्टम्यां पूर्णायां यदा बुधवारो भवति तदेकभक्तव्रतं कार्यमित्युक्तं निर्णयामृते भविष्योत्तरे—

'यदा यदा सिताष्टम्यां बुधवारो भवेद्यदि ।
तदा तदा हि सा ग्राह्या एकभक्ताशने नृप ।।
बुधाष्टमी तु सम्पूर्णा यथोक्तफलदायिनी ।।" इति ।

अष्टम्या दिने न भोक्तव्यं, तदुक्तम्—

---

[1] उक्त पाठः ख पाठे नास्ति ।

"भूताष्टम्योर्दिवा भुक्ता रात्रौ भुक्त्वा तु पर्वणि ।
एकादश्यां दिवा रात्रौ भुक्त्वा चान्द्रायणं चरेत् ।।"

तत्र पर्वाणि –

"चतुर्दश्यष्टमी चैव अमावस्या च पूर्णिमा ।
पर्वाण्येतानि राजेंद्र ! रविसंक्रान्तिरेव च ।।"

अत्राष्टमीद्वयमष्टमीत्वेन चतुर्दशीद्वयं चतुर्दशीत्वेनैकीकृत्य द्वे अमावस्या–पूर्णिमा–संक्रान्ति त्रीणि, एवं पंच पर्वाणि ।

इति पौण्डरीकयाजिविश्वेश्वरविरचिते प्रतापभूपाज्ञया प्रतापार्के
विद्वद्विनोदकंदे गतो मयूखोऽष्टमः पूर्तिम् ।

अथ नवमीनिर्णयः

इयं च सर्वमते उपवासादिष्वष्टमी युतैव ग्राह्या । वसुरन्ध्रयोरिति युग्मवाक्यात्—

अष्टम्या नवमीविद्धा कर्त्तव्या फलकांक्षिभिः ।
न कुर्यान्नवमीं तात दशम्यां तु कदाचन ।।"
इति ब्रह्मवैवर्तवचनाच्च ।

अथ नवमी विशेषनिर्णयः

तत्र चैत्रकृष्णनवमी वराह जयन्तीति केचित् । चैत्रशुक्लनवमी श्रीरामनवमी । तदुक्तं हेमाद्रौ व्रतखण्डे—

"चैत्रे मासि नवम्यां तु शुक्लपक्षे रघूत्तमः ।
प्रादुरासीत्पुरा ब्रह्मन् ! परब्रह्मैव केवलम् ।।" इति ।

श्रीमदनरत्ने—

"श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।
तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः ।।

यत्किंचित्क्रियते कर्म [1]तत्स्यादक्षयकारकम् ।
उपोषणं जागरण पितृन्नुद्दिश्य तर्पणम् ।
तस्मिन्दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ।।" इति ।

अत्र च—

"यस्तु रामनवम्यां हि भुङ्क्ते मोहाच्च मूढधीः ।
कुम्भीपाकादिघोरेषु पच्यते नात्र संशयः ।।"

तथा—

"अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमम् ।
व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ।।" इति ।

---

१. तद्भवत् इति ख पाठः ।

अकरणे दोषश्रवणात्। तथा–

"सूर्यग्रहे कुरुक्षेत्रे महादानैः कृतैर्मुहुः।
यत्फलन्तदवाप्नोति श्रीरामनवमी व्रतात्॥"

इति मदनरत्नाद्युद्धृतवचनेषु फलश्रावणाच्च नित्यकाम्यता। संयोगपृथक्त्वाच्च न फलनित्यत्योर्विरोधः। अत्र केचित्—उपासकानामेवेदं व्रतं नित्यं, न त्वन्येषामित्याहुरिति, तन्न। संकोचे मानाभावात्। जन्माष्टमीशिवरात्र्यादिव्रतेऽपि तथात्वापत्तेः। अन्ये तु–

"प्राप्ते श्रीरामनवमी दिने मर्त्यो विमूढधीः।
उपोषणं न कुरुते कुंभीपाकेषु पच्यते॥"

इति वचनेऽकरणे दोषश्रवणात्। "तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम्।" इति वचनाच्च जन्माष्टम्यादिवदिदमपि सर्वेषां नित्यम्। [1]अन्यथा जन्माष्टम्यादावपि तदुपासकानामेव नित्यतां वक्तुः को वारयितेत्याहुः। अत्र च व्रते मर्त्य इत्यविशेषस्मरणात्। तस्मात्सर्वात्मनेऽति वचनाच्च सर्वेषामधिकारः। इयं च मध्याह्नव्यापिनी ग्राह्या।

"चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि।
सैव मध्याह्नयोगेन महापुण्यप्रदा भवेत्॥"

इत्यगस्त्यसंहितोक्तेः।

"मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये।
आविरासीत्सकलया कौसल्यायां परः पुमान्॥" इति।

तत्रव कर्कलग्ने मध्याह्ने जन्मोक्तेश्च दिनद्वयेऽपि मध्याह्नव्याप्तावव्याप्तावेकदेशस्पर्शे वा पूर्वदिने पुनर्वस्वृक्षयुक्तामपि त्यक्त्वा परैव कार्या।

"नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैः।
उपोषणं नवम्यां च दशम्यां चैव पारणम्॥".

इति माधवीयेऽगस्त्यसंहितायामष्टमीविद्धाया निषेधादिति निर्णयसिंधुकारादयः। मयूखकारादयस्तु सनक्षत्रा चेत्पूर्वाऽन्यथोत्तरा अष्टमीविद्धानिषेधादित्याहुः। एषु पक्षेषु या पुनर्वसुयुता सैव ग्राह्या।

---

१. उक्तः पाठः ख पाठे नास्ति। ख पाठेऽपि अत्र एतत् पृष्ठात्मके द्वे पत्रे स्तः एकस्मिन् उक्त पाठस्य प्रथम शब्दः "अन्यथा" इत्यन्त ख उल्लेखः। अपरस्मिन् पूर्व वाक्यमेव नास्ति।

२. कार्यं वै नवमीव्रतम् इति ख पाठेऽधिकः।

"पुनर्वस्वृक्षसंयोगः स्वल्पोऽपि यदि दृश्यते ।
चैत्रशुक्लनवम्यां तु सा पुण्या सर्वकामदा .।"

इत्यगस्त्यसंहितावचनादिति कालतत्त्वविवेचनकारादयः ! यत्तु नव्यैः पुनर्वसुयुतामपि नवमो त्यक्त्वा परैव कार्येति सिंधुकारमतमसमंजसम् । नवमी चाष्टमीविद्धा त्याज्येति वाक्ये ऋक्षपदाभावात् एषु एव मातामहचरणानामप्याशय इत्युक्तं तदेवासमंजसम् । अत्र ऋक्षपदाभावेऽपि नवमी चाष्टमोविद्धेत्यष्टमीविद्धानिषेधकस्य संकोचे मानाभावात् पुनर्वस्वृक्षसंयोग इत्यगस्त्यसंहितावचनस्य पुनर्वसुयोगे प्राशस्त्यबोधकत्वेन न संकोचकत्वम् । यदा तु तादृश्या दिनद्वयेऽपि पुनर्वसुयोग एकत्र मध्याह्ने परत्र मध्याह्नं विहाय, तदा मध्याह्ने पुनर्वसुयुक्ता ग्राह्या । मुखे श्रीरामजन्मकाले योगस्य लाभात् । यदा तु दिनद्वयेऽपि मध्याह्ने नवमी पुनर्वसुयोगो, यदा वा दिनद्वयेऽपि मध्याह्नं विहाय यदा वा दिनद्वयेऽपि पुनर्वस्वभावस्तदोत्तरैव ग्राह्या । नवमी चाष्टमीविद्धेति वचनात् । "सऋक्षाऽप्यष्टमो विद्धा नोपोष्येति माधवः" । यदा तु प्रातस्त्रिमुहूर्त्ता नवमी, दशमी च क्षयवशात्सूर्योदयात्प्रागेव समाप्यते तदा स्मार्तानामुत्तरदिवसे एकादशीनिमित्तोपवासा नवमीव्रतांगपारणा लोपो मा भूदिति तादृशस्थले स्मार्तैरष्टमीविद्धैव नवमी कार्या । वैष्णवैस्त्वष्टमीविद्धायाः सर्वथा त्याज्यत्वान्नवम्या मध्याह्नव्याप्त्यभावेऽपि षट्घटिकात्मकैव नवमी कार्या । तेषामरुणोदयविद्धैकादश्या हेयत्वान्नवमीव्रतांगपारणलोपप्रसंगाभावात् । एतदेवाभिप्रेत्योक्तं रामार्चनचन्द्रिकायाम् —

"विद्धैव चेदृक्षयुक्ता व्रतं तत्र कथं भवेत् ।
विद्धा निषेधश्रवणान्नवमो चेति वाक्यतः ।।
वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि ।
दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यास्ति वैष्णवैः ।।
तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम् ।।" इति ।

दशमीवृद्ध्यभावेऽष्टमीविद्धायाः क्षये च पारणाय दशम्यामेव कर्त्तव्यत्वाद्वैष्णवैरपि विद्धैवोपोष्येत्यर्थसिद्ध हरिभक्तिविलासागस्त्यसंहितागोविंदार्णवकारादयोऽप्येवं ऋक्षाभावेऽपि नवम्युपोष्या । तदुक्तमगस्त्यसंहितायाम्— केवलाऽपि सदोपोष्या नवमो शब्दसंग्रहात्" इति । अशक्तविषये प्रतिनिध्यादिकं तु परिभाषायां द्रष्टव्यम् । पारणा तु दशम्यामेव कर्त्तव्या । यदा पूर्वविद्धायामुपवासस्तदापि नवमीमतिक्रम्य कर्त्तव्या । दशम्यामेव पारणमित्येतत्कारणान्ययोगव्यवच्छेदपरेण नवम्यां पारणस्य निर्वर्तितत्वान्नात्र ऋक्षान्तप्रतीक्षा । तस्य प्राशस्त्यमात्रार्थत्वात् । अत्र मध्याह्ने पूजा, रात्रौ जागरणं, परेद्युः प्रातः पायसहोम—ब्राह्मणभोजनपारणादि चेति दिनद्वयात्मकमिदं व्रतं कर्त्तव्यम् । इयं नवमो मलमासे न कार्या "सुजप्तमप्यजप्तं स्यान्नोपवासः कृतो भवेदि"ति न कुर्यान्मलमासे

तु महादानं व्रतानि चेति च माधवीये संग्रहवचनादिति दीक्षितप्रभृतयः । वस्तुतस्तु सर्वरूपत्वान्मदनरत्नोद्धृत—

गृहप्रवेशगोदानस्थानाश्रममहोत्सवान् ।
न कुर्यान्मलमासेऽपि गुरौ शुक्रे तथास्तगे ।।"

इति मरीचिवचनान्न भवतीति वक्तुं युक्तम् । ननु रामनवमी व्रतस्य नित्यत्वादेकादशीवन्मलमासेऽपि कर्त्तव्यता स्यादिति चेत् । अत्र ब्रूमः—नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः, किंतु— "एकादश्यां न भुंजीत पक्षयोरुभयोरपि" इत्यादिनिषेधस्य मलमासेऽपि पालनीयत्वात् । कृष्णैकादश्यां पुत्रिवद् गृहिण इवार्थादुपवासः प्रसज्ये¹न्न त्विह तथेति व्रतत्वेन प्राप्तिर्वाच्या । स च निषिद्धेत्यप्रसंगः— "स्पष्टमासे विशेषाख्या विहितं वर्जयेन्मल" इति निषेधाच्च । एव जन्मादावपि चेद्‌हव्यम् । अस्यामेव भद्रकालीपूजनमुक्तं कल्पतरौ ब्राह्मे—

"चैत्रे नवम्यां शुक्लायां भद्रकाली महाबला ।
योगिनीनां तु सर्वासामाधिपत्येऽभिषेचिता ।।
तस्मात्तां पूजयेत्तत्र सोपवासो जितेन्द्रियः ।
विचित्रैर्बलिभिर्भक्त्या सर्वासु नवमीसु च ।।"

इति वैशाखकृष्णशुक्लनवम्योश्चन्द्रिकां पूजयेत् । तदुक्तं निर्णयामृते भविष्योत्तरे—

"वैशाखे मासि राजेन्द्र ! नवम्यां पक्षयोर्द्वयोः ।
उपवासपरो भक्त्या पूजनीया तु चन्द्रिका ।।
विमानवरमारूढो देवलोके महीयते ।"

इति ज्येष्ठशुक्लनवम्यामुमापूजनमुक्तं भविष्ये—

"ज्येष्ठे मासि नृपश्रेष्ठ ! कृत्वा नक्तस्य वै विधिम् ।
उपवासपरो भक्त्या नवम्यां पूजयेदुमाम् ।।
कुमारीर्भोजयेच्चापि स्वशक्त्या ब्राह्मणाँस्तथा ।
शाल्यन्नं पयसोपेतं स्वयं भुंजीत वाग्यते ।।" इति ।

आषाढकृष्णशुक्लनवम्योरैन्द्रीं पूजयेदित्युक्तं तत्रैव,

"उपवासपरो भक्त्या नवम्यां पक्षयोर्द्वयोः ।
आषाढे मासि राजेन्द्र ! यः कुर्यान्नक्तभोजनम् ।
पूजयेच्छ्रद्धया दुर्गामैन्द्रीनाम्नीं तु नामतः ।।
ऐरावतगतां शुभ्रां स्वेन रूपेण रूपिणीम् ।
स ऐरावतमारुह्य इन्द्रस्यानुचरो भवेत् ।।" इति ।

---

१. प्रसज्यते इति 'ख' पाठः ।

श्रावणकृष्णशुक्लनवम्यो कौमारीपूजा कार्या । तदुक्तं निर्णयामृते भविष्योत्तरे -

"श्रावणे मासि राजेन्द्र ! यः कुर्यान्नक्तभोजनम् ।
क्षीरषष्टिकभक्तेन सर्वभूतहिते रतः ॥
कौमारीति नाम्नी च चण्डिकां पूजयेत्सदा ॥" इत्यादि ।

भाद्रपदशुक्लनवमी नन्दा अस्यां दुर्गापूजनमुक्तं भविष्योत्तरे—

"मासि भाद्रपदे यास्यान्नवमी बहुलेतरा ।
सा तु नन्दा महापुण्या कीर्त्तिता-पापनाशिनी ॥
तस्यां यः पूजयेद् दुर्गां विधिवत्कुरुनन्दन ।
सोऽश्वमेधफल विन्द्याद्विष्णुलोक च गच्छतीति ॥"

आश्विनकृष्णनवम्यां देवीमुत्थापयेत् । तदुक्तं । देवीपुराणे —

"कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेऽपि वा ।
नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः ॥" इति ।

कन्यायां दर्शान्तभाद्रपदे अस्यामेव मातृश्राद्धमन्वष्टकामहालयप्रकरणे वक्ष्यते ।

अथाश्विनशुक्लनवमी

सा च दुर्गाव्रतपूजादौ पूर्वविद्धा ग्राह्या । वसुरन्ध्रयोरिति युग्मवाक्याच्छ्रावणीयदौर्गनवमीति पाद्माच्च । इयं महानवमीत्युच्यते । तदुक्तं प्रतापमार्तण्डे लैंगे—

"दुर्गापूजासु नवमी मूलावृक्षत्रयान्विता ।
महती कीर्तिता तस्यां दुर्गा महिषमर्दिनी ॥" इति ।

पूजयेदितिशेषः । अस्यां पूजाहोमादिकृत्वा प्रभूतऽवलिदानं कार्यम् । प्रभूतबलिदानं च नवम्यां विधिवच्चरेत्" इति कालिकापुराणात् । यदा तु नवम्यष्टमीविद्धा भूत्वा द्वितीयदिनेऽपि कियती भवति, तदा नवमीप्रयुक्तस्य पूजादेः पूर्वदिने[1]ऽपि महाबलिदानमात्रं द्वितीयदिने कर्त्तव्यम् ।

'अष्टम्यामुदिते सूर्य दिनान्ते नवमी भवेत् ।
प्रभाते बलिदाने तु कियन्मात्रापि लभ्यते ॥
नवम्यां तत्र संपूज्या दुर्गा दुर्गतिनाशिनी ॥" इति वचनात् ।

नवमीप्रयुक्तं बलिदानं सर्वथा नवमीमध्येकार्यम् । न तु दशम्याम् ।

"दशम्यां बलिदानं तु दीयते यत्र मानवैः ।
तद्राष्ट्रं नाशमायाति नरकोपद्रवैः किल ॥"

---

[1] नुष्ठाने इति 'ख' पाठेऽधिकः ।

इति भविष्यवचनान्मदनरत्ने तु बल्यादौ परा कार्या ।

"अश्वयुक् शुक्लनवमी मुहूर्त्तं वा कला यदि ।
सा तिथिः सकला ज्ञेया लक्ष्मीविद्या-जयार्थिभिः ।।"

इति सौरपुराणात्सूर्योदयेन सह—

"यदि बलिदानं प्रकर्त्तव्यं तत्र देशः शुभावहः ।
बलिक्षमे कृतेऽष्टम्यां पुत्रभंगो भवेन्नृप ।।"

इति देवीपुराणाच्च ।

उपवासे तु पूर्वैवेति प्रतापमार्तण्डेऽप्येवं द्वितीयदिने नवम्या अलाभे तु पूर्वद्युरेव नवमीमध्ये कार्यं दशम्यां बलिदान्त्विति भविष्ये, नवमी प्रयुक्तस्य बलिदानस्य दशम्यां करणे दोषश्रवणात् । मदनरत्ने यानि तु—

"न कार्या दशमीविद्धा नवमी तु सदा बुधैः ।
नवमीं दशमीविद्धां ये कुर्वन्ति विमोहिताः ।
वृथा तेषां भवेत्सर्वं बलिपूजाविधानकम् ।।"

इत्यादीनि क्वचिद्वचनानि तानि शुद्धाधिकनिषेधपराणि । अन्यथा सूर्योदये परं रिक्तेति वाक्यविरोधप्रसङ्ग इति । अत्र निर्णयसिंधुकाराः 'वेधश्च त्रिमुहूर्तात्मकः । हेमाद्र्युक्तमुहूर्त्तद्वयात्मकवेधस्तु सूर्योदय एव । सायं तु त्रिमुहूर्त्ता एव, तेन सा त्रिमुहूर्त्तयोगे[1] पूर्वा नवमी पूर्वोक्तवचनान्नवमीं तां, न दशम्यां तु कदाचन इति स्कान्दे परानिषेधाच्च । त्रिमुहूर्त्तयोगाभावे तु निषिद्धापि परविद्धैव कार्येति निष्कर्षः । निर्णयदीपे तु—

"आवर्तनात्पूर्वकाले नवमी स्यात्परेऽहनि ।
दुर्गार्चा तत्र पूर्वेद्युः पूर्वाह्णस्त्वष्टमी यदा ।।"

इति धौम्यवचनान्महानवमीपरदिनेऽपराह्णव्यापित्वे परान्यथा पूर्वेत्युक्तम् । अस्य शारदनवमीविषयत्वे समूलत्वे च प्रमाणाभावाद्विमृश्यमेतत् । इयं च नवम्युपवासादिष्वतिप्रशस्ता । तदुक्तं भविष्ये—

"तस्मादियं महापुण्या नवमी पापनाशिनी ।
उपोष्या सुप्रयत्नेन सततं सर्वपार्थिवैः ।।"

---

[1] उदये पूर्वया तिथ्या विद्यते त्रिमुहूर्तगैः, सायं तूत्तरया तद्वत् इति माधवेन स्वयं उत्तरतिथेरेव वेधस्योक्तत्वात् अत्र तु पूर्वं वेधसत्वाद्योगे इत्युक्तम्, तेन पूर्वं दिने अष्टम्या सूर्यास्तात् पूर्वं त्रिमुहूर्तं नवमी सत्वे पूर्वा तन्यूनत्वे तूत्तर विद्धैवेति भावः इति अधिकः ख पाठः ।

हेमाद्रौ देवीपुराणेऽपि—

"आश्विनस्य तु मासस्य नवमी शुक्लपक्षगा ।
जायते कोटिगुणितं दानं तस्यां नराधिप ।।" इति ।

अत्र च,

"नवम्यां बलिदानं तु कर्त्तव्यं वै यथाविधिः ।
जपं होमं च विधिवत्कुर्यात्तत्र विभूतये ।।"

तथा "व्रते च जागरश्चैव नवम्यां विधिवच्चरे" दिति कालिकापुराणान्नवम्यामेव होमबल्यादिकार्यमिति केचित् । अन्ये तु,

"पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवाम् ।।"

इति देवीपुराणादष्टम्यां होममाहुः । अपरे तु द्विविधवाक्यवशाद्विकल्पं समुच्चयं चाहुः । परे तु, "नवम्यां च जपं होमं समाप्य विधिवद् बलिम् ।" इति राजमार्तण्डवचनान्नवम्यामेवारभ्य नवम्यां होमं समापयेदित्याहुः । अत्र कुलाचाराद् व्यवस्था । शिष्टास्तूभयानुग्रहायाष्टम्यामारभ्य नवम्यां समापयेदिति । अस्मत्प्रपितामहः श्रीरत्नाकरभट्टचरणास्तु— "वस्तुतस्त्वष्टमीहोमवचनानि लोहाभिसारिककर्मपराणि" 'लोहाभिसारिकं कर्म कारयेद्या दष्टमी'ति भविष्योत्तरपुराणेऽष्टमीपर्यन्तमेव तस्योक्तत्वात् । नवमीहोमवचनं तु नवरात्रव्रतविषयमिति न काऽप्यनुपपत्तिः । अथवाष्टमी नवमी होमवचनान्यष्टरात्रनवरात्रपक्षयोर्व्यवस्थया होमविधायकानि यत्तु निर्णयसिंधौ समुच्चयपक्ष एव युक्त इति तदेतेन परास्तम् । यदपि रुद्रयामले विकल्प उक्तस्तन्निर्मूलमिति तत्प्रौढिवादमात्रम् । यामलस्यैव मूलत्वात् । अथ तस्यैव निर्मूलत्वमित्यभिप्रायस्तन्न । तन्त्राणामपि वेदमूलकताया नारदपंचरात्रादिषूक्तत्वादित्याहुः । होममंत्रा अपि तत्तद्वाक्येषु नानाविकल्पेनोक्तास्तत्रापि कुलाचाराद् व्यवस्थेति कौस्तुभे । इयं मन्वादिरपि इति महानवमीनिर्णयः ।

कार्तिकशुक्लनवमी युगादिः । [1]सा चोक्ता रत्नमालायाम्—

"माघे पंचदशी कृष्णा नभस्य च त्रयोदशी ।
तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः ।।" इति ।

सा श्राद्धादावपि पूर्वाह्णव्यापिनी ग्राह्या । निर्णयस्तु पूर्वमेवोक्तः । इयमेवाक्षयनवमीत्युच्यते । तदुक्तं हेमाद्रौ देवीपुराणे—

"शुक्लपक्षे नवम्यां यः कार्तिकस्य समाहितः ।
स्नायाद्ध्यायान्नमस्कुर्यादक्षयं लभते फलम् ।।" इति ।

---

[1] सा चोक्ता इत्यारभ्य युगादय इत्यन्तः पाठः 'ख' पाठे नास्ति ।

अत्र श्राद्धं कर्त्तव्यं तथा च कृत्यतत्त्वार्णवे—

"कार्तिके नवमी शुक्ला पितृणां तृप्तिदा सदा ।
तस्यां स्नानं तथा दानमनन्तफलसाधकम् ।।" इति ।

अस्यां गोदानादिकमुक्तं विष्णुपुराणे ।

"अस्मिश्च गोभूमिहिरण्यवस्त्र, दानेन सर्वं प्रविहाय पापम् ।
शूरत्वमिन्द्रस्य सुहृत्वमेति, मर्त्त्याधिपत्यं लभते मनुष्यः ।।" इति ।

अस्यामेव कूष्माण्डदानाचारः । अस्यामेव भथुराप्रदक्षिणोक्ता वाराहे । तद्विधिश्च मथुरासेतौ द्रष्टव्यः । अस्यामेव विष्णुत्रिरात्रव्रतारम्भं कृत्वा तुलसीविवाहः कर्त्तव्यः । तदुक्तं हेमाद्रौ पद्मपुराणे—

"कार्तिके शुक्लां नवमीमवाप्य विजितेन्द्रियः ।
हरिं विधाय सौवर्णं तुलस्या सहितं विभुम् ।।
पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयम् ।
एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिम् ।।" इति ।

मार्गशीर्षशुक्लनवमी नन्दिनी । तदुक्तं मदनरत्ने भविष्ये—

"मासि मार्गशिरे वीर ! शुक्लपक्षे तु या भवेत् ।
सा नंदिनी महापुण्या नवमी परिकीर्तिता ।।
यस्तस्यां पूजयेद्देवीं त्रिरात्रोपोषितो नरः ।
सोऽश्वमेधमवाप्येह विष्णुलोके महीयते ।।" इति ।

इयमेव सह्यकल्पादिः कल्पादिश्च पौषादिचतुर्मासेषु कृष्णपक्षनवमीष्वान्वष्टक्य श्राद्धं कार्यमित्युक्तं, प्राक् । इयमेव सवित्रकल्पादिः । माघशुक्लनवमी महानन्दा प्रोक्ता । तत्रैव—

"माघमासे तु या शुक्ला नवमी लोकपूजिता ।
महानंदा तु सा प्रोक्ता सदानंदकरी नृणाम् ।।
तस्यां स्नानं तथा दानं जपहोमाभिषेचनम् ।
सर्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरैः ।।" इति ।

[1]चैत्र कृष्णनवमी वाराहजयन्तीति केचित् ।

इति पौण्डरीकयाजिविश्वेश्वरविरचिते प्रतापभूपाज्ञया प्रतापार्के
विद्वद्विनोदकंदे गतो मयूखोऽत्र रन्ध्राख्यः ।

—●—

---

[1] उक्त पाठः ख पाठे नास्ति ।

अथ दशमी-निर्णयः

सा च दिनद्वयेऽपि कर्मकालव्यापिनी सर्वकार्येषु पूर्वापरा वेच्छया ग्राह्या ।

"संपूर्णा दशमी कार्या परया पूर्वयाऽथवा ।
युक्ता न दूषणं तस्यां यतः सा सर्वतोमुखी ।।"

इत्यंगिरो वचनात् ।

अन्येषु पक्षेषु पूर्वैव । "दशमी चैव कर्त्तव्या सद्गुर्गा द्विजसत्तम" इति स्कान्दादिति हेमाद्रिः । "कृष्णा पूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता" इति माधवः । उपवासे तु सर्वापि सर्वमते पूर्वैव—

"नागविद्धा तु या षष्ठी शिवविद्धा तु द्वा[1]दशी ।
दशम्येकादशीविद्धा नोपोष्या सा कथंचन ।।"

इति शिवरहस्योक्तेः ।

निर्णयसिंधुकौस्तुभकारादयस्तु—

"उपवासादौ सर्वत्र नवमीयुता ग्राह्या ।
दशमी तु प्रकर्त्तव्या सद्गुर्गा द्विजसत्तम ।।"

इत्यापस्तंबवचनादंगिरोवचनन्तु नवमीयुक्ताया अलाभे उदयकालव्यापिनी ग्राह्येत्येवं परमित्याहुः । वस्तुतस्तूपवासे सर्वापि पूर्वैव । तदतिरिक्तेषु पूर्वापरा वा कर्मकालव्यापिनी ग्राह्येति[2] ।

अथ दशमी विशेष निर्णयः

तत्र चैत्रशुक्लदशम्यां यमपूजनं कार्यमित्युक्तं निर्णयामृते देवीपुराणे—

"धर्मराजं दशम्यां तु पूजयित्वा सुगन्धकैः ।
विगतारिर्निरातङ्क इह चान्ते परं पदम् ।।" इति ।

प्राप्नोतीति शेषः । ज्येष्ठशुक्लदशमी दशहरा । तदुक्तं हेमाद्रौ ब्राह्मे—

---

[1] सप्तमी इति 'ख' पाठः ।

[2] साधुः इत्यधिकः 'ख' पाठः ।

"ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता।
हरते दशपापानि तस्माद्दशहरा स्मृता ॥" इति ।

दशपापान्याह मनुः ।

"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥"
परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥" इति ।

अस्यां दशयोगा उक्ताः स्कान्दे—

"ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयो ।
व्यतीपाते तथा[1]नन्दे कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।" इति ।

वाराहे तु पंचयोगा गंगाया एव दशहरात्वं चोक्तं—

"दशम्यां शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि ।
अवतीर्णा ह्यतः स्वर्गाद्धस्तर्क्षे च स[2]रिद्वसः ॥"

हरते दशपापानि तस्माद्दशहरा स्मृतेत्य दि इह बुधभौमयोः कल्पभेदेन व्यवस्था । इयं च योगबाहुल्यात्पूर्वा परा वा ग्राह्येति निर्णयसिंधु-मयूख-कृत्यरत्नावल्यादौ । कौस्तुभे पाठादेव दशत्वे सिद्धे पुनर्दशयोग इति [3]कीर्तितानां दशासमुदितानामेव पुण्यकालत्वं, न तु कस्यचिन्मूलत्वमित्यर्थः । नामेव पुण्यकालत्वज्ञापनार्थम् । अतएव यत्कैश्चिदुक्तं दिनद्वये कतिपययोगसत्त्वे यत्रैव योगभूयस्त्वं तत्रैव स्नानादि कार्यमिति तच्चि[4]न्त्यौ । दशमीव्यतीपातयोर्योगान्तरनिरपेक्षयोः शास्त्रान्तरेण पुण्यकालत्वे मानाभावात् । अतो दिनद्वये कतिपययोगवद्दशमीसत्त्वे गंगापूजनादौ दैवकर्मणि पूर्वाह्णस्य पुण्यकालत्वात् तद्व्यापिन्येव दशमी ग्राह्येत्युक्तम् । तिथ्यर्के यत्त्वत्रोक्तं [5]योगेन स्नानमुक्तम् । सिंधुकारज्येष्ठैस्तत्प्रमाणाभावादुपेक्ष्यम् । वस्तुतस्तु ज्येष्ठशुक्लदशम्याः प्राधान्याद्धस्तादियोगाभावेऽपि केवलदशम्यां यथोक्तस्नानं कार्यमेवेत्युक्तं ज्यैष्ठे मलमासे सति तत्रैव दशहरा कार्या, न तु शुद्धे दशहरासु नोत्कर्ष इति हेमाद्रौ ऋष्यशृंगोक्तेः । दशहरास्विति बहु-

---

१. गरा इति ख पाठः ।
२. सरिद्वरा इति ख पाठः ।
३. कीर्तितं कीर्तितानां इति अधिकः ख पाठः ।
४. तच्चिन्त्यमिति 'ख' पाठः ।
५. योगेभ्यो न्यून इति ख पाठोऽधिकः ।

वचनं प्रतिपदादितिथ्यभिप्रायेण । कृत्यरत्नावलीकारास्तु अधिकमासे [illegible] [illegible] कार्येत्याहुः स्कान्दे–

"यां कांचित्सरितं प्राप्य दद्यादर्घ्यंतिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः ॥"

अत्र विशेषः काशीखण्डे –

"ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः ॥
एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आशुक्लपक्षे दशमीं प्रतिजन्माद्यमुत्सृजेत् ॥"

तथा–

"लिङ्गं दशाश्वमेधेश ! दृष्ट्वा दशहरातिथौ ।
दशजन्मार्जितैः पापैः [1]मुच्यते नात्र संशयः ॥" इति ।

अत्र गंगास्तोत्रपाठमपि दशवारं कुर्यात् तदुक्तं भविष्ये–

"तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः ।
यः पठेद्दशकृत्वस्तु दरिद्रो वापि वाक्षमः ॥
सोऽपि तत्फलमाप्नोति गंगां सम्पूज्य यत्नतः ।" इति ।

तच्च स्तोत्रं प्रतिपदादिदशमीपर्यन्तं दिनवृद्धिसंख्यया पठनीयमिति शिष्टाः । अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिनत्वाद्विशेषेण पूजा कार्या । तदुक्तं स्कान्दे सेतुमाहात्म्ये–

"ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
गरानन्दे व्यतीपाते कन्या चन्द्रे वृषे रवौ ॥
दशयोगे सेतुमध्ये लिंगरूपधरं हरम् ।
रामो वै स्थापयामास शिवलिंगमनुत्तमम् ॥" इति ।

आषाढशुक्लदशमीमन्वादिः । अत्र च श्राद्धादिकं कर्त्तव्यमिति प्रागुक्तम् ।

अथा श्विनशुक्लदशमी

तस्यां प्रातर्देवीं सम्पूज्य विसर्जनं कार्यम् । तदुक्तं देवीपुराणे–

"ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकम् ।
संप्रेषणं तु कर्त्तव्यं गीतवादित्रनिःस्वनैः ॥" इति ।

---

[1] त्यज्यते इति 'ख' पाठः ।

तत्र दशम्याः पूर्णतिथित्वे प्रातस्तत्कृत्वा तदुत्तरं पा[1]रणं तदुत्तरमपराजितापूजनमिति क्रमो निःसंदिग्ध एव। यत्र तु नवम्युत्तरमपराह्णे दशमी वृता, उत्तरदिने श्रवणाभावश्च तत्र विसर्जनव्रतपारणापराजितापूजनक्रमे भवेति संदेहः पारणोत्तरकर्त्तव्यस्य तत्रैवापराह्णे शिष्टैः क्रियमाणस्यापराजितापूजनस्य विसर्जनं विनानुपपत्तेः। अत्रोच्यते, नवमीदशमीपारणविधायकवचनद्वैविध्येन पारणाया अनियतकर्त्तव्यत्वेऽपि—

"संप्रेषणं तु कर्त्तव्यम् दशम्यां शांवरोत्सवैः।
प्रातरावाहयेद्देवीं प्रातरेव विसर्जयेत्॥"

इति वचनैर्विसर्जनस्य दशम्यां प्रातः कर्त्तव्यत्वेन निर्णीतत्वात्पूर्वेद्युर्नवम्यां दशम्यां वा यथाचारं पारणां कृत्वाऽपराह्णेऽपराजितापूजनं विधाय प्रातर्दशम्यां विसर्जनं कर्त्तव्यमिति। तथा च रुद्रयामले--

"अष्टम्यां जागरं कुर्यान्नवम्यां पारणं तथा।
दशम्यां च विसर्गः स्यादि"ति॥

धवलनिबन्धे तु विशेषः—

"अन्त्यपादो दिवाभागे श्रवणस्य यदा भवेत्।
संप्रेषणं तदा देव्या दशम्यां तु पुर्नदिवा॥"

इति दशम्या दिनद्वयसत्त्वे पूर्वदशम्यां श्रवणान्त्यपादयोगे तत्रैव विसर्जनम्। नक्षत्रयोगानुरोधेन पूर्वदशम्यां क्रियमाणे विसर्जने न पूर्वाह्णादर इत्याशयेनोक्तं राजमार्तण्डे। निर्माल्ये तु श्रवणदशमीवासरान्ते तु जह्यादिति निर्माल्यत्यागेन देवीविसर्जनमुपलक्ष्यते। तत्र तद्योगाभावे तु परदशम्यामेव तत्परदिने दशम्यभावे तु पूर्वदशम्यां नक्षत्रयोगे सत्यसति वा कार्यम्। दिनद्वयेऽपि नक्षत्रयोगसत्त्वासत्त्वयोस्तु नक्षत्रयोगप्राशस्त्यं प्रातःकालप्राशस्त्यं चाभिप्रेत्योक्तं रूपनारायणीये। दशम्यां प्रातः सम्प्रेषयेदिति।

अथ नवरात्रपारणानिर्णयः

सा च दशम्यां कार्या—

"आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकम्।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत्॥"

नवमी तिथिपर्यन्तं वृद्ध्या पूजाजपादिकमित्यादिवचनैर्नवमीपर्यन्तप्रधानभूतपूजाद्युक्तेरुपवासादेश्चांग[2]त्वान्नवरात्रोपवासत इति नवरात्रसमाख्यया

---

१. पारणा इति 'ख' पाठः।

२. अङ्गत्वे तत्पर्यन्तत्वात् इति 'ख' पाठः।

नवम्या अप्युपोष्या[1]लाभावगतेश्च । एवं सप्तम्यादि त्रिरात्रेऽपि यानि तु नवम्यां[2] विबुधाधिपेत्यादीनि नवमोपारणविधायकवचनानि । तान्यपि लोहाभिसारिककर्मविषयाणि । तस्य लोहाभिसारिकं कर्म कारयेद्यावदष्टमीत्यष्टमीपर्यन्तत्वोक्तः । अथवा यदाष्टमीविद्धा नवमी त्रिमुहूर्त्ता लभ्यते, तदा पूर्वनवम्यां नवमीकृत्ये जाते द्वितोयनवम्यां पारणा विधीयते ।

"आश्विने शुक्लपक्षे तु नवरात्र उपोषितः ।
नवम्यां पारणं कुर्याद्दशमीमिश्रिता न चेत् ॥"

इत्यनेन तूत्तरनवम्यां नवम्यन्ते प्राप्तायाः पारणाया बाधेन नवमी, मध्य एव विधानं, यद्वेदमष्टरात्रादिपक्षविषयमिति कृत्यरत्नावल्याम् । निर्णयसिन्धौ तु नवमीपारणाविधायकानि वचनानि हेमाद्र्यादिविरुद्धत्वान्निर्मूलानीत्युक्तं न[3] समूलत्वेऽपि यदा दिनद्वये नवमी तदा द्वितीयादिने उपोष्यतिथ्यन्ते उपवासयोग्यतिथ्यन्ते पारणा न किन्तु नवमीमध्ये कार्येत्येवं नेयानि शिवरात्रिपारणावदिति । एष एव मयूखसिद्धान्तः । एवं च "सर्वेषामुपवासानां प्रातरेव हि पारणा" इति वचनावगतस्यावशिष्टं नवम्यन्तः पारणस्य "तिथिः स्त्रियामतोऽर्वाक् चेत्तिथ्यन्ते पारणं भवेत्" इति तिथ्यन्तपारणविधिना बाधितस्य प्रतिप्रसवविधित्वे लाघवम् । अन्यथा नवम्यामप्राप्तपारणविधौ गौरवं स्यादिति न्यायविदः । दाक्षिणात्यास्तु नवमी पारणाविधायकवचनान्यथानुपपत्त्या नवरात्रपारणान्तं व्रतमंगीकृत्य कुलधर्मानुसारेण च नवम्यामेव पारणं कुर्वन्ति । दोक्षिता अपि नवमीपारणामेवांगीचक्रुः । अत्र यथा कुलाचारव्यवस्था स्मृतिकौस्तुभकारैरपि प्रथमदिने स्वल्पाष्टमीयुक्ता नवमी द्वितीयदिने पारणापर्याप्तनवमीयुक्ता दशमी तद्द्वितीयदिने च पूर्वोक्तविसर्जनार्हताप्रतिपादकनक्षत्रयोगवती दशमी, तदोक्तनिर्णयानुसारेणाष्टमी नवम्युपवासयोः पूर्वदिने सिद्धत्वादवशिष्ट नवम्यां पारणं निर्विवादमेव । यदा त्ववशिष्टनवमीदिन एव दशमीनक्षत्रयोगादिना विसर्जनार्हा तदापि विसर्जनोत्तरं तन्निर्विवादम् ।

यदा तु पूर्वदिने सप्तमी वेधरहिता षष्टिदण्डात्मिकाऽष्टमी परदिने चाष्टमी शेषसंयुक्ता नवमी तद्द्वितीयदिने नवमीशेष संयुक्या शुद्धा वा दशमी तदा तत्परदिने दशम्याः सत्त्वेऽपि नवमीयुक्तदशम्यामेव विसर्जनपारणे विधेये । नवमी पूजायाः संधिपूजायाश्च पूर्वदिने सिद्धत्वात् यदा तु प्रथमदिनेऽष्टमी द्वितीयसूर्योदयात्पूर्वं मुहूर्त्तद्वयादिपरिमाणा स्वल्पावाऽपरदिने च नवमी षष्टिदण्डिका-

---

[1] त्वावगतेश्च इति 'ख' पाठः ।

[2] पारिता देवी कुलवृद्धि प्रयच्छति, दशम्यां पारिता देवी कुलनाशं करोति वै, तस्मात्तु पारणां कुर्यात् नवम्यां इत्यन्तः 'ख' पाठोऽधिकः ।

[3] उक्त रेखाङ्कितपाठः ख पाठे नाऽस्ति ।

त्मिका तत् द्वितीयदिने नवमीशेषसंयुक्ता दशमी तदापि तत्परदिने दशमी सत्त्वेऽपि नवमीयुक्तदशम्यामेव तदुभयं विधेयम् । यदा तु तिस्रोऽपि तिथयस्तत्तद्दिने तत्तत्कृत्यार्हास्तत्र पूर्वोदाहृतवचनद्वैधाद्दाक्षिणात्यानां नवम्यामेव पारणाचारदर्शनात् । प्राच्यानां तु दशम्यामेवतद्दर्शनात्सांवत्सरिकेपार्वणैकोद्दिष्टविधेर्विरोधे विज्ञानेश्वरोक्तव्यवस्थावदिहापियथाकुलाचारमेव व्यवस्थितोचितेत्युक्तं, नवरात्रव्रतपारणाहे सत्यपि सूतके पारणं कृत्वा सूतकान्ते ब्राह्मणभोजनं दानं च कार्यम् । तदुक्तं रुद्रयामले—

"सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।
तदन्ते भोजयेद्विप्रान् दानं दद्याच्च शक्तितः ।।" इति ।

तदन्ते सूतकान्ते । कृत्यरत्नावल्यान्त्वत्र नवरात्रहोमस्य पूजारूपत्वेन प्रधानत्वात् तस्य चानन्यसाध्यत्वेन आशौचेऽसंभवान्न तु दानार्चनंजपमिति निषेधात् तत्समाप्तिं विना नियमरूपोपवाससमाप्त्यसंभवादाशौचान्ते होमादिपूर्वकं पारणं कर्त्तव्यम् । प्राचीनशिष्टाचारोऽप्येवमेव । येस्तु होमो न क्रियते तेषां पारणं भवत्येवेति स्थितेम् । स्त्रिया रजोदर्शनमध्येऽपि पारणंकृत्वा शुद्ध्यन्तरं दानादिकार्यम् । तदाह सत्यव्रतः 'प्रारब्धदीर्घतपसा'मिति सत्यव्रतवचनान्ना[1]रीणां यद्रजो भवेत् न तत्रापि व्रतस्य स्यादुपरोधः कदाचन" इति । निर्णयसिंधौ यत्तु—

"नियमस्था यदा नारी प्रपश्येदन्तरा रजः ।
उपोष्यैव तु ताः रात्रीः स्नात्वा शेषं चरेद्व्रतम् ।।"

इत्यंगिरोवचनम् ।

यच्च हारीतवचनम्,

"निसमस्था यदा नारी रजः[2] पश्येत्कथंचन ।
त्रिरात्रं तु क्षियेदूर्ध्वं व्रतशेषं समापयेत् ।।"

इति तद्विधवोपवासविषयम् ।

तासां तत्र भोजननिषेधादिति केचित् । वयं तु प्रागुक्तसत्यव्रतवचने 'दीर्घतपसा'मिति विशेषोपादानात् द्वादशीव्यतिरिक्तं सकलैकाहोपवासविषयोऽयं 'त्रिरात्रं तु क्षियेदूर्ध्वं'मिति पारणानिषेधः । त्रिरात्रनवरात्रादिदीर्घव्रतेषु तु रजोमध्ये एव पारणे ब्रूम इति स्थितं, पारणायां विधिनिषेधयोः सत्त्वादाचारतो व्यवस्थेति केचित् । मयूखे तु सत्यव्रतवचनं सधवापरं, विधवायास्तु तत्र त्रिरात्रमध्ये भोजननिषेधात् इत्यन्ये । तन्न, निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधपारणविषयत्वायोगात् । वस्तुतस्तु रजस्वलाया विधवायास्त्रिरात्रमध्ये भोज-

---

[1] उक्त पाठः 'ख' पाठे नास्ति ।

[2] नारी रजः पश्येत् कथञ्चनः । इति ख पाठः ।

न निषेध एव खपुष्यायमाण इत्युक्तम् । वस्तुतस्तु "दीर्घकालव्रते रजस्वलयोः सधवाविधवयोर्भर्त्रेत्येव पारणा, तद्भिन्नैका ह्यदि साध्ये तु पारणादि स्नात्वैवोभयोरपि" इत्युक्तम्[1] । इति नवरात्र मध्ये आशौचरजोदर्शनपाते पारणानिर्णयः । इयमेव विजयदशमी । सा च नवमी युक्ता श्रवणयुक्ता च ग्राह्या ।

"नवमीशेषयुक्तायां दशम्यामपराजिता ।
ददाति विजयं देवी पूजिता जयवर्द्धिनी[2] ।।
एकादश्यां न कुर्वीत पूजनं चापराजितम् ।"
इति स्कान्दात् ।

अयं च नवमीयोगविधिरेकादशीयोगनिषेधश्च पूर्वस्यामेव श्रवणयोगे—

"दशमीं यः समुल्लंघ्य प्रस्थानं कुरुते नरः ।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ।।" इति ।

स्कान्दवचनं तु सति संभवे दशम्यामेव प्रस्थेयं न त्वालस्यादिना तामुल्लंघ्यैकादश्यामिति नियमार्थं यदा तु पूर्वदिने श्रवणयोगाभावः, परदिने चाल्पाऽपि तद्योगिनी तदा परैव । उदये, दशमी किंचित्संपूर्णैकादशी यदि श्रवणार्क्ष यदा काले सा तिथिर्विजयाभिधा ।

"श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।
उल्लंघयेयुः सीमानं तद्दिनर्क्षं ततो नराः ।।"

इति कश्यपवचनात् । कालेऽपराह्णे सम्पूर्णैकादशीति वचनात्तदा दशम्याः कर्मकाल व्याप्तिर्नापेक्षिता । उभयदिने श्रवणयोगाभावे त्वपराह्णयोगवती दशमी ग्राह्या । तदुक्तं लल्लेन— "तिथिः शरीरं तिथिरेव कारणं, तिथिः प्रधानं तिथिरेव साधनम् । इति । यदा दिनद्वयेऽपराह्णयोगो यदा वा पूर्वदिने अपराह्णव्याप्तिः स्वल्पा, परदिने त्वधिका । यदा वा दिनद्वयेऽपराह्ण योगाभावस्तदापि पूर्वा,

"या पूर्णा नवमी युक्ता, तस्यां पूज्याऽपराजिता ।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ।।"
इत्यादि स्कान्दात् ।

---

[1] मम प्रति भाति इति ख पाठोऽधिकः ।

[2] तथोदयिकः स्वल्प दशम्या एव श्रवण योगे या तिथिमित्यादिना साकल्यमादायापराह्णेऽपराजिता पूजनं भवति नैधं पक्षान्तरेषूचितमिति ज्ञापनार्थं मुक्तमेकादश्यानेतीति कौस्तुभ । इति अति शोध पाठः ख पाठे वरीवर्तते ।

कालतत्त्वविवेचन-मदनरत्न-कृत्यरत्नावल्यादावपि यदोत्तरैव श्रवणयुक्ता-[1]ऽन्यथा सर्वपक्षेषु नवमीयुक्तैव ग्राह्येत्युक्तम् । यत्तु निर्णयसिंधौ श्रवणस्य रोहिणीवदप्रयोजकत्वमुक्तं तन्मन्दं दृष्टान्तासिद्धेः । तत्र सति संभवे निर्णायकत्व स्वीकारात् मयूखकारादयस्तु सा शमीपूजा सीमोल्लंघनादौ नक्षत्रोदयव्यापिनी ग्राह्या । नदुक्तं रत्नकोषे—"ईषत्संध्यामतिक्रान्तः किंचिदुद्भिन्नतारकः । विजयो नामक योगो[2]ऽयं सर्वकार्यार्थसाधकः ॥" इति । दिनद्वये तद्व्याप्तौ पूर्वैव या पूर्णानवमीत्युक्तेत्यादि स्कांदात् । देशांतरयात्रा हि पूर्वोक्ततारकोदयरूपसंध्याकाले कुर्युः । दिनद्वये तारकोदयकालाभावे परदिन एकादशमुहूर्त्ते यात्रा कार्या ।

"आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु ।
सायंकाले शुभा यात्रा दिवा वा विजयक्षणे ॥"
एकादशो मुहूर्त्तोऽपि विजयः परिकीर्तितः ।
तस्मिन् सर्वैर्यातव्या यात्रा विजयकांक्षिभिः ॥"

इति भृगूक्तेः ।

परदिने एकादशमुहूर्त्तव्याप्त्यभावेऽपि श्रवणयोगश्चेत्तदैव यात्रा कार्या । पूजा तु पूर्वदिन एव । उदये दशमी किंचिदिति कश्यपोक्तेरित्याहुः । रामकल्पद्रुमकारास्त्वपराह्णव्याप्त्या निर्णयं स्वीकुर्वाणाः यस्तु विजयदशमीनक्षत्रोदयव्यापिनी ग्राह्येत्याह, सोऽपराह्णे पूजादिविधानेन तस्यैव मुख्यकालत्वमजानन् भ्रान्त-इत्युपेक्ष्येत्याहुः । राज्ञां पट्टाभिषेचने तु सर्वथोत्तरैव ।

"पौष[3]स्य दशमीं शुक्लां पूर्वविद्धां न कारयेत् ।
श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने ॥"

इति ज्योतिर्निबन्धे नारदोक्तेः ।

अपरार्के पुराणसमुच्चये,

"कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम् ।
शोभनं खंजनं पश्येज्जलगोष्टादिसन्निधौ ॥" इति ।

सर्वे च जनास्तस्यामपराह्णे ग्रामसीमानमुल्लंघ्यापराजितां पूजयेयुः । तथा पुराणसमुच्चये—

---

[1] तदैवैकादशी युक्ता इति अतिरिक्तः ख पाठः ।
[2] कालोऽयमिति ख पाठः ।
[3] ईषस्य इति ख पाठः ।

"दशम्यां च जनैः सम्यक्पूजनीयाऽपराजिता ।
ऐशनीं दिशमाश्रित्य अपराह्णे प्रयत्नतः ॥" इति ।

इयं मन्वादिरिति केचित् । इयमेव च बुद्धजयन्ती । सा सायंकालव्यापिनी ग्राह्या । इयं सोपपदाऽपि पौष शुक्ल दशमी ईशानकल्पादिः । माघकृष्णा दशम्यघोरकल्पादिः ।

इति विश्वेश्वररचिते प्रतापभूपाज्ञया प्रतापार्के
विद्वद्विनोदकन्दे गतो मयूखो दिशासंख्यः ।

अथैकादशीनिर्णयः

सा च सर्वकार्येषु द्वादशीयुता ग्राह्या । रुद्रेण द्वादशीयुक्तेतिवचना[1]देकादशीमहिमा हेमाद्रौ गारुडे—

"एकादशी व्रतं भक्त्या यः करोति सदा नरः ।
स विष्णुलोकं व्रजति याति विष्णोः सरूपताम् ।।" इति ।

नारदीयपुराणे—

"यानि कानि च पापानि ब्रह्महत्यासमानि च ।
अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे ।।
तानि पापान्यवाप्नोति भुंजानो हरिवासरः ।" इति ।

इदं व्रतं शिवभक्तादिभिरपि कार्यम् । :'वैष्णवो वाऽथ शैवो वा कुर्यादेकादशीव्रतम्" इति शिवधर्मोक्तेः । "वैष्णवो वाऽथ शैवो वा सो रोप्येत्तत्समाचरेत् ।।" इति सौरपुराणाच्च । तत्रैकादश्युपवासो द्वेधा— निषेधपरिपालनात्मको, व्रतरूपश्च । तत्राद्यो—

"न शंखेनापि वेत्तो यं न खादेत्कूर्मसूकरौ ।
एकादश्यां न भुंजीत पक्षयोरुभयोरपि ।।"
इति कौर्मदेवलाद्युक्तः ।

व्रतरूपो ब्रह्मवैवर्त्ते प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि दशम्यामुपवासस्य प्रकुर्याद्वैष्णव व्रतमिति । व्रतरूपोऽपि द्वेधा नित्यः काम्यश्च "उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि" इति एकादशी सदोपोष्या । पक्षयोः शुक्लकृष्णयोरित्यादिवचनेषु नित्यपदश्रवणा"त्पक्षे पक्षे च कर्त्तव्यमेकादशयामुपोषणम् ।" इति वीप्सा श्रवणा"दुपोष्यैकादशी राजन् यावदायुः सुवृत्तिभिः" इति यावज्जीवकं कर्त्तव्यताभिधानात्—

---

[1] एकदशी न कर्त्तव्या दशमी संयुक्ता विभो इति स्कन्द पुराणवचने पूर्वं विद्धा निषेद्धाच्च । अथोपवासविषये विशेषो निरूप्यते । तत्रादौ इत्यन्तः अतिरिक्तः ख पाठः ।

"न करोति हि यो मूढ एकादश्यामुपोषणम् ।
स नरो नरकं याति रौरवं तमसावृतम् ।।"

इत्याद्यकरणे दोषश्रवणाच्च नित्यता,

"यदीच्छेद् विष्णुसायुज्यं शुभांसम्पदमात्मनः ।
एकादश्यां न भुंजीत पक्षयोरुभयोरपि ।।"

इति कौर्मादिषु फलश्रवणाच्च काम्यतां[1] संयोगपृथक्त्वन्यायेन चैकस्यैव फलनित्यत्वयोर्न विरोधः तस्य चोभयरूपस्यापि निषेधपरिपालनात्मकस्यापि वेधस्य चैकदिने प्राप्तौ काम्यव्रतानुष्ठानेनैव नित्यप्रयोगवन्निषेधपरिपालनस्यापि सिद्धिः । तथा चोक्तं कालादर्शादिषु सिद्धिस्तस्यार्थतो व्रतमिति ।

अथैकादशीव्रतेऽधिकारिणः प्रदर्श्यन्ते ।

यथाह, कात्यायनः—

"अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ।।"

अष्टवर्षाधिक इत्युपनयनोत्तरत्वस्योपलक्षणम् इति हेमाद्रिप्रभृतयः । वस्तुतस्त्वष्टवर्षाधिकग्रहणस्योपलक्षणत्वे प्रमाणत्वे प्रमाणाभावः उपनयनोत्तरत्वेन । उपलक्ष्येण नियतसम्बन्धाभावात् । किन्तु विवक्षितमेव परन्तु शक्तज्ञानवद्विषयत्वेन व्यवस्थितम् । अशक्तस्याज्ञस्य तु एकादशवर्षोत्तर व्रतादावधिकारः ।

"अपूर्णैकादशाब्दस्य चतुर्वर्षाधिकस्य च ।
प्रायश्चितं चरेन्माता अन्ये चाप्यस्य बान्धवाः ।।" इति ।

दीक्षितीये प्रायश्चित्तसारे यमवचने एकादशवर्षपर्यन्तमकरणे विहितप्रायश्चित्तादौ साक्षादनधिकारस्योक्तत्वात् । तत्राप्यसामर्थ्ये चतुर्दशवर्षोत्तरमधिकारः । तदुक्तं मणिमाण्डव्यसंवादे महाभारते—

"मर्यादां स्थापयाम्यद्य लोके धर्मफलोदयाम् ।
आचतुर्दशकाद्वर्षान्न भविष्यति पातकम् ।।"

परतः कुर्वतामेव दोष एवं भविष्यतीति । अत्र मर्त्यग्रहणात्सर्वेषामेवानुलोमप्रतिलोमादीनामत्राधिकारः । एवं पक्षद्वयैकादशीव्रतस्य सर्वत्रप्राप्तौ व्यवस्थया विशेषः कालादर्शेऽभिहितः !

---

[1] एकस्मात् तूयत्वे संयोग पृथकत्वं, एकस्यैव पवार्थं स्योभयत्वे नित्यत्वे काम्यत्वे संयोगो वाक्यं तस्य पृथक्त्वं भेदः स हेतुरिति शेषः । यथा खदिरो यूपो भवति, खादिरो वै प्रजा । काम्यस्य यद्यैकस्यैव खदिरस्य यूपस्य नित्यत्वकाम्यत्वमिति अतिरिक्तः 'ख' पाठः शोध पाठः ।

"विधवायावनस्थस्य यतेश्चैकादशीद्वये ।
उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः ॥"

भुर्जेनिषेधः कृष्णायां सिद्धिस्तस्य ततो व्रते इति । तथा च गृही कृष्णायां निषेधपरिपालनार्थमशननिवृत्तिमात्रं कुर्यात् । तत्र विशेषो वायवीय उक्तः—

"उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेत् ।
नदुष्यत्युपवासेन उपवासफलं लभेदिति ॥"

भक्ष्यं च विद्धाविषये दर्शितम्—

"अविद्धानामलाभे तु पयोदधि फलानि च ।
सकृदेवाल्पमश्नीयादुपवासस्ततो भवेत् ॥" इति ।

तथा— "नक्तं हविष्यान्नमनोदनं वा, फलं तिलाः क्षीरमथाम्बु चाज्यम् । यत्पंचगव्यं यदि चापि वायुः, प्रशस्तमत्रोत्तरमुत्तरत्व"मिति । नीत्यैकादश्युपवासासमर्थनाप्येकभक्तादिकं कर्त्तव्यम् । तथा च मार्कण्डेयः—

"एक भक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन [1]व्रती द्वादशिको भवेत्[2] ॥" इति ।

तथा — "यथाशक्तिदानैकब्राह्मणभोजनसहस्रगायत्रीजपद्वादशप्राणायामादयोऽप्यनुकल्पाः" परिभाषोक्ताद्रष्टव्याः । हेमाद्रौ बौधायनः—

"व्याधिभिः परिभूतानां पित्ता[3]धिकशरीरिणाम् ।
त्रिंशद्वर्षाधिकानां च नक्तादिपरिकल्पना ॥"

त्रिस्त्रिंशद्वर्षाणामित्यपि क्वचित्पाठः तत्र नवति वर्षाणामित्यर्थः । नित्यकाम्ययोरशक्तास्तु स्वप्रतिनिधिभिर्व्रतं कारयेयुः । ते परिभाषायां द्रष्टव्याः । दैवादेकादश्यां सर्वथैवाकृतव्रतेन पुरुषेण द्वादश्यामपि तत्कार्यमित्युक्तं अपरार्कं वाराहे—

"एकादशी विलुप्ता चेत्परतो द्वादशी स्थिता ।
उपोष्या द्वादशी तत्र यदीच्छेत् परमं पदम् ॥" इति ।

द्वादश्यामपि तदकरणे चान्द्रायणं कुर्यात् । "एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेद्" इति स्मरणात् । तत्रापि प्रमादादिनाऽकरणे यवमध्यचान्द्रायणं

---

[1] नंनि इति ख पाठः ।

[2] एक नक्तेन बालवृद्धातुरः क्षिपेत्, पयोमूल फलैर्वापि नंनि द्वादशिको भवेदिति इति ख पाठोऽधिकः ।

[3] पित्ताधिक इति 'ख' पाठः ।

नास्तिक्यादिना तदकरणे तु पिपीलिकामध्य एवं निमित्तावृत्तौ नैमित्तिकावृत्तिर्बोध्या । पतिवत्यास्तूपवासनिषेधादिकं परिभाषायां द्रष्टव्यम् । चातुर्मास्यान्तर्गता तु कृष्णापि गृहिणोपोष्या ।

'शयनी बोधिनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥" इति पाद्मात् ।

एतच्चापुत्रगृहस्थविषयं, पुत्रवतस्तु साऽपि निषिद्धासंक्रान्त्यामुपवासं च कृष्णैकादशीवासरे, 'चन्द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही" इति नारदोक्तेः । हेमाद्रौ जैमिनिः—

"तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः ।
नानुषङ्गकृतो ग्राह्यो यतो नित्यमुपोषणम् ॥" इति ।

तन्निमित्तस्य संक्रान्त्यादिनिमित्तस्योपवासस्य निषेधः । न अनुषंगकृतः संक्रांत्यादिसंयोगकृत एकादश्युपवासनिषेधो ग्राह्यः । काम्य संक्रान्त्याद्युपवासनिषेधो नित्यैकादश्युपवासविषयो न भवतीत्यर्थः । तेन—

"आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
पारणं चोपवासं च न कुर्यात् पुत्रवान् गृही ॥"

इत्यादि रविवारादिनिमित्तकोपवासनिषेधोऽत्र न प्रवर्तते । यानि शुक्लकृष्णैकादश्योः साम्यबोधकानि वचनानि । "यथा कृष्णा तथा शुक्ला विशेषो नास्तिकश्चन" इत्यादीनि यान्यपि शुक्लकृष्णाविवेकप्रत्यवायबोधकानि ।

"स ब्रह्मह्लासगोघ्नश्च सुरापो गुरुतल्पगः ।
विवेचयति यो माहादेकादश्यौ सितासिते ॥" इत्यादीनि ।

तानि सर्वाणि वनस्थयति वैष्णवादि विषयाणि । अन्यथा, 'शुक्लां च सदा गृहीत्वा'दि वाक्यविरोधः स्यात् । प्राच्यास्तु वैष्णवगृहस्थानां कृष्णापि नित्या—

"नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणम् ॥

सपुत्रश्च सभार्यश्च स जनो भक्तिसंयुतः ।
एकादश्यामुपवसेत् पक्षयोरुभयोरपि ॥"
इति नारदोक्तेरित्याहुः ।

निर्णयसिन्धौ पुत्रशब्दश्चापत्यमात्रवचनः । नारायणवृत्तौ— "पुमांस एव मे पुत्रा जायेरन्" इत्यत्रापत्यमात्रवाचित्वोक्तेः । 'जनयद् बहुपुत्राणी'ति लिंगा-

त्पुमान् पुत्रो जायत इति चेत्युक्तम् । काम्योपवासस्तु पुत्रवतापि कृष्णायामपि विधेयः—

"पुत्रवांश्च सभार्यश्च बन्धुयुक्तस्तथैव च ।
उभयोः पक्षयोः काम्यव्रतं कुर्यात्तु वैष्णवम् ।।"
इति नारदवचनात् ।

अथ व्रतकालनिर्णयः—

तत्रादौ वैष्णवमते एकादशी निर्णीयते । वैष्णवलक्षणं च

परमपदमापन्नो हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेद् यस्तु यस्य दीक्षास्ति वैष्णवी ।।
समात्मा सर्वभूतेषु निजाचारा[1]द्विष्णुतः ।
विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते ।।" इति ।

वैष्ण[2]वाद्यागमात्तु दीक्षायुक्तो हि वैष्णव" इति च । यद्यपि पित्रादेरागमदीक्षायां तन्मात्रस्यैव वैष्णवत्वं न तत्पुत्र[3]स्य । तथापि स्वपारम्पर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यन्ते वृद्धाः । वैष्णवमते चैकादशी द्विविधा— सम्पूर्णा विद्धा च । या सम्पूर्णा सेव शुद्धेत्युच्यते । तत्राद्या गारुडे—

"उदयात्प्राग्यदा विप्र ! मुहूर्त्तद्वयसंयुता ।
सम्पूर्णैकादशी ज्ञेया तत्रैवोपवसेद्गृही ।।"[4]

भविष्यपुराणेऽपि—

"आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता ।
एकादशी तु सम्पूर्णा विद्धाऽन्यापरिकीर्त्तिता ।।" इति ।

या तु कृत्स्नाऽरुणोदयव्यापिनी द्वितीयसूर्योदयादर्वा[5]क्च रात्रौदिने वा समाप्ता द्वादशीयुक्ता सा न विद्धा, न सम्पूर्णा किन्तु खण्डामात्रम् । अरुणोदये दशमीसत्त्वे विद्धा । तदुक्तं भविष्यपुराणे—

"अरुणोदयकाले तु दशमी यदि दृश्यते ।
सा विद्धैकादशी तत्र पापमूलमुपोषणम् ।।" इति ।

---

[1] निजाचारदविष्णुत इति ख पाठः ।
[2] वैखानसोद्यागकोक्त दीक्षायुक्तः इति ख पाठः ।
[3] पुत्रादेः इति 'ख' पाठः ।
[4] इति गृही वैष्णव इति ख पाठः ।
[5] अर्वागेव इति 'ख' पाठः ।

अरुणोदयश्च पंचदशधाविभक्तरात्रेरन्त्यमुहूर्त्तद्वयात्मको बोध्यः । "चतस्रो घटिका प्रातररुणोदय उच्यते" इति । 'निशः प्रान्ते तु यामार्द्धे' इति अरुणोदयवेधः स्यात् । सार्धं तु घटिकात्रयमित्यादीनां सर्वेषां न्यूनाधिकपरिमाणत्व प्रतिपादकवचनानामपि रात्रिमानह्रासवृद्धिभ्यां मुहूर्त्तद्वयपरतैव । 'उदयात्प्राग्यदा विप्र'[1] इत्यस्य 'आदित्योदयोदयवेलायाः'[2] इत्यस्य च गारुडभविष्यवचनस्यैकवाक्यत्वात् । कालतत्त्वविवेचन-मयूखादावप्येवम् । यत्तु निर्णय सिन्धौ -- "उदयात्प्राक्चतस्रस्तु घटिका अरुणोदयः" इति स्कांदवचनेन 'उदयात्प्राग्यदा विप्र' इति गारुडवचनस्य, 'आदित्योदयवेलायाः' इति भविष्यवचनस्य चोपसंहाराद्दण्डचतुष्टयमेवारुणोदय इति । चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ।

"चतुष्टयविभागोऽत्र वेधादीनां किलोदितः ।
अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयम् ॥

अतिवेधो द्विघटिका प्रभासंदर्शनाद्रवेः ।
महावेधोऽपि तत्रैव दृश्यते[3] द्विजसत्तम ॥"
तुरीयस्तत्र विहितो, योगः सूर्योदये बुधैः ।"

इति भविष्यवचनमप्यवयवद्वारेणारुणोदयवेधविशेषपरमेवेति ।

यदप्यत्र केचित्— एषां सर्वपक्षाणां मुहूर्त्तद्वयेन क्रोडीकारात्

"निशः प्राते तु यामार्द्धे देववादित्रवादने ।
सारस्वतानध्ययने वारुणोदय उच्यते ॥"

इति वचनाच्च रात्रिमानवशात्सार्धत्रिदण्डादयोऽनेकेऽरुणोदयाः । तदाह हेमाद्रिः— सार्धघटिकात्रयोक्तिरष्टाविंशतिघटीमितरात्रिविषया महत्तमास्तु रात्रीरपेक्ष्य चतस्रो घटिका इत्युक्तमित्याहुः । तन्न, अरुणोदयशब्दस्यानेकार्थत्वापत्तेः । न च मुहूर्त्तद्वयमर्थः । दण्डद्वयैकमुहूर्त्तादिवेधानां तथाप्यनुपपत्तेः । न हि तेषां यामार्द्धत्वमरुणोदयत्वं चास्तीत्यादि । तदेतदापाततः रात्रिमानह्रासवृद्धिवशेन त्रिदण्ड–सार्द्धत्रिदण्ड–चतुर्दण्डात्मकत्वान्मुहूर्त्तद्वयस्यैकमूलदण्डचतुष्टयरूपारुणोदयावयवत्वकल्पनापेक्षया त्रिदण्डादीनामेकं यन्मूलमरुणोदयत्वं तत्कल्पनैव लाघवम् । कल्पनालाघवेन दण्डचतुष्टयादिप्रतिपादकवचनानां मुहूर्त्तद्वयपर्यवसितार्थप्रतिपादकत्वस्यैव युक्तत्वान्मुहूर्त्तद्वयत्वस्यानुगतस्य वाच्यतावच्छेदकस्य सकलसाधारणत्वेन नानार्थत्वापत्तिरप्यरुणोदयशब्दस्य द्विघटिकादौ तदसत्त्वं न

---

[1] मुहूर्तद्वयसंयुत इति ख पाठोऽधिकः ।
[2] प्राङ्मुहूर्तद्वयान्वितेति ख पाठोऽधिकः ।
[3] अर्को न दृश्यते इति अधिकः ख पाठः ।

दोषाय । तस्यारुणोदयो नात्मकत्वाद्दोषविशेषबोधनार्थं तदभिधानादित्यलम् । यत्तु ब्रह्मवैवर्त्ते —

"अर्धरात्रे तु केषांचित् दशम्या वेध इष्यते ।
कपालवेध इत्याहुराचार्या ये हरिप्रिया. ।।"

इति तदर्धरात्रवेधोऽपियदावर्ज्यस्तदा किमु वक्तव्यमरुणोदयवेध इति कैमुतिकरींत्याऽरुणोदयवेधं निन्दापरमिति माधवः । तत्त्वं त्वेकादश्याः पूर्वं चतुर्यामेषु व्रतसंकल्पवर्जनार्थमिति । यस्तु दिक्यं च दशभिस्तथेति सार्धसप्तमुहूर्त्तात्मकएकादश्यां दशमीवेध उक्त उपवासातिरिक्तविषयः[1] । तदेवमरुणोदयविद्धैकादशी त्रैष्णवेन सर्वथा परित्याज्या ।

"दशमीशेषसंयुक्तो यवि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतम् ।।"

इति गारुडवचनात् ।

शुद्धाप्येकादशीमात्रस्प द्वादशीमात्रस्योभयोर्वा परत्र सत्त्वे त्याज्या । तत्रैकादश्याधिक्ये नारद आह—

'संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।
द्वादश्यां त[2]द्व्रतं कार्यं त्रयोदश्यां तु पारणम् ।।" इति ।

अत्र त्रयोदश्यां पारणं द्वादशीक्षयाद्बोध्यम् । यत्त्वत्रकैश्चिन्नदभिहितं एतादृशतिथिवृध्यनन्तरदिने आकस्मिकह्रासस्य ज्योतिःशास्त्रेऽप्रसिद्धेस्तिथ्यादिपत्रेऽनुपलब्धेश्चेद्दशशुद्धाधिकानधिकद्वादशिकोदाहरणस्य गगनकुसुमायमानत्वमिति तदेतन्मन्दं यत्राक्षांशाः षट्षष्टिमिताः पलभा सप्तविंशत्तत्र ¦देशांतरे घनचरघटिका एकादशाधिका यदा भवन्ति, तदा ज्योतिःशास्त्र प्रसिद्धेनाष्टघटिकापेक्षया रात्रिमानह्रा[3]सितघटिकात्मकमुहूर्त्तद्वयस्य'पि अरुणोदयत्वसंभवेन नवपंचाशज्घटिकोत्तर प्रवृत्तैकादश्या द्वितीयदिने सूर्योदयोत्तरं विद्यमानायाः शुद्धाधिकत्वेन तदुत्तरं प्रवृत्तद्वादश्याः घटिकाह्रासभ.वेनोदाहरणसंभवात् । अतएव मदनरत्नादौ परमवृद्धौ सत्यां दण्डषटकक्षयस्यैत्र ज्योतिःशास्त्रे प्रसिद्धिरित्युक्तम् । तिथि[4]व्यास आह —

"एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।
उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम् ।।" इति ।

---

१. इति माधवः । इति ख पाठोऽधिकः ।
२. 'लङ्घनम्' इति ख पाठोऽधिकः ।
३. ह्रासेन इति ख पाठः ।
४. पत्रेऽनुपलब्धिश्च सकलदेशीय तिथि पत्रानालोचन मूलिकैवेत्यलम् द्वादश्याधिक्ये इत्यन्त ख पाठोऽधिकः ।

लुप्ता द्वितीयसूर्योदयस्पर्शिनी । उभयाधिक्ये गुरुराह—

"संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि ॥"

इत्येवं वैष्णवानामेकादशी निर्णीता ।

अथ तद्भिन्नानां स्मार्त्तानामेकादशीनिर्णीयते । साऽपि द्वेधा, शुद्धा विद्धा च । तत्राद्या गारुडे—

"आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः ।
संपूर्णैकादशी नाम कार्या धर्मफलेप्सुभिः ॥"

इति सूर्योदये दशमोसत्त्वे विद्धा ।

"अतिवेधा महावेधा ये वेधास्तिथिषु स्मृताः ।
सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये स्मृतः ॥"

इति स्मरणात् ।

तथा— "सूर्योदयस्पृशा ह्येषा दशमी गर्हिता सदा" इति । अत्र सूर्योदयमारभ्योदयपर्यन्तं विद्यमानां सम्पूर्णां सूर्योदयोत्तरं दशमी सद्भाववती विद्धां चाभिप्रेत्याष्टादशभेदा उच्यन्ते । ते च संग्रहे -

"शुद्धा विद्धा द्वयी नन्दा त्रेधा न्यूनसमाधिकैः ।
षट्प्रकाराः पुनस्त्रेधा द्वादश्यूनसमाधिकैः ॥" इति ।

अस्यार्थः एकादशी द्विविधा शुद्धा विद्धा च । [1]तत्र शुद्धसमा शुद्धाधिकेतिधा । एवं विद्धान्यूना विद्धसमा विद्धाधिकेति । विद्धाऽपि त्रिधा । इयं षट्प्रकारा द्वादश्यूनसमाधिकैः प्रत्येकं त्रिप्रकारेत्यष्टादशैकादशीभेदाः । ते यथा— १. शुद्धन्यूनान्यूनद्वादशिका २. शुद्धन्यूनासमद्वादशिका ३. शुद्धन्यूनाधिकद्वादशिका ४. शुद्धसमान्यूनद्वादशिका ५. शुद्धसमासमद्वादशिका ६. शुद्धसमाधिकद्वादशिका ७. शुद्धाधिकान्यूनद्वादशिका ८. शुद्धाधिकासमद्वादशिका ९. शुद्धाधिकाधिकद्वादशिका १०. एवं विद्धन्यूनान्यूनद्वादशिका ११. विद्धन्यूनासमद्वादशिका १२. विद्धन्यूनाधिकद्वादशिका १३. विद्धसमान्यूनद्वादशिका १ . विद्धसमासमद्वादशिका १५. विद्धसमाधिकद्वादशिका १६. विद्धाधिकान्यूनद्वादशिका १७. विद्धाधिकासमद्वादशिका १८. विद्धाधिकाधिकद्वादशिका चेति ।

अत्र सर्वेष्वपि भेदेष्वेकादशी द्वादश्योः समत्वं नाम षष्टिघटिकात्मकत्वं, ततो न्यूनत्वे न्यूनत्वमाधिक्ये आधिक्यमितिनिर्णयामृते । द्वितीयदिने सूर्योदया-

---

[1] तन्न शुद्धन्यूनाशुभ समाशुद्धाधिकेति शुद्धात्रिधा इति ख पाठोऽधिकः ।

त्प्राक् समाप्त्यान्यूनत्वं समत्वं सूर्योदयात्किंचिन्न्यूनत्वम् । आधिक्यं सूर्योदयोत्तरसत्त्वमिति कालतत्त्वविवेचनादौ । तत्र[1] शुद्धन्यूनायां न्यूनद्वादशिकायां समद्वादशिकायां चे[2]त्यर्थः । दृश्यां न विवादः ।[3] यदा [4]शुद्धन्यूना शुद्धसमा वाऽधिकद्वादशिका भवति, नदा सर्वैरपि शुद्धैकादश्युपोष्या । तदुक्तं स्कंदपुराणे—

"शुद्धा यदा समाहीना समाहीनाऽधिकोत्तरा ।
एकादशीमुपवसेन्न शुद्धां वैष्णवीमपि ।।"

एकादशी यदा शुद्धासती द्वितीय सूर्योदयपर्यन्ता ततो न्यूना वोतरा द्वादशीसमा न्यूनाऽधिका वा भवतु, तदा शुद्धामेकादशीमेवोपवसेन्न वैष्णवीद्वादशीम्[5] ।

"न चेदेकादशी विष्णौ द्वादशो परतः स्थिता ।
उपोष्यैकादशी तत्र यदीच्छेत्परमं पदम् ।।"
इति नारदवचनाच्च ।

एवं च—

"एकादशी भवेत्पूर्णा परतो द्वादशी यदा ।
तदा ह्येकादशी त्यक्ता द्वादशी समुपोषयेत् ।।" इति ।

"अविद्धाऽपि च विद्धा स्यात्परतो द्वादशो यदि" इत्यादिवचनानि द्वादशीदिने एकादश्या अपि सत्त्वे द्रष्टव्यानि । "पूर्णाऽप्येकादशी त्याज्या वर्धते द्वितयं यदि" इति वचनानन्तरात् । यत्तु—

"सम्पूर्णैकादशी त्याज्या परतो द्वादशी यदि ।
उपोष्या द्वादशीशुद्धा द्वादश्यामेव पारणम् ।।"

इति वचनं द्वादश्याः शुद्धत्वाभिधानात एकादशी वृद्धिविषयं वक्तुं न शक्यते तद्वैष्णवविषयं, स्मार्त्तानां तु पूर्वैव । निर्णसिन्धु–मदनरत्न–कालतत्त्वविवेचनकारानन्तभट्ट–माधवादीनामपीदमेव सम्मतम् । हेमाद्रिणा तु- -

---

[1] एकादशी शुद्धा द्वितीय सूर्योदयान्न्यूना द्वादश्यपि ततोन्यूना तत्पर्यंता वेत्येवम् इति ख पाठेऽधिकः शोधपाठ. ।

[2] न विवादः इति ख पाठः ।

[3] एकादशी शुद्धा द्वितीयसूर्योदय पर्यन्ता द्वादशी तु ततो न्यूना तत्पर्यन्ता वेत्येवम् इति शोध पाठः ख पाठे अधिकः ।

[4] एकादशी शुद्धा द्वितीय सूर्योदयान्न्यूना तत्पर्यन्ता वा द्वादशी तु सम्पूर्णा सती त्रयोदश्या चास्तीत्येवम् इति शोध पाठः ख पाठेऽधिकः ।

[5] इत्यर्थः अपि अधिक 'ख' पाठ· ।

"एकादशी भवेत्पूर्णा परतो द्वादशी यदा ।
तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् ।।"

इति स्कान्दा ।

संपूर्णैकादशी त्याज्या, परतो द्वादशी यदि ।
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम् ।।"

इति स्मृत्यन्तराच्च ।

शुद्धन्यूनाशुद्धसमावाऽधिका सर्वेषां परैवेत्युक्तम् । सम्पूर्णैकादशी द्वादश्यां च कियन्मात्रास्ति । तत्र रात्रिशेषे त्रयोदशीत्येवं रूपा शुद्धाधिका न्यूनद्वादशिका संपूर्णैकादशी द्वादश्यां च कियन्मात्रास्ति तत्र द्वादशी चोदयपर्यन्तेत्येवं रूपा शुद्धाधिका[1] समद्वादशिका च सकामैः प्रथमोपोष्या, निष्कामैर्द्वितीया । तदुक्तं मार्कण्डेयेन—

"संपूर्णैकादशी यत्र परत्र पुनरेव सा ।
पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेत् ।।" इति ।
प्रथमेऽहनि संपूर्णा व्याप्याऽहोरात्रसंयुता ।
"द्वादश्यां च तथा सा न दृश्यते पुनरेव च ।
पूर्वा कार्या गृहस्थैस्तु यतिभिश्चोत्तरा विभो ।।"

इति स्कंदपुराणाद् गृहिणां पूर्वा यतेः परेति माधवः । विष्णुप्रीतिकामैस्त्वेतादृशे विषये दिनद्वयेऽप्युपवासः कार्यः ।

"संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् ।
उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः ।।"

इति वृद्धवसिष्ठवचनात् ।

लुप्यते सूर्योदयं न स्पृशति, तेन समापि गृह्यते संपूर्णैकादशी द्वादश्यां च कियन्मात्रास्ति । द्वादशी च त्रयोदश्यामित्येवंरूपा शुद्धाधिकाधिकद्वादशिका तु शुद्धामेकादशीं परित्यज्य सर्वैर्द्वादशीमिश्रिताः कार्या ।

"संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
वैष्णवी तु त्रयोदश्यां घटिकाऽपि च दृश्यते ।।
गृहस्थोऽपि परां कुर्यात्पूर्वां नोपवसेत्सदा ।।"

---

१. न्यूनद्वादशिका सम्पूर्णैकादशी द्वादश्याञ्च कियन्मात्रास्ति तत्रद्वादशी चोदयपर्यन्तेत्येवं रूपाशुद्धा इत्यन्तः ख पाठोऽधिकोऽस्ति ।

२. द्वादशी च तथा प्रात दृश्यते इति ख पाठो विद्यते ।

इति स्मृत्यन्तरा‘त्पूर्णाप्येकादशी त्याज्या वर्धते द्वितयं यदि” इति स्कंदपुराणाच्च । तदेवं पूर्णाभिदव्यवस्थोक्ता ।

अथ विद्धा-भेदव्यवस्थोच्यते

तत्र दशमीविद्धैकादशी रात्रिशेषे च द्वादशी त्रयोदश्यां चास्ति न्यूनेत्येवंरूपा विद्धा न्यूनान्यूनद्वादशिका पुत्रवद् व्यतिरिक्तगृहस्थैर्यतिभिश्च पूर्वाविद्धैवोपोष्या ।

> “दशमीशेषसंयुक्ता नोपोष्यैकादशी तिथिः ।
> यदि दैवात्तु संसिध्येदेकादश्यां तिथित्रयम् ।।
> तत्र क्रतुशतं पुण्यं द्वादशी पारणे भवेत् ।।” इति ।

हेमाद्रौ नारदवचनात् ।

> “एकादशी दशमी[1]विद्धा परतश्च न वर्धते ।
> यतिभिर्गृहिभिश्चैव सैवो पोष्या क्षये तिथिः ।। इति ।

तत्रैव पाद्माच्च–पुत्रवद्भिस्तु परोपोष्या ।

> “एकादशीषु नष्टासु रविसंक्रमणे तथा ।
> पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही ।।”

इति व्यासवचने तेषामेकादशी दिनक्षये उपवासप्रतिषेधात् । हेमाद्रिस्तु–

> “पूर्वविद्धा न कर्त्तव्या षष्ठ्येकादश्यथाष्टमी ।
> एकादशी तथा कुर्यात् क्षीयते द्वादशी यदि ।।”

इति निगमात्सर्वेषांपूर्वैवेत्याह–दशमीविद्धैकादशी रात्रिशेषे च द्वादशी त्रयोदश्यां चास्ति समेत्येवंरूपा विद्धन्यूनासमद्वादशिका पूर्वोक्तनारदपाद्मवचनाभ्यामेव सर्वैर्गृहिभिः पूर्वोपोष्या । यतिभिस्तूत्तरा ।

> “दशमीमिश्रिता पूर्वा पूर्णा वा द्वादशीपरा ।
> एकादश्यां महाप्राज्ञ उपवासः कथं भवेत् ।।”

इत्युपक्रम्योक्तं–

> “शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः ।”
>
> इति विष्णुरहस्यवचनात् ।

हेमाद्रिस्तु ‘एकादशीषु नष्टास्वि’ति निषेधात्—

---

[1] दशा इति पाठः ।

"दिनक्षये तु संप्राप्ते द्वादशीं समुपोषयेत् ।
[1]पारणं च त्रयोदश्यां यदीच्छेच्छ्रेय आत्मनः ॥"

इति ब्रह्मपुराणात्पुत्रवतां गृहिणां, दिनक्षये तु शुद्धैवेति सुमन्त-सत्यव्रत-वचनान्मुमुक्षूणां च शुद्धद्वादश्यामुपवासः ।

एकादशी न लभ्येत सकला द्वादशी भवेत् ।
उपोष्या दशमीविद्धा ऋषिरुद्दालकोऽब्रवीत् ॥"

इति स्मृत्यन्तरादन्येषां तु पूर्वाविद्धैवेत्याह । मदनरत्ने तु– विद्धन्यूनान्यून-द्वादशिका समद्वादशिका वा मुमुक्षुव्यतिरिक्तैः सर्वैर्विद्धैवोपोष्या । दशमी शेष-संयुक्तेति नारदवचनात् । मुमुक्षुभिस्तु शुद्धा द्वादश्युपोष्या । तथा च सुमन्तु सत्यव्रतौ—

"दिनक्षयेऽपि शुद्धैव द्वादशी मोक्षकांक्षिभिः ।
उपोष्या दशमी विद्धा नोपोष्यैकादशी सदा ॥" इति ।

पुत्रवद्गृहस्थानां त्वेकादशीषु नष्टास्विति व्यासवचने विद्धन्यूनायामुप-वासनिषेधादिति [2]वायुप्रोक्तवचना[3]त्किञ्चित्फलादिभक्षयित्वोपवासः कार्यं इत्युक्तम् । दशमी विद्धैकादश्युदयमात्रपर्यन्ता द्वादशी च न्यूना समावेत्येवंरूपा विद्ध-समान्यूनद्वादशिका समद्वादशिका च गृहिभिः पूर्वाविद्धैवोपोष्या यतिभिस्तूत्तरा । तदुक्तं पुराणसमुच्चये—

"दशमी मिश्रिता पूर्वाद्द्वादश्यां च विलुप्यते ।
एकादश्यां तदा ब्रह्मन्नुपवासः कथं भवेत् ॥" इति प्रश्ने ।

"शुद्धैव द्वादशी राजन् उपोष्या मोक्षकांक्षिभिः ।
सकामैः गृहिभिः पूर्वाविद्धापीति विनिश्चयः ॥" इति ।

माधवस्तु चतुर्ष्वप्युक्तविद्धाभेदेषु [4]अनुयायिनो मयूखकौस्तुभकारादयस्तु एको द्वितीयदिने एकादशीसत्त्वं [5]कोट्यन्तरं तदभावेन [6]संदेहाभावात्सर्वैरपि पूर्वाविद्धैवोपोष्या । न च विद्धत्वादस्ति सन्देह इति वाच्यम् । असति कोट्यन्तरे विद्धाया अप्युपादेयत्वात्तथा च विष्णुरहस्ये—

---

१. पारयीत इति ख पाठः ।
२. उपवास निषेधेष्विति ख पाठोऽधिकः ।
३. तैः इति ख पाठोऽधिकः ।
४. ख पाठे उक्त पाठोनास्ति ।
५. द्वितीयदिने एकादशी सत्वं इति ख पाठेऽधिकः पाठः ।
६. कोट्यन्तरा भावेन इत्यपि ख पाठोऽधिकः ।

"एकादशी भवेत्काचिद्दशम्या दूषिता तिथिः ।
वृद्धिपक्षे भवेद्दोषः क्षयपक्षे तु पुण्यदा ॥" इत्याह ।

मयूखकौस्तुभकारादयोऽप्येवं दशमीविद्धैकादश्युदयादर्वागेवसमाप्ता उदयमात्रं प्राप्ता वा द्वादश्यां नास्ति । द्वादशी तु त्रयोदश्यां विद्यते, इत्येवंरूपा विद्धन्यूना विद्धसमा चाधिकद्वादशिका शुद्धद्वादश्येवोपोष्या । द्वादश्यामेव पारणं, तत्पर्याप्तद्वादशीलाभे तदलाभे तमुल्लंघ्यापि कार्यम् ।

"उपवासदिनं विद्धं यदा भवति पूर्वथा ।
द्वितीयेऽह्नि यदा न स्यात्स्वल्पाप्येकादशी तिथिः ॥"

तत्रोपवासो विहितः कथं तद्वदसूतज । "सूत उवाच"—

"यदा न प्राप्यते विप्रा ! द्वादश्यां पूर्ववासरः ।
रविचक्रार्द्धमात्रोऽपि तत्रोपोष्यं पर दिनम् ॥"

सारथेररुणस्योदयात्प्रागेव रथचक्रोदयमात्रप्राप्तत्वेनात्यल्पोऽपीत्यर्थः ।

उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारयेत् ।
निर्गता चेत् त्रयोदश्यां कला वा द्विकलापि वा ॥"
इति नारदीयात् ।

"एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।
उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम् ॥"

इति व्यासवचनाच्च लुप्ता दिनद्वये सूर्योदयेऽस्पर्शेन क्षयंगता । हेमाद्रि–माधव–कालतत्त्वविवेचनादावप्येवम् । मदनरत्ने तु—

"विद्धन्यूनाधिकद्वादशी का[1]र्या दशमीमिश्रिता नरैः ।
प्रातर्भवतु वामा वा यस्मान्नित्यमुपोषणमि"ति ॥

ऋष्यश्रृंगोक्तेर्विद्धैवोपोष्या । मुमुक्षूणां त्वेकादशी यदा लुप्तेति व्यासोक्तेः शुद्धद्वादश्यामुपवास इत्युक्तम् । निर्णयामृते तु विद्धन्यूनाधिकद्वादशिका एकादशी पयदा लुप्तेति स्मृत्यन्तरात्सर्वत्रैकादशी कार्येति ऋष्यश्रृंगोक्तेश्च सर्वासां पूर्वैवेत्युक्तम् । दशमी विद्धैकादशी द्वादश्यां च कियन्मात्रा विद्यते । तत्र रात्रिशेषं च त्रयोदशी । एवंरूपा विद्धाधिकान्यूनद्वादशिका सर्वैरपि परैवोपोष्या । तदुक्तं कूर्मपुराणे—

"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥" इति ।

---

[1] विद्ध न्यूनया न्यून द्वादशिकया सम द्वादशिकया वासमाविद्ध समाधिक द्वादशिकायां तु सर्वमैकादशी कार्या इत्यन्तः पाठ ख पाठेऽधिकः ।

अस्मिंश्च द्वादशीदिनक्षये—

"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी।
उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः॥"

इति कूर्मपुराणात्पुत्रवद्गृहिभिरुपवासो न कार्यः, किन्तु तैस्तत्र नक्तं कार्यम्। तथा च वृद्धशातातपः।

"एकादशी यदा विद्धा द्वादशी च क्षयं गता।
क्षीणा सा द्वादशी ज्ञेया नक्तं तत्र विधीयते॥" इति।

हेमाद्रिस्तु—

"एकादशी द्वादशी च रात्र्यन्ते च त्रयोदशी।
उपवासः कृतस्तत्र मोक्षमेव प्रयच्छति॥" इति।

वचनान्मुमुक्षूणां—

"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी।
त्रिभिर्मिश्रा तिथिः प्रोक्ता सर्वपापहरा स्मृता॥
उपवासः कृतस्तस्यां महापातकनाशनः॥"

इति वचनात्पापक्षयकामिनाम्—

"द्वादश्यां तु यदा भूप! दिनक्षयतिथिर्भवेत्।
तदोपवासः कर्त्तव्यो विष्णुसायुज्यमाप्नुयात्॥"

इति वचनाद्विष्णुसायुज्यकामिनां च परा, पुत्रवद्गृहिभिर्नक्तं कार्यम्। एतद्व्यतिरिक्तैस्तु विद्धाऽप्यविद्धा विज्ञेया परद्वादशी न चेत्।' इत्यादि सामान्यवचनबलेनैव विद्धैकादश्युपोष्येत्याह। दशमीविद्धैकादशी द्वादश्यां विद्यते, द्वादशी चोदयपर्यन्तेत्येवंरूपा विद्धाधिकासमद्वादशिकाऽपि सर्वैरपि परैवोपोष्या। तथा च पद्मपुराणे—

"सर्वत्रैकादशी ग्राह्या द्वादशीमिश्रिता नरैः।
प्रातर्भवतु वामा. वा यतो नित्यमुपोषणम्॥"

इति उपोषणं नित्यं प्रधानं, तत्र चान्त्यकलावच्छिन्नैकादशी मुख्या, तादृशो चाधिक्ये द्वादश्यां लभ्यत इति सैवोपोष्या। पारणं तु तत्रापि द्वितीयदिनेन्त्यकलावच्छिन्नद्वादशी यदि लभ्यते। यथोभयाधिक्ये तदा सम्यगेव। नो चेत् त्रयोदश्यामपि भवत्वित्यर्थः। अतएव नारदः—

"द्वादश्यैकादशी यत्र संगता त्रिदशाधिप।
तामुपोष्य ततः कार्यं त्रयोदश्यां तु पारणम्॥" इति।

यानि तु—

"पारणाहे न लभ्येत द्वादशी कलयापि चेत् ।
तदानीं दशमी विद्धाऽप्युपोष्यैकादशी तिथिः ॥"

इत्यादीनि विद्धानुग्रहवचनानि तानि विद्धाधिकाव्यतिरिक्तविषयाणि । पूर्वोदाहृतवचनविरोधात् माधवेन तदनुयायिभिर्मयूखकारादिभिस्तु शुद्धाधिकावद्विद्धाधिकान्यूनद्वादशिका[1] वा एकादशी

एकादशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः ।
उत्तरां तु यति. कुर्यात्पूर्वामुपवसेद्गृही ॥"

इति प्रचेतोवाक्याद् गृहिभिः पूर्वा, यतिभिरुत्तरोपोष्येत्युक्तम् । कैश्चित्तु पूर्वोक्ते एकादशीदिनक्षयेऽत्र च द्वादशी दिनक्षये "उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेत्" इति सामान्यवचनान्नवतं हविष्यान्नमिति वचनोक्त भक्ष्यप्रकल्पनमुक्तं तत्त्र विशेषतो द्वादश्युपवासविधानेऽत्र च नक्तविधाने सति विचारणीयम् । यानि तु—

"दशम्यनुगता हन्ति द्वादशद्वादशीफलम् ।
धर्मापत्यधनायूंषि त्रयोदश्यां तु पारणम् ॥"

इति कौर्मादीनि दशमोवेधत्रयोदशीपारणयोर्निषेधकानि तानि विहितभिन्नपराणि दशमी विद्धैकादशी द्वादश्यां च कियन्मात्रा विद्यते । द्वादशी च त्रयोदश्यामस्तीत्येवरूपा विद्धाधिकाधिकद्वादशिका तु सर्वैः परैवोपोष्या । सूर्योदयवेधनिषेधस्य स्मार्त्तान् प्रत्येव प्रवृत्तेः शुद्धायामुभयाधिक्ये पराया उक्तत्वाद्विद्धायां तादृश्यां कैमुतिकन्यायाच्च । उक्तं च भविष्यपुराणे—

एकादशीं दिशायुक्तां वर्धमाने विवर्जयेत् ।
क्षयमार्गस्थिते सोमे उभयासहितः शिवः ॥"

एकादशी तस्यामित्यर्थः । कुर्वीत दशमीयुतामिति । अतएवोभयसाधारण्येनाह माधवः—

"एकादशी द्वादशी चेत्युभयं वर्धते यदि ।
तदा पूर्वदिनं त्याज्यं स्मार्त्तैर्ग्राह्यं परं दिनम् ॥" इतिं ।

कालतत्त्वविवेचनकारास्तु शुद्धाधिकाधिकद्वादशिका २. शुद्धाधिकानधिकद्वादशिका ३. शुद्धानधिकानधिकद्वादशिका ४. शुद्धानधिकाधिकद्वादशिका च तथाविद्धाऽपीत्यष्टावेव भेदाः श्रीमाधवाचार्यसम्मताः । अत्र पूर्वोक्ता अष्टादशभेदा

---

[1] समद्वादशिका इत्यधिकः ख पाठः ।

अप्यन्तर्भवन्ति । तथा हि शुद्धानधिकेत्यत्रानधिकेत्यनेन साम्यन्यूनत्वयोः संग्रहाच्छुद्धासमाधिकद्वादशिका शुद्धन्यूनाधिकद्वादशिके संग्रहीते भवतः । आद्यभेदः समानः । एवमग्रेऽप्यनधिकपदेन साम्यन्यूनत्वयोः संग्रहाच्छुद्धसमासमद्वादशिका-शुद्धसमान्यूनद्वादशिका–शुद्धन्यूनासमद्वादशिका–शुद्धन्यूनान्यूनद्वादशिका चेति चत्वारो भेदाः संगृहीताः । एवमुत्तरत्रापि शुद्धानधिकेत्यनेन भेदद्वयसंग्रह इति क्रमेण नवभेदानां संग्रहः । [1]चतुर्भिर्विद्धाभेदैरपि नवभेदानां संग्रह उन्नेय इत्याहुः । ते शुद्धा यदा समाहीना समाहीनाधिकोत्तरेत्यादिवाक्यजानंतोऽज्ञा महानिबन्धांश्चा[2]वश्यं एवमुपेक्ष्याः ।

अथ काम्योपवासक्रमः

तत्रांगिरा–

"सायमाद्यन्तयोरह्नोः सायं प्रातश्च तद्दिने ।
उपवासफलं प्रेप्सुर्जह्याद्भुक्तचतुष्टयम् ।।" इति देवलः ।
"दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः ।
एकादशीमुपवसेत् पक्षयोरुभयोरपि ।।
देवतास्तस्य तुष्यन्ति कामितं तस्य सिध्यतीति ।।"

दशमीं द्वादशीं च प्रकृत्य नारदीये—

"अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः ।
अवनीतल्पशयनाः प्रियासंगविवर्जिताः ।।
शाकं मा[3]षंमसूरांश्च पुनर्भोजनमैथुने ।
द्यूतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत् ।।"

घृतमत्यम्बुपानं च इति पाठान्तरं हेमाद्रौ । तस्मिन्पाठे वृतं प्रचुरं तथा—

"कांस्यं मासं मसूरं च तैलं वितथभाषणम् ।
आयासं च प्रवासं च दिवास्वापं च मैथुनम् ।।
शिलापिष्टं परान्नं च दशम्यादिषु वर्जयेत् ।"

व्रतघ्नान्याह देवलः—

"सकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् ।
उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात् ।।"

---

१. 'एवं' इति ख पाठोऽधिकः ।
२. पश्यन्तोऽचा एवमिति उपेक्षा इति ख पाठः ।
३. मांसं इति ख पाठः ।

स एव- "अत्यये चाम्बुपानेन[1] नोपवासः प्रणश्यति ।" [३]अत्यये केऽष्ट अव्रतघ्नानि, पद्मपुराणे—

"अष्टौतान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ।।"

क्वचिदस्यापवादः --

"शयने च मदुत्थाने मत्पार्श्वपरिवर्त्तने ।
नरो मूलफलाहारी हृदि शल्यं समार्पयेत् ।।"

कन्दं सूरणादि, मूलं तदितरत् । एतच्च हेमाद्र्यादिमहानिबन्धेष्वदृष्टत्वान्निर्मूलमिति केचित् । विष्णुरहस्ये—

"गात्राभ्यंगं-शिरोऽभ्यंगं-ताम्बूलं-चानुलेपनम् ।
व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्बलरागकृत् ।।"

स्मृत्यन्तरे—

"दशम्यामेकभक्तं तु कुर्वीत नियतेन्द्रियः ।
आचम्य दन्तकाष्ठं तु खादेत तदनन्तरम् ।।
रात्रिनयेत्ततः पश्चात्प्रातः स्नात्वा समाहितः ।।"

इत्यादि नियमलोपे प्रायश्चित्तमुक्तं संग्रहे—

'मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषवणे ।
अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः ।।" इति ।

वसिष्ठः—

"उपवासं तथा श्राद्धे न कुर्याद्दन्तधावनम् ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ।।"

प्रमादात्करणे तु प्रायश्चित्तमुक्तं विष्णुरहस्ये—

"श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् ।
गायत्र्याः शतसंपूतमम्बुप्राश्याद्विशुध्यति ।।"

उपवाससंकल्पश्च प्रातः स्नात्वा कर्त्तव्यः । यदा त्वर्धरात्रानन्तरमपि दशम्यनुवर्तते तदैकादश्याः पूर्वमर्धं परित्यज्योत्तरार्द्धे पूजासंकल्पावनुष्ठेयौ ।

---

२. न इति ख पाठः ।

३. अत्ययेकष्टे इति ख पाठः ,

"दशम्याः संगदोषेण मध्यरात्रात्परेण तु ।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोस्तदा ।।"
इति स्मृत्यन्तरवचनात् ।

यदा सूर्योदये दशमीवेधस्तदा रात्रौ पूजासंकल्पौ कार्यौ ।

विद्धोपवासे [1]नशनन्तु दिनं त्यक्त्वा समाहितः ।
रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाचरेत् ।।"
इति नारदीयवचनात् ।

मुखोपवासकर्त्तुरेकादश्यां श्राद्धप्राप्तावाह माधवीये कात्यायनः –

"उपवासो यदा नित्यः[2] श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ।।" इति ।

तथा—

"मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदा ।
अभ्यर्च्य पितृदेवाँश्च, आजिघ्रेत्पितृसेवितम् ।।"

इति आघ्राणेनापि भोजनं[3] सिद्ध्यति । तस्य भोजनकार्ये विधानात् कंदमूलफलाहाराद्यनुकल्पकर्त्तुस्तु नैतत्स्वभक्ष्यस्यैव फलादेः पितृब्राह्मणपात्रेषु परिवेषणपूर्वकं तच्छेषभक्षणसम्भवात् । नृसिंहपरिचर्योदाहृतानि–

एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत् ।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ।।

इति पाद्मादीन्येकादश्यां श्राद्धनिषेधपूर्वकं द्वादशीश्राद्धप्रतिपादकवचनानि तु निर्मूलानि । हेमाद्रिमाधवादिमहानिबन्धकारैरलिखनात् । किं च, 'महालये सपक्षः सकलः पूज्यः 'षोडशकं प्रति' इति श्रुत षोडशत्वं पौषैकादश्यां च मन्वादिश्राद्धं क्षयाहापरिज्ञाने च तत्पक्षैकादश्यां विहितं श्राद्धं च बाधितमेव स्यात् । समूलत्वेऽपि वा नैमित्तिकपदश्रवणात्सावकाशनैमित्तिकतीर्थादिश्राद्धपरतैव तेषां यच्च—

"श्राद्धे जन्मदिने चैव संक्रान्त्यां राहुसूतके ।
उपवासं न कुर्वीत यदीच्छेच्छ्रेय आत्मनः ।।" इति वचनम् ।

---

१. नश्नन्स्तु इति ख पाठः ।
२. अत्र नित्य इत्यविवक्षितं अनुवाद्यविशेषणत्वात्, अतः काम्योपवासेऽप्याघ्रेयमेवेति श्राद्ध चन्द्रिकायाम् इति शोधपाठः ख पाठेऽधिकः ।
३. कार्यम् इति ख पाठोऽधिकः ।
४. श्राद्ध इति ख पाठोऽधिकः ।

तत्र श्राद्धग्रहणं पूर्ववाक्य पर्यालोचनयैकादशीव्यतिरिक्तविषयं द्रष्टव्यम् । यदपि स्मृतिचंद्रिकास्थं पठन्ति—

"अन्नाश्रितानि पापानि तद्भोक्तुर्दातुरेव च ।
मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः ॥" इति ।

तस्यापि 'रागप्राप्तभुजि गोचरस्य न, वैधश्राद्धभुजि गोचरत्वं निर्णयसिन्धौ, योऽपि अकृतश्राद्धनिचयाजलपिण्डविना कृता' इति लघुनारदीये एकादश्यां श्राद्धादिनिषेधः, स मातापितृभिन्नविषयः । पूर्ववाक्ये तद्ग्रहणात् । निचयः प्रतिग्रह इत्युक्तम् । यश्च—

"व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद्गृही ।
श्राद्धं कृत्वा तु यो विप्रो न भुक्ते पितृसेवितम् ॥
हविर्देवा न गृह्णन्ति कव्यानि पितरस्तथा ॥"

इत्यादिवचनैः ।

पित्रादिसांवत्सरिकदिने उपवासनिषेधः, सोऽपि रविवाराद्युपवासनिषेधवत्तन्निमित्तोपवासविषयत्वासम्भवेऽप्यावश्यकैकादश्याद्युपवासव्यतिरिक्तविषयः । एवं, "विधिं कृत्वा तु षण्मासान्नोपवासो विधीयते" इत्येतदप्यावश्यकैकादश्युपवासव्यतिरिक्तविषयम् । सूतकादौ तु दानार्चनरहितमुपवासमात्रं कुर्यात् । तदुक्तं कौर्मे—

"काम्योपवासे प्रक्रान्तेऽ[1]नन्तरामृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ॥" इति ।

प्रकान्त इत्यनेनाप्रक्रान्तव्रतप्रक्रमो निषिध्यते । सूतकान्ते पूजादानादिकं कुर्यात् ।

"सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनम् ।
दानं दत्वा विधानेन व्रतस्य फलमश्नुते ॥"

इति मात्स्योक्तेः ।

नित्यविषये वाराहे—

'सूतके तु नरः स्नात्वा प्रणम्य मनसा हरिम् ।
एकादश्यां न भुंजीत व्रतमेवं न लुप्यते ॥
मृतकेऽपि न भुंजीत एकादश्यां सदा नरः ।
द्वादश्यां तु समश्नीयात्स्नात्वा विष्णुं प्रणम्य च ॥" इति ।

---

[1] स्वन्तरा इति ख पाठः ।

रजस्वलाभिरप्येतद्व्रतमनुष्ठेयमेव । प्रारब्धदीर्घतपसामिति सामान्यतः सत्यव्रतोक्तेः—"संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम्"इति विशेषतोऽपि-ऋष्यशृंगोक्तेः—

"स्नात्वा भर्तुश्चतुर्थेऽह्नि शुद्धा स्यात्परिचारणे ।
पंचमेऽह्नि विशुद्धा स्याद्दैवे पित्र्ये च कर्मणि ।।" इति श्रुतेः ।

पंचमेऽहनि शुद्धयाऽतिक्रान्तपूजादानादिकमपि कार्यमिति माधवः । एतच्च पूर्ववत्काम्यविषयम् । अथ पारणादिनकृत्यमाह कात्यायनः –

प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।
पारणं तु ततः कुर्याद्यथासम्भवमागतः ।।" इति ।

यथासंभवत्वं च ब्राह्मणभोजनं [1]बन्धुसाहित्येषु । तथा च बृहन्नारदीये—

"ब्राह्मणान्भोजयेच्छक्त्या दद्याद्वै दाक्षणां तथा ।
ततः स्वबंधुभिः सार्धं नारायणपरायणः ।।
कृतपंचमहायज्ञः स्वयं भुंजीत वाग्यतः ।"इति ।

यदा तु द्वादशी पारणमात्रपर्याप्ता, तदा रात्रिशेषे स्नानादिकं सर्वं कर्म कृत्वा द्वादशीमध्ये पारणं कार्यम् । न तु त्रयादश्यां, तदुक्तं नारदीये—

"भवेद्यदा त्रयोदश्यां द्वादश्यास्तु कलाद्वयम् ।
द्वादशद्वादशीर्हन्ति त्रयोदश्यां तु पारणम् ।।
कलाद्वयं त्रय वापि द्वादशीं न त्वतिक्रमेत् ।
पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ।।" इति ।

ननु द्वादश्यतिक्रमेऽपि नास्ति दोषः । सा तिथिः सक ा ज्ञेया' इति वचनेन साकल्याभिधानादितिवन्मैवं साकल्यस्य स्नानादिविषयत्वाद्वावयशेषे स्नानदानजपादिष्वित्यभिधानात् । पारणे तु न साकल्यवचनं प्रवर्तते । तिथिस्तात्कालिकी ज्ञेयेतिवचनात् अल्पद्वादश्ये यदा पारणं तदा ततः प्रागेवः सर्वा क्रियाः कर्त्तव्या' । तथा च नारदीये—

"अल्पायामथ विप्रेन्द्र ! द्वादश्यामरुणोदये ।
स्नानार्चनक्रियाः कार्या जपहोमादि संयुताः ।।" इति ।

पद्मपुराणेऽपि—

"यदा भवेदतीवाल्पा द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा ।।"

---

[1] दक्षिणदान ।

इति नारदीयवचने होमशब्देनादिशब्देन चौपासनविश्[1]वेदेवादिकं स्मार्तमेव गृह्यते, सादृश्यात् । न तु श्रौतं पौराणं [2]वाऽनुरोधेन श्रौतकालबाधस्यान्याय्यत्वात् तदनधिकृतविषयत्वेन, सावकाशत्वाच्च । यस्य चावश्यकमरुणोदयाधिककालसाध्यं तत् तद्दिने संख्यादिसंकोचेनाप्यावश्यकं कृत्वा द्वादशीमध्ये पारणं कर्त्तव्यम् ।

महाहानिकरी ह्येषा द्वादशी लंघिता नरैः ।
करोति धर्मंहरणमस्नाते[3] च सरस्वती ।।"

इति पद्मपुराणे द्वादशीलंघने दोषस्मरणात् । नृसिंहपरिचर्यायां तु—

"कलार्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि ।
आमध्याह्नाः क्रियाः सर्वाः कर्त्तव्याः शम्भुशासनादि।।"ति

स्कांदवचनान्निशीथादूर्ध्वमपि क्रियाप्रवृत्तिरित्युक्तम् । कालतत्त्वविवेचने माध्याह्निकापकर्षस्तु भूयस्यामपि द्वादश्यां भवत्येव । सर्वेषामुपवासानां प्रातःकालोऽत्रह्नः पंचधाविभागपक्षे ज्ञेय इति तिथ्यर्के प्रातरेव हि पारणेति माधवाद्युदाहृतवचनात् । अत्र भानजस्याल्पात्तूत्तरत्वात्पूर्वनिपातः भोजनमाध्याह्निकयोश्च वाचनिकपौर्वापर्यसद्भावादिति निर्णयसिन्धौ [4]त्वत्रार्षविधानाद्भूयस्यां द्वादश्यां पारणमपराह्न एव कार्यम् । प्रातः शब्दस्तु—सायं प्रातर्द्विजातीनां अशनं श्रुतिचयदितम्" इतिवद् अपराह्नवाचित्वेऽप्युपपन्नः । न च वाक्यं वै,यर्थ्यम्—"सर्वेषामुपवासानां प्रातरेव हि पारणा" इतिवाक्यवैयर्थ्यम् । पुनर्भोजनसायंपारणानिवृत्त्यर्थत्वात्तस्येत्याहुरित्युक्तम् । यदा तु त्रयादशीनिमित्तक्षयाह श्राद्धादिसंकटान्तरं वा भवति, तदा स्वल्पायां द्वादश्यामद्भिः पारणं कृत्वा श्राद्धानन्तरं भोक्तव्यम् । तदाह देवलः—

संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् ।
अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदि"ति ।।

यदा तु प्रातःकालो द्वादशीप्रथमपादव्याप्तो भवति, तदा तमतिक्रम्यैव पारणं कर्त्तव्यम् ।

"द्वादश्याः प्रथमः पादो हरिवात्सर संज्ञितः ।
तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः ।।"

---

[1] वैश्य इति ख पाठः
[2] पौराणधर्मानुरोधेन इति ख पाठः ।
[3] भस्नाते एव सरस्वती ।
[4] कर्म कालानां विना कारणं वाधापत्ते प्रागुक्तवचनैश्चाल्प द्वादश्यामेवापकर्षविधानात् इति अधिकः 'ख' पाठः ।

इति मदनरत्न-निर्णयामृत-[1]विष्णुधर्मोत्तरात् । विष्णुतत्पर ईश्वरभक्तः, केचिद्विष्णुतत्पर इति वचनाद्वैष्णवविषयमेतदिति वदन्ति । द्वादश्याः सर्वथाऽलाभे त्रयोदश्यां पारणस्यार्थसिद्ध्यै [2]प्रशंसा नारदीये—

"त्रयोदश्यां तु शुद्धायां पारणे पृथिवीफलम् ।
शतयज्ञाधिकं वापि नरः प्राप्नोत्यसंशयम् ॥" इति ।

तच्च नैवेद्यतुलसीदलयुक्तेनान्नेन कर्त्तव्यम् । तदुक्तं स्कंदपुराणे—

"कृत्वा चैवोपवासं तु योऽश्नाति द्वादशी दिने ।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥" इति ।

अथ नित्योपवासप्रकारो विष्णुरहस्येऽभिहितः ।

"अथ नित्योपवासी चेत्सायं प्रातर्भुजिक्रियाम् ।
वर्जयेन्मातमान् विप्रः सप्राप्ते हरिवासरे ॥"

इति [3]दशम्येकादशीषु व्रतांगभूततया ये विहिता नियमास्ते काम्यव्रते आवश्यकाः शक्तौ सत्यां नित्यव्रतेऽपि कार्याः, "शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणं" इति कात्यायनोक्तेः वैष्णवंस्त्ववश्यमनुष्ठेयाः । दशमीं प्रकृत्य "विष्णाराराधनपरैरेतत्कार्यमुपोषितै" रिति 'द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जये' दित्यादि नृसिंहपरिचर्योदाहृतवचनात् । अशक्तौ तु माधवीये ब्रह्म वैवर्त्ते—

इति विज्ञाय कुर्वीतावश्यमेकादशीव्रतम् ।
विशेषनियमासक्तोऽहोरात्रं भुक्तिवर्जितः ।
निगृहीतेन्द्रियः श्रद्धासहायो विष्णुतत्परः ।
उपोष्यैकादशी पापान्मुच्यते नात्र सशयः ॥" इति ।

तत्राप्यशक्तस्यानुकल्पा उक्ता एव । अथाष्टौ महाद्वादश्यः, तत्स्वरूपं ब्रह्मवैवर्त्ते दर्शितम् ।

"उन्मीलिनी वंजुली च त्रिस्पृशा पक्षवर्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ॥

द्वादश्योऽष्टौ महापुण्याः सर्वपापहरा द्विज ।
तिथियोगेन जायन्ते चतस्रश्चापरास्तथा ॥

---

१. धृत इति ख पाठः ।
२. शिद्धस्यैव इति 'ख' पाठः ।
३. दशम्येकादशीद्वादशीषु इति 'ख' पाठः ।

नक्षत्रयोगात्प्रबलं पापं प्रशमयन्ति ताः।
एकादशी तु संपूर्णा [1]वर्धते पुनरेव सा ॥"

तद्युक्ता द्वादशीत्यर्थः।

"उन्मीलिनी भृगुश्रेष्ठकथिता पापनाशिनी।
द्वादश्यामुपवासस्तु द्वादश्यामेव पारणम् ॥
वंजुली नाम सा प्रोक्ता हत्यायुतविनाशिनी।
अरुणोदय आद्या स्यात् द्वादशी सकलं दिनम् ॥
अन्ते त्रयोदशीप्रातस्त्रिस्पृशा सा प्रकीर्तिता ॥"

आद्या एकादशी अरुणोदये[2]। "एकादशी, द्वादशी च रात्रिशेषे, त्रयोदशी। त्र्यहस्पृक्तदहोरात्रं" इति पद्मपुराणेऽहोरात्रे तिथित्रययोगस्योक्तत्वात्।

"कुहूराके यदा वृद्धिं प्रयाते पक्षवार्धिनी।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ॥"

अत्र विहायेति श्रवणद्वादश्यामिवोपवासद्वयासमर्थविषयं पुष्यं श्रवणपुष्याद्यरोहिणी सयुताः स्तुता उपोषिताः समफला "द्वादश्योऽष्टौ पृथक्पृथागति पुष्याद्यं पुनर्वसुः।" समस्वर्गादिफलाः नतु कश्चिदासां मिथो विशेष इत्यर्थः। तत्र शुद्धाधिकैकादशीयुता द्वादशी उन्मीलिनी, शुद्धाधिका द्वादशी वजुली सूर्योदये एकादशी अन्ते च त्रयोदशी मध्ये वर्तमाना द्वादशी त्रिस्पृशा। अग्रे पर्वणः संपूर्णाधिकत्वे पक्षवर्धिनी, पुष्पर्क्षयुता जया, श्रवणयुता विजया, पुनर्वसुयुता जयन्ती, रोहिणीयुता पापनाशिनी। दीपिकायामप्येवं। अथ पुष्यविष्णुभंपुनर्वसु आत्मभूभान्विता, द्वादश्येवभवेज्जया च विजया तद्वज्जयन्त्यंहसां नाशिनाति। नृसिंहपरिचर्यायां तु नक्षत्रप्रयुक्ता अन्यथोक्ताः। "आदित्येन जयाऽच्युतेन विजया पुष्येण पापापहा। रोहिण्या च जयंतिकेति" हरिभक्तिविलासेऽप्येवम्। तत्र तिथिप्रयुक्तासु न कोऽपि संदेहः।

अथ श्रवणद्वादशी निर्णेष्यते

नक्षत्रयोगप्रयुक्तेतरमहाद्वादशीत्रये सूर्योदयादारभ्यापरसूर्योदयपर्यन्तंनक्षत्रयोगो मुख्यः कल्पः। उपवासस्याहोरात्रसाध्यत्वेन तथा सत्येव कर्मकालव्याप्तिलाभात् सूर्योदयप्रभृत्यस्तत्पर्यन्तत्वमनुकल्पः। "प्रातः संकल्पयेद्विद्वान् उपवासव्रतादिकम्" इति संकल्पकालव्याप्तिलाभान्नक्षत्रव्रतेषु नक्षत्रस्यास्तमयसंबंधेन प्राशस्त्यप्रसिद्धेश्च श्रवणरोहिणीवत्स्वल्पस्यापि नक्षत्रयोगस्य प्राशस्त्यज्ञापकशास्त्रान्तरादर्शनाच्च। पारणा तु, तिथिनक्षत्रसंयोगे उपवासो यदा

---

[1] द्वादशी तु न वर्द्धते इति शोध पाठोऽधिकः ख पाठे।

[2] सूर्योदये इति ख पाठोऽधिकः।

भवेत्" इत्यादिवचनेभ्य उभयान्तेऽन्यतरांते वा एकादशीद्वादश्योरेकत्वे तंत्रेणोपवासः पार्थक्ये तु शक्तस्योपवासद्वयं "एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्" इति विष्णुरहस्यात् । अशक्तौ तु द्वादश्यामेव ।

एवमेकादशीं त्यक्त्वा द्वादशी समुपोषयेत् ।
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥"

इति तत्रैवोक्तेः ।

एताश्चाऽष्टावपि महाद्वादश्यः काम्या एव । नित्यत्वे प्रमाणाभावात्फलश्रवणाच्च । एवमेकादशीं भुक्त्वेत्येतत्प्रक्रान्तकाम्यप्रयोगविषयम् । यत्तु—

"न करिष्यन्ति ये लोके द्वादश्योष्टौ ममाज्ञया ।
तेषां यमपुरे वासो यावदाभूतसं[1]स्तवम् ॥"

इत्यकरणप्रत्यवायबोधकम् । पद्मपुराणनाम्ना केनचिल्लिखितं वचनं तदतिवैष्णवग्रन्थेष्वप्यदर्शनादनाकरशेवेति कालतत्त्वविवेचने । स्मृतिकौस्तुभादौ-श्रवणद्वादशीव्यतिरिक्ताः काम्याः । एकादशीद्वादशी व्रतसन्निपातनिर्णये समयहेमाद्रौ—एकादश्युपवासव्रतं नित्यं, द्वादश्युपवासव्रतं काम्यं[2] इति स्पष्टमभिधानात् । तथा तन्निर्णयान्तेऽपि तत्रैवोक्तं—श्रवणद्वादशीव्यातिरेकेण द्वादश्यां यावज्जीविककाम्योपवासविधानमिति । उक्तं च दीपिकायाम — "एवमभीष्टकाम्युपवसेदष्टौ महाद्वादशीं" रित्युक्तम् । गोविन्दार्णवे त्वेताःफलश्रवणात्काम्याः । "न करिष्यन्ति ये लोके०" इति प्रकरणे प्रत्यवायश्रवणान्नित्याश्च न च वैष्णवानामेव । तन्नित्यं नान्येषामिति शक्यम् । एकमेव वस्तुकंचित् प्रति नित्यम् कंचित् प्रत्यनित्यमिति विरोधादित्युक्तम् ।

अथैकादशीविशेषनिर्णयः

तत्र चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे—

'चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ।
आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः ॥

दमनेनार्चयित्वा च रात्रौ जागरणं चरेत् ॥" इति ।

अत्रैव वैशाखस्नानारम्भ उक्तः पाद्मे—

'मधुमासस्य शुक्लायामेकादश्यामुपोषितः ।
पंचदश्यां च भो वीर ! मेष संक्रमणेऽपि वा ॥
वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।
मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकम् ॥" इति ।

---

१. 'संप्लवम्' इति 'ख' पाठः ।

२. अन्यदेव इति ख पाठोऽधिकः ।

पृथ्वीचंद्रोदये पाद्मे —

"तुलामकरमेषेषु प्रातः स्नानं विधीयते।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ।।" इति ।

तीर्थविशेषोऽपि तत्रैवोक्तः:—

"मेषसंक्रमणे भानोर्माधवे मासियत्नतः।
महानद्यां महातीर्थे नदे सरसि निर्झरे ।।
देवखाते तथा स्नायाद्यथाप्राप्ते जलाशये।
दीर्घिका कूपवापीषु नियतात्मा हरिं स्मरन् ।।" इति ।

सूतसंहितायां प्रथमखण्डे प्रयागप्राशस्त्यमुक्तं

"प्रयागाख्यं महातीर्थं भवरोगस्य भेषजम् ।
भरण्यां कृत्तिकायां वा रोहिण्यां व विशेषतः ।।
तत्र स्नात्वा रवौ मेषे वर्तमाने मुनीश्वराः ।
यथाशक्ति धनं दत्वा विमुक्तो मानवो भवेत् ।।" इति ।

"संकल्पे च यत्तीर्थे स्नाति तन्नाम [1]गृह्यते ।
अज्ञाने केवलं विष्णुतीर्थमित्या[2]चरेच्छुभम् ।।
यदि न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः ।
तत्रेत्युच्चारणं कार्यं विष्णुतीर्थमिदंत्विति ।।
तीर्थस्य देवता विष्णुः सर्वत्रापि न संशयः ।।"

इति तत्रैवोक्तेः ।

वैशाखे च कृष्णगौरतुलस्य त्रिकालं विष्णुपूजा-अश्वत्थमूलसिंचन-प्रदक्षिणा-गोपृष्ठकण्डूयन-प्रपागलंतिका-पूर्णघटदानादि तत्रैवोक्तं—एवं मासपर्यन्तस्नानाशक्तौ त्र्यहं वा स्नायात् । तदुक्तं तत्रैव पाद्मे—

"त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिनत्रयम् ।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा ।।
प्रातः स्नातः सनियमः सर्वपापैः प्रमुच्यते .।" इति ।

कालनियमोऽपि पाद्मे —

"यो दिनत्रयमपि प्रयत्नतः स्नाति, मेषमुपयाति भास्करे[3] ।
अनुदिनं माधवे मासि सोऽघनिचयैर्विमुच्यते ।।

---

[1] ग्राह्यम् इति ख पाठः ।

[2] अज्ञाने तु विष्णुतीर्थमिति वदेत् इति ख पाठः ।

[3] नुदित एव इति ख पाठः ।

स्नानमर्घोदिते सूर्ये वैशाखे नियतैश्च यैः।
तस्य पुण्यं महद्देव ! किंचिद्वक्तुं न शक्यते ।।" इति।

एवं स्नाने कृते तस्योद्यापनं कार्यम्। तदुक्तं तत्रैव—

"मासमेवं बहिः स्नात्वा नद्यादौ विमले जले।
एकादश्यां वा द्वादश्यां पौर्णमास्यामथापि वा ।।
उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः ।।" इति।

यथोक्तोद्यापनाशक्तौ तत्रैवोक्तम्—

"वैशाखं विधिना स्नात्वा, भोजयेद् ब्राह्मणान्दश।
कृशरं सर्वपापेभ्यो मुच्यते नात्र संशयः ।।" इति।

भट्टोजीदीक्षितीये निर्णयसिन्धौ च यदा तु वैशाखो मलमासो भवति, तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वयं स्नानं तन्नियमाश्च कर्त्तव्याः। मासोपवासचांद्रायणादि तु मलमास एव समापयेत्। तदुक्तं दीपिकायाम्—'नियतत्रिंशद्दिनत्वाच्छुभेमास्यारभ्य समापयेत मलिने मासोपवासादिकम्' इति। एवं कार्त्तिकस्नानादावपीत्युक्तेः। यत्तु मयूखे—वैशाखस्य मलत्वेऽपि तत्रैव स्नानादिसमाप्य' मिति हेमाद्रिमदनौ। तथा च काठकगृह्ये—

"आरब्धं मलमासात्प्रग्यत्काम्यमसमापितम्।
संप्राप्ते मलमासेऽपि तत्समाप्यमसंशयम् ।।" इत्युक्तम्।

तच्चिन्त्यम्। हेमाद्रिमदनरत्नयोस्तादृशग्रंथानुपलम्भात्। एतद्वचनस्य नियतकालसमाप्यसावनदिनसाध्यकृच्छ्रचान्द्रायणादिविषयत्वेन व्याख्यातत्वाच्चेति दिक्।

निर्जला एकादशी निर्णयः

ज्येष्ठशुक्लैकादशीनिर्जला। तथा च मदनरत्ने स्कांदे—

"ज्येष्ठे मासि नृपश्रेष्ठ ! या शुक्लैकादशी शुभा।
निर्जलं समुपोष्याऽत्र जलकुंभान् सशर्करान् ।।
प्रदाय विप्रमुख्येभ्यस्तापत्रयविवर्जितः।
विष्णुलोकमवाप्येह मोदते विष्णुसन्निधौ ।।" इति।

हेमाद्रौ पाद्मे—

"स्नाने चाचमने चैव वर्जयित्वोदकं बुधः।
उपयुंजीत नैवान्यद् व्रतभंगोऽन्यथा भवेत् ।।

उदयादुदयं यावद्वर्जयित्वा जलं बुधः ।
अप्रयत्नादवाप्नोति द्वादशद्वादशीनृप ॥" इति ।

सायंपर्यन्तवर्जने तु न्यूनं फलम् । तपस्तारतम्येन फलतारतम्यात् । संकल्पोऽपि तथैव कार्यः । चरणामृतपाननियमवता त्वत्र भगवत्तीर्थं ग्राह्यमेवेत्यन्यत्र स्पष्टम् । आषाढशुक्लैकादश्यां विष्णोः स्वापमहोत्सव उक्तो निर्णयामृते ब्राह्मे—

"एकादश्यां तु शुक्लायामाषाढे भगवन् हरिः ।
भुजंगशयने शेते क्षीरार्णवजले सदा ॥" इति ।

अयं द्वादश्यामप्युक्तो भविष्ये—

"आभाकाद्येषु मासेषु मिथुने माधवस्य च ।
द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवः ॥" इति ।

तत्र विशेषः—"निशि स्वापे दिवोत्थानं संध्यायां परिवर्तनम्" इति । एताश्च द्वादश्योरात्रिसंध्यादिनेष्वनुराधाश्रवणरेवतीनामादिमध्यान्तभागयुक्ता। क्रमेण प्रस्वाप-परिवर्तनप्रबोधोत्सवेषु प्रशस्ताः । तथा च नारदीये—

"मंत्राद्यपादे स्वपितीह विष्णुः श्रुतेश्च मध्ये परिवर्तमेति ।
पौष्णावसाने च सुरारिहन्ता, प्रबुध्यते मासचतुष्टयेन ॥" इति ।

यदा तु द्वादशीषु रात्र्यादिभागेषु तत्तन्नक्षत्रपादयोगो नास्ति, तदा द्वादशीनक्षत्रमात्रयोगोऽपि रात्र्यादिगतो ग्राह्यः । "पादयोगो यदा न स्यादृक्षेणापि तदा भवेद्" इद्वि वराहपुराणात् ।

"विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्यामक्षसंयोगे पादयोगो न कारणम् ॥"
इति विष्णुधर्मोतराच्च ।

यदा तु द्वादशीषु तानि नक्षत्राण्येकदेशेनापि न सन्त्येव, किन्त्वेकादशीषु त्रयोदशीषु वा, तदा तत्रापि तत्तदृक्षभाग एव निशादिवेलानादरेण प्रस्वापादिकार्यम् ।

"अप्राप्ते द्वादशीमृक्षे उत्थानं शयने हरेः ।
पादयोगे न कर्तव्ये नाहोरात्रं विचिन्तयेत् ॥"
इति जीमूतवाहनोद्धृतवचनात् ।

पादयोगादन्यतिथौ द्वादश्यामृक्षसंगमादिति वचनाच्च । कौस्तुभे तु, 'अप्राप्ते०' इत्यादिवचनं मुख्यकाले केनापि निमित्तेनाकृतोत्सवेन पुंसा त्रयोदश्यादिगौणकाले कर्त्तव्योत्सवः । पादयोगवशेन दिवैव कार्यो रात्रौ वा [1]तुहिनायामिति सन्देहे नियमार्थम, न तु नक्षत्ररहितद्वादशीबाधेन त्रयोदश्यादौ पादयोगेऽप्राप्तकर्त्तव्यताप्रापणपूर्वं रात्र्यादिनिषेधार्थम् । अपूर्वविधौ गौरवात्[2] । [3]एवं च द्वादश्यां निशाद्यादरेऽन्यतिथौ च नक्षत्रपादयोगादरे नियते सति यदा द्वादशीषु निशादेरन्यत्र तत्तदृक्षभागयोगेऽन्यतिथौ च तदितरनक्षत्रस्यैव योगस्तदा द्वादशीषु सायं संध्यायां प्रस्वापादिः ।

"द्वादश्यां सन्धिसमये, नक्षत्राणामसम्भवे ।
आभाकासितपक्षेषु शयनावर्तनादिकम् ॥"

इति वराहवचनात् ।

सधिसमय इति शयनादावन्वेति । संधिसमयश्च सायं सन्ध्यैव

"रेवत्यन्तो यदा रात्रौ द्वादश्यां च समागमः ।
तदा प्रबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥"

इति जीमूतवाहनधृतवचनात् ।

यत्र तु स्वल्पा द्वादश्यस्तदापि रात्र्यादावेव शयनादिकार्यम् । उदयव्यापिनीनां तासां साकल्यप्रतिपादना"द्विष्णुर्दिवा न स्वपिति न च रात्रौ विबुध्यते" इति विष्णुधर्मोत्तरे रात्र्यादेरन्यत्रशयनादिनिषेधाच्च । अत्र बहुषु वचनेषु चतुर्थभागे[4]ष्वादिपादग्रहणाच्चतुर्धाविभक्तानुराधारेवत्योराद्यान्त्यपादयोरेव स्वापबोधोत्सवौ कार्यौ । न चादिमध्यावसानेष्विति वाक्ये समं स्यादश्रुतत्वादिति न्यायेन त्रेधा विभाग एव । अतएव मध्यग्रहणमप्युपपद्यत इति वाक्यं वचनान्तरेषु पादग्रहणेन विशेषश्रवणादश्रुतत्वादिति हेतोरसिद्धः । श्रवणस्य तु त्रेधाविभक्तस्य मध्यभाग एव ग्राह्यः पूर्वोक्तभविष्यवचने द्वादश्यामिति पारणादिनपरं पारणाहे पूर्वरात्रे घटादीन्वादयन्मुहुरिति राक्षार्चनचन्द्रिकोक्तेः । एतेन द्वादशीपदमेकादशीपरमिति परास्तम् । मयूखे तु यत् द्वादश्यां शयनादिकमुक्तं तन्मिथुनार्क एव । अभाकेतिपूर्वोक्तभविष्यवचने सिंहतुलोपलक्षकमिथुनग्रहणा-

---

१. तद्रहितायाम् इति 'ख' पाठः ।
२ इति व्याख्यातम् इति ख पाठोऽधिकः ।
३. स्वमते द्वादशी बाधेनर्क्षयुक्तैकादश्यां त्रयोदश्यां वा कार्यम्, कौस्तुभमते तु द्वादश्यामृक्षाभावेऽपि कार्यं तत्र विघ्नादिना तदुत्तरगौणकालत्रयोदश्यां पादयोगे दिवैव कार्यमितिभावः ।
४. चतुर्थभागवाचि ।

दित्युक्तम् । तेनात्र यथाचारं व्यवस्था कौस्तुभे तु द्वादश्यां प्रधानकर्त्तव्यतानिर्णये सत्येकादशीविधिस्तत्रोपक्रमाभिप्रायः । पूर्णमास्यां पूर्णमास्याया[1]मृते भविष्योत्तरे—

"फाल्गुने मासि शुक्लायामेकादश्यां जनार्दनः ।
वसत्यामलकीवृक्षे लक्ष्म्या सह जगत्पतिः ।।
तत्र संपूज्य देवेशं भक्त्या कुर्यात् प्रदक्षिणाम् ।।" इति ।

इयमेव गोविन्दद्वादशीत्युच्यते । तथा च हरिभक्तिविलासे—

"फाल्गुने द्वादशी शुक्ला या पुष्यर्क्षेण संयुता ।
गोविन्दद्वादशी नाम कथ्यते सा द्विजोत्तम ।।"

इति द्वादश्योरभेदाभिप्रायेण किं वा द्वादश्यां पुष्यनक्षत्रे सति तस्यामेवोपवासापेक्षयेति तद्व्याख्यातारः ।

इति विश्वेश्वरविरचिते प्रतापभूपाज्ञया प्रतापार्के विद्वद्विनोदकन्दे गतो मयूखोऽत्र रुद्राख्यः ।

* * *

---

[1] ऋते भविष्योत्तरे इत्यारभ्य उपाकर्मोत्सर्ज्जनञ्च पवित्रं दमनार्पणमित्यन्तः 'क' पाठ' ख पाठे नोपलब्धः ।

अथ द्वादशीनिर्णयः

सा चोपवासादिसर्वकार्येषु पक्षद्वयेऽप्येकादशीयुतैव ग्राह्या रुद्रेण द्वादशीयुक्तेतियुग्मवाक्यात् "द्वादशी च प्रकर्त्तव्या एकादश्या युता प्रभो" इति स्कंदपुराणवचनाच्च । एकादश्युपवासपारणे तु निर्णीता प्राक् ।

अथ द्वादशीविशेषनिर्णयः

तत्र चैत्रकृष्णद्वादशी वैराजकल्पादिः । चैत्रशुक्लद्वादश्यां दमनार्पणं कार्यम् ।

द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।
बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरम् ।।"

इति रामार्चनचंद्रिकोक्तेः । अत्र पारणाहर्विवक्षितम् ।

"पारणाहे न लभ्येत द्वादशी कलयापि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रं दमनार्पणम् ।।"

इति तत्रैवोक्तेः ।

नित्यं चेदं— "चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः" इति पद्मपुराणात् । माधवे— "दमनारोपः स्यान्मधौ, विस्मृतो यदि वैशाखे श्रावणे भाद्रे वा कर्त्तव्यं तदर्पणम्" इति वचनेन गौणकाले तद्विधानाच्चं । इदं च मलमासे न कार्यम् । "उपाकर्मोत्सर्जनं च पवित्रं दमनार्पणम् ।" इति । यजेतेति यदित्युक्तम् । यत्तु विष्णोधर्मोत्तरे— "कार्त्तिकस्य सिते पक्षे तदेव दिनपञ्चकम् ।

विबोधयन्ति देवेशं गत्वा सेन्द्रादिवौकसः ।
देवास्तथैव कुर्वन्ति तदापि च महोत्सवम् ।।"

इत्येकादशीमारभ्य दिनपंचकं प्रबोधकालत्वेनोक्तम् । तत्त्रयोदशीप्रभृतेगौणत्वाभिप्रायम् । अतो द्वादश्यामकृतोत्सवे न तत्रोत्सवः कार्यः । यत्तु तत्रैव वचनान्तरे—

"आषाढे शुक्लपक्षान्ते भगवान्मधुसूदनः ।
भोगिभोगे निजां मायां योगनिद्रां समाप्नुयात् ॥
शेतेऽसौ चतुरो मासान् यावद्भवति कार्तिकी ॥" इति ।

तत्र पक्षान्त इत्युपक्रमाद्यपि कार्त्तिकीपदेन पूर्णमास्येव प्रबोधकालत्वेन प्रतीयते । तथापि पूर्णमास्यां शयनोत्सवव्रतस्वीकारो येन कृतौ, तद्विषयं तद्बोध्यम् । "शिष्टास्तु सर्वदेवानामपि पारणोत्तरमेव रात्रौ कुर्वन्ति इदं च शयनादिनित्यम् ।" अपि मलमासे निषिद्धम् ।

"मिथुनस्थो यदा भानुरमावस्याद्वयं स्पृशेत् ।
द्विराषाढः सविज्ञेयो विष्णुः स्वपिति कर्कटः ॥"
इति मोहचूडोत्तरोक्तेः ।

अधिमासे न कार्यमित्युनुवृत्तौ—"ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम्" इति कालादर्शोक्तेश्च । चातुर्मास्या[1]द्यारम्भोऽप्याषाढशुक्लैकादशीद्वादशीपौर्णमासीषु कर्कसंक्रान्तिदिने वा विकल्पेन कर्त्तव्यः ।

"एकादश्यां तु गृह्णीयात्संक्रान्तौ कर्कटस्य वा ।
आषाढ्यां वा नरो भक्त्या चातुर्मास्योदितं व्रतम् ॥"

इति सनत्कुमारवचनादाषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा" इति वराहपुराणाच्च । अस्य नित्यत्वं तत्रैवोक्तम्—

"वार्षिकांश्चतुरोमासान् वाहयेत्केनचिन्नरः ।
व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवम् ॥
असंभवे तुलार्के तु कर्त्तव्यं तत्प्रयत्नतः ॥" इति ।

यदा कदाप्यारंभे समाप्तिः कार्तिकशुक्लद्वादश्यामेवेत्यग्रे वक्ष्यते । अयं चा[2]स्यारम्भः शुक्रास्तादावपि कार्यः ।

"न शैशवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः ।
खंडत्वं चिन्तयेदादौ चातुर्मास्यविधौ नरः ॥"
इति वृद्धगार्ग्योक्तेः ।

इदं च द्वितीयाद्यारंभविषयम् । [3]प्रथमारंभस्तु न भवत्येव । नित्यानामारम्भः काम्यानां वर्जनमिति मयूखकौस्तुभादौ— "एकादश्यामाशौचे पूर्णिमायां

---

[1] व्रत इति ख पाठे अधिकः ।

[2] अस्यारम्भ इति ख पाठे नास्ति ।

[3] एतत् संख्यकाया अङ्किता पंक्तिः ख पाठे ।

कर्कसंक्रान्तौ वा व्रतारंभः कार्यः । त्रितयत्राप्याशौचे तु प्रथमतोऽनारम्भ एव । [1]तथा, आशौच मध्येऽपि द्वितीयाद्यारंभो भवत्येव ।

"अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान् ।
व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैः ॥"

इति भार्गवार्चनदीपिकायां स्कांदोक्तेः ।

"आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्" इति विष्णूक्तेश्च, द्वितीयाद्यारम्भस्तु भवत्येव—

"प्रतिवर्षं च यः कुर्याद्देवं वै संस्मरन् हरिम् ।
देहान्तेऽतिप्रदीप्तेन विमानेनार्कवर्चसा ॥
मोदतेऽसौ विष्णुलोके यावदाभूतसंप्लवम् ।"

इति हेमाद्रौ भविष्यवचनेन प्रतिवर्षं क्रियमाणस्यैकफलसम्बन्धेनैकव्रतत्वेन प्रथमारम्भस्य वृत्तत्वात् । निर्णयसिन्धावप्येवम् । नित्यानामारम्भः काम्यानां वर्जनमिति मयूखकौस्तुभादौ । यत्त्वर्चनदीपिकायां स्कान्दे 'अशुचिर्वाशुचि०' इति तदारंभोत्तरं बोध्यम् । इदं च शिवभक्तादिभिरपि कार्यम् ।

"शिवे वा भक्तिसंयुक्तो भानौ वा गणनायके ।
कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेत् ॥"

इति ब्रह्मवैवर्त्तात् ।

चातुर्मास्यव्रतसंभवे कार्तिके किंचिद्व्रतमवश्यं कार्यम् ।

"चतुर्ष्वपि मासेषु न सामर्थ्यं व्रतैर्यदि ।
तदोर्जे व्रतिना भाव्य मव्यब्दफलमिच्छता ॥
अव्रतः कार्त्तिको येषां गतो मूढधियामिह ।
तेषां पुण्यस्य लेशोऽपि न भवेत्सूकरात्मनाम् ॥"

इति काशीखण्डात् ।

इयमेव मत्स्यजयन्तीति केचित् । सा प्रातःकाल व्यापिनी ग्राह्या । श्रावणशुक्लैकादश्यां पवित्राधिवासनं कार्यमित्यग्रे वक्ष्यते । भाद्रशुक्लैकादश्यां विष्णोरंगपरिवर्तनमुक्तं हेमाद्रौ भविष्ये—

"प्राप्ते भाद्रपदे मासि एकादश्यां दिने सिते ।
कटिदानं भवेद्विष्णोर्महापातकनाशनम् ॥" इति ।

---

१. एतत् संशयकाङ्क्षितायाः पंक्ते पश्चाल्लिखिताऽस्ति ।

कटिदानमंगपरिवर्तनम् । इदमाभाकाद्येषु मासेष्विति पूर्वोक्तभविष्यवचनात् द्वादश्यां वा कार्यम् । इयं वामनजयन्तीति वक्ष्यते । आश्विनशुक्लैकादश्यां कार्त्तिकस्नानारम्भः कार्यः । तदुक्तं विष्णुरहस्ये—

"आरभ्यैकादशीं शुक्लामाश्विनस्य तु मानवः ।
प्रातः स्नानं प्रकुर्वीत यावत्कार्त्तिकभास्करः ।।" इति ।

पाद्मे च– "आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् । कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीः ।" इति । हेमाद्रावादित्यपुराणे— "पूर्णं आश्वयुजे मासि पौर्णमास्यां समाहितः" इति उक्त्वा । "मासं समग्रं परया च भक्त्या समाप्यते कार्त्तिक पौर्णमास्या"मिति । तत्राश्विनशुक्लैकादश्यामारंभे कार्त्तिकशुक्लद्वादश्यां समाप्तिः । आश्विनपौर्णमास्यामारम्भे तु कार्त्तिक्यां समाप्तिरिति ज्ञेयम् । एवं मासोपवासादेरप्याश्विनपौर्णमास्यामारम्भे तस्य नियतत्रिंशद्दिनत्वेन कार्त्तिकशुक्लचतुर्दश्यां माससमाप्तेः कार्त्तिकपौर्णमास्यामेव पारणा न तु प्रतिपदि । भीष्मपंचकव्रतस्य तु प्रतिपदीति ज्ञेयम् । दाक्षिणात्याश्चैतदेवाद्रियन्ते । प्राच्यास्तु- "तुलामकरमेषे"ष्विति पाद्मात् कार्त्तिकस्नानादौ सौरमासमाश्रयन्ति । अत्र देशविशेषः पाद्मे –कार्त्तिकं प्रक्रम्य

"कुरुक्षेत्रे कोटिगुणो गंगायामपि तत्समः ।
ततोऽधिकः पुष्करे स्यात् द्वारवत्यां च भार्गवः ।।
पुण्याः पूर्यश्च सप्तैव मुनयो मथुराधिकाः ।
दुर्लभो [1]विप्र ! मथुरायां नृणां मासो हि कार्त्तिकः ।।
यत्रार्चितः स्वकं रूपं भक्तेभ्य. संप्रयच्छति ।।" इति ।

इदं स्नानं काशीस्थपञ्चनदेऽप्यतिप्रशस्तम् ।

"शतंसमास्तपस्तप्त्वा कृते यत्प्राप्यत फलम् ।
तत्कार्त्तिके पंचनदेऽसकृत्स्नानेन लभ्यते ।।"

इत्यादि काशीखण्डोक्तेः ।

संपूर्णस्नानाशक्तौ ब्रह्मपुराणे कार्त्तिकमधिकृत्य एकादश्यादिषु तथा तत्र पचसु रात्रिषु

'दिने दिने च स्नातव्यं शीतलासु नदीसु च ।
वर्जितव्या तथा हिंसा मांसभक्षणमेव च ।।"

इति काशीखण्डे ।

!"वाराणस्यां पंचनदे ह्यहं स्नात्वा च कार्त्तिके ।
अमी ते पुण्यवपुषः पुण्यभाजो विनिर्मला ।।" इति ।

---

[1] दुर्लभा कार्तिको विप्रा मथुरायां नृणामिह यत्रार्चित इति 'ख' पाठः ।

स्नानकालोऽपि तत्रैव—

"कार्त्तिके बिन्दुतीर्थे यो ब्रह्मचर्यपरायणः ।
स्नास्यंत्यनुदिनं भानौ भानुजात्तस्य भीः कुतः ।।" इति ।

'भानुजो यमः' पाद्मेऽपि "नाडीद्वयावशिष्टायां रात्र्यां गच्छेज्जलाशयम्" इति । इदं च प्रातःस्नानं सन्ध्यां च कृत्वा कार्यम् । तेन विनेतरकर्मानधिकारादिति वर्धमानः । यद्यपि प्रातः सन्ध्यायाः सूर्योदये समाप्तिस्तथापि वचनबलादनुदितहोमवत्पूर्वमेव समापनीयेति निर्णयसिन्धौ । वस्तुतस्तु प्रातःस्नानोत्तरं प्रातःसन्ध्याया पूर्वमेव कार्त्तिकादिस्नानं विधातुमुचितम् । प्रातः संध्यायाः सूर्योदयोत्तरं समाप्यत्वेनानुदिते भानौ विहितस्य स्नानस्य प्रातः सन्ध्यातः पश्चादनुष्ठेयत्वानुपपत्तेः । एतदर्थकमेव वचनं 'स्नास्यत्यनुदिते भाना' विति अनुदिनहोमस्य च श्रौतत्वेन स्मार्त्त[1]संकोचकत्वं युज्यते । कार्तिके यत्यादिर्मासोपवासं कुर्यान्न तु गृहस्थः ।

"वानप्रस्थो यतिर्वापि नारी वा विधवा मुने ।
मासोपवासं कुर्वीत गुरोर्विप्राज्ञया यतः ।।
आश्विनस्यामले पक्षे एकादश्यामुपोषितः ।
व्रतमेतत्तुगृह्णीयाद्यावत्त्रिंशद्दिनानि तु ।।" इति ।

"प्रकृत्य न गृहस्थश्चरेद् व्रत"—मिति पाद्मोक्तेः । कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे—

"तुलायां तिलतैलेन सायंकाले समागते ।
आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति ।।
महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदम् ।" इति ।

अस्यामेव द्विदलादिकार्त्तिकव्रतारम्भः कार्यः । इत्युक्तं पाद्मे—

आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीः ।।" इति ।

द्विदलानि च—

"माषविमुद्गमसुराश्च चणकाश्च कुलत्थकाः ।
निष्पा वा राजमाषाश्च आढक्यो द्विदलं स्मृतम् ।।"

पाद्मे —

---

[1] सन्ध्या इति ख पाठोऽधिकः ।

"नोर्जो वंध्यो विधातव्यो व्रतिना केनचित्क्वचित् ।
अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम् ।।"

तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणे"ति कार्त्तिकशुक्लैकादश्यां देवोत्थापनमुक्तं हेमाद्रौ पाद्मे—

"एकादश्यां तु शुक्लायां कार्त्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ।।" इति ।

यद्यपि रात्रौ बोधयेदित्युक्तं, तथापि प्रबोधस्तु दिवैव कार्यः । "निशिस्वापो दिवोत्थानं संध्यायां परिवर्तनमि"ति सर्वनिबन्धकारोद्धृतमात्स्यवाक्यात् । "प्रभाते विमले स्नात्वा देवमुत्थापयेत्सुधीः" इति भविष्यत्पुराणाच्च । कौस्तुभे त्वतएव पाद्मवचनाद्रात्रावेव प्रबोध इति निर्णीतम् । रामार्चनचंद्रिकायां तु—"पारणाहे पूर्वरात्रे घंटादीन्वादयन्मुहुः" इति वचनात् द्वादश्यामुक्तम् । दाक्षिणात्या अपि द्वादश्यां कुर्वन्ति । वस्तुतस्तु तत्र श्रीरामोत्थापनमेव युक्तम्, राघवादिशब्दश्रवणात् । इतरेषां क्रतुभुजामेकादश्यामेव । अस्यामेकादश्यां रात्रौ जागरणमत्यावश्यकम् ।

"पूर्वजन्मसहस्रेषु यत्तु दुष्कर्म अर्जितम् ।
जागरेण प्रबोधिन्या दहते तूलराशिवत् ।।
कृत्वा तु पातकं घोरं ब्रह्महत्यादिकं नरः ।
कृत्वा तु जागरं विष्णोर्धौतपापो भवेन्नरः ।।"
इति स्कांदात् ।

अस्यां विशेष उक्तो मदनरत्ने वराहपुराणे—शुक्लपक्षं प्रक्रम्य,

"एकादशी सोमयुता कार्त्तिके मासि भामिनि ।
उत्तराभाद्रसंयोगे अनन्ता सा प्रकीर्तिता ।
तस्यां यत् क्रियते भद्रे ! सर्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदानेन अनन्ता सा स्मृता प्रिये ।।" इति ।

अस्यामेव भीष्मपंचकव्रतारम्भो नारदीये—

"अतो नरैः प्रयत्नेन कर्त्तव्यं भीष्मपंचकम् ।
कार्त्तिकस्यामले पक्षे कृत्वा सम्यग्भक्तया[1] व्रतम् ।।
एकादश्यां तु गृह्णीयाद् व्रतं पंचदिनात्मकम् ।।" इति ।

अत्र स्मृतिकौस्तुभकृता तूपक्रमे एकादशीशब्देन न प्रसिद्धव्रतदिनग्रहणम्, प्रकरणान्तरे लक्षणायां प्रमाणाभावात् । तिथिश्च युग्मवाक्याद् द्वादशीविद्धैव

---

[1] सम्यग्यत व्रतः इति 'ख' पाठ. ।

ग्राह्या । 'दिक्पंचदशभिस्तथे' त्युक्तवेधस्यैव दूषकत्वम् । एवं च दशम्यविद्धैकादशीमारभ्य पंचदिनात्मकं व्रतं चतुर्दश्यविद्धपौर्णमास्यां चेत्समाप्यते तदा नैव संदेहः । तिथिक्षयवशेन नैवं घटते चेद्विद्धायामप्यारम्भः । [1]प्रद्यो न व्रतानुरोधेनांगतिथिगुणस्य परविद्धात्वादेरनादरणीयत्वात् । एवमविद्धैकादश्यामारभ्य परविद्धपूर्णमास्यां समापनेव[2] तिथिवृद्धिवशेन षड्दिनापत्तिस्तदा पूर्वपूर्णमास्यामपि समाप्तिः । उपक्रमसमाप्त्योरंगत्वाविशेषेऽपि मुख्य चेति न्यायेनोपक्रमधर्मस्यैव बलवत्वादित्युक्तम् । तत्सावित्रीत्रिरात्रव्रते प्रधानभूताया अन्तिमतिथेर्निर्णयानुरोधेन प्राक्तनतिथ्योरुपादानेन स्वतंत्रनिर्णयकरणाविषयत्वस्य सर्वैः स्वयं चोक्तत्वेन तद्वादिहापि पंचदिनात्मकस्यान्यंतिमप्रधानभूतपौर्णमासीनिर्णयानुरोधेन प्राक्तनतिथिचतुष्टयस्य स्वतंत्रतिर्णयाकरणेनैव ग्रहणोपपत्तौ क्लेशकरणमात्रमित्युपेक्ष्यम् । पौषशुक्लैकादशी मन्वादिः । अस्यामेव माघस्नानारंभ उक्तो ब्राह्मे —

"एकादश्यां शुक्लपक्षे पौषमासे समारभेत् ।
द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापयेत् ।।" इति ।

माघ इति शेषः पाद्मेऽपि —

"पुष्यस्यैकादशीं शुक्लां आरभ्य स्थंडिलेशयः ।
मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत् ।।
त्रिकालमर्चयेद्विष्णुं त्यक्तभोगो जितेन्द्रियः ।
माघस्यैकादशीं शुक्लां यावद्विद्याधरोत्तमे"ति ।।

त्रिकालस्नानं मासोपवासविषयं निराहार इत्युक्तेः । अनेन सावन उक्तः— विष्णुना तु तुलामकरमेषेष्वित्यादिना सौरमास उक्तः । पृथ्वीचन्द्रोदये त्वन्यथोक्तम् विष्णुः,

"दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत् ।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरः ।।" इति ।

अत्र दर्शमिति शुक्लादिमुख्य चांद्राभिप्रायेण....पक्षो नेदानीं प्रचरति । पाद्मे —

"सर्वेऽधिकारिणस्त्वत्र विष्णुभक्तौ यथा नृप ।

ब्राह्मे —

"उष्णोदकेन वा स्नानमशक्ये सति कुर्वते ।
वृद्धेषु सर्वगात्रेषु उष्णोदं न विशिष्यते ।।"

---

[1] प्रधान व्रतानुरोधेन इति ख पाठः ।

[2] समापने यदि तिथि वृद्धिवशेन इति 'ख' पाठः ।

माघस्नानं काम्यमेवेति केचित् । "तुलामकरमेषेषु प्रातः स्नायी सदा भवेत्' इति विष्णवादिवाक्ये सदादिशब्दश्रवणान्नित्यतावगतेर्नित्यकाम्यमिनि तु युक्तम् । यदा तु माघो मलमासो भवति, तदा काम्यस्य स्नानस्य मध्ये समाप्ति-निषेधान्मासद्वयं स्नानं, तन्नियमाश्च कर्त्तव्याः । मासोपवासादि तु मले एव "समापयेत् । स्नानकालश्च सूर्योदयः । त्रिस्थलीसेतौ– "मकरस्थे रवौ यो हि न स्नात्यभ्युदिते रवौ" इति । 'माघमासे रटंत्यापः किंचिदभ्युदिते रवौ" इति पाद्मवचनाच्च ।

"सम्प्राप्ते माघमासे तु तपस्विजनवल्लभे ।
क्रोशन्ति सर्ववारीणि समुद्गच्छति भास्करे ॥
पुनीमः सर्वपापानि त्रिविधानि न संशयः ।"

इति नारदीयोक्तेः ।

"[1]माघमासे रटत्पापः किंचि"दिति च पाद्मवचनाद्यो—

"यो माघमासस्युषसि सूर्यकराभितप्ते, स्नान समाचरति चारुनदीप्रवाहे ।
उद्धृत्य सप्तपुरुषान्पितृमातृवंश्यान्स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ ॥"

इति भविष्योत्तरवचनाच्च ।

एवं सति

"अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः ।
माधवांघ्रियुगं ध्यायन् यः स्नाति सुरपूजितः ॥" इति ।

तथा,

"अरुणोदयमारभ्य प्रातःकालावधि प्रभो ।
माघस्नानभवं पुण्यं क्रमात्तत्र च धारणा ॥
उत्तमं तु सनक्षत्रं लुप्ततारं तु मध्यमम् ।
सवितर्युदिते भूप ! ततो हीनं प्रकीर्तितम् ॥"

इति ब्राह्मवचने शक्त्यपेक्षया व्यवस्था । निर्णयसिन्धुमयूखकारादयः— इदं प्रयागेऽतिप्रशस्तं सहस्रगुणिता सापि भवेत्पश्चिमवाहिनी ।

पश्चिमाभिमुखी गंगा कालिन्द्या सह संगता ।
हन्ति कल्पकृतं पापं सा माघे नृप ! दुर्लभा ॥" इति ।

[2]"काश्यां शतगुणा प्रोक्ता गंगायमुनसंगमा" इति पाद्मादिवचोभ्यश्च । प्रयागासम्भवे काश्यां दशाश्वमेधोत्तरस्थप्रयागतीर्थे स्नानमुक्तं काशीखण्डे ।

---

[1]. उक्त पाठः ख पाठे नास्ति ।

[2]. उक्त वाक्यं ख पाठे प्रयागेऽतिप्रशस्तमित्यस्य अनन्तरं वर्तते ।

"काश्युद्भवे प्रयागे ये तपन्ति स्नान्ति मानवाः ।
दशाश्वमेधजनितं फलन्तेषां भवेद्ध्रुवम् ॥"

इति ब्राह्मे —

"तडागेषु तु वा स्नायात्कूपभाण्डाश्रिते तथा ।
माघमासे तु वाराहे शस्तं वा निम्नगाजलम् ॥"

भाण्डाश्रिते त्वयं विशेषः—

"सरित्तोयं महावेगं नवं कुंभस्थितं तथा ।
वायुना ताडितं रात्रौ गंगास्नानसमं स्मृतम् ॥
यत्र कुत्रापि वा माघे प्रयागस्मरणान्वितः ।
करोतु मज्जनं तीर्थे स लभेद्गांगमज्जनम् ॥"

इदं च स्नानं नैरन्तर्येण कार्यम् । तदुक्तं पृथ्वीचन्द्रोदये प्रभासखण्डे—

"माघे मासि च यः स्नायान्नैरन्तर्येण भावतः ।
पौण्डरीकफलं तस्य दिवसे दिवसे भवेत् ।
माघमासमिमं पूर्णं स्नास्येऽहं देव माधव ।
तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि ॥"

इति स्नानविधौ विष्णूक्तमंत्रलिंगात्सम्पूर्णमाघं स्नानमेकतीर्थं एव कर्त्तव्यम् । मासपर्यन्तं स्नानासंभवे तु— त्रि ग्रह एकाहं वा स्नायात् "महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयं" इति लिंगात्

"अस्मिन्योगे त्वशक्तोऽपि स्नायादपि दिनत्रयम् ।
प्रयागे माघमासे तु त्र्यह स्नातस्य यत्फलम् ॥
नाश्वमेधसहस्रेण तत्फलं लभते भुवि ॥"

इति पाद्मादिवचनाच्च॥

अत्र मकरसंक्रम–रथसप्तमी–माघीतित्र्यह इत्येके । माघशुक्लदशम्यादीत्यन्ये । मकरादित्र्यह इत्यपरे । माघस्याद्यत्रयहदिवसात्र्यह इति केचित । त्रयोदश्यादीति बहवः ।,"महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम्" इति पाद्मोक्तेः । एतस्यार्थवादत्वाद्यत्किचिद्दिनत्रयमिति भाट्टाः तत्र संदिग्धेषु वाक्यशेषादिति न्यायात्त्रयोदश्यादि पक्ष एव ज्यायान् । अन्ये तु वचनाभावान्निर्मूलाः । प्रयागं विनापि पाद्मे— "अस्मिन्यः [1]स्यादशक्तः सः स्नायादपिदिनत्रयम्" नारदीये —

---

[1] अस्मिन् योगे त्वशक्तोऽपि इति 'ख' पाठ ।

"नवाह्नि सेवयेत्स्नातो ह्यस्नातोऽपि वरानने ।
होमार्थं सेवयेद्वह्नि शीतार्थं न कदाचन ॥
अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ।
त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः ॥
अनभ्यंगी वरारोहे सर्वं मासं नयेद् व्रती ।
तिलस्नायी तिलाद्वर्त्ती तिलहोमी तिलोदकी ॥
तिलभुक् तिलदाता च षट्तिलाः पापनाशनाः ॥"

तथा--

"अप्रावृताशरीरस्तु यः कष्टं स्नानमाचरेत् ।
पदे पदेऽश्वमेधस्य फल प्राप्नोति मानवः ॥"

पाद्मे—

"अत्र चैव यथाशक्त्या देयं माघे नराधिप ।
सुवर्णं रक्तिकामात्रं दद्याद्वेदविदे तथा ॥"

माघशुक्लैकादशी व्यानकल्पादिः । फाल्गुनकृष्णैकादशी वराहकल्पादिः । फाल्गुनशुक्लैकादश्यामामलकीवृक्षस्थितं विष्णुं पूजयेदित्युक्तं निर्णयामृते भविष्योत्तरे—

',फाल्गुने मासि शुक्लायां एकादश्यां जनार्दन ।
वसत्यामलकीवृक्षे लक्ष्म्या सहजगत्पतिः ॥
तत्र संपूज्य देवेशं भक्त्या कुर्यात्प्रदक्षिणाम् ।" इति ।

इयमेव गोविंद द्वादशीत्युच्यते । [1]अत्र द्वादश्येकादश्योरभेदाभिप्रायेण किं-वा द्वादश्यां पुष्यनक्षत्रे सति तस्यामेवोपवासापेक्षयेति तद्व्याख्यातारः ।

इति विश्वेश्वर विरचिते प्रतापभूपाज्ञया प्रतापार्के
विद्वद्विनोदकन्दे जातो मयूखोऽत्राऽऽदित्याख्यः ।

—o—

---

[1] तथा च हरिभक्ति विलासे फाल्गुन द्वादशीशुक्लाया पुष्यक्षण संपुता, गोविन्द द्वादशी नामेत्यादि द्वादशी यति इत्यन्तः पाठः ख पाठेऽधिकः ।

अथ त्रयोदशी निर्णयः

सा च सर्वमते शुक्ला पूर्वा कृष्णोत्तरा।
शुक्लत्रयोदशी पूर्वा परा कृष्णत्रयोदशी ॥"

इति माधवोक्तेः।

दीपिकाऽपि—

"पूर्वासितेऽसिते चाथ मता त्रयोदशी तिथिः।"

यदा तु कृष्णपक्षे परविद्धा न लभ्यते तदा पूर्वविद्धा ग्राह्या। तदाह वसिष्ठः—

"एकादशी तृतीया च षष्ठी चैव त्रयोदशी।
पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्परेऽहनि ॥" इति।

केचित्तु सर्वत्र त्रयोदशी कृष्णापरेकास्त्रिमुहूर्त्तसत्त्वे पराऽन्यथा पूर्वा। शुक्लाऽपि यदि पूर्वत्राऽपराह्णिकी तदा पूर्वाऽन्यथा पराऽपीत्याहुः।

अथ त्रयोदशी विशेष निर्णयः

तत्र चैत्र कृष्णा त्रयोदशी[1] वारुणीयोगो ब्रह्माण्डे—

"वारुण्येन समायुक्ता मधौ कृष्णात्रयोदशी।
गंगायां यदि लभ्येत शतसूर्यग्रहैः समा ॥" इति।

तथा शूलपाणौ स्कांदे—इममेव श्लोकं पठित्वा पठितम्—

"शनिवारसमायुक्ता सा महावारुणी मता।
गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा ॥
शुभयोग समायुक्ता शनौ शतभिषा यदि।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥" इति।

---

[1] त्रयोदश्यामिति ख पाठः।

"तिथिकृत्ये च कृष्णादि व्रते शुक्लादिमेव च" इति ब्राह्मोक्तेरत्र कृष्णादिर्मासः। न चास्य व्रतत्वं, 'व्रत' पदं तत्प्रकरणाद्यभावात्। अयं योगो गौडेष्वतिप्रसिद्धः। चैत्रशुक्लत्रयोदश्यां मदनपूजोक्ता हेमाद्रौ भविष्ये—

"चैत्रोत्सवे सकललोकमनोविनोदे, कामं त्रयोदशतिथौ च वसन्तयुक्तम्।
पत्न्या सहार्च्य पुरुषप्रवरोऽप्ययोषित्, सौभाग्यरूप सुतसौख्ययुतः सदा स्यात्॥"
इति।

अत्र त्रयोदशी शुक्लपक्षस्थत्वात् पूर्वैव। इयमुदानकल्पादिः। वैशाखकृष्णात्रयोदशी गौरीकल्पादिः। [1]विशाखशुक्लत्रयोदश्यां वैशाखस्नानारम्भः पूर्वोक्तः। ज्येष्ठशुक्लत्रयोदश्यां वटसावित्रीत्रिरात्रारम्भ इति वक्ष्यते। आश्विन कृष्णत्रयोदश्यां श्राद्धंकार्यमिति महालयनिर्णये वक्ष्यते। इयमेव त्रयोदशी युगादिः। अतश्च युगादिनिमित्तमपि पिण्डरहितमेव कुर्यात्। पिण्डनिषेधश्च युगादिनिर्णये पूर्वोक्तः। कार्त्तिककृष्णत्रयोदश्यां सन्ध्यायां दीपदानमुक्तं चंद्रप्रकाशे स्कांदे—

"कार्त्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे।
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति॥" इति।

बहिर्ग्रामाद्बहिरितिकेचित्। गृहाद्बहिरित्यपरे। क्वचित्त्वाश्विनकृष्णपक्षे तु इति पाठः। तत्राश्विनः शुक्लादिर्ग्राह्यः। अत्र यमदेवत्यन्वाद्दक्षिणामुखेन दीपदानं कार्यम। आचाराद्दीपपूजनमपि। अत्र त्रयोदशीप्रदोषव्यापिनी ग्राह्या। 'निशामुख' इत्यनेन प्रदोष[1]दीपदानविधानात्। प्रदोषश्च "प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते" इति वत्सोक्तो ज्ञेयः। दिनद्वये तद्व्याप्त्यावव्याप्तौ वा पराकृष्णपक्षस्थत्वात्। अस्यामेव गोत्रिरात्रव्रतं कार्यम्।

"कृष्णपक्षे त्रयोदश्यां मासि चाश्वयुजे तथा।
दीपोत्सव समीपे तु व्रतमेतत्समाचरेत्॥"
इति स्कांदात्।

'तु' शब्दो 'वा' शब्दार्थे। 'शुक्लपक्षे त्रयोदश्या' इत्यपि पाठः। ततश्च शुक्लत्रयोदशीमारभ्य वा कार्यमिति लभ्येत। आश्वयुजोऽत्रामान्तः। तिथ्यर्के तु "मासि भाद्रपदे शुक्ले त्रयोदश्यां समारभेत्" इति। हेमाद्रौ भविष्योत्तर वचनात्—"भाद्र शुक्लत्रयोदश्यां गोत्रिरात्रव्रतमुक्तम। गुर्जरास्त्वेतदेवाद्रियन्ते। अत्र त्रयोदश्यनुरोधेन निर्णय स्त्रिरात्रस्य। इयं त्रयोदशी प्रातःकालवर्त्तिनी ग्राह्या। दिनद्वये चेत्पूर्वा, संपूर्णत्वात्। कार्त्तिकशुक्लत्रयोदश्यादि दिनत्रये काश्यां पंचनदे स्नानमुक्तम्।

---

१. सम्पूर्णं स्नानाद्यवतो वैशाख शुक्ल त्रयोदश्यां इति ख पाठ अधिकः।

काशीखण्डे—

“वाराणस्यां पंचनदे त्र्यहं स्नातास्तु कार्त्तिके ।
अमी ते पुण्यवपुषः पुण्यभाजो विनिर्मलाः ॥” इति।

अत्र केचिद् यत्किंचित दिनत्रयमिच्छन्ति । बहवस्त्विदमेव त्रयोदश्यादि दिनत्रयमाहुः । मासपर्यन्तस्नानाशक्तौ माघशुक्लत्रयोदश्यादि दिनत्रये माघस्नान[1]मुक्तम् । इयमेव[2] “महा[3]माघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम्” इति पाद्मोक्तेः । इदं सम्पूर्णमाघस्नानाशक्तौ ज्ञेयम् ।

“अस्मिन् योगे त्वशक्तोऽपि स्नायादपि दिनत्रयम् ।
प्रयागे माघमासं तु त्र्यहं स्नातस्य यत्फलम् ।
नाश्वमेधसहस्रेण तत्फलं लभते भुवि ॥”
इति तत्रैवोक्तं ।

माघशुक्लत्रयोदशी कल्पादिरिति केचित् । अथ पक्षद्वयगतासु त्रयोदशीषु प्रदोषे शिवपूजा नक्तभोजनात्मकं प्रदोषव्रतमुक्तम । ब्रह्मोत्तरखण्डे—

“पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा ।
घटिका त्रिरस्तमयात्पूर्वं स्नानकार्यं समाचरेत् ॥
शुक्लाम्बरधरो भूत्वा संयतो नियमान्वितः ।
कृतसन्ध्याजपविधिः शिवपूजां समारभेत् ॥” इति ।

विश्वादर्शे, प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमुच्यते” इति । गौडग्रन्थे तु दण्डद्वयात्मकमेव प्रदोषमुक्तम् । “प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते” इति वत्सोक्तेः । यत्तु— “त्रिमुहूर्त्तः प्रदोषः स्याद्रवावस्तंगते सति” इति स्कन्दपुराणवचनं तद्गौणप्रदोषकालपरम् । विश्वादर्शोक्तिवाक्योपात्तघटिकात्रयात्मकमुख्यकालाधिककालबोधकत्वात् । कैश्चित्तु त्रिमुहूर्त्तात्मक एव मुख्यः प्रदोषकालः स्वीकृतस्तेषां मते माधवोक्त उत्तममध्यमविभागोऽनुपपन्नः । द्वयोरपि मुख्यकालत्वस्वीकारात् अत्र प्रदोषे शिवपूजा, नक्त भोजनात्मकं च प्रदोषव्रतं कीर्त्तितम् । तत्र प्रदोषव्यापिनी त्रयोदशी ग्राह्या । तथा च स्कन्दपुराणे—

“एकवत्सरपर्यन्तं प्रतिपक्षे त्रयोदशी ।
प्रदोषे शिवमभ्यर्च्य नक्तं भोक्ष्यामि शंकर ॥” इति ।

---

१. कार्यमित्युक्तम् इति ‘ख’ पाठः ।
२. त्रयोदशीकल्पादिः इति ख पाठे अन्य पाठः ।
३. उक्त पाठः ख पाठे नास्ति ।

[1]पूजारंभकालोऽपि तत्र—

"ततस्तु लोहिते भानौ स्नात्वा सनियमो व्रती ।
पूजास्थानं ततो गत्वा प्रदोषे शिवमर्चयेद् ॥" इत्युक्तम् ।

प्रदोषस्वरूपनिर्णयश्च नक्तप्रकरणोक्तावेवात्र द्रष्टव्यौ । ब्रह्मोत्तरे खण्डे तु— 'घटिकात्रयमस्तमयात्पूर्वमुपक्रमकाल उक्तः । मुख्यपूजाकालस्तु 'सूर्यास्तादिनक्षत्रोदयान्तः प्रदोषो रजनीमुख" मिति कांशबलात् तत्रान्यतरदिने प्रदोषव्याप्तौ तस्य स्पर्शे वा सैव ग्राह्या। दिनद्वये प्रदोषव्याप्तौ "सौम्येन [2]तदेकदेशेवोत्तराः प्रातः संकल्पयेद् द्विधा उपवासव्रतादिकमिति" संकल्पकालमारभ्य [3]सत्वे,

"यदि स्यादुभयोस्तिथ्योः प्रदोषव्यापिनी तिथिः ।
तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा पुनः ॥"
इति जाबालिवचनाच्च ।

[4]उभयत्र दिवा रात्रावपीत्यर्थे । वैषम्येण तदेकदेशस्पर्शे तदाधिक्यवती ग्राह्या । [5]पूजोपक्रमकालगा तु कृतिभिर्ग्राह्या । न युग्मादर इति दीपिकोक्तेः ।

---

१. उपतवाक्यं ख पाठे नास्ति ।

२ तदेकदेश स्पर्शे चोत्तरा इतिं ख पाठः ।

३. सत्वाद्यदि स्यादुभयोस्तिथ्योरिति जाबालिवचनाच्चेति 'ख' पाठः ।

४. उपतवाक्यं ख पाठे नास्ति ।

५. दिनद्वयेऽपि प्रदोषव्याप्त्यभावेऽपि पूजोपक्रमकालव्यापिनी उत्तरैव ग्राह्या इत्यन्तः ख पाठेऽधिकः । अमी ते पुण्यवपुषः, पुण्यभाजोऽतिनिर्मला इति अत्र केचिद् यत् किञ्चित् दिनत्रयमिच्छन्ति इत्यस्य पाठस्य अनन्तरं ख पाठे पृथक् पत्रं संयोजितं यस्य पाठो निम्नप्रकारेणास्ति—दिनत्रयमाहुः । मासपर्यन्तं स्नानाशक्तौ माघशुक्लत्रयोदशादि दिनत्रये माघस्नानं कार्यमित्युक्तं प्राक् । इयमेव त्रयोदशीफलादिः । अथ पक्षद्वयगतासु त्रयोदशीषु प्रदोषे शिवपूजा नक्तभोजनात्मकं प्रदोषव्रतमुक्तम् । ब्रह्मोत्तरखण्डे पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा । घटिकात्रिरस्तमयात् पूर्वं स्नानं समाचरेत् । शुक्लाम्बरधरोभूत्वा वाग्यतोनियमान्वितः । कृत सन्ध्याजपविधिः शिवपूजां समारभेदिति । स्कन्दपुराणे तु, ततस्तु लोहिते भानौ स्नात्वा संनियमो व्रती, पूजास्थानं ततोगत्वा प्रदोषे शिवमर्चयेत् इत्युक्तम् । प्रदोष स्वरूपं निर्णयश्च नक्त प्रकरणोक्ताविवात्र द्रष्टव्यौ । अस्मिन् प्रदोषव्रतेवारभेदेन फलभेदोऽप्युक्त. स्कन्द पुराणे, यदा त्रयोदशीशुद्धा मन्दवारेण संयुता आरब्धव्यं व्रतं तत्र सन्तानफलसिद्धये । ऋणमोचनार्थं तु भौमवारेण संयुता । सौभाग्यस्त्री विवृद्ध्यर्थं शुक्रवारेण संयुता ।(एतदनन्तरं पृष्ठ १६६ तमे लिखितं उभयोरेव क ख पाठयोः पाठः समानम् चतुर्थ्यां विशेष इत्यन्तः) ।

"अतथात्वे परत्र स्यात्तत्रार्वागस्ततो दिवा ।" इति वाक्याच्च । अतथात्वे दिनद्वये प्रदोषकाले तिथेर्भवे अस्तादर्वागेव सायाह्ने भोजनं स्यात् । अतएव 'प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते" इत्युपक्रम्यैवम्

ज्ञात्वा ततो विद्वान् सायाह्ने तु भुजिक्रियाम् ।
कुर्यान्नक्तव्रती नक्ते फलं भवति निश्चितम् ।।"

इति स्कांदे उपसंहृतम् ।

यत्तु कैश्चित् उक्तं, दिनद्वये प्रदोषाव्याप्तौ पूर्वैवग्राह्या, "त्रयोदशी तु द्वादशीसहिता मुने" इति सुमन्तुवचनादितितत्तुच्छम् । अस्य सामान्यवचनत्वेनाहोरात्रसाध्योपवासादिषु सावकाशत्वेन कालविशेषसाध्यविशेषप्रदोषव्रतेऽनिर्णायकत्वात् । अस्मिन् प्रदोषव्रते वारभेदेन फलभेदाऽप्युक्तः स्कन्दपुराणे ।

"यदा त्रयोदशी शुद्धा मंदवारेण संयुता ।
आरब्धव्यं व्रतं तत्र सन्तानफलसिद्धये ।।
ऋणनिर्मोचनार्थं तु भौमवारेण संयुता ।
सौभाग्यस्त्रीविवृद्धयर्थं शुक्रवारेण संयुता ।।
आयुरारोग्यसिद्ध्यर्थं भानुवारेण सयुता ।।" इति ।

इदं प्रदोषव्रतं मंदवारे प्रशस्तम् । कृष्णपक्षे मन्दवारे त्वतिप्रशस्तम्। तदुक्तं ब्रह्मोत्तरखण्डे—

"मंदवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम् ।
तत्रापि दुर्लभस्तस्मिन् कृष्णपक्षे समागतः ।।" इति ।

ब्रह्मोत्तरखण्डे तु– अत्रैव सोमवारयुक्तायामपि त्रयोदश्यां विशेषेण शिवपूजोक्ता ।

सोमवारे विशेषेण प्रदोषादिगुणैर्युते ।
केवले वापि ये कुर्युः सोमवारे शिवार्चनम् ।।" इति ।

अध्ययनप्रदोषमाह– अत्रैव प्रसगादध्ययनप्रदोषोऽप्युच्यते, तत्र कालादर्शे बृहन्मनुः—

"चतुर्थ्यां च त्रयोदश्यां सप्तयामर्धरात्रतः ।
अर्वाङ्गाध्ययनं कुर्याद्यदोच्छेत्तस्य धारणम् ।।"

अस्यार्थः चतुर्थ्यादितिथीनां अर्धरात्रादर्वाक्सत्त्वेऽर्द्धरात्रं यावत्प्रदोषः। दिनद्वये प्रदोषः। स्मृत्यर्थसारमते चतुर्थ्यां विशेषः।

"चतुर्थ्याः पूर्वरात्रे तु नवनाडीसु दर्शने।
नाध्येयं पूर्वरात्रेस्यात्सप्तमी च त्रयोदशी॥
अर्धरात्रात्पुरा चेत्स्यान्नाध्येयं पूर्वरात्रकः॥" इति।

इति विश्वेश्वरविरचिते प्रतापार्के प्रतापभूपाज्ञया
विद्वद्विनोदकंदे गतो मयूखोऽत्र विश्वाख्यः।

अथ चतुर्दशीनिर्णयः

सा न शुक्लोत्तरा कृष्णा पूर्वा ग्राह्या । चतुदश्यां च पूर्णिमेति युग्मवाक्यात्—

"तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता ।।"

इति नारदीयात् ।

"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्त्तव्या परविद्धा न कर्हिचित् ।।"

इत्यापस्तम्बोक्तेश्च ।

मदनरत्नादिषु "तूपवासे तु शुक्ला कृष्णाऽपि परयुता" एव ग्राह्या ।

"एकादश्यष्टमी षष्ठी उभे पक्षे चतुर्दशी ।
अमावस्या तृतीया च ता उपोष्याः परान्विताः ।।"

इति वृद्धवसिष्ठवचनादित्युक्तम्

अथ चतुर्दशीविशेषनिर्णयः—

सर्वासु चतुर्दशीतु वीरेश्वरपूजोक्ता स्कान्दे—

"विधायैवं जागरणं नरो वीरेशमर्चयेत् ।
सूयात्तन्नेव गृह्णाति शरीरं पांचभौतिकम् ।।" इति ।

[1]चैत्र [2]कृष्ण चतुर्दश्यां केदारकुण्डोदकपानमुक्तं, [3]तत्रैव—

---

१. ख पाठे "अथ चतुर्दशी विशेषनिर्णयः" इति पाठः अत्र लिखितोऽस्ति ।

२. तत्र चैत्रकृष्णाचतुर्दशीकृत्यं पृथिवी चन्द्रोदये पुलस्त्यः, चैत्र कृष्णा चतुर्दश्यां यः स्नायाच्छिवसन्निधौ न प्रेतत्वमवाप्नोति गंगायां तु विशेषत इति, चैत्र कृष्णा चतुर्दश्यामंगारक दिनं यदि पिशाचत्व पुनर्नस्याद्गंगायां स्नान । भोजनात् अत्र पूर्वा ग्राह्या, कृष्णपक्षस्थत्वात् गौडैस्त्वेत्तदेव शुक्लचतुर्दश्यामित्येव देवलीयत्वेन पठितम् इत्यन्तः पाठ ख पाठे पूर्वं लिखितः ।

३. अत्रैव केदारकुंडोदकमुक्तं स्कान्दे, चैत्रकृष्णचतुर्दश्यां उपवासं विधाय च इति ख पाठः ।

"चैत्रकृष्णचतुर्दश्यामुपवासं विधाय च ।
केदारोदकपानेन यथा तत्र फलं लभेत् ॥" इति ।

अथ चैत्रकृष्णचतुर्दशीकृत्यं पृथ्वीचंद्रोदये पुलस्त्यः—

"चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसंनिधौ ।
न प्रेतत्वमवाप्नोति गंगायां तु विशेषतः ॥" इति ।
चैत्रकृष्णचतुर्दश्यामंगारकदिनं यदि ।
पिशाचत्वं न पुनः स्याद्गंगायां स्नानभोजनात् ॥"

अत्र पूर्वो ग्राह्यः, कृष्णपक्षस्थत्वात् । गौडोस्त्वेतदेव शुक्लचतुर्दश्यामित्येनं देवलीयत्वेन पठितं [1]अत्रैव केदारकुण्डोदकपानं प्रोक्तं । स्कान्दे—

"चैत्रकृष्णचतुर्दश्यामुपवासं विधाय च ।
केदारोदकपानेन यथा तत्र फलं लभेत् ।।" इति ।

चैत्रशुक्लचतुर्दशीदमनकार्ये इयं रात्रिव्यापिनी ग्राह्या ।

"मधोः श्रावण[2]शुक्लायां तिथि[3]र्या स्याच्चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या परा पूर्वाह्णगामिनी ॥"
इति बौधायनवचनात् ।
"निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यत. ।
अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेत् ॥"
इति ब्रह्मवैवर्त्ताच्चेति ।

एवमेव हेमाद्रि-माधव-मदनरत्नादयः सर्वनिबंधकाराः । रात्रिव्यापिनीत्येतत्पूर्वविद्धापरमिति मयूखे निर्णयसिन्धौ तु[4] यदा[5] पूर्वदिने सूर्योत्तरं त्रिमुहूर्त्ता त्रयोदशी, तदुत्तरं चतुर्दशी । तदा पूर्वा चतुर्दशी ग्राह्या ।

त्रिमुहूर्त्तंन्यूनत्रयोदशी सत्त्वे तूत्तरैवेति भावः ।
पूर्वान्यथोत्तरेति सम्प्रदायविन्मते स्थितम् ॥"

---

१. अयं पाठः ख पाठे यथा स्थानं वर्तते किन्तु क पाठे पूर्वमपि उल्लिखितः ।
२. मासस्य इत्यधिकः ख पाठः ।
३. शुक्लाया तु चतुर्दशी इति ख पाठः ।
४. उक्तपाठे रेखाङ्कितः पाठः ख पाठे शोधपाठरूपेण चतुस्संख्यकेन अङ्केन सङ्केतिते स्थले लिखितोऽस्ति । (चतुर्दशी—सावकाशमिति)
५. मुहूर्तं त्रयभेदे इत्यधिकः ख पाठः ।

चतुर्दशी तु कर्त्तव्या त्रयोदश्या युता विभो” इति स्कान्दम् । उत्सर्गः तदपवादश्च तृतीयैकादशीषष्ठीति नारदीयवचनम् । तदपवादश्च— “मघोः श्रावणमासस्य०” इति । तत्रापवादाभावे पुनरुत्सर्गस्य स्थितिन्यायेन पूर्वविद्धैव ग्राह्यति सिद्ध्यति । ब्रह्मवैवर्त्तं तु सामान्यरूपमन्यरूपमन्यत्र सावकाशमिति । तेन—[1]अत्र ‘सायं’ शब्देन सायंकालाख्योऽह्नः। सः पंचमविभागो ग्राह्यः । पूर्वदिने सायं मुहूर्त्तत्रयवेधे पूर्वाऽन्यथोत्तरेति संप्रदायविन्मते स्थितम् । अस्यामेव काशीवासिभिः पशुपतीश्वरपूजा कार्या । तदुक्तं काशीखण्डे—

‘चैत्रशुक्लचतुर्दश्यामुपोषणपरायणः ।
पूजयित्वा पशुपतिं रात्रौ जागरणं चरेत् ।।” इति ।

तत्र चतुर्दशी रात्रिव्यापिनी ग्राह्या । अस्यामेव नृसिंहदोलोत्सवः कार्यः । तदुक्तं गारुडे—

“मधौ शुक्लचतुर्दश्यां नृसिंहं जगतः प्रभुम् ।
राजोपचारैः संपूज्य मासमान्दोलयेत्कलौ ।।
दक्षिणाभिमुखं देव दोलमानं सुरेश्वरम् ।
संपूजितं सकृद्दृष्ट्वा सर्वपापैः प्रमुच्यते ।।” इति ।

वैशाख शुक्लचतुर्दशी नृसिंह जयन्ती । तदुक्तं गोविन्दार्णवे ब्राह्मे—

“शुक्लपक्षे चतुर्दश्यां, मासि माधवसंज्ञके ।
प्रादुर्भूतो नृप ! चास्य तस्मात्तां समुपोषयेद् ।।” इति ।

इयं प्रदोषव्यापिनी ग्राह्या ।

‘वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके ।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ।।”

इति स्कांदात् ।

“वैशाख शुक्लपक्षे च चतुर्दश्यां निशामुखे ।
[2]तज्जन्म संभवं पुण्यं महापाप प्रणाशनम् ।।
वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारणम् ।”

इति हेमाद्रौ नृसिंहपुराणाच्च ।

दिनद्वये प्रदोषव्याप्तावव्याप्तावेकदेशसमव्याप्तौ वा परा संकल्परूपव्रतोपक्रमकाले सत्त्वाच्छुक्लपक्षगतत्वाच्चतुर्दश्यां च पूर्णिमेति युग्मवाक्याच्च ।

---

१. उक्तपाठः ख पाठेऽनुपलब्धः ।

२. मज्जन्म इति ख पाठः ।

वैषम्येणैकदेशयोगे आधिक्यवती ग्राह्या । कृत्यरत्नावल्यादावप्येवम् । दीक्षितीये तु दिनद्वयेऽप्यव्याप्तौ पूर्वा पूर्वदिने गौणकालव्याप्तेः सत्त्वात् । परदिने च तदभावादित्युक्तम् । यत्तु कैश्चिदुक्तं–पूर्वदिने प्रदोषकालव्यापि चतुर्दशीसद्भावे उत्तरदिने प्रदोषकालास्पर्शेऽप्युत्तरविद्धा ग्राह्या ।

“अनङ्गेन समायुक्ता न सोपोष्या चतुर्दशी ।
धनापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेत् ॥”

इति वचनेन पूर्वविद्धानिषेधादिति । तन्न । एतद्वचनस्य हेमाद्रिमाधवमदनरत्नादिसकलमहानिबन्धेष्वलिखितत्वेनानाकरत्वात् । समूलत्वेऽपि दिनद्वये प्रदोषकाले समव्याप्तिसत्त्वे पूर्वविद्धाया निषेधकत्वाच्च । अस्या एव योगविशेषेण प्राशस्त्यं नृसिहपुराणे—

[1]“स्वातिनक्षत्रयोगे च शनिवारे महद् व्रतम् ।
सिद्धियोगस्य संयोगे वणिजे करणे तथा ॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ॥
सर्वैरेतैस्तु संयुक्तं हत्याकोटि विनाशनम् ।
एभिर्योगे विनापि स्यान्मद्दिनं पापनाशनम् ॥” इति ।

अस्मिन् व्रते सर्वेषामप्यधिकारः ।

‘सर्वेषामपि वर्णानामधिकारोऽस्ति मद्व्रते ।
मद्भक्तैस्तु विशेषेण कर्त्तव्यं मत्परायणैः ॥”
इति तत्रैवोक्तेः ।

इदं च संयोगपृथक्त्वन्यायेन नित्यं काम्यं च ‘वर्षे वर्षे तु कर्त्तव्य’ मिति

वीप्साश्रवणाद्विज्ञाय मद्दिनं यस्तु लंघयेत् ।
[2]स याति नरकं घोरं यावच्चंद्रदिवाकरौ ॥”
इत्यकरणे दोषश्रवणाच्च ।

‘अपुत्रो लभते पुत्रान्’ इत्यादिफलश्रवणाच्च । अस्यामेवोङ्कारेश्वरयात्रा प्रोक्ता काशीखण्डे—

‘राधशुक्लचतुर्दश्यामद्यापि क्षेत्रवासिना ।
तत्र यात्रां प्रकुर्वन्ति महोत्सवपुरःसराः ॥
तत्र जागरणं कृत्वा चतुर्दश्यामुपोषिताः ।
प्राप्नुवन्ति परं ज्ञानं यत्र कुत्रापि तेऽमृताः ।'

---

[1] उक्तमिति ख पाठोऽधिकः ।

[2] पापकृन्नर इति ख पाठोऽधिकः ।

ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सर्वतः ।
तानि वैशाखभूतायामागस्त्योंकृतिदर्शनम् ।।" इति ।

इयमेव गारुडकल्पादिः । ज्येष्ठकृष्णचतुर्दशी माहेश्वरकल्पादिः । [1]भाद्रशुक्लचतुर्दश्यामनन्तव्रतमुक्तं भविष्ये—

तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ।
पौर्णमास्याः समायोगे व्रतं चानन्तकं चरेत् ।।" इति ।

तत्र चतुर्दशी मध्याह्नव्यापिनी ग्राह्या ।

"मध्याह्ने भोज्यवेलायां समुत्तीर्यं सरित्तटे ।
ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम् ।।
चतुर्दश्यामर्चयन्तं भक्त्या देवं[2] पृथगिति ।।"

इतिहासदर्शनादिति केचित् । तन्न, इतिहासे मध्याह्नस्य विधानाभावात् । तत्तत्कल्पनस्य च प्रत्यक्षवचनविरोधेऽनुचितत्वात् । अतो दैवे ह्यौदयिकी ग्राह्येति वचनेन 'चतुर्दश्यां च पूर्णिमेति' युग्मशास्त्रादिभिश्चोदयव्यापिन्येव युक्ता । साऽप्युदये त्रिमुहूर्त्ताऽपि ग्राह्या । अनन्तव्रते तिथिरिति माधवोक्तेस्त्रिमुहूर्त्ता[3] ग्राह्याऽपि तिथ्यन्तरवत्त्रिमुहूर्त्तेति मुख्यः कल्पः । दिङ्मुहूर्त्तेत्यनुकल्पः । एवं सति शिष्टाचारोऽप्यनुगृहीतो भवति । यत्तु वचनं स्कान्दम्—

"मुहूर्त्तमपि चेद् भाद्रे पौर्णमास्यां चतुर्दशी
सम्पूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययम् ।।" इति ।

तन्मुख्यत्रिमुहूर्त्ताभावेऽनुकल्पविधायकं त्रिमुहूर्त्तप्रशंसापरं वा[4] माधव[5]-मयूख-कालतत्त्वविवेचन-कृत्यरत्नावली-तिथ्यर्ककारादयोऽप्येवम् । केचित्तु मुहूर्त्तमपि चेदित्यस्य त्रिमुहूर्त्तनियमनिरासार्थत्वमङ्गीकृत्य मुहूर्त्तमात्राप्यौदयिको ग्राह्येति वदन्ति । दिनद्वये उदयव्यापित्वे सम्पूर्णत्वात्पूर्वैव । अत्र 'चं मुहूर्त्तमपि चेद्भाद्रे' इति स्कांदवाक्येन सम्पूर्णत्वाभिधाना "त्मध्याह्ने भोज्यवेलाया"मिति

---

[1] श्रावणशुक्लचतुर्दशी पवित्रारोपणेरात्रिव्यापिनी ग्राह्या चैत्र चतुर्दशीवत् इति ख पाठोऽधिकः ।

[2] पृथक् इति अधिकः ख पाठः ।

[3] व्याप्ता इति ख पाठोऽधिकः ।

[4] द्विमुहूर्तापीति वा पाठः इति ख पाठे शोधपाठः ।

[5] उक्तपाठः ख पाठे नास्ति ।

कथावाक्याच्च पूजनं मध्य[1]दिनद्वये[2] तदव्याप्तावपि पूर्वैव । सा च द्विधा भवति । त्रयोदश्यधिकरणचंद्रोदयोत्तरं रात्रिशेषे प्रविष्टा चतुर्दशी परदिने ह्रासवशाच्चन्द्रोदयात्पूर्वमेव समाप्तेत्याद्यपक्षः । सूर्योदयोत्तरं कियत्यपि त्रयोदशी तदुत्तरं प्रविष्टा चतुर्दशी चंद्रोदयकालात्पूर्वमेव समाप्तेति द्वितीयः । तत्राद्ये पूर्वैव, दिनद्वये मुख्यकालालाभाविशेषेऽपि ।

"पूर्वविद्धचतुर्दश्यां कार्त्तिकस्य सितेतरे ।
पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः ॥"

इति पृथ्वीचंद्रोदयोद्धृतस्कांदेन - "प्रत्यूषस्य कार्त्तिके कृष्णपक्षस्य चतुर्दश्यां दिनोदय" इति लैंगेन सूर्योदयस्य च "स्वकालादुत्तरो गौणः कालः कर्मणः" इत्यनेन गौणकालत्वेनाभिहितोत्तरकालव्याप्तिलाभात् । अत्र तैलाभ्यंगस्य रात्रिकर्मत्वाद्रात्रावेव वर्तमानया त्रयोदश्या चतुर्दशी विद्धा भवति । द्वितीयेऽपि पूर्वैव ।

"त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी ।
रात्रिशेषे त्वमावस्या तदाभ्यंगे त्रयोदशी ॥" इति ।

समग्रमयूखे चन्द्रप्रकाशधृताचारसवादिवचनात् । यदि तु हेमाद्र्यादिभिरलिखनात् अत्रानाश्वासस्तदा –"तैले लक्ष्मीर्जले गंगा दीपावल्यां चतुर्दशीम् ।" प्राप्येति शेषः 'प्रातः स्नानं तु यः कुर्याद्यमलोकं न पश्यति ॥" इति ब्राह्मवचनात् प्रातः कालव्यापिनी पूर्वैव । अत्र चद्रोदये चतुर्दश्यसत्त्वेऽपि चंद्रोदय एवाभ्यग स्नानादिकार्यम् तिथ्यादौ तु भवेद्यावानिति पूर्वोक्तवाक्येन त्रयोदश्यन्ते चतुर्दशीह्रासप्रक्षेपेण चंद्रोदये पारिभाषिकचतुर्दशीसत्त्वात् । यत्र पूर्वा परा वा प्रमा-

---

[1] मध्याह्न एव कर्त्तव्यं महाष्टम्यादिवत इति ख' पाठः ।

[2] निर्णयामृते तु स्वल्पायामप्युदयकालव्यापिन्यां चतुर्दश्यामुपक्रम्य पूर्णिमा भागेऽपि पूजादिकं कार्यम् । उपवासव्रतादीनां घटिकैकापि या भवेत्, उदये सा तिथिर्ज्ञेया विपरीता तु पैतृक इति कण्वादिवचनैरुदयव्यापिन्यास्तिथेर्दैवकृत्ये सम्पूर्णत्वविधानादित्युक्तम् । आश्विनकृष्णाचतुर्दश्यां दुर्मरणमृतानां श्राद्धकार्यमितिमहालयनिर्णये वक्ष्यते । कार्तिककृष्णाचतुर्दशी नरकचतुर्दशी । तस्यां तैलस्नानमुक्तं भविष्ये । कार्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये । कर्त्तव्यं तिलतैलेन स्नान नरकभीरुभिरिति । आश्विनस्यासिते पक्षे चतुर्दश्यां विधूदये कर्त्तव्यं मङ्गलं स्नानं भीरुभिरिति काल दर्शोद्धतममांतमासेन ज्ञेयम् । अत्र चन्द्रोदयस्य कर्मकालत्वात् तद्व्यापिनी चतुर्दशी तैलाभ्यंगस्नानादौ ग्राह्या । दिनद्वयचन्द्रोदयव्याप्तौ तु पूर्वा । तैलाभ्यंगस्नानयमतर्पणादिबहुकर्मकालव्याप्तिलाभात् । त्रयोदशीयुतायां च चतुर्दश्यामिषासिते विधूदये नरः स्नात्वा नरकं नैव पश्यति इति गौडग्रन्थधृतस्मृत्यन्तरवचनात् च । दिनद्वये इत्यन्तः पाठः ख पाठेऽधिकः (क पाठेऽयं पाठः नास्ति)

णान्तरेण ग्राह्या। तिथिर्ग्राह्यत्वेन प्राप्ता, तत्रानेन मुख्यकाले ग्राह्यतिथेरसत्त्वेऽपि क्षयादिप्रक्षेपेण शास्त्रतस्तत्र तत्तिथेः सत्त्वान्मुख्यकाल एव कर्मानुष्ठानं कार्यमिति ज्ञाप्यते। न त्वनेनाप्राप्तं कर्त्तव्यत्वमुच्यते। तथा सति जन्माष्टम्यादौ दिनद्वये कर्मकालाव्याप्तौ पूर्वविद्धा प्रसज्येत। शास्त्रतस्तिथेः सत्त्वात्। एवं च प्रकृतएव चतुर्दश्याः खण्डत्वे पूर्वोक्तस्कान्देन पूर्वाप्राप्तेर्ग्राह्यतिथिश्चतुर्दशीगतक्षयस्यैव पूर्वतिथौ प्रक्षेपो न त्वमाक्षयस्य चतुर्दश्याम्। एवमेव मयूखकारा नव्याश्च। तस्माद्दिनद्वये चद्रोदये चतुर्दश्यभावे त्रयोदश्यामेवाभ्यंगस्नानादिकुर्यादिति सिद्धम्। यस्तु कालादर्शधृतं मात्स्ये।

"मृगांकोदयवेलायां त्रयोदश्यां यदा भवेत्।
दर्शे वा मंगलस्नानं दुःख शोकाशुभप्रदम्॥"

इति त्रयोदश्यादिनिषेधः।

"योऽप्यरुणोदयतोऽन्यत्र, रिक्तायां स्नाति यो नरः।
तस्याह्निकभवो धर्मो नश्यत्येव न संशयः॥"

इति भविष्योयः। स न हि नहि निंदितुं प्रवृत्ताऽपितु विधेयं स्तोतुं यथोदितहोमपरिग्राहिणामनुदितनिन्दोदितपक्षं स्तोतुं प्रवृत्ता, न त्वनुदितं निन्दितुमेवेत्यर्थः। निन्दान्यायेन चतुर्दशीस्तुत्यर्थो ज्ञेयोऽन्यथोक्तोदाहरणे विहितस्नानादेर्लोपापत्तेरिति दिक्।

यद्यपि कार्तिकव्रतिनाम्,

'तैलाभ्यंगं तथा शय्यां परान्नं कांस्यभोजनम्।
कार्त्तिके वर्जयेद्यस्तु परिपूर्णव्रती भवेत्॥" इति।

पाद्मेऽभ्यंगस्नानं निषिद्धं तथाप्यत्र तैलाभ्यंगस्नानं तैरपि कार्यम्।

"नरकस्य चतुर्दश्यां तैलाभ्यंगं च कारयेत्।
अन्यत्र कार्त्तिकस्नायी तैलाभ्यंगं विवर्जयेत्॥"

इति तत्रैव प्रतिप्रसवश्रुतेः। अत्र 'तैले लक्ष्मीर्जलेगंगाः इति ब्राह्मोक्तेश्चातुर्वर्ण्यस्याप्यधिकारः। चतुर्दशीमारभ्य चतुर्ष्वपि दिनेषु काम्यस्नानमुक्तम्। पृथ्वीचंद्रोदयब्राह्मे—

"इषे भूते च दर्शे च कार्त्तिकप्रथमे दिने।
यदा स्वाति तदाऽभ्यंगस्नानं कुर्याद्दिनोदये॥

ऊर्जशुक्लद्वितीयायां तिथौ यस्तु शुभे दिने ।
मानवो मंगलस्नायी नैव लक्ष्म्या वियुज्यते ॥
दीपैर्नीराजनैरत्र[1] सैषा दीपावली स्मृता ।”

इति स्नानेऽपामार्गभ्रामणमुक्तं ब्राह्मे—

“अभ्यंगस्नानमध्ये तु नरकस्य क्षयार्थं वै ।
अपामार्गस्य पत्राणि भ्रामयेच्छिरसोपरि ॥”

अत्र तर्पणमुक्तं भविष्ये—“ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः” इति । एतत्सव्येनापसव्येन वा कार्यम् ।

“यज्ञोपवीतिना कार्यं प्राचीनावीतिनाऽथवा ।
देवत्वं च पितृत्वं च यमस्याः स्याद्द्विरूपता ॥

इति तत्रैवोक्तेः। अत्र च हेतूक्तिबलाच्छुक्लकृष्णतिलसक्तत्रिरावृत्त्या-रूपदेव–पित्र्यधर्मविकल्पो द्रष्टव्यः । इदं यमतर्पणं यमुनायामतिप्रशस्तम् । तदुक्तं कृत्यतत्वार्णवे -

“यां कांचित्सरितं प्राप्य कृष्णपक्षे चतुर्दशी ।
यमुनायां विशेषेण नियतस्तर्पयेद्यमम् ॥” इति ।

इद च जीवत्पितृकेणापिकार्यम् । जीवत्पिताऽपि कुर्वीत तर्पणं यम-भीष्मयोः” इति पाद्मोक्तम् । अस्यां प्रदोषे दीपदानं कार्यं, तदुक्तं ब्राह्मे—

“अमावस्याचतुर्दश्योः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः ॥” इति ।

तथा भविष्ये—

“ततः प्रदोषसमये दीपान् दद्यान्मनोरमान् ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥
प्रकारोद्यानवीथीसु प्रतोलीनिष्कुटेषु च ।
मदुरासु विविक्तासु हस्तिशालासु चैव हि ॥” इति ।

---

[1] नीराजनादत्र इति ख पाठः ।

इदं च दीपदानं संलग्नं कार्यम् । तदुक्तं ज्योतिर्निबन्धे नारदेन—

"पूषासितचतुर्दश्यामिन्दुक्षयतिथावपि ।
ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत् ।
कुर्यात्संलग्नमेतच्च दीपोत्सवं दिनत्रयम् ॥" इति ।

अस्यामेव नक्तभोजनमुक्तं लैंगे—

"नक्तं प्रेतचतुर्दश्यां यः कुर्याच्छिवतुष्टये ।
न तु क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥" इति ।

ज्योतिः ग्रन्थे—

"तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ।
उल्का हस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ॥" इति ।

यदा पूर्वदिने प्रदोषं चतुर्दशीस्नानयोग्या चोत्तरदिने तदा पूर्वदिने प्रदोषे दीपदानादि कृत्वा परेद्युः स्नानं कार्यम् । क्रमानुरोधेन कालबाधस्यान्याय्यत्वात् । स्मृतिकौस्तुभे तु-तर्पणवत्स्नानदिनप्रदोषे तिथ्यनपेक्ष एव दीपदानस्य विधानादसत्यामपि चतुर्दश्यां स्नानदिने प्रदोष एव दीपदानमित्युक्तम् । कृत्यतत्त्वार्णवे भविष्ये तु—

"कार्त्तिके भौमवारे हि चित्रा कृष्णा चतुर्दशी ।
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवम् ॥"

भौमवारचित्रानक्षत्रानक्षत्रयोगे महाफलेति तत्रैव व्याख्यातम् । निर्णयामृतेत्वियं भौमवारयुक्तश्चित्राख्येत्युक्ता पुष्करपुराणत्वेदमेव वचनं किञ्चित्पाठान्तरेण लिखितम् । तत्र पूर्वार्द्धं तु पूर्ववत । उत्तरार्द्धं च—'तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरम्:" इति । अस्यामेव हनुमज्जन्म । तदुक्तं वाराहपुराणे—

"आश्विनस्यासिते पक्षे भूतायां च महानिशी ।
भौमवारेऽञ्जनीपुत्रं हनूमन्तमजीजनत् ॥" इति ।

आश्विनोऽत्रामान्तः । कार्त्तिकशुक्लचतुर्दशी वैकुण्ठचतुर्दशी । सा द्विविधा । विष्णुप्रीत्यर्था शिवप्रीत्यर्था च । तत्राद्या रात्रिव्यापिनी ग्राह्या । तथा च हेमाद्रौ भविष्ये—

"कार्त्तिकस्य सिते पक्षे चतुर्दश्यां नराधिपः ।
सोपवासस्तु सम्पूज्य हरिं रात्रौ जितेन्द्रियः ॥ इति ।

दिनद्वये तद्व्याप्तौ निशीथप्रदोषोभयव्यापिनी ग्राह्या । द्वितीया त्वरुणोदयव्यापिनी ग्राह्या । तदुक्तं सनत्कुमारसंहितायां—

“वर्षे च हेमलम्भाख्ये मासे श्रीमति कार्त्तिके ।
शुक्लपक्षे चतुर्दश्याञ्चतुर्घटिकोऽरुणोदयः ।।”

इति दिवोदासीये उक्तमिति नरकचतुर्दशीप्रकरणे निर्णयसिन्धावरुणाभ्युदयं प्रति—

“महादेवतिथौ ब्राह्मे मुहूर्त्ते मणिकर्णिके ।
स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत् ।।
संक्षेपं ज्योतिषस्तस्य प्रतिष्ठाख्यन्तदाऽकरोत् ।
स्वयमेव स्वमात्मानं चरन् पाशुपतं व्रतम् ।।” इति ।

अत्राऽन्योऽप्येवं कुर्यादिति परकृतिरूपेणार्थवादेन विधिःकल्प्यते । तत्पूर्वदिने चोपवासःकार्यः ।

“ततः प्रभाते विमले कृत्वा पूजां महाद्भुताम् ।
दण्डपाणेर्महानाम्नि वनेऽस्मिन् कृतपारणः ।।”

इति तत्रैवोक्तेः । शिवरहस्येऽपि पूर्वदिने उपवासाद्युक्तम्[1]—

“ततोऽरुणोदये जाते स्नात्वा स्नात्वा च भस्मना ।
सन्ध्यां समाप्य विश्वेशं समभ्यर्च्य यथाविधिः ।
मद्भक्तान्भोजयामासुर्ऋषियो बुभुजुस्ततः ।।” इति ।

केचित्तु खण्डतिथौ वा[2] पूर्वदिने कृतोपवासाः परदिनेऽरुणोदये पूजादि कुर्वन्ति अस्यां विश्वेश्वरदर्शनान्मुक्तिरुक्ता काशीखण्डे—

“कार्त्तिकस्य चतुर्दश्यां विश्वेशं योऽवलोकयेत् ।
स्नात्वा चोत्तरवाहिन्यां न तस्य पुनरागतिः ।। इति ।

कार्त्तिकव्रतोद्यापनांगभूतोपवासे तु परविद्धैवेयं ग्राह्या । प्रधानभूतव्रतसमाप्तेः परविद्धपौर्णमास्यामनुष्ठेयाया अनुरोधेनांगोपवासनिर्णयस्योचितत्वा-

---

१. द्युक्त्वोक्तमिति ‘ख’ पाठः ।

२. खण्डतिथौ वा इति अधिकः ‘ख’ पाठः ।

च्छुक्लपक्षेऽष्टमी चैवेति शास्त्राच्च । मार्गशीर्षशुक्लचतुर्दश्यां काश्यां पिशाचमोचनतीर्थयात्रोक्ता, काशीखण्डे—

“मार्गशुक्लचतुर्दश्यां कपर्दीश्वरसन्निधौ ।
स्नात्वाऽन्यत्रापि मरणान्न पैशाच्यमवाप्नुयुः ।।

इमां सांवत्सरीं यात्रां ये करिष्यन्ति मानवाः ।
तीर्थप्रतिग्रहात्पापान्निस्तरिष्यन्ति ते द्विजाः ।। इति ।

अस्यां पिशाचमोचनतीर्थे एव श्राद्धं त्रिस्थलीसेतौ भट्टैरुक्तम् । तस्य प्राप्तपैशाच्यस्वपित्राद्युद्देश्यकत्वे पार्वणत्वादपराह्णव्यापिनी ग्राह्या । अज्ञातनामकपिशाचाद्युद्देश्यकत्वे त्वेकोद्दिष्टत्वान्मध्याह्नव्यापिनी । कुलधर्मव्रतादौ तूत्तरैवेति निर्णयसिन्धौ । माघकृष्णचतुर्दश्यां यमतर्पणं कार्यम् । तदाह हेमाद्रौ यमः—

“अनर्काभ्युदिते काले माघकृष्णचतुर्दशी ।
स्नातः सन्तर्प्य तु यमं सर्वपापैः प्रमुच्यते ।। इति ।

अत्र जीवत्पितृकस्यापि अधिकार इत्युक्तम्[1] । अथ फाल्गुनकृष्णचतुर्दशी शिवरात्रिः । तदुक्तं

[2]माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी ।
शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदिनी ।।”

माघग्रहणममान्तमासेन । तच्च शिवरात्रिव्रतमेकादशी जयन्ती व्रतवत्संयोगपृथक्त्वन्यायेन नित्यं काम्यं च । तत्र नित्यत्वम

“परात्परतरं नास्ति शिवरात्रिः परात्परम् ।
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् ।
जन्तुर्जन्म सहस्रेण भ्रमते नात्र संशयः ।।”

इत्यकरणे प्रत्यवायश्रवणात्—

“वर्षे वर्षे महादेवि ! नरो नारी पतिव्रता ।
शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत् ।।”

---

१. प्राक् इति ‘ख’ पाठोऽधिकः ।

२. स्कान्दे इति अधिकः ख पाठः ।

इति वीक्षाश्रवणात् ।

"माघकृष्णचतुर्दश्यां यः शिवं शंसितव्रतः ।
मुमुक्षुः पूजयेन्नित्यं स लभेदीप्सितं पदम् ।।" इति ।
"सागरो यदि वा शुष्येत्क्षीयते हिमवानपि ।
मेरुमंदरशैलाश्च श्रीशैलो विन्ध्य एव च ।
चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतम् ।।"

इति नित्य-निश्चलशब्दैरवगन्तव्यम् ।

"काम्यत्वेन शिवं वाऽथ पूजयित्वापि यो जनः[1]।
जागर्त्ति चेच्चतुर्दश्यां[2] स मातुः स्तनयोपयः ।।
न कदाचित्पिबेद्भूयो ह्यस्मिन् संसारसागरे ।
यदीच्छेद्वांछितान्भोगान्दिवि देवमनोरमान् ।।
आगमोक्तविधिं कृत्वा प्राप्नोति परमं पदम् ।
मम भक्तस्तु भो देवि ! शिवरात्रिमुपोष्य च ।।
गणत्वमक्षयं देव्यमक्षयं शिवशासनम् ।।"

इति फलश्रवणात् बोध्यं, काम्यव्रतस्येशानसंहितायां वर्षसंख्यापठ्यते—

"एवमेतद् व्रतं कुर्यात्प्रतिसम्वत्सरं व्रती ।
द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकन्तथा ।
सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः ।।" इति ।

शिवरात्रिव्रतं चोपवासपूजाजागरणरूपप्रधानत्रयसमुदायरूपम् ।

"उपवासप्रभावेन बलादपि च जागरात् ।
शिवरात्रेस्तथा तस्यां लिंगस्यापि च पूजया ।
अक्षयान् लभते भोगान् शिवसायुज्यमाप्नुयात् ।।"

---

[1] जन इति ख पाठे नास्ति ।

[2] चतुर्दशीं, यातुः पयोधर रसं न पिबेत्स कदाचन ।

इति नागरखण्डादिषु त्रयाणामपि फलसम्बन्धश्रवणात् हेमाद्रिमाधवीयमदनरत्नादावप्येवम् यानि तु—

"अखंडितव्रतो यो हि शिवरात्रिमुपोषयेत् ।
अथवा शिवरात्रिं च पूजाजागरणैर्नयेत् ॥"

तथा—

"कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान् ।
जागरं कुरुते तत्र स रुद्रसमतां व्रजेत् ॥"

इत्यादीनि वाक्यानि तान्यनुकल्पत्वादशक्तविषयाणीति निर्णयसिन्धुमदनरत्नकारादयः। तिथ्यर्ककारास्तु--नित्यव्रते पूजैव प्रधानं पूर्वोक्तानिष्टवाक्ययोः पूजामात्रग्रहणात्काम्यव्रतविधायकवाक्येषु त्रितयग्रहणात्काम्यव्रते उपवासजागरणपूजाः प्रधानमित्याहुः। नित्यकाम्यरूपस्यास्य व्रतस्य सर्वाधिकारिकत्वमीशानसंहितायामुक्तम्—

"शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ॥" इति ।

नृसिंहपरिचर्यायान्तु वैष्णवैरप्येतत्व्रतं कार्यम् इत्युक्तं—

"सौरो वा वैष्णवो वाऽन्यो देवतान्तरपूजकः ।
न पूजाफलमाप्नोति शिवरात्रिबहिर्मुखः ॥"

इति पाद्मवचनात् ।

"न ते तत्रगमिष्यन्ति ये द्विषन्ति महेश्वरम् "

इति शिवद्वेषिणो वैष्णवपदप्राप्तिनिषेधाच्च। अत्रापि जन्माष्टमीवद्रात्रावपि त्रयोदशीवेधो भवति। रात्रिसाध्यव्रतत्वादियं निशीथव्यापिनी ग्राह्या। तदुक्तमीशानसंहितायाम्—

"माघकृष्ण चतुर्दश्यामादिदेवो महानिशि ।
शिवलिंगमभूत्तत्र कोटिसूर्यसमप्रभम् ॥"
"तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः ।
व्याप्यार्धरात्रं यस्यां तु लभ्यते या चतुर्दशी ।
[1]व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद् व्रतं नरः ॥ इति ।

---

[1] तस्यामेव व्रतं कार्यं यत्प्रसादार्थिभिर्नरैः, पूर्वेद्युर्वा परेद्युर्वामहानिशि चतुर्दशी इत्यन्त अधिकः ख पाठः ।

नारदसंहितायामपि—

"अर्धरात्रयुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ।।" इति ।

तत्रेत्यनन्तरं यः कुर्यादित्यध्याहार्यम् महानिशा च—

"महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः"

इति देवलोक्तेर्निशीथरूपैव । एवं चार्धरात्रशब्दोऽपि तत्पर एव । शिष्टाचारोऽप्येवं माधवस्तु—

"प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी ।
तथा त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु ।
भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत् ।।"

इति वायवीयादौ प्रदोषव्याप्तेः नारदसंहितादौ निशीथव्याप्तेश्चोक्तत्वेन तदुभयव्यापिनी ग्राह्येत्याह । निर्णयसिन्धावप्येवम् । निर्णयामृते तु सर्वाऽपि शिवरात्रिः प्रदोषव्यापिन्येव । अर्धरात्रवाक्यानि तु कैमुतिकन्यायेन प्रदोषस्तावकानीत्युक्तम् । तत्र दिनद्वये निशोथव्याप्तौ पूर्वा ।

"अर्धरात्रापुरस्ताच्चेज्जया योगो यदा भवेत् ।
पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैः ।।" इति ।

पाद्मवचनादिति हेमाद्रिः । मदनरत्नेऽप्येवम् । गौडा अप्येवमाहुः । परदिने प्रदोषनिशीथोभयव्याप्तिसत्त्वात्परैवेति तु माधवः । तदनुसारिणो मयूखतिथ्यर्ककारादयोऽपि

"आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी ।
तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमा ।।"

इति कामिकात्

प्रदोषव्यापिनी ग्राह्या शिवरात्रिश्चतुर्दशी ।
रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ।"

इति स्मृत्यन्तरात् "दिवारात्रिव्रतं यच्च" इति स्मृतेश्च परैवेत्याहुः । इदमेव युक्तमिति निर्णयसिन्धावपि—

"यदा तु परदिने स्वल्पाऽर्द्धरात्रिव्याप्तिः ।
प्रथमदिने च सम्पूर्णा तदा पूर्वैव ।।"

तथा चेशानसंहितायाम्--

"व्याप्यार्धरात्रं यस्यां तु वर्तते या चतुर्दशी ।
तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ।।" इति ।
"महतामपि पापानां दृष्टावै[1] निःकृतिः पुरा ।
न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवाम् ।।"

इति स्कांदवाक्येऽ[2]प्रयोगस्य निंदितत्वाच्च । यदा पूर्वेद्युश्च प्रदोषे, तदा पूर्वैव ।

"माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी ।
अनंगेन समायुक्ता कर्त्तव्या सा सदात्तिथिः ।।"

इति नागरखण्डात् । यदा तु प्रथमेऽह्नि चतुर्दशीनिशीथादूर्ध्वं प्रवृत्ता, परदिने च निशीथादर्वागेव समाप्ता, तदा परदिने गौणकालव्याप्तिसत्त्वात् परैव । तथा च मदनरत्ने—

"माघासिते भूतदिनं हि राजन्, उपैति योगं यदि पञ्चदश्याः ।
जया प्रयुक्तां न कदापि कुर्याच्छिवस्य रात्रिप्रिय[3]कृत्त्वतस्तत् ।।" इति ।

इयं त्रिस्पृशा वेदेऽति[4]प्रशस्ता । तदुक्तं माधवीये--

"त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी ।
अन्ते चैव सिनी वाली त्रिस्पृश्यां शिवमर्चयेद् ।। इति ।

योगविशेषेणापीयं प्रशस्तेत्युक्तं स्कन्दपुराणे—

"माघकृष्णचतुर्दश्यां रविवारो यदा भवेत् ।
भौमो वाऽथ भवेद्देवि ! कर्त्तव्यं व्रतमुत्तमम् ।।"

शिवयोगे[5] वैतद्भवेदुत्तमोत्तममिति । अत्रैव कृत्तिवासेश्वरार्चाप्युक्ता भविष्ये—

---

१. दुष्टावैनिः इति ख पाठः ।
२. अमायोगे इति ख पाठः ।
३. प्रियकृच्छिवस्येति 'ख' पाठः ।
४. चेवतिप्रशस्ता इति 'ख' पाठः ।
५. शिव योगस्य योगे इति ख पाठः ।

"माघमासे चतुर्दश्यां कृष्णपक्षे समाहिताः ।
कृत्तिवासेश्वरं लिंगम् अर्चयन्ति शिवं शुभम् ।
ते यान्ति परमं स्थानं सदाशिवमनामयम् ।। इति ।

वैष्णवानां तु त्रयोदशीविद्धा निषिद्धा । "शिवरात्रिव्रते भूतं कामविद्धं विवर्जयेत् ।" इति हरिभक्तिविलासोक्तेः ।

अथ पारणनिर्णयः

तच्च स्कन्दपुराण एव तिथ्यन्ते तिथिमध्ये च विहितम् । कृष्णाष्टमी-स्कन्दषष्ठी-शिवरात्रि-चतुर्दशी "एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत्" इति ।

"उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणम् ।
कृतैः सुकृतलक्षैश्चलभ्यते नान्यथा[1] फलम् ।।
ब्रह्मा स्वयं चतुर्वक्त्रैस्तथा ह्यहम् ।
दिने दिने फलं तस्य वक्तुं शक्तो न पार्वति ।।"
ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
संस्थितानि भवन्तीह भूतायां पारणे कृते ।।" इति ।

तत्र

"तिथीनामेव सर्वासामुपवासव्रतादिषु ।
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ।।

इति स्कांदवचसैव पर्युदस्तशिवरात्र्याः सर्वप्रकारेषु तिथिमध्य एव पारणा । शिष्टाचारोऽप्येवमेव । कृष्णाष्टमीति स्कांदवचनं तु कृष्णाष्टम्यादिविषयमेव, न तु शिवरात्रिविषयम् । तदुपादानं तु पूर्वयुतत्वमात्रकथनार्थमिति निर्णयसिन्धुकाराः । मयूखदीक्षितीयादौ तु तिथिमध्य एव पारणमुक्त्वा स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मण इति । मण्डनोक्तेस्तिथ्यन्तपारणविधेर्गौणपरत्वमुक्तम् । मदनरत्ने तु सा ह्यस्तमयपर्यन्तव्यापिनी चेत्परेऽह्नि । दिवैव पारणां कुर्यात् पारणान्नैव दोषभागिति कालादर्शादिलिखितशिवरात्रिप्रकरणपठितस्मृतिवचनाद्दिवा तिथिसमाप्तौ तिथ्यन्तेऽन्यथा तन्मध्य एव [2]व्यवस्थोक्ता ।

---

[1] लभ्यते वाथवा न वा इति 'ख' पाठः ।

[2] एव इति व्यवस्थोक्ता इति ख पाठः ।

कालनत्त्वविवेचनकारादयस्तु कालादर्शवचनादेव तिथ्यन्तं प्रतीक्ष्य दिवा पारणस्य कर्त्तुं शक्यत्वे तिथ्यन्ते नो चेत्तिथिमध्य एवेति व्यवस्थामाहुः । माधवस्तु

“तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ।।”

इति सामान्यवाक्या‘द्यामत्रयादर्वाक्च [1]तिथिः स्याच्चेच्चतुर्दशी ।” स मासो तिथ्यन्ते यामत्रयोर्ध्वगामित्वे तु प्रातस्तिथिमध्य एवेति व्यवस्थामाह । दीपिकायान्तु रात्रावपि तिथ्यन्ते एवोक्तम्—

व्रतं तिथेरन्ते निशीथेऽपि वाऽश्नीयादिति ।

यदा तु पारणदिने स्वल्पा चतुर्दशी तदा जलपारणं कृत्वाऽमाश्राद्धं कुर्यात् । “आपो वा अशितमनशितं चेति” श्रुतेः । इति पारणनिर्णयः ।

अथ मासशिवरात्रिनिर्णयः ।

तदारम्भस्तु मार्गशीर्षकार्त्तिकमाघकृष्णचतुर्दशीष्वन्यतमचतुर्दश्यां कार्यः । तदुक्तं मदनरत्ने स्कांदे—

“आदौ मार्गशिरे मासि दीपोत्सवदिनेऽपि वा ।
गृह्णीयान्माघमासे वा द्वादशैवमुपोषयेत् ।।” इति ।

अस्य व्रतस्य वर्षसङ्ख्योक्ता । तत्रैव—एवं द्वादशवर्षान्ते द्वादशैव तपोधनान्” इति । हेमाद्रौ कालोत्तरखण्डे तु—“चतुर्दशाब्दं कर्त्तव्यं शुभं” इत्युक्तम् । अत्र चतुर्दशीरात्रौ प्रतियामं पूजाया जागरणस्य च विधानात्तयोः सकलरात्रिसाध्यत्वाद्यस्मिन्दिनेऽधिका रात्रिव्याप्तिः, सा ग्राह्या । रात्रिव्याप्तिसाम्ये तु “रुद्रव्रतेषु सर्वेषु कर्त्तव्या सम्मुखी तिथिः” इति ब्रह्मवैवर्त्ताज्जयायोगस्य प्राशस्त्याच्च पूर्वैव । [2]हेमाद्रि-कृत्यरत्नावली-[3]कालतत्त्वविवेचन-दाक्षितीयादावप्येवम् ।

---

[1] चतुर्दशी समाप्तौ इति ख पाठः ।

[2] माघगतेतरासित चतुर्दश्यास्तु रात्रिद्वये अस्तित्वे बहुरात्रियुक् शुभतरा साम्ये तु पूर्वा स्मृतेति दीपिकोक्तेः । इति शोध पाठोऽधिकः ख पाठे ।

[3] प्रतिमासासित तु सा बहुरात्रियुता ग्राह्या, साम्ये पूर्वैव संमतेति तत्संग्रह वचनाच्च इति शोध पाठोऽधिकः ख पाठे ।

मदनरत्न कौस्तुभ-निर्णयसिन्धु-मयूखादी तु वार्षिकशिवरात्रिव्र[1]तनिर्णयवत इत्युक्तम् । यत्तु प्रदोषव्यापिनी ग्राह्येति तत्सन्यस्तविषयम्,

"मोक्षमार्गरतानां च मुनीनामूर्ध्वरेतसाम् ।
तेषामेव तु सा प्रोक्ता साऽमावास्या चतुर्दशी ॥"
इति विश्वरूपनिबन्धे नंदिकेश्वरवचनादिति दीक्षिता ।

इति विश्वेश्वरविरचिते प्रतापभूपाज्ञयाप्रतापार्के विद्वद्विनोदकन्दे
गतो मयूखोऽत्र मन्वाख्यः ।

❖

---

[1] शिवरात्रिवन्निर्णय इति ख पाठः ।

अथ पौर्णमासीनिर्णयः

सा तु वटसावित्री व्रतव्यतिरिक्तसर्वव्रतेषु परा ग्राह्या ।

"भूतविद्धा न कर्त्तव्या दर्शः पूर्णा कदाचन ।
वर्जयित्वा मुनिश्रेष्ठ ! सावित्रीव्रतमुत्तमम् ॥"

इति ब्रह्मवैवर्त्तवचना "त्सावित्रीव्रतमन्तरेण भवतोऽमापौर्णमास्यौ परे" इति दीपिकोक्तेश्च । उपवासेऽपि परैव । "एकादश्यष्टमी षष्ठी०" ति विष्णुधर्मोत्तरात् । यत्तु—

"षष्ठ्येकादश्यमावस्या पूर्वविद्धा तथाष्टमी ।
पूर्णिमा परविद्धा च नोपोष्यं तिथिपंचकम् ॥"

इति ब्रह्मपुराणवचनं यच्चतुर्दश्या च पूर्णिमेति युग्मवाक्यं तत्सावित्रीव्रतविषयम् । पूर्वोदाहृतैकादश्यष्टमी षष्ठीतिवचनविरोधात् । सावित्रीव्रते तु पूर्वैव ग्राह्या । तच्च ज्येष्ठपूर्णिमायां वक्ष्यते । सर्वास्वपि पूर्णिमावास्यावच्छ्राद्धं नित्यम् ।

"अमावास्या व्यतीपातपौर्णमास्यष्टकासु च ।
विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ॥"

इति पितामहेनाकरणे प्रत्यवायोक्तेः । तच्चापिण्डं कार्यम् । तदुक्तं निर्णयदीपे गर्गेण—

"पौर्णमासीषु सर्वासु निषिद्धं पिण्डपातनम् ।
वर्जयेत्वां प्रौष्ठपदीं यथा दर्शस्तथैव सा ॥" इति ।

तत्रामावस्यावदेव निर्णयः ।

अथ पौर्णमासीविशेषनिर्णयः ।

तत्र चैत्रपूर्णिमायां विशेषो वायवीये—

"संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् ।।" इति ।

अत्र स्वीयतिथ्या समुच्चय इति केचित् । स्वीयतिथावकरणेऽत्र पूजेत्यन्ये दीक्षितः तदितरविषयत्वेन व्यवस्थेत्यपरे मेषस्थे रवौ याऽमावास्या न साऽमावास्यान्ते यस्येति चान्द्रविशेषणमुदन्ते चन्द्रे या पौर्णमासी सा चैत्री । एतत्क्रमेणान्या अपि तदुक्तं हरदत्तेन—

"मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ।
चान्द्रा मासास्तत्तदन्ताश्चैत्राद्या द्वादशस्मृताः ।।
तेषु या पौर्णमासी सा चैत्रादिसंज्ञया मता ।
कदाचित्केन योगेन नक्षत्रस्येति निर्णयः ।।" इति ।

इयं मन्दादिवारेणयुक्ताऽति प्रशस्तेत्युक्तं ब्रह्मपुराणे—

"मंदे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिकी ।
तत्राश्वमेधिकं पुण्यं दानेन लभते नरः ।
दानमक्षयतां याति पितृणां तर्पणन्तथा ।।" इति ।

महाचैत्र्यादि लक्षणमुक्तं गार्ग्येण

"माससंज्ञे यदा ऋक्षे चंद्रः सम्पूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृतेति ।।"

शंकरगीतायाम्

"एकराशिगतौ काले यदा गुरुनिशाकरौ ।
सा पौर्णमासी महती सर्वं सर्वपापहरा स्मृता ।।"

तथा—

"पौर्णमासीषु सर्वासु मासर्क्षसहितासु च ।
दत्तानामिह दानानां फलं दशगुणं भवेत् ।।" इति ।

इयं मन्वादिरपि । अत्रापि वैशाखस्नानारम्भ इत्युक्तं प्राक् । अथ वैशाखी, तत्र जाबालिः—

[1]"मृतान्नमुदकुंभं च वैशाख्यां विशेषतः ।
निर्दिश्य धर्मराजाय गोदानफलमाप्नुयात् ॥" इति ।

शृतं पक्वं पाद्मे—

"वैशाख्यां विधिवत्स्नात्वा भोजयेद् ब्राह्मणान् दश ।
कृशरं सर्वपापेभ्यो मुच्यते नात्र संशयः ॥" इति ।

निर्णयामृते पुराणसमुच्चये—

"वैशाख्यां पौर्णमास्यां तु विशाखासु विशेषतः ।
यस्तु कृष्णाजिनं दद्यात् सखुरं शृंगसंयुतम् ॥
तिलैः प्रच्छाद्य वासोभिः सर्ववस्त्रैरलंकृतम् ।
ससमुद्रगुहा तेन सशैलवनकानना ॥
सप्तद्वीपान्विता दत्ता पृथिवी नात्र संशयः ॥" इति ।

तत्रैव विष्णुः—

"कृष्णाजिने तिलान् कृष्णान् हिरण्यं मधुसर्पिषी ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥" इति ।

हेमाद्रौ भविष्ये—

"कुंभान् स्वच्छजलैः पूर्णान् हिरण्यान्नसमन्वितान् ।
वैशाख्यां ब्राह्मणे दत्वा न शोचति कृतान्ततः ॥" इति ।

विष्णुधर्मोत्तरे—

वैशाखे पौर्णमास्यां वै जलस्थं जगदीश्वरम् ।
पूजयेद्वैष्णवो भक्त्या कृत्वोत्साहं मुदान्वितः ॥
गीतवाद्यपताकाद्यैः कृत्वा पुण्यं महोत्सवे ।
ज्येष्ठस्यैकादशी शुक्ला यजेतावत्प्रहर्षितः ॥ इति ।

भविष्ये—

"वैशाखी कार्त्तिकी माघी तिथयोऽतीव पूजिताः ।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ॥ इति ।

---

१. शृतान्नमुदकुम्भञ्च इति 'ख' पाठः ।

अथ ज्येष्ठी—अस्यां सावित्रीव्रतं कार्यम् । तदुक्तं भविष्ये—

"ज्येष्ठे मासि सिते पक्षे पौर्णमास्यां तथा व्रतम् ।
चीर्णं पुरा महाभक्त्या कथितं ते मया नृप ।।" इति ।

दाक्षिणात्याश्चैतदेवाद्रियन्ते । एतच्चामावस्यायामप्युक्तम् । निर्णयामृते भविष्ये—

"आमायां च तथा ज्येष्ठे वटमूले महासती ।
त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् ।।
अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रियः ।
अयाचितं चतुर्दश्याममायां समुपोषणम् ।।"

इति तत्तु पाश्चात्या आद्रियन्ते । हेमाद्रि-समयोद्योतादिषु तु भाद्रपदपूर्णिमायामुक्तं, तत्तु नेदानीं प्रचरति । गौडास्तु—

"मेषे वा वृषभे वाऽपि सावित्रीं तां विनिर्दिशेत् ।
ज्येष्ठकृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः ।
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः ।।" इति ।

पराशरोक्तेश्चतुर्दश्यां प्रदोषे व्रतम् । दिनद्वये तद्व्याप्तौ परैवेत्याहुः । तन्निर्मूलमिति निर्णयसिन्धौ । स्मृतिकौस्तुभकारास्तु सावित्रीव्रते ज्येष्ठपूर्णिमामावस्ययोर्देशभेदेन यथाचारं व्यवस्था । यत्तु मदनरत्ने भविष्योत्तरोक्तं भाद्रपदपूर्णिमायां सावित्रीव्रतं तत्सभार्यं पुंकर्तृकत्वाद्गायत्र्यधिष्ठातृब्रह्मपत्नीभूतसावित्रीदैवत्यत्वात् प्रकृतव्रतदेवताभूतया सावित्र्याऽत्रानुष्ठितस्य सावित्र्यात्मककन्याप्रापकतया निर्दिष्टत्वान्न प्रकृतव्रताभेदेन तद्व्रतं निर्देशार्हम् । एवं च यत्प्राच्यैः "मेषे वा वृषभेवाऽपि०" इति पराशरोक्तं चतुर्दश्यां प्रदोषव्रतमुच्यते, तदपि त्रिरात्रव्रतेति प्रसिद्धाद् व्रतादेकरात्रत्वाद्भिन्नतया स्फुटमिति न प्रसिद्धव्रतेन सह विकल्पते इति बोध्यमित्याहुः । अत्र पौर्णमासी अमावस्या च "पूर्वविद्धैव ग्राह्या कृष्णाष्टमी बृहत्तपा" इति निगमवाक्याद्—

"भूतविद्धा न कर्त्तव्या अमावस्या च पूर्णिमा ।
वर्जयित्वा नरश्रेष्ठ ! सावित्रीव्रतमुत्तमम् ।।"

इति ब्रह्मवैवर्ताच्च । यदा त्वष्टादशघटिका चतुर्दशी तदा परा ग्राह्या । [1]पूर्वविद्धे सावित्रीव्रते पंचदशी तिथिः ।

---

[1] उक्त पाठः ख पाठे नास्ति ।

"नाड्योऽष्टादशभूतस्य स्युश्चेत्तच्च परेऽहनि ।
भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ।।"

इति स्मृतेरिति माधवः । निर्णयसिन्धुकारास्तु वस्तुतस्तबभूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमित्यस्य व्रतान्तरे सावकाशत्वाद्विशेषतः प्रवृत्तपूर्वविद्धाविधायकवचनेन तस्य बाधादष्टादशपाडीवेधेऽपि पूर्वैवेत्याहुः । कालतत्त्वविवेचनस्मृतिकौस्तुभादावप्येवम् । इदं च त्रयोदशीमारभ्य पूर्णियान्त कर्त्तव्यम् । तदुक्तं स्कान्दभविष्ययोः—

"ज्येष्ठे मासि सिते पक्षे[1] पूर्णिमायां तथा व्रतम् ।" इति ।

अत्र पूर्णिमामावस्यानुरोधेनैव यथा [2]त्रिरात्रसम्पृक्तिर्भवति तथा त्रयोदश्यादिग्राह्यम् । तस्याः प्रधानत्वादिदं व्रतमविशेषात् सर्वाभिः कार्यम् ।

"नारी वा विधवा वाऽपि सपुत्रा पुत्रवर्जिता ।
सभर्त्तृका सपुत्री वा कुर्याद् व्रतमिदं शुभम् ।।"

इति वचनात् । पारणं तु पौर्णिमान्ते कार्यम् । अत्र विशेषो निर्णयामृते आदित्यपुराणे--

"ज्येष्ठे मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः ।
सोऽश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ।।" इति ।

विष्णुरपि--

"ज्यैष्ठी ज्येष्ठायुता चेत्तस्याच्छत्रोपानहदानेन[3] नरो नराधिपत्यमाप्नोतीति ।

इयं च रौच्यमन्वादिः । कौर्मकल्पादिश्च—"इयमेव योगविशेषेण महाज्यैष्ठी" । तथा च गार्ग्यः:--

"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्येष्ठमासस्य महाज्यैष्ठी प्रकीर्तिता ।।"

ऐन्द्रज्येष्ठाप्राजापत्यरोहिणीप्रकारान्तरेणापि महाज्येष्ठीमाह । स एव—

"वृषे वा मिथुने भानौ जीवचन्द्रौ तथोदये ।
पौर्णमासी गुरोर्वारे महाज्येष्ठी प्रकीर्तिता ।।"

---

[1] द्वादश्यां रजनी मुके व्रतं त्रिरात्रमुद्दिश्येत्युपक्रम्यांते उपसंहृते, ज्येष्ठे मासि सिते पक्षे इत्यन्तोऽधिकः 'ख' पाठः ।

[2] सम्पत्तिरिति ख पाठः ।

[3] छत्रोपाहप्रदानेन इति ख पाठः ।

उदभं पूर्वाषाढा । अथाषाढी । आषाढशुक्लचतुर्दश्यामुपोष्य पूर्णिमायां हरिपूजा कार्या । तदुक्तं निर्णयामृते ब्रह्मपुराणे--

"चतुर्दश्यामुपोष्याथ पौर्णमास्यां यजेद् हरिम् ।" इति ।

अस्यामेव च पूर्वाषाढायुतायामन्नदानं कुर्यात् । तथा च विष्णुः

आषाढयामाषाढायुक्तायामन्नपानादिदानेन तदेवाक्षयमाप्नोतीति ।

अस्यामेव कोकिलाव्रतारंभः तदुक्तं हेमाद्रौ भविष्ये---

"आषाढपौर्णमास्यां तु सन्ध्याकाले ह्युपस्थिते ।
संकल्पयेन्मासमेकं श्रावणं प्रत्यहं ह्यहम् ।।"

इति भविष्योक्तेः तत्र सायाह्ने पूजोत्तरं [1]प्रदोषे नक्तव्रतत्वात्सायाह्नव्यापिनी ग्राह्येति निर्णयसिन्धुकारादयः । प्रदोषव्यापिनीति कृत्यरत्नावल्याम् । सन्ध्याव्यापिनीति मयूखादौ । [2]दिनद्वये तत्त्वे परा प्रदोषव्यापिनी ग्राह्येति कृत्यरत्नावल्याम् । अस्यां शिवशयनमुक्तम् हेमाद्रौ वामनपुराणे—

"पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे ।
वैय्याघ्रे च जटाभारं समुद्ग्रथ्या हि वर्ष्मणा ।।" इति ।

इयं रुद्रव्रतत्वात्पूर्वविद्धा ग्राह्या । प्रदोषव्यापिनीति निर्णयसिन्धौ । अत्र विष्णुशयनमप्युक्तम् । प्रागेकादशीप्रकरणे । अत्रैवाषाढीश्वरयात्रा पूजा चोक्ता काशीखण्डे--

"उदीच्यां भारभूतेशमाषाढीशं समर्चयेत् ।
आषाढ्यां पंचदश्यां वै न पापैः परितप्यते ।
कृत्वा सांवत्सरीं यात्रां अनेन जायते नरः ।। इति ।

अस्यां किंचिद्दानमावश्यकम । तदुक्तमयोध्याकाण्डे भरतशपथेषु---

"आषाढी कार्तिकी माघी तिथयः पुण्यसम्भवाः ।
अप्रदानवतो यान्तु यस्यार्योऽनुमते गतः ।।" इति ।

इयमेव क्षौरव्यासपूजादौ त्वौदयिकी त्रिमुहूर्त्ता ग्राह्या ।
"त्रिमुहूर्त्ताधिकं ग्राह्यं पर्वक्षौरप्रणामयोः ।।" इति ।

---

[1] नक्तविधानात् इति ख पाठः ।

[2] उक्तपाठः ख पाठे नास्ति ।

विश्वेश्वरपद्धतावुक्तत्वात् । कृत्यरत्नावल्यादौ तु मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तादृशी चेत्परंवेत्युक्तम् । अस्यामेव दिग्विशषे वायुसचारे फलविशेष उक्तो ज्योतिः शास्त्रे .–

“आषाढ्यां भास्करास्ते सुरपतिनिलये वातिवाते सुवृष्टिः
सस्यार्धं सप्रकुर्याद्यदि दहनदिशो मंदवृष्टिर्यमेन ।
नैर्ऋत्यामन्ननाशो वरुणदिशि जलं वायुकोणे प्रवायुः
कौबेर्यां सस्यपूर्णा सकलवसुमती तद्वदीशानवायौ ॥

इयं मन्वादिः । अथ श्रावणपौर्णिमायामुपाकर्म । तत्र बह्वृचानां तावदुपाकर्मकालं प्राहाऽऽश्वलायनः––

“अथातो व्यायोपाकरणमोषधीनां प्रादुर्भावे ।
श्रवणेन श्रावणस्य पंचम्यां हस्तेन वेति ॥

ओषधीनां प्रदुर्भावे [1]अरुणोदये श्रावणसम्बन्धिश्रवणे श्रावणसम्बन्धिन्यां हस्तयुक्तपंचम्यां[2] हस्ते वा कर्त्तव्यमिति व्याख्यातारः ।” यजुर्वेदिनां कालमाह पारस्करः —

“अथातोऽध्यायोपाकर्म श्रवणेन श्रावण्याम् ।
पौर्णमास्यां श्रावणस्य पंचम्यां हस्तेन वेति ॥

बौधायनः —

श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य ।
छन्दांस्यधीयीतेति छन्दोगविषये गार्ग्यः ॥
“सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्ने विचरेद् बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्वच्छन्दसाम् ।
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्निकम् ॥”

इति सिंहे रवावित्युपाकर्मणापि सम्बन्धः[3] । अथर्ववेदिनां काल उक्तः कौशिकः गृह्ये––

---

१. अङ्गुरोदये इति ‘ख’ पाठः ।

२. केवल पञ्चम्यां हस्ते वा इति ख पाठोऽधिकः ।

३. सम्बन्ध्यते इति ‘ख’ पाठः ।

"अथ वेदस्याध्ययनविधिं वक्ष्यामः ।
श्रावण्यां प्रौष्ठपद्यां वोपाकृत्यार्धपंचमासानधीयीरन् ।।
अर्धमासं वोपाकृत्य क्षयेरन् ।
त्र्यहमुत्सृज्य आरम्भः श्रावण्यामुक्तः 'पौष्यामुत्सर्गं' ।." इति ।

अत्रैवं व्यवस्था—बह्वृचैरौषधिप्रादुर्भावे सति शुक्लप्रतिपदादि श्रावणमासस्य श्रवणनक्षत्रे उपाकर्म कर्त्तव्यम् । यजुर्वेदिभिः पर्वणि कार्यम् । तत्र तैत्तिरीयै औदयिके पर्वणि कार्यम् ।

'पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते ।।"

इति गार्ग्योक्तेः ।

"धनिष्ठा प्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ।।

इति गृह्यपरिशिष्टवाक्ये सामान्येन श्रुताऽपि यजुः शब्द एतद्वचनानुरोधेन तैत्तिरीयकपरः । अतो वाजसनेयिभिः 'श्रावणी दुर्गनवमी'ति वचनात्पूर्वविद्धपौर्णमास्यामिदं कार्यमिति हेमाद्रिमदनपारिजातादयः । मदनरत्ने तु—

"पर्वण्यौदयिके कुर्यु" रिति वाक्ये तैत्तिरीयकपदं सर्वयजुर्वेद्युपलक्षणार्थम् ।

तेन याजुषाः—"सर्वेप्यौदयिके पर्वणि कुर्युः, श्रावणी दुर्गानवमीति वचनं तु कुलधर्मव्रतादिविषयमित्युक्तम् । तत्रोपलक्षणत्वेऽ[1]मान्ताभावाद्धेमाद्रिमताद्यवस्थैव युक्तेति निर्णयसिन्धुमयूखस्मृतिकौस्तुभादौ । छन्दोगैस्तु–सिंहस्थे सूर्ये हस्तयुक्तायां श्रावणशुक्लपञ्चम्यां केवलपंचम्यां वा हस्तयुक्ते श्रावणशुक्लतिथ्यन्तरे वा कार्यम् । "बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते" इति वचनात् । यजुर्वेदिभिस्तु श्रावण्यसम्भवे येषां गृह्ये श्रावणहस्तपंचम्यावुक्ते, तैस्तत्र कर्त्तव्यम् । तयोरप्यसम्भवे भाद्रपदपौर्णमास्यां तद्गतहस्तपंचम्योर्वा कार्यम् । येषां गृह्ये तेनोक्तेस्तैर्भाद्रपद्येव ग्राह्या ।

"श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधिः ।
युक्तश्छन्दांस्यधीयीत मासान् [2]विप्रार्धपंचमान् ।।"

इति मनुवचनात् ।

"संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते ।
उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिः ।।"

---

१. भानाभावात् इति 'ख' पाठः ।
१. विप्रो र्धपञ्चमान् इति ख पाठः ।

इति वचने वाजसनेयिग्रहणं येषां गृह्ये पंचमी श्रुता तेषां उपलक्षणं, संक्रान्त्यादिग्रहणं च सूतकादिसंभावनाया अप्युपलक्षणं संक्रान्तौ ग्रहणे वापि सूतके मृतके च वा

"ग्रहणस्नानं न कुर्वीत नारदस्य वचो यथो यथा ।
अथ चेद्दोषसंयुक्तपर्वणि स्यादुप्रक्रिया ।
दुःखशोकामयग्रस्ता राष्ट्रे तस्मिन् द्विजातये ॥"

इति स्मृतिकौस्तुभे । सूतकादावपि तन्निषेधात् । बौधायनीयैस्तु श्रावण्यसम्भवे वार्षिकसमाख्यां बाधित्वा आषाढ्यामेव कर्त्तव्यम् । श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य छन्दांस्यधीयीतेति बौधायनवचनात् ।

"सामगानां तु सिंहार्के हस्तस्य ग्रहसंक्रति ।
दुष्टत्वे तूपाकर्म लुप्यते नात्र संशयः ॥"

अथर्ववेदिभिः श्रावण्यसम्भवे प्रौष्ठपद्यां कार्यम् । ग्रहसंक्रान्तियोगश्चोपाकर्मसम्बन्धिन्यहोरात्रे भाव्यर्द्धरात्रात्पूर्वं नक्षत्रपर्वणोर्विद्यमानस्तयोर्दूषको न त्वर्धरात्र्यात्परस्ताद्विद्यमानः । तथातीतादर्धरात्रात्परतो विद्यमानोऽपि दूषको न तत्पूर्वः । नाप्युपाकर्मांगभूततिथि नक्षत्रापेक्षया पूर्वोत्तरकालीने तिथ्यन्तरे नक्षत्रान्तरे वा विद्यमानः ।

"अर्धरात्रादधस्ताच्चेत् संक्रान्तिग्रहणं तथा ।
उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ॥"

इति गार्ग्यवचनाद्य

अर्धरात्रादर्वाक्तु ग्रहः संक्रान्तिरेव च ।
नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेऽपि वा ॥'

इतिशास्त्रान्तराच्च । "बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्ति वर्जितः" इत्यादौ श्रवणादि समानाधिकरण्येन ग्रहणादि-पर्युदासश्रवणाच्च । तेन चतुर्दशी प्रतिपदोः संक्रमणे उत्तराषाढधनिष्ठादौ च ग्रहणे संक्रान्तौ वा पर्वणि श्रवणे चोपाकर्म कार्यमेव । यानि तु

"त्रयोदश्यादितोवर्ज्यं दिनानां नवकं ध्रुवम् ।
मंगल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ॥"
तथा द्वादश्यादि तृतीयान्तो वेध [1]दुरग्रहे स्मृतः ।

---

[1] वेध इन्दुग्रहे स्मृतः इति 'ख' पाठः ।

"एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्तितः ।
खण्डग्रहे तयोः प्रोक्त उभयत्र च दिनत्रयम् ।।"

इत्येवमादीनि पौर्णमासी व्यतिरिक्तदिनानामपि सदोषतत्वप्रतिपादकानि वचनानि तान्युपाकर्मादिव्यतिरिक्तकर्मविषयाणि—

नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च ।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ।।"

इति वाक्येनोपाकर्मणि वेधदोषाभावस्योक्तत्वात् पर्वणि ग्रहणे सति पूर्वं त्रिरात्रादिवेधाभावं वक्तुमिदं तेन पर्वणि ग्रहणेऽपि चतुर्दश्यां श्रवणं कार्यमिति हेमाद्रिः । यदा तु गौणकालेऽप्योषधिप्रादुर्भावाभावो ग्रहसंक्रान्तियोगो वा निमित्तान्तरेण केनचिदतिपत्तिर्वाभवति, तदा वर्षर्तुमध्ये यदाकदाचित्कार्यं, न तु श्रावणसम्बन्धनियमः । तदुक्तं शौनकेन—तद्वार्षिकमित्याचक्षत इति । वर्षासु भवं वार्षिकमित्यर्थः । अतएव बह्वृचकारिकायाम् —

"अवृष्ट्यौषधयस्तस्मिन् मासे तु न भवन्ति चेत् ।
तदा भाद्रपदे मासि श्रवणेन तदिष्यते ।।"

इति गोभिल । प्रौष्ठपदीं हस्तेनोपाकरणमिति प्रौष्ठपदीं प्राप्येति शेषः । यत्तु—

'वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ ।
उपाकर्म न कर्त्तव्यं कर्त्तव्यं सिंहयुक्तके ।।"

इति स्मृत्यन्तरवचनम् । तन्नर्मदोत्तरभागविषयम् ।

"नर्मदोत्तरभागे तु कर्त्तव्यं सिंहसिंहयुक्तके ।
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे ।।"

इति वचनात् कथं तर्हि नर्मदोत्तरभागगतानां शिष्टानां कर्कटस्थे रवावुपकर्मानुष्ठानम् । अत्र केचित्–अस्य वचनस्य सामगविषयत्वस्यादेतस्य वचनस्य प्राच्यग्रन्थेषु दाक्षिणात्यप्राचीननिबंधेषु चादृष्टत्वादनाकरत्वमाहुः । [1]एतच्च गुरुशुक्रास्तादावपि कार्यम् ।

"उपाकर्मोत्सर्जनं च पवित्रदमनापणम् ।"

---

[1] एतच्च गुरुशुक्रास्तादावपि कार्यमित्यारभ्य त्वाष्ट्र ऋक्ष समन्वितश्रावणं कर्म कुर्वीरन् ऋग्यजुसामपाठका इत्यन्त पाठः ख पाठेऽनुपलब्धः ।

इति दमनारोपे लिखितवचनात्

यज्ञोपवीतं कर्त्तव्यं श्रावणे गुरुशुक्रयोः ।
मौढ्येऽपि वार्द्धके बाल्ये नित्यवत्कर्मणोऽपि तम् ।।”

इति स्मृतिसारसमुच्चयाच्च । प्रथमारंभस्तु न भवति—

“गुरुभार्गवयो मौढये बाल्ये वा वार्द्धकेऽपि वा ।
तथाधि माससंसर्पमलमासादिबुद्धिजाः ।
प्रथमोपाकृतेर्न स्यात्कृतं कर्मविनाशकृत् ।।”

इति संग्रहवचनात । अत्रादिशब्देन सिंहस्थगुर्वादिग्रहणम् । प्रथमारंभे वृद्धिश्राद्धं कुर्यादिति नारायणवृत्तौ । द्वितीयादिप्रयोगोऽप्यधिमासे न कार्यः ।

“उपाकर्मोत्सर्गश्च प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ परे कार्या वर्जयित्वा तु पैतृकम् ।।”

इति ज्योतिपराशरोक्तेः ।

“उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि ।
अभिषेकादि वृद्धीनां न तूत्कर्षो युगादिषु ।।”

इति कात्यायनोक्तेश्च । यत्तु दशहरासु नोत्कर्ष इति ऋष्यशृगवचनं तत्सामगविषयम् । तेषां सिंहार्कोपजीवनेन विहितस्योपाकर्मणोऽसम्भवात् । एतानि च हस्तश्रवणपर्वाणि दिनद्वयेऽपि कर्मकालव्याप्तावव्याप्तौ चौदयिकानि ग्राह्याणि । तदुक्तं गृह्यपरिशिष्टे—

“धनिष्ठाप्रतिपद्वेधश्च षड्घटिकात्मको ज्ञेयः ।”

“वेधः षड्घटिको ज्ञेयः” इति स्मरणादिति मदनपारिजातोक्तत्वात् । त्वाष्ट्रऋक्षसमन्वितं श्रात्रणं कर्म कुर्वीरन् ऋग्यजुः सामपाठका इति गृह्यपरिशिष्टात् । कर्मणो धनिष्ठादियुतत्वं, धनिष्ठायुते श्रवणे प्रतिपद्युक्तपौर्णमास्यां चित्रायुते हस्ते यथाक्रममनुष्ठानात् औदयिकानि च पर्वादीनि प्रातः सगवात्मक—षण्मुहूर्त्तव्यापीनि ग्राह्याणि ।

“श्रावण्यां प्रोष्ठपद्यां वा प्रतिपत्षण्मुहुर्त्तकैः ।
विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ।।”

इति निगमवचनात् । पर्वग्रहणं हस्तश्रवणयोरप्युपलक्षणम् । अतएव पृथ्वीचन्द्रोदये—

इति गार्ग्यवचनं लिखित्वा—

"उदये संगवस्पर्शे श्रुतौ पर्वणि चार्कभे।
कुर्युर्नभस्युपाकर्म ऋग्यजुः सामगाः क्रमात् ॥"

इति वचनान्तरमपि लिखितम्। निर्णयसिन्धौ तु—

"उदयव्यापिनित्वेव विष्णवर्क्षे घटिकाद्वयम्।
तत्कर्म सफलं ज्ञेयं तस्य पुण्यन्त्वनन्तकम् ॥"

इति गार्ग्यवचनविरोधादेतानि वचनानि प्राशस्त्यपराणीत्युक्तम्। परमार्थस्तु बहूनां वचनानां प्राशस्त्यपरत्वस्यानुचितत्वादेकस्योदयव्यापिनो गार्ग्यवचनस्यैव वैश्वानराधिकरणन्यायेन षण्मुहूर्तात्मककालस्तुतिद्वारा षण्मुहूर्त्तात्मकपूर्वोक्तकालस्तावकत्वे युक्तमिति प्रतिभाति[1]। संगवैकदेशव्याप्तिः प्रतीयते। निगमवाक्ये तु षण्मुहूर्त्तक इति पूर्णभागद्वयव्याप्तिरपि गार्ग्यवचनात्प्रतीयते। एषां वचसां यथा श्रुतार्थपरत्वे संभवति नान्यतरस्यावयुत्या पृथक्कृत्यनुवादत्वं वक्तुमुचितम्। नापि विकल्पपरत्वं तस्याष्टदोषशास्त्रद्वयप्रामाण्याद्विकल्पस्वीकारेऽन्यतरानुष्ठानेऽन्यतराप्रामाण्येऽष्टौ दोषाः। यथा व्रीह्यनुष्ठाने व्रीहीणामस्वीकृतप्रामाण्यपरिग्रहस्वीकृताप्रामाण्यपरित्यागरूपं दोषद्वयं, यवानां तु स्वीकृतप्रामाण्यपरित्यागास्वीकृताप्रामाण्यपरिग्रहरूपं दोषद्वयं मिलित्वा दोषचतुष्टयमेवं यावानुष्ठानेऽप्यूहम्। दुष्टत्वादनेकश्रुतिकल्पनाप्रसंगाच्च। किन्तु येषां शाखिनां षण्मुहूर्त्तसाध्यमेवोपाकर्म तान्प्रति षण्मुहूर्त्तव्याप्तिरेव ग्राह्यत्वनियामिका। एवमितरे अतिव्याप्ती तच्छाखिनां प्रतिग्राह्यत्वनियामिके बोध्ये।

अतएव स्फुटं

स्मृत्यर्थसारोक्तिस्तिथिखण्डे—

सत्युदयव्यापिनीप्रयोगपर्याप्ततिथिरुपाकरणे।

एवं च नोक्तवचनेषु क्वापि स्वार्थत्यागः। नाप्यनेक श्रुतिकल्पनाप्रसक्तिः। सर्वेषां कर्मकालव्याप्तिशास्त्रप्रपञ्चवचनानरूपत्वादिति। सामगानान्त्वपराह्णोपाकर्मिणां वचनात्तत्कालव्यापिनमपि पूर्वेहस्तं बाधित्वोत्तरदिन एव तदनुष्ठानम्। यदा पूर्वदिने त्रिमुहूर्त्ताऽधिका वा उत्तराषाढा उपरिष्टाच्च श्रवणः। परदिने च

---

[1] स्मृतिकौस्तुभे तु पृथिवीचन्द्रोदयोदाहृतवचने संगवस्पर्शं इति स्पर्शग्रहणात् इत्यन्तोऽधिकः ख पाठः।

क्षयवशादुदये नास्ति, तदा पञ्चम्यादौ कार्यम् न तु पूर्वविद्धे श्रवणे न हि मुख्याभावे निषिद्धमिश्रग्रहणं सम्भवति । पंचम्यादिकालत्रयासम्भवे तूत्तराषाढा विद्धमपि-ग्राह्यम् । एवं पूर्वापि गुणलोपे तु मुख्यस्येति न्यायात् इदं चोपाकर्म दैवकर्मत्वा-त्पूर्वाह्ण एव कार्यम् । भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव त्विति प्रचेतो वचनात् छन्दोगैस्त्वपराह्णे कार्यम् । पूर्वोक्तगार्ग्यवचनात्

"अध्यायानामुपाकर्म कुर्यात्तन्नालेऽपराह्णिके ।
पूर्वाह्णे तु विसर्गः स्यात् इति वेदविदो विदुः ॥"

इति गोभिलोक्तेश्च । प्रयोगपारिजाते तु सर्वेषामापराह्णिकमेवोक्तम् । एतच्च गुरुशुक्रास्तादावपि कार्यं,

"उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ।"

इति दमनारोपे लिखितवचना

"यज्ञोपवीतं कर्त्तव्यं श्रावणे गुरुशुक्रयोः ।
मौढ्येऽपि वार्द्धके बाल्ये नित्यवत्कर्म नोदितम् ॥"

इति स्मृतिसारसमुच्चयाच्च । प्रथमारम्भस्तु न भवति । गुरुभार्गवयोर्मौढ्ये बाल्ये वार्धकेऽपि वा

"तथाऽधिमाससंसर्पमलमासादिषु द्विजाः ।
प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ॥"

इति संग्रहवचनात् । अत्रादिशब्देन सिंहस्थगुर्वादिग्रहणं प्रथमारम्भे वृद्धि-श्राद्धं कुर्यादिति नारायणवृत्तौ द्वितीयदिप्रयोगोऽप्यधिमासे न कार्यः ।

"उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ परे कार्या वर्जयित्वा तु पैतृकम ॥"

इति ज्योतिः पराशरोक्तेः—

"उत्कर्षः कालवृद्धौ स्यादुपाकर्मादि कर्मणि ।
अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिषु ॥"

इति कात्यायनोक्तेश्च । यत्तु दशहरासु नोत्कर्ष इति ऋष्यशृंगवचने तत्सामगविषयम् । तेषां सिंहार्कोपजीवनेन विहितस्योपाकर्मणोऽग्रिमम्[1] । इदं च

---

[1] उपाकर्मणोऽग्रिममासेऽसंभवात् इति ख पाठः ।

ब्रह्मचारिगृहस्थव नप्रस्थानां त्रयाणामपि वर्णानां नित्यं भवति । तथा च गोभिलः—

"उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते ।
धारणाध्ययनांगत्वाद्गृहिणां ब्रह्मचारिणाम् ॥"

इति गोभिलः ।

"उत्सर्जनं च वेदानां उपाकरणकर्म च ।
अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥" इति ।

अत एवोपाकर्मोत्सर्जनयोर्नित्यत्वमित्युपाकर्मकालनिर्णयः । अत्रैव प्रसंगादुत्सर्जनकालोऽपि निर्णीयते । तद् बह्वृचैर्माघ्यां कार्यम्

"अध्यायोत्सर्जनमाघ्यां पौर्णमास्यां विधीयते" इति कारिकोक्तेः ।

गृह्येऽपि—

मध्यमाष्टकायामेताभ्यो देवताभ्योऽन्नेन हुत्वाऽऽप्नोऽभ्यवन्तीति मध्यमाष्टकाग्रहणं षण्मासान्तलक्षणार्थं, तेन तस्याः समीपे माघ्यां पौर्णमास्यामिति वृत्तिकारः । याजुषैस्तु—

"पौषमासे रोहिण्यामष्टकायां वा कार्यम् ।
पौषमासस्य रोहिण्यामष्टकायामथापि वा ॥
जलान्ते छन्दसां कुर्युरुत्सर्गं [1]विधिवद् द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥"

इत्याह । तत्रेयं व्यवस्था । यदा श्रावण्यामुपाकर्म, तदा पौषशुक्लप्रतिपदि प्रौष्ठपद्यामुपाकृतौ तु माघशुक्लप्रतिपद्युत्सर्जनमिति । तथा च स एव—

"श्रावण्यां प्रौष्ठपद्यां वोपाकृत्य यथाविधिः ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपंचमान् ॥" इति ।

अर्धः पंचमो येष्विति व्युत्पत्त्या सार्धचतुरित्यर्थः । यत्तु पंचार्धषष्ठान्वेति ह्यरतिवाक्यन्तदाषाढ्यामुपाकरणे ज्ञेयं । बौधायनास्तु—

"पौष्यां माघ्यां वा कुर्युः पौष्यां माघ्यां वोत्सृजेत्" इति ।

---

२. छन्दसां वहिरिति याज्ञवल्क्योक्तेः, मनुस्तु पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्गः इत्यधिकः 'ख' पाठः ।

तत्सूत्रात् तैत्तिरीयैस्तु पौष्यां कार्यम् ।

"तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत"

इति तत्सूत्रात् । कातीयास्तु भाद्रपदे कुर्युः ।

उत्सर्गश्चेत्तदा तष्यतिथ्यां प्रौष्ठपदेऽपि वेति कात्यायनोक्तेः ।

सामगास्तु–सिंहार्के पुष्ये कुर्युः तथा च सिंहे रवौ त्विति गार्ग्यवचनं पूर्वमुक्तम् । यदा तु सिंहस्थे सूर्ये सति, तन्मध्यस्थहस्तनक्षत्रात्प्राक्पुष्यः कर्कस्थो भवति, तदा कर्कस्थ पुष्य एव सामगैरुत्सर्गं कृत्वा तदुत्तरसिंहार्कहस्ते 'उपाकर्म कार्यम् ।

"मासे प्रौष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदा ।
तदा च श्रावणे कुर्यादुत्सर्गं छन्दसां द्विजः ॥"

इति तत्परिशिष्टोक्तेः । अत्र प्रौष्ठपदश्रावणशब्दौ मीनादिसौरमासाभिप्रायेण छन्दोगानामुत्सर्जनोपाकर्मणोः सौरमास एव विधानात् सर्वैरुपाकर्मदिने कार्यम् ।

पुष्ये तूत्सर्जनं कुर्यादुपाकर्मादिनेऽथवा ।"

इति खदिरगृह्योक्तेः । "स्वाध्यायमधीतेऽब्द" मिति श्रुतेः । श्रावण्यां प्रौष्ठपद्यां वेति पूर्वोक्तनिगमवचनाच्च । अतएवोत्सर्जनकाला अपि खण्डत्वे औदयिकत्वादिनोपाकर्मकालवदेव निर्णेयाः । तेषामपि दैवत्वेन पूर्वाह्णकालत्वात्तथाशिष्टसमाचाराच्च । यत्तु तिथ्यर्के–इदानीन्तनैराश्वलायनैरप्ययमेवोत्सर्जनकाल आद्रियते । तत्र मूलं न जात इत्युक्तम् । तदभ्रान्तिविजृम्भितं स्वयमेव खदिरगृह्यस्य मूलत्वेनोक्तत्वात् । न च गृह्यसूत्राणां तत्तच्छाखीयान् प्रत्येवव्यवस्थितप्रामाण्यकत्वमिति वाच्यम् । अविरोधिनोऽनुकल्पत्वेन पराशाखीयस्यापि ग्राह्यत्वात् एतच्च कर्नद्वयं प्रत्यशब्दं कार्यम् । तदुक्तं हेमाद्रौ कात्यायनेन—

"प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः ।
क्रियते छन्दसान्तेन पुनराप्यायनं भवेत् ॥
आयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः ।
क्रीडमानैरपि सदा हत्तेषां सिद्धिकारकम् ॥" इति ।

अत्र द्विजैरिति त्रयाणामाश्रमिणां त्रयाणामपि वर्णानामधिकारसिद्धिः । यत्तु—"मासान् विप्रोऽर्धपंचमान्" इति शास्त्रे विप्रग्रहणं तद्ब्राह्मणस्येव

स्वतोऽधिकारः क्षत्रियवैश्ययोस्तदन्वारंभमात्रमेवेति ज्ञापनार्थम् । अध्येयमाणो[1]ऽध्याप्यैरन्वारब्ध इत्याश्वलायनसूत्रेऽध्यायकरपरेणाध्येष्यमाणपदेनाध्ययनादिकृतब्राह्मस्यैव स्वतन्त्राधिकारप्रतीते उत्सर्जनात्तरकार्यं मनुराह—

"अत उर्ध्वंन्तु छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदांगानि तुसर्वाणि कृष्णपक्षेषु संपठेत् ।।"

कारिकान्तु[2] विशेषः ।

"अत द्दारम्य षण्मासान् षडंगानि त्वधीयते ।
शुक्ले वेदमधीयीत कृष्णेऽङ्गानीति केचन ।।" इति ।

"यदा तूत्सर्जनदिने भानुभौमवारादिकं तदा मृत्तिकास्नानं कार्यं" एतस्य नैमित्तिकत्वात् । निषेधस्य च नित्यस्नानादौ सावकाशत्वात् ।

"संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां विनोदये ।
स्नानं कुर्वीत मतिमान् तदा श्रुतिस्मृतिविधानतः ।।"

इति हेमाद्रावुक्तेश्च । उपाकर्मोत्सर्जनान्तरं त्रिरात्रं पक्षिणीमहोरात्रं वाऽध्ययनं न कार्यम् । तदुक्तं निर्णयसिन्धौ मिताक्षरायाम्- -

"उपाकर्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रं वाऽनध्याय" इति ।

एतच्च कर्नद्वयमध्येष्यमाणोऽध्याप्यैरन्वारब्ध इति सूत्रात्सशिष्यत्वे तदधिकारिकस्य कर्मण आचार्याग्नौ नान्यस्याग्नावन्यो जुहुयानिति निषेधात्कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वत इति कारिकोक्तेश्च लौकिकाग्नावेव कर्त्तव्यम् । शिष्याभावे तु—

"अध्यायोपाकृतिं कुर्यात्तत्रोपासनवह्निना"

इति वचनात्स्मार्त्ते इति निगर्वः । उपाकर्मांगभूतस्नाने नदीनां रजो दोषो नास्तीत्याह वसिष्ठः—

"उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ।।"

इत्युत्सर्जनम् । अथात्रैव प्रसंगान्नदीनां रजो दोष उच्यते । तत्र कर्कसंक्रान्त्यनन्तरं महानद्यस्त्रिदिनं रजस्वलाः । तथा च कालादर्शे भविष्ये—

---

[1] अध्येष्यमाणः इति ख पाठः ।
[2] कातीयगृह्यकारिका-रेणुदीक्षितकृतेति बोध्यः ।

"आदौ कर्कटके देवि ! महानद्यो रजस्वलाः ।
त्रिदिनं वा चतुर्थेऽह्नि शुद्धा स्युर्जाह्नवी यथा ॥"

अत्र च जाह्नवी यथेति शुद्धत्वमात्र दृष्टान्तोऽयं न तु तस्या दोषशंकाऽपि

"गंगा च यमुना चैव प्लक्षजाता सरस्वती ।
रजसा नाभि भूयन्ते ये चान्ये नदसंज्ञिताः ॥"

इति देवलवचनात् । महानद्यश्च ब्राह्मे—

"गोदावरी भीनरथी तुंगभद्रा च वेणिका ।
तापो पयोष्णो विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥
भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः ॥
द्वादशैता महानद्यो देवर्षिक्षेत्रसम्भवा ।"

इति वेणिका कृष्णा । यत्तु—

"प्रथमं कर्कटे देवि ! त्र्यहं गङ्गा रजस्वला"

इति वचनं, तद्गोदावरीपरम् । अन्तर्गतरजोविषयमित्यन्ये—

"गंगाधर्मद्रवः पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोदोषाः सर्वावस्थासु चामलाः ॥"

इति निगमोक्तेः । तीरवासिनां तु रजोदोषो नास्ति । न तु तत्तीरवासिनामिति निगमोक्तेः । गाङ्गजलयोगे रजो दुष्टमपि जलं ग्राह्यमित्युक्तं मात्स्ये

"गंगाम्भसा समायोगाद्दुष्टमप्यम्बुपावनम्"

इति नदानाह देवलः—

"शोणसिंधुर्हिरण्याख्य कोकिलोहितघर्घराः ।
शतद्रुश्च नदाः सप्त पावनाः परिकीर्त्तिताः ॥" इति ।

यस्तु

"सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
न स्नानादीनि कर्माणि तासु कुर्वीत मानवः ॥" इति ।

सिंहावधि रजोदोषः । यश्च—

“यावन्नोदेति भगवान् दक्षिणाशाविभूषणम् ।
तावद्रजोवहा नद्यः करतोयाः प्रकीर्तिताः ।।”

इत्यगस्त्योदयावधिरजोदोषः, स क्षुद्रनदो परः ।

“करतोयाः स्वल्पतोयः क्षुद्रनद्यस्तूक्ताः”

स्मृतिसंग्रहे—

“चतुर्हस्तो धनुर्दण्डः सहस्राण्यष्टौ तु गतिर्यासां न विद्यते ।
न ता नदीः शब्दवहागर्त्तास्ते परिकीर्त्तिताः ।।”

आपदित्वाऽऽह कात्यायनः —

“याः शोषमुपगच्छन्ति ग्रीष्मे कुसरितो भुवि ।
तासु प्रावृषि न स्नायादपूर्णे दशवासरे ।।”

एवं नूतनकूपादिजलेऽपि दशाहमाह याज्ञवल्क्यः ।

“अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
भूमेर्नवोदकं चैव दशरात्रेण शुद्ध्यति ।।” इति ।

एतच्च कलौ निषिद्धम् । नवोदके दशाह चेति कलिवर्ज्येषूक्तेः । क्वचित् त्वदोषमाह व्याघ्रपादः—

“अभावे कूपवापीनामनपायि पयोभृताम् ।
रजोदुष्टेऽपि पयसि ग्रामभोगी न दुष्यति ।।” इति ।

गौडास्त्वन्येनापि समुद्धृते इति द्वितीयपादे पाठः । तेनोद्धृते न दोषः । तथा च तासु स्नानं नेत्याहुः । अस्यामेव रक्षाबन्धनमुक्त हेमाद्रौ भविष्योत्तरे—

“सम्प्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये ।
स्नानं कुर्वीतमतिमान् श्रुतिस्मृतिविधानतः ।।
ततो देवानृषींश्चैव तर्पयेपर्वमम्भसा ।
उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम् ।।
कुर्वीत ब्राह्मणैः सार्धं वेदानुद्दिश्य शक्तितः ।”

उद्दिश्य संकीर्त्य

"शूद्राणां मंत्ररहितं स्नानं दानं च शस्यते ।
ततोऽपराह्णसमये कुर्यात्पोटलिकां[1] शुभाम् ॥"

कारयेच्चात्र[2] निषेधाच्च

"त्रयोदश्यादितोवर्ज्यं दिनानां नवकं ध्रुवम् ।
मांगल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ॥"

इति निषेधस्त्वनियतकालीनकर्मपरः । अन्यथा होलायां कागतिः ? अतएव—

"नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च ।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥"

इति नियतकालीने तदभाव इति दिक् । यदा परेद्युस्त्रिमुहूर्त्तं पर्वं पूर्वेद्युस्त्रिमुहूर्त्तं चतुर्दश्युत्तरं पर्वं तदोपाकर्मणः परत्रानुष्ठानेऽप्यपराह्णकालानुरोधेन पूर्वत्रैव रक्षाबन्धनम् । भद्रान्ते, न तु परत्र । उपाकर्मोत्तरत्वस्य पूर्णतिथावार्थिकत्वात् । अत्र च सर्वेषामप्यधिकारः ।

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः ।
कर्त्तव्यो रक्षिकां बन्धो द्विजान् संपूज्य यत्नतः ॥"

---

[1] पोटलिकां इति ख पाठः ।

[2] कारयेच्चाक्षते तद्वत् सिद्धार्थें हेमचर्चिताम्, वस्त्रैः विचित्रैर्कार्पासैः क्षौमैर्वामलवर्जितैः । विचित्रवस्तु प्रथितां स्थापयेत् भाजनोपरीति, अत्र पूर्णिमापराह्णव्यापिनी ग्राह्या । ततोऽपराह्णसमये कुर्यात् पोटलिकां शुभाम् इत्युक्ते दिनद्वये तद्व्याप्तौ पूर्वा ग्राह्या । श्रावणीदौर्गनवमीति वृहद्यमवचनात् । अत्रोपाकर्मानन्तर्यस्य पूर्णातिथावार्षिकस्यानुवादो न तु विधिः । अनङ्गत्वेन गौरवात्, प्रयोगविधिभेदेन क्रमायोगाच्छूद्रादौतदयोगाच्च, तेन परेद्यु उपाकरणेऽपि पूर्वेद्युरपराह्णे तत् करणं सिद्धम् । स्मृतिकौस्तुभे स्वौदयिकी ग्राह्या । पौर्णमास्यां दिनोदय इति उपक्रमात् उपाकर्मोपलक्षितोत्तरकालता प्रतीतेश्चेत्युक्तम् । इदं रक्षाबन्धनं भद्रायां न कार्यम् । भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुना तथा । श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनीति वचनात् । तत्सत्वे तु रात्रावपि तदन्ते कुर्यात् इति निर्णयामृते । नियतकालत्वात् भद्रावर्ज्यग्रहणदिनेऽपीदं कार्यम्, होलिकावत् ग्रहसंक्रान्त्यादौ रक्षानिषेधाभावात् सर्वेषां एव वर्णानां सूतकं राहुदर्शनमिति तत्कालमात्रनिषेधाच्च इत्यन्तः ख पाठः अधिकः ।

इति भविष्यवचनात् । अत्र तलाभ्यंगमाह कौशिकः—

"श्रावण्यां बलिराज्ये च वसन्तस्योदये तथा ।
तैलाभ्यंगो न दुष्येत संक्रान्तिग्रहणादिषु ।।" इति ।

अस्यामेवाश्वलायनैः—रात्रौ श्रवणाकर्मकार्यं श्रावण्यां पौर्णमास्यां श्रावणाकर्मेति तत्सूत्रात् । सर्पबलिरप्यत्रैव कार्या । सामवेदिनामप्यत्रैव श्रवणकर्म सर्पबलिश्च । अथातः [1]श्रवणाकर्मपौर्णमास्यामित्यादिना श्रवणाकर्म विधाय अहरहस्तूष्णीं बलिं हरेत्सायं प्राग्घोमादाग्रहायण्या इति तदीयगृह्यसूत्रात् । अत्र पौर्णमासोसामान्योक्तावपि गृह्यान्तरवशेव पौर्णमासोविशेषे तदुपसंहारसम्भवः ।

कातीयसूत्रेऽपि—

"अथातः श्रवणाकर्म श्रावण्यां पौर्णमास्यामित्यादिनोक्तम्"

तदन्ते सर्पबलिरप्युक्तः । अस्यामेव रात्रौ तैत्तिरीयकैः सर्पबलिः कार्यः । श्रावण्यां पौर्णमास्यां स्थालीपाक इति तत्सूत्रात् । अस्मिन् कर्मद्वयेऽस्तमययोगिनी पूर्णिमा ग्राह्या । अस्तमिते स्थालीपाकं श्रपयित्वेत्यस्तमयकाले विधानात् । "कर्मणो यस्य यः कालः" इति वचनान् दिनद्वये तद्व्याप्तौ वोत्तरदिने विकृतित्वात् । याज्ञिकास्तु पौर्णमासी शब्दस्य पर्वान्त्यक्षणवचनत्वात्पर्वसन्धिदिने रात्रौ श्रवणकर्मानुष्ठानं वदति । इदं च कर्मद्वयं समानतन्त्रकार्यमित्यन्ये । इदं चाभुक्तैव कार्यम् । प्रयागरत्ने-भुक्त्वा कार्यमिति केचित् । अस्य च श्रवणाकर्मणो मुख्यकाले दैवादकरणे लोपः । मुख्यकालेऽपि सकृदेव करणमिति केचित् । यथोक्तमेतत्तुल्यन्यायाष्टकाप्रकरणे कर्केण—सकृत्करण चाभ्याश्रवणादिति । अन्ये त्वीदृशपाकयज्ञानां प्रत्यब्दमावृत्तिं मन्यन्ते । उक्तं च–रेणुकाकारिकायाम्—

अथातः श्रवणाकर्मशास्त्रदृष्ट्या मयोच्यते ।
"श्रावण्यामेव तत्कार्यमभावाद्गौणकालतः ।
वचनात्सूत्रकारस्य सकृदस्य क्रिया भवेत् ।।

एवमेवेतरेषां स्यादावृत्तिर्वा स्मृतेर्बलात् ।
सकृत्करणमिच्छन्ति पाकयज्ञेषु केचन ।
आवृत्तिं केचिदिच्छन्ति तत्रावृत्तिः सतां[2] मता ।।" इति ।

अस्यामेव हयग्रीवयात्रोक्ता कल्पतरौ ब्राह्मे—

---

[1] श्रवणाकर्म इति ख पाठः ।

[2] रेणुदीक्षितकृता–कातीयगृह्यकारिकायामुत्तरार्द्धभागः ।

"श्रावण्यां श्रवणो जातः पूर्वं हयशिरा हरिः ।
जगाद सामवेदं तु सर्वकल्मषनाशनः ।
स्नात्वा संपूजयेत्तं तु शंखचक्रगदाधरम् ।।" इति ।

"अत्रैव सर्वदेवानां पवित्रारोपणमुक्तं निर्णयामृते मत्स्यपुराणे—

"आषाढ्यामथवाऽष्टम्यां चतुर्दश्यामुमापतिम् ।
पवित्रैरर्चयेद्भाद्र्यां श्रावण्यां चेतरान् सुरान् ।।" इति ।

पवित्रारोपणे कुलधर्मव्रतादौ चेयं पूर्वविद्धैव । श्रावणीदुर्गनवमीति वृहद्यमवचनात् ।

अथ भाद्रपदी

अस्यां प्रपितामहात्परास्त्रीनुद्दिश्य श्राद्धं कार्यम् । तदुक्तं हेमाद्रौ ब्राह्मे—

"नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यांतु कर्त्तव्यं वराहवचनं यथा ।।"

इति नान्दीमुखत्वं चोक्तम् । तत्रैव [1]नान्दीमुखानामिति वचने कन्याराशिगते रवौ भूते भाविनि वेत्यध्याहृत्य या पौर्णमासी भाद्रपदी, तस्यां कार्यमिति तेनार्थस्वीकारात् । कृत्यरत्नावलीकाराणां त्वयमाशयः । अध्याहारे उपलक्षणे च मानाभावाद्यथा श्रुतार्थमेव तथा च कन्याराशिगते रवौ या पौर्णमासो भाद्रपद्याश्विनोः वा तस्यां कार्यम् ।

पिता पितामहश्चैव तथैव प्रपितामहः

"त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः ।
तेभ्यः परतरे ये तु ते तु नान्दीमुखाः स्मृताः ।।" इति ।

तच्च प्रत्यब्दमिति शब्दान्नित्यम् । इदं च श्राद्धं भाद्रपदमासान्तर्गते कुत्रचिद्दिने कन्यासंक्रमणे तन्मासमध्यवर्त्तिन्यां कर्त्तव्यमित्युक्तं[2] हेमाद्रौ । कृत्यरत्नावल्यां त्वस्यां कन्यार्कयुक्तायां श्राद्धमुक्तम् । नित्यत्वाच्च, यस्मिन्वर्षे भाद्रपद्याः कन्यार्क योगाभावस्तदाश्वयुज्यां कन्यार्कयुक्तायां कार्यम् । हेमाद्र्युक्तस्य भाद्रपद्युपलक्षणत्वस्यायुक्तत्वादित्युक्तम् । अत्र मातामहपार्वणमपि कार्यम् ।

---

[1] नान्दीमुखानामित्यतः भाद्रपदी आश्विनी वा तस्यां कार्यम् इति पाठः ।

[2] नान्दीमुख–तस्यां कार्यमित्यन्तः ख पाठः क पाठे पूर्व एव लिखितः ।

"पितरो यत्र पूज्यन्ते तत्र मातामहा अपीति धौम्योक्तेः।

न चात्र पितृशब्दोऽजहल्लक्षणाया जनकादिपरः। तस्या अन्याय्यत्वात्। किन्तु वस्वादिभावा पितृरूपसंस्कारनिमित्तः, तत्र रूढत्वात्। न चैवं सपिण्डीकरणोत्तरश्राद्धमात्रे मातामहानामापत्तिः। असति बाधके इष्टापत्तेः। कृत्यरत्नावल्यान्तु–मातामहास्त्वत्र न भवन्ति। धौम्यवचने पित्रादिपार्वण एव तेषां विधानादित्युक्तम्। मयूखेऽप्येवम्। इदं श्राद्धं पौर्णमासीषु सर्वास्विति पूर्वोक्तगार्ग्यवचनात्सपिण्डकं कार्यम्। पक्षश्राद्धं सकृन्महालय वा कुर्वत एवेदं नित्यमिति प्रयोगपारिजाते। अथात्रैव प्रसंगान्महालयापरपक्षश्राद्धं निरूप्यते। तत्र बृहन्मनुः–

"आषाढीमवधीं कृत्वा पंचमं पक्षमाश्रिताः।
कांक्षन्ति पितरः क्लिष्टा अणुमप्यन्वहं जलम् ॥
आषाढीमवधिं कृत्वा यः पक्षः पंचमो भवेत्।
तत्र श्राद्धं प्रकुर्वीत कन्यस्यार्को भवेन्न वा ॥"

अत्राद्यश्लोकोत्तरार्द्धान्नित्यता।

"आषाढ्याः पञ्चमे पक्षे यः श्राद्धं न करिष्यति।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपैष्यति ॥"

इति नागरखण्डेऽकरणे प्रत्यवायश्रवणात् च। काम्यतापि,

"पुत्रानायुस्तथाऽऽरोग्यमैश्वर्यमतुलन्तथा।
प्राप्नोति पंचमे दत्वा श्राद्ध कामांस्तु पुष्कलान् ॥

इति कार्ष्णाजिनिस्मृतेः। अस्य संज्ञाद्वयमुक्तं बृहन्मनुना—

"नभस्यस्यापरः पक्षो यत्र कन्यां व्रजेद्रविः।
स महालयसंज्ञः स्याद्गजच्छायाह्वयस्तथा ।:" इति।

नभस्य इत्यमान्तमासेन पराशरमाधवीये कार्ष्णाजिनिः।

"नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिनेदिने।
नैव नंदादिवर्ज्यं स्यान्न वै निन्द्या चतुर्दशी ॥" इति।

अत्र दिने दिन इति वीप्सया सहिता शुद्धमित्येकवचनात्तत्पक्षगतदिनसमसंख्याभ्यासविशिष्ट एकः प्रयोगो विधीयते। अस्मिन् पक्षे च ब्राह्मणैक्यनियमः। अमायां च दक्षिणादानं षोडशश्राद्धपक्षे तु प्रत्यहं तत् न च ब्राह्मणैक्यमिति बोध्यम्। अत्र षट् पक्षाः, कृष्णप्रतिपदादिशुक्लप्रतिपदं तमिति षोडशतिथिपक्ष

एकः। प्रतिपदादिदर्शान्तमित्यपरे[1] दश-सप्त-पंच तिथिपक्षाः। एकतिथिपक्षश्चेति। तत्र प्रथममाह शाट्यायणिः—

"नभस्य‍ास्यपरे पक्षे तिथिषोडशकस्तु यः।
कन्यागतान्वितश्चेत्स्यात्स: कालः श्राद्धकर्मणि॥" इति।

[2]नभस्य इत्यमा। अत्र चैकदेशवर्त्तिकन्यासंक्रान्तियोगेऽपि सम्पूर्णस्य पक्षस्य प्राशस्त्यम्,

"मध्ये वा यदिवाऽप्यन्ते यत्र कन्यां रविर्व्रजेत्।
सपक्षः मकलः पूज्यः श्राद्धं तत्र विधीयते॥"

इति वृद्धमनुवचनात्। यत्त्वादित्यपुराणे कन्यां गच्छतु या य वेत्युक्तं तत्पक्षोपक्रम इति व्याख्येयम्। न चेदित्यसंदिग्धवचनं शास्त्राणि चेत् प्रमाणं स्युरितिवत्। तिथिषोडशश्चामावास्योत्तरां प्रतिपदमादायेति देवलेनोक्तम्।

"अहः षोडशकं यत्तुशुक्लप्रतिपदा सह।
चंद्रक्षयाविशेषे च साऽपि दर्शात्मिका स्मृता॥" इति।

यत्तु हेमाद्रिणा तिथिषोडशत्वोपपादनायान्यत्प्रकारद्वयमुक्तं, तिथिवृद्धिमभिप्रेत्य पूर्वां पौर्णमासीं गृहीत्वा वेति। तत्राद्योन नित्यवच्छ्रवणाविरोधात्। न द्वितीयः परपक्षश्रुतिविरोधात्। पचदश-दश-सप्त-पच-तिथिपक्षा ब्रह्मपुराणे दर्शिताः।

"अश्वयुक् कृष्णपक्षे तु श्राद्ध कुर्याद्दिने दिने।
त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेववेति॥"

दिने दिन इति वीप्साश्रवणात्पंचदशतिथिलाभस्तिथ्याधिक्येऽपि तत्र श्राद्धावश्यकत्वं च सूचितम् तृतोयो भागस्त्रिभागः। पंचदशतिथ्यात्मकस्य पक्षस्य त्रिभागहीनता चाद्यानां चतसृणां चतुर्दश्याश्च वर्जनात्। एवमर्धत्रिभागपक्षयोरपि चतुर्दशीवर्जनम्। नभस्यस्यापरे पक्षे इति कार्ष्णाजिनिवचनेन प्रतिपदादिपक्ष एव चतुर्दशीवर्जननिषेधादितरपक्षेषु तद्वर्जनप्रतीतेः। नन्दादिवर्जनं त्वितरपक्षेष्वपि न भवति। संख्याहानिप्रसंगात्।

---

[1] पञ्चदशतिथिपक्षोऽन्यः, पञ्चम्यादि अष्टम्यादि दशम्यादि चतुर्दशी वर्जम् दर्शान्तमित्यपरे इति ख पाठोऽधिकः।

[2] वक्त रेखाङ्कितः पाठः 'ख' पाठे नास्ति।

गोविंदार्णवे तु–चतुर्दशीवर्जनमाश्विनकृष्णपक्षातिरिक्तकृष्णपक्षविषयम आश्विनकृष्णपक्षचतुर्दश्यवर्जनं सर्वेषु पक्षेष्वित्युक्तम्। निर्णयसिन्धावपि प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीमिति याज्ञवल्क्यीयवचनमन्यकृष्णपक्षीयचतुर्दशीपरम्। एतत्परत्वेनैव निंद्या चतुर्दशीति विरोधात। सकृन्महालये तु वचनान्निषेध इत्युक्तम्। तदुभयमप्यसम्यक्। नभस्यस्यापरे पक्षे इति वचने प्रतिपदादिपक्षचतुर्दश्यवर्जनप्रतीतेः। एव च त्रिभागहीनपदेनपंचम्यादिपक्षः, अर्धमित्यष्टम्यादिः, अर्धं च पक्षस्यैव। उक्तपक्षयोः पक्षस्यैवभागितयान्वयादत्रापि तथौचित्यात्। त्रिभागमिति दशम्यादिः। कालादर्शेऽपि,

“पक्षाद्यादि च दर्शान्तं पंचम्यादि दिगादि च।
अष्टम्यादि यथाशक्तिः कुर्यादापरपक्षिकम्॥”

पक्षादिः प्रतिपत् दिग्दशमी दर्शान्तमिति सर्वत्र। गौतमोऽपि, अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्पंचम्यादिदर्शान्तमष्टम्यादि सर्वस्मिंश्चेति। केचित्तु–त्रिभागहीनमिति षष्ठ्यादिः पक्षः त्रिभागमित्येकादश्यादिः पंचम्यूर्ध्वं त्वतोप्यतीति विष्णुधर्मोक्तेः। अर्धमितिचैकादश्यादिपक्षस्यार्धं त्रयोदश्यादीत्याहुः। निर्णयसिन्धौ तु––

चतुर्दशीश्राद्धाभावे पंचम्यादिदशम्यादि।
पक्षौ तत्सत्त्वे षष्ठ्याद्यैकादिकौ॥
एवं चतुर्दश्यां श्राद्धाभावे द्वादश्यादिस्तत्सत्त्वे,
त्रयोदश्यादिरिति व्यवस्थेत्युक्तम्।

तच्चियन्त्यम्। चतुर्दशीवर्जनावर्जनयोरन्यनिर्हेतुकवर्जनयोरुक्तौ। अवस्थायां प्रमाणाभावात्। एकदिनपक्षो नागरखण्डे—

“आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे।
तस्यां[1] संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम्॥” इति।

तेषां च पक्षाणां शक्ताशक्तपरत्वेन व्यवस्थेति प्राञ्चः। निर्णयसिन्धौ तु तद्वा च शक्ताशक्तवाचकपदाभावादिदमयुक्तम्। सकृन्महालयपक्ष एवावश्यकः। फलभूमार्थिनान्ये पक्षा अनुष्ठेया[2] इत्युक्तम्। गौडास्तु—“त्रयोदश्यादिपक्ष एव

---

[1] तस्य इति ख पाठः।
[2] अनुष्ठेया इति ख पाठः।

नित्यः तत्रैवर्निदाश्रुतेः । ब्राह्मे एवकारेण तस्यैव पंचमपक्षयोगः । व्यवच्छेदोक्ते-रिति । तन्न । एकस्मिन्नपीत्यनेन विरोधात् । वस्तुततु पक्षादि च दर्शान्तमिति काष्र्णाजिनिवचने यथाशक्तिपदोपादानाच्छक्ताशक्तभेदेन व्यवस्थैव सम्यक् प्रतिभाति । अत्र यद्यपि कन्याराशिविशिष्टपक्षस्य निमित्तत्वं प्रतीयते तथापि—

“आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः ।
कुर्याच्छ्राद्धं तत्र रविः कन्यां गच्छतु वा न वा ।।”

इति अग्निपुराणवचने कन्यासम्बन्धस्तु [1]उपलक्षणत्वेन प्रतीतः कन्यासम्बन्धरहितपरपक्षस्यापि श्राद्धं प्रतिनिमित्तत्वं प्रतीयते । कन्यासम्बन्धश्च प्राशस्त्यप्रयोजकः ।

कन्यागतसवितरि यान्यहानि तु षोडशः ।
ऋतुभिस्तानि तुल्यानीति ब्रह्म पुराणोयवाक्यशेषात् ।।
“पुण्यः कन्यागतः सूर्यः पुण्यः पक्षश्च पंचमः ।
कन्यास्थार्कान्वितः पक्षः सोऽत्यन्तं पुण्य उच्यते ।।

इति शाट्यायनिवचनाच्च । कन्यान्वयश्च सर्वस्मिन्नेव पक्षे तदेकदेशे वा विवक्षितः । यत्र पुनः सर्वथैवानन्वयस्तत्रापि पंचमपक्षमात्रप्राधान्यात्प्रतिपदादिपक्षचतुष्के–क्वचिच्छक्त्यनुरोधाद् ज्ञेयम । अपरपक्षं सकृन्महालयकरणपक्षं नंदादिवर्जनं भवत्येव । तस्यऽत्राप्रवृत्तौ कारणाभावात् । नंदादिवर्जनमाह पृथ्वीचंद्रोदये वसिष्ठः—

“नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु ।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ।।” इति ।

नारदोऽप्याह—

‘न नंदासु भृगोर्वारे रोहिण्यां च त्रिजन्मसु ।
रेवत्यां च मघायां कुर्यादापरपक्षकम् ।।” इति ।

नंदाः प्रतिपत्षष्ठ्येकादश्यः त्रिजन्मान्याद्यदशमैकोनविंशानि नक्षत्राणि । त तु जन्मभं तत्पूर्वोत्तरे चेति निर्मूललक्षितलक्षणप्रसंगात्पूर्वोत्तरनक्षत्रयोर्जन्म-

---

[1] अविद्यमानं सद्व्यावर्तकं उपलक्षणं यथा काकवन्तोदेवदत्तस्यगृहादित्यत्राविद्यमानोऽपि काकोगृहान्तरं व्यावर्तकस्तथाऽविद्यमाना कन्याराशिः पक्षान्तरव्यावर्तकः । इति ख पाठे अधिकः शोध पाठः ।

शब्दवाच्यत्वाभावान्मूलालेखनाच्च। यत्तु कर्त्तुश्च पुत्रदाराणां त्रिजन्मर्क्षाणि वर्जयेदिति क्वचिल्लिखितं वचनं[1] तदेव व्याख्येयम्। कर्त्तुस्तत्पुत्रदाराणां च यानि त्रीणिजन्मर्क्षाणि आद्यदशमैकोनविंशानि तानि वर्जयेदिति। अन्यथा त्रिशब्दस्य बहुवचनस्य च वैवर्थ्यात्। श्लोकसंग्रहे—

"नन्दाश्च कामरव्यार भृग्वग्निपितृकालभे।
गण्डे वैधृतिपाते च पिण्डांस्त्याज्याः सुतेप्सुभिः॥"

अश्वः सप्तमी, कामस्त्रयोदशी, आरो भौमः, अग्निपितृकालभानि कृत्तिकामघाभरण्यः, पातो व्यतीपातः, पिंडदानग्रहणं श्राद्धोपलक्षणम्। एककल्पनालाघवात्। अत्र सप्तमी रविभौमभरणीगंडवैधृतिव्यतीपातेषु मूलवचोऽन्वेष्यम्। वृद्धगार्ग्योऽपि—

"प्राजापत्ये च पौष्णे च पित्रर्क्षे भार्गवे तथा।
यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति॥" इति।

एतच्च सकृन्महालयविषयम्।

"सकृन्महालये काम्ये पुनः श्राद्धेऽखिलेषु च।
अतीतविषये चैव मेतत्सर्वं विचिन्तयेत्॥"

इति पृथ्वी चन्द्रोदये नारदोक्तः। यद्वा सकृन्महालयोऽमावस्यादौ क्रियते, तदैतन्न विचारणीयम्।

"अमापाते भरण्यां च द्वादश्यां पक्षमध्यके।
तिथिं वारं च नक्षत्रं योगं च न विचारयेत्॥"

इति हेमाद्र्युदाहृतसंग्रहवचनात्। इदं च हेमाद्रि पुस्तकेषु न दृश्येत इति मयूखे। अत्र चतुर्दशीभिन्नायां मृततिथिसमानजातीयायां तिथौ निषेधप्रयोजकयुक्तायामपि यावत्सम्भवंशिष्टाः सकृन्महालयश्राद्धं कुर्वन्ति। वचनान्यपि तन्मूलभूतान्याधुनिकग्रन्थेषूपलभ्यन्ते। नागरखण्डे—

"आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे।
मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः।
तस्य संवत्सरं यावत्सन्तुष्टाः पितरो ध्रुवम्॥"

---

[1] तद्यदि साकरं इति अधिकः ख पाठः।

कात्यायनः—

"या तिथिर्यस्य तातस्य मृता हेतु प्रवर्तते ।
सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः ।।"

तथा—

"अशक्तः पक्षमाध्ये तु करोत्येकदिने यदा ।
निषिद्धेऽपि दिने कुर्यात्पिण्डदानं यथा विधिः ।।" इत्यादीनि ।

अत्र मृताहे श्राद्धासम्भवे तिथ्यादिनिषेधोऽत्र विचार्यः । विशेषविधानेन सामान्यप्रवृत्तिनिषेधापवादादिति कौस्तुभे उक्तम् । श्राद्धकल्पलतायान्तु निषेधवचनानां नंदायुगादि मन्वादि मघाभरणीसंक्रान्त्यादि । तन्निमित्तश्राद्धविषयत्वं तत् न तु निमित्तान्तरप्राप्तेषु नित्येषु च निषेधः ।

"तिथिनक्षत्रवारादिनिषेधो य उदाहृतः ।
स श्राद्धे तन्निमित्ते स्यान्नातुषंगकृते ह्यसौ ।।"

इति दिवोदासीये वृद्धगार्ग्योक्तेरित्युक्तम् । मृततिथिसमानजातीयायां महालयापरपक्षश्राद्धविधायकान्येतानि वचनान्यनाकराणि । अतो—

"निषिद्धे यस्मिन् कस्मिन् अपि दिने कार्यम्,
न तु निषिद्धेऽपि मृताहनि" इति बहवः ।

एवं "श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालयः" इति कालादर्शवचनाच्चचतुर्दश्यां मृतस्यापि शस्त्राद्याहतस्य पौर्णमासोमृतस्य वा महालये श्राद्धदिनमाद्यन्यतमं ग्राह्यम् । तदसंभवे तिथ्यादिनिषेधविचारपूर्वकं दिनान्तरं मार्कण्डेयः—

'कन्यागते सवितरि दिनानि दशपंच च ।
पार्वणेनैव विधिना श्राद्धं तत्र विधीयते ।।"

यस्तु—

"विवाहे विहिते मासांस्त्यजेयुर्द्वादशैव हि ।
सपिण्डाः पिण्डनिर्वापं मौंजीबन्धे षडेव हि ।।"

इति विवाहानन्तरं पिण्डदाननिषेधो ज्योतिः पराशरेणोक्तस्यापवादः स्मृतिसंग्रहे—

"महालये गया श्राद्धे मातापित्रोर्मृतेऽहनि ।
यस्य कस्यापि मर्त्यस्य सपिण्डीकरणे तथा ।
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सुतः ।।" इति ।

महालयश्राद्धं चाधिमासे न कर्त्तव्यम् ।

"नभोवाऽथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पंचमः ।।"

इति नागरखण्डात् । पंचमसप्तमत्वे आषाढपूर्णिमातः एतदापरपक्षिकं श्राद्धं मातापित्रोर्मरणे प्रथमाब्दे न कार्यम् । तथा च स्मृतिः--

"अस्थिक्षेपं गया श्राद्धं श्राद्धं चापरपाक्षिकम् ।
प्रथमेऽब्दे न कुर्वीत कृते पितुः सपिण्डने ।।"

अस्यापवादः पूर्वार्द्धे तदेव--

"प्रथमेऽब्देऽपि कुर्वीत यदि स्याद्भुक्तिमान् सुतः ।" इति ।

अत्र सुतपदोपादानात्पुत्रस्यैव ।

"पितृमरणप्रथमाब्दे पितुरापरपक्षिकम् ।
श्राद्धं कृताकृतं पित्रातिरिक्तस्य तु न भवेत् ।।"

एतद्वचनं निर्मूलमिति केचित् । [1]पितृमरणप्रथमाब्देऽपि–पितुरापरपक्षिकं श्राद्धं कृताकृतं कृतेऽभ्युदयोऽकृते प्रत्यवायो नास्ति । इदं च गुर्विणी पतिना पिण्डरहितं कार्यम् ।

"मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।
न जीवत्पितृकः कुर्याद् गुर्विणी पतिरेव च ।।" इति दक्षोक्तेः ।

एतच्च संन्यस्तपितृकादिना जीवत्पितृकेणापि कर्त्तव्यम् ।

"वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति ।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ।।"

इति कातीयोक्तेः । यत्तु कौण्डिन्यवचः—

"दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च ।।"

इति तत्संन्यस्तपितृकाद्यतिरिक्तविषयम् । काम्यश्राद्धपरं वा साग्निकस्य सकृन्महालयश्राद्धममावस्यायामेव ।

"न दर्शे न विना श्राद्धमाहिताग्नेर्द्विजन्मनः"

---

[1] उक्तरेखांकितपाठः ख पाठे नास्ति ।

इति मनुवचनादिति केचित् । कृष्णपक्षे सामान्यश्राद्ध एव दर्शनियम इत्यन्ये । श्राद्धांगतर्पणं तु पक्षश्राद्धे श्राद्धोत्तरं प्रत्यूहम् [1]सकृन्महालये तु परेद्युः । तदुक्तं नारदीये—

"पक्षश्राद्धं यदा कुर्यात्तर्पणन्तु दिने दिने ।
सकृन्महालये चैव [2]तदुक्तं ह्यपरेऽहनि ॥" इति ।

प्रयोगपारिजाते गर्गः—

"कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ।
पितॄणां प्रत्यहं कार्यं निषिद्धेऽपि च तर्पणम् ॥
सकृन्महालयेऽश्वः स्यादष्टको स्वन्त एव हि ।
पक्षश्राद्धे हिरण्ये च अनुव्रज्य तिलोदकम् ॥ इति ।

इदं निषिद्धदिनेऽपि कार्यम् ।

"तिथितीर्थविशेषे च गयायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ॥"

इति स्मृतिरत्नावल्यां वचनात् । इदं श्राद्धं चान्नेनैव कर्त्तव्यम् न त्वामान्नादिना—

"मृताहं च सपिंडं च गयाश्राद्धं महालयम् ।
आपन्नोऽपि न कुर्वीत श्राद्धमासेन कर्हिचित् ॥"

इति स्मृतिदर्पणे गालवोक्तेः यदि केनचित्प्रतिबन्धेन महालयापरपक्षे सकृत्पक्षेणापि श्राद्धं न कृतम् । तदैतदनन्तरं शुक्लपंचमीं यावत् कस्मिंश्चिद्दिने कार्यम् ।

"हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन् ।
पंचम्योरन्तरे कुर्यादुभयोरपि पक्षयोः ॥" इति यमवचनात् ।

अत्रासंभवे तुलासंक्रान्ति यावत्, तत्राप्यसंभवे वृश्चिकसंक्रान्ति यावत् कस्मिंश्चिद्दिने—

तावच्छ्राद्धस्य कालः स्याच्छून्यं प्रेतपुरं तथा ।" इति ब्रह्मपुराणात् ।
"यावच्च कन्यातुलयोः क्रमादस्ते दिवाकरे ।

---

[1] उत्तरेखाङ्कितः पाठ ख पाठे नास्ति ।
[2] परेऽहनि तिलोकवम् इति ख पाठ आधिकः ।

क्रमाच्छ्राद्धस्य कालः स्यादित्यन्वयः । अनेन कन्यापेक्षया तुलाया अनुकल्पत्वमुक्तम् । अत्र कन्यातुलयोरपि कृष्णपक्ष एव ग्राह्यः । सामान्यतः प्राप्तस्य कालस्य परित्यागे हेत्वाभावादिति केचित् । तत्रापि कार्त्तिकामावस्यायां विशेषतः कार्यं "येयं दीपान्विता राजन् ! व्याप्त पंचदशो भुवि । तस्यां दद्यान्न चेद्दत्तं पितृणां वे महालयः ॥" इति भविष्यवचनात् । पंचदशी अमावस्या ख्यातेत्युक्तत्वात् । मुख्यगौणकाले महालयापरपक्षश्राद्धाननुष्ठाने प्रायश्चित्तमुक्तमृग्विधाने—

"दूरो अश्वस्य मंत्रं च दशामासं द्विमासयोः ।
महालयं यदा न्यूनं तदा सम्पूर्णमेति तत् ॥"

इति द्विमासयोः कन्यातुलयोर्महालयश्राद्धं यदाहीनं इत्यर्थः । मंत्रस्तु—

"दुरो अश्वस्य दुरद्गगोरसिदुरो यवस्य सुत इनस्यति ।
शिक्षानुरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं पणीमसि ॥"

इति मंत्रं जपेत् यत्तु जातुकर्ण्यः—

"आकांक्षन्ति स्म पितरः पंचमं पक्षमाश्रिताः ।
तस्मात् तत्रैव दातव्यं दत्तमन्यत्र निष्फलम् ॥" इति ।

तत्फलातिशयहानिपरं 'कन्यां गच्छतु वा नवा' इति तुर्यपदेवापाठः । तेन कन्यायोगे प्राशस्त्यमात्रम् । महालये विशेषमाह देवलः—

"देवाद्यं नैव कुर्वीत देवान्तं नैव कुत्रचित् ।
दैवाद्यं तं हि कुर्वीत श्राद्धं पारणहेतुना ॥" इति ।

आदौ देवा विश्वेदेवा अन्ते देवा महाविष्णुरिति व्याख्यातं निर्णयामृते—

"अतश्च विष्णुप्रीत्यर्थं ब्राह्मणपूजनाद्यत्रावश्यकर्मिति" प्रतीयते ।

अत्र विश्वेदेवास्तावद्धुरिलोचनौ

"अपि कन्यागते सूर्ये काम्ये च धुरिलोचना",

इत्यादित्य पुराणोक्तेः,कृत्यरत्नावल्यां तु—

"पुरुरवार्द्रवसंज्ञकौ विश्वेदेवौ"

यत्तु—

"अपि कन्यागते सूर्ये श्राद्धे तु धुरिलोचनौ"

इत्यादिपुराणवचनं तत्काम्यबुद्धया क्रियमाणमहालयश्राद्धविषयमिति हेमाद्यादयः केचिन्नित्येऽपि महालयश्राद्धे ताविच्छन्ति मह्यं त्वेतन्न रोचते यतो

नात्र महालयपदं श्रूयते किंतु कन्यागते सूर्ये श्राद्ध इत्येव। तत्र किं 'कन्यागते सूर्ये' इतीयमधिकरणसप्तमी। उत निमित्तसप्तमी। आद्ये कन्यागताधिकरणकेषु वार्षिकादिष्वतिप्रसंगः। द्वितीये महालयश्राद्धस्य तन्निमित्तकत्वाभावेन तत्र धुरिलोचनौ न स्याताम्।

"आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः।
श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वा॥
अगतेऽपि रवौ कन्यां श्राद्धं कुर्वीत यत्नतः।
आषाढ्याः पंचमः पक्षः प्रशस्तः पितृकर्मसु॥"

इति जातुकर्ण्यजाबालिवचनाभ्यां महालयश्राद्धस्य केवलपंचमपक्षप्रयुक्तत्वात्। तत्रैव,

"शक्रध्वजनिपाताङ्को यः स्यात्पक्षस्तु पंचमः।
स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते॥
पुत्रानायुर्धनं धान्यमारोग्यं भूतिमेव च।
प्राप्नोति पंचमे दत्वा श्राद्धं कामांस्तथापरान्॥
एतान्यपि हि हिंसन्ति पंचमं यो व्यतिक्रमेत्।
तस्मात् नातिक्रमेद्विद्वान् पंचमे पैतृकं विधिम्॥" इति।

कन्यायोगस्तु प्राशस्त्यार्थः न तु तस्य निमित्तत्वं किं विषयं तर्हीदं वचनमिति चेत् श्रूयतामवधानेन नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ पौर्णमास्यां तु कर्त्तव्यमिति वचनविहिते श्राद्ध कन्याकयुक्तपौर्णमास्या निमित्तत्वेन तत्र कन्यार्कस्यापि निमित्तत्वात्तत्र भवेतां धुरिलोचनौ। यद्वा कन्या संक्रान्तिश्राद्धे भवेतां, न तु कदापि नित्ये महालयश्राद्धे इत्युक्तम्। पित्र्ये क्रममाह वोपदेवः—

"तातां वा त्रितयं सपत्नजननी मातामहादित्रयं,
सस्त्रिस्त्रीतनयादि तातजननी स्वभ्रातरः सस्त्रियः।
तातां वात्मभगिन्यपत्यधवयुग्जायापिता सद्गुरुः,
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणः॥" इति।

तातां वा त्रितयं पित्रादित्रयमात्रादित्रयं च स्मृत्यर्थसारेऽपि महालये मातृश्राद्धपूर्वकं प्रशस्तमिति। अत्र विशेषः स्मृतिदर्पणे गालवेनोक्तः।

"अनेका मातरो यस्य श्राद्धे चापरपक्षिके।
अर्घ्यदानं पृथक् कुर्यात्पिण्डमेकं तु निर्वपेत्॥"

मातामहादित्रयं सस्त्रीति सपत्नीकमिति प्रयोज्यम् तथा च पार्वणत्रयं कार्यम् । उक्तं च श्राद्धहेमाद्रौ--

"महालये गयाश्राद्धे वृद्धौ वान्वष्टकासु च ।
नवदैवत्यमत्रेष्टं शेषं षाट्पौरुषं विदुः ।।" इति ।

विभवे सति तु मातामहाहीनां पृथक् कार्यम् । पूर्वार्द्धं तदेव ।

"ज्ञेयं द्वादशदैवत्यं तीर्थे प्रौष्ठे मघासु च" इति निगमोक्तेः ।

स्त्रीस्वजाया । तनयादिः तनयः पुत्रः आदिना कन्यास्नुषादिः ' तातभ्राता पितृव्यः । जननी भ्राता मातुलः । स्वभ्राता सहोदरोऽसहोदराश्च । पितृव्यस्त्री मातुलानी भ्रातृजायाः–पितृष्वसृमातृष्वसृ-स्वभगिन्योऽपत्यधवयुक्ताः । तेन सापत्यायै सधवायै इति प्रयोज्यम् । एतासु सतीषु न तद्भर्त्रादिर्दानं द्वारलोपात् । जायापिता श्वसुरः । श्वश्रा अप्युपलक्षणम् । अत्र मूलं स्मृतिचन्द्रिकायां ज्ञेयम् । क्रमान्तरे प्रघट्टके स्मृत्यन्तरे । आदौ पिता ततो माता सपत्नजननी तथा । मातामहाः सपत्नीकाः स्वपत्नी तदनन्तरम् । सुतभ्रातृ पितृव्याश्च मातुलाश्च सपत्निकाः ।

दुहिता भगिनी चैव दौहित्रो भागिनेयकः ।
पितृष्वसा मातृष्वसा श्वशुरो गुरुर्थिनः ।।" इति ।

क्रमान्तरं प्रयोगपारिजाते संग्रहे—

"पितृमातृमातामहाः पितृव्यो भ्रातरः सुतः ।
पितृष्वसा मातुलश्च तद् भगिन्यः स्वजामयः ।।
भार्या भगिन्यो दुहिता श्वसुरो भावुकाः स्नुषा ।
शालको गुरुराचार्यः-स्वामीमित्रं यथाक्रमम् ।।" इति ।
"स्वजामयः स्वभगिन्यः भावुको भगिनीपतिः ।"

एतेषां क्रमाणाभाचारात् व्यवस्थेति निर्णयसिंधौ । ऐच्छिको विकल्पं इति मयूखे । पित्रादिभिन्नानां महालये एकोद्दिष्टमेव ।

"उपाध्यायगुरुश्वश्रूपितृव्याचार्यं मातुलाः ।
श्वसुरभ्रातृतत्पुत्रर्त्विक्शिष्यपरिपोषकाः ।।
भगिनीस्वामिदुहितृजौ मातृभगिनी सुताः ।
पितरौ पितृपत्नोनां पितुर्मातुश्च या स्वसा ।।
सखिद्रव्यदशिष्याद्याः तीर्थे चैव महालये ।
एकोद्दिष्टेन विधिना पूजनीयाः प्रयत्नतः ।।" इति हेमाद्रौ पुराणोक्त ।

अत्र प्रत्येकोद्दिष्टं ब्राह्मणभेद इति मुख्यः पक्षः। अशक्तौ चतुर्विंशतिमते एकस्मिन् (ख)

"यस्मिन् ब्राह्मणे सर्वानाचार्यादीन् प्रपूजयेत्।
दशद्वादश वा पिण्डान् दद्यादकरणं न तु।।" इति।

"एकोद्दिष्टक्रमे अत्र सम्बन्धासत्यक्रमः।
तत्तुल्यत्वे मरणक्रमात्तेनाप्यनिर्णये।।"

पाठक्रमादिति बोध्यम। अत्र पर्वणैकोद्दिष्टयोः क्रममाह मरीचिः—

"यद्येकत्र भवेतां चेदेकोद्दिष्टं च पार्वणं।
पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समापयेत्।।"

पुलस्त्यः—

"महालये गयाश्राद्धे गतासूनां क्षयेऽहनि।
तंत्रेण श्रवणं कृत्वा श्राद्धं कुर्यात्पृथक्।।" इति।

यत्तु

"प्रदानं यत्र येत्रेषां सपिण्डीकरणात्परम्।
तत्र पार्वणवत्कुर्यादेकोद्दिष्टं त्यजेद् बुधः।।" इति।

तदेता[1] दृशैकोद्दिष्टविधिना बाधादेतद्व्यतिरिक्तविषयं एकोद्दिष्टस्वरूपमुक्तं याज्ञवल्क्येन—

"एकोद्दिष्टं देवहीनं एकार्घ्यैकपवित्रकम्।
आवाहनाग्नौकरणरणरहितं त्वपसव्यवत्।।" इति।

अत्रैकः पाको वैश्वदेवं तन्त्र पृथग् वा पिंडबर्हिश्चैकमिति स्मृत्यर्थसारे उक्तम्। एकोद्दिष्टेष्वग्नौ करणं न कर्त्तव्यम कर्त्तव्यमिति गृह्यकाराः। अत्र पाणिहोमः पिण्डाश्च द्विजान्तिक इति प्रयोगपारिजाते आचार्यः—

"काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम्।
चतुर्थेषु करे होमः पिण्डाश्चात्र द्विजान्तिके।।" इति।

पार्वणैकोद्दिष्टयोः समानतंत्रत्वे त्वग्निसमीप एव। तत्र विशेषमाह मनुः—

"अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्।
पर्युक्ष्यदभानोस्तोयं यतो ह्याग्निसमो द्विजः।। इति।

---

[1] "विशेषतो महालयादि सम्बन्ध्येकोदिष्ट विधानेन बाधा तद्व्यतिरिक्त क्षयाहविशेषणम्" इति शोधपाठः ख पाठेऽधिकोऽस्ति।

अत्र चाचार्यवचनेन द्विजातिके पिण्डदानं कर्त्तव्यमित्युक्तम् । तदेकोद्दिष्टस्यैव पृथगनुष्ठानविषयम् । पार्वणश्राद्धतंत्रानुष्ठानपक्षेत्वेकत्रपिण्डदानं कर्त्तव्यम् । विधवायास्तु विशेषः स्मृतिसंग्रहे—

"चत्वारि पार्वणानीह विधवायाः सदैव हि ।
ततो मातामहानां च श्राद्धदानमुपक्रमेत् ॥" इति ।

तथा, "श्वश्रूणां च विशेषेण मातामह्यास्तथैव च" इत्यपि क्वचित् । "अशक्तौ षट्दैवत्यं कुर्यात् तस्याः षट्दैवत्ये विशेषः स्मृतिरत्नावल्याम्-"स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यः स्वपितृभ्यस्तथैव च । विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता ॥" इति । विधवा स्वय संकल्पं कृत्वाऽन्यद्वारा कारयेदिति प्रयोगपारिजाते—स्तदपुत्रवतीविषयम् । पुत्रवत्यास्त्वनधिकार एव । अस्मिन् महालये भरण्यां श्राद्धमतिप्रशस्तम् । तदुक्तं मात्स्ये—

"भरणीपितृपक्षे तु महती परिकीर्त्तिता ।
अस्यां श्राद्धं कृतं येन स गया श्राद्धकृद्भवेत् ॥" इति ।

पृथ्वीचन्द्रोदये श्रीधरीये बृहस्पतिः—

"नभस्यापरपक्षस्य द्वितीया यदि वाम्यभे ।
तृतीयाचाग्नितारामिः सहिता प्रीतिदापितु ॥"

इदं पिण्डरहितं कर्त्तव्यम् । तथा च पुलस्त्यः—

"अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
भरणीषु च कुर्वीत पिण्डनिर्वापणं न हि ॥"

पाद्मेऽपि—

"संक्रान्तिषु च सर्वासु पिण्डनिर्वापणादृते" इति ।

अपिण्डकश्राद्धे विशेष माह छागलेयः—

"पिण्डो यत्र निवर्तेत मघादिषु कथंचना ।
संकल्पं तु तदा कार्यं नियमाद् ब्रह्मवादिभिः ॥" इति ।

संकल्पस्वरूपमुक्तं तेनैव—

सं"कल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणम् ।
नावाहनाग्नौ करणे न पिण्डान्वि किरंन च ॥ इति ।

अशक्तया सापिण्डकश्राद्धेकरणेऽप्येवमेव ।

"अशक्त्या पार्वणं श्राद्धं यथावत्कर्त्तुमक्षमः ।
पिण्डाद्यादिविहीन[1] तु स वै संकल्पमाचरेत् ।।" इति वचनात् ।

अत्रैवाष्टम्यामाश्वलायनेन माध्यावर्षसंज्ञकं श्राद्धमुक्तम् ।
एतेन माध्या वर्षं प्रौष्ठपद्या अपरपक्षः ।। इति ।

मध्ये वर्षासु भवं माध्या वर्षमित्यर्थः । इदं च सप्तम्यादिषु त्रिष्वहस्सु अष्टकावत्कार्यंम् एतेनेति कृत्स्नाष्टका धर्मातिदेशादिति वृत्तिकृत् । अत आश्वलायनशाखिभिरष्टकाशब्देनेह संकल्पः कार्यः । माध्या वर्षं करिष्य इति संकल्प्य सर्वोऽप्यष्टकाविधिः कार्यः । हरदत्तस्तु–माधावर्षमिति पाठ स्वीकृत्य मघायुक्तवर्षासु विहितत्रयोदशीश्राद्धपरत्वेन व्याख्याय तत्रानन्तरोक्तान्वष्टक्य घर्माति[2]मास आन्वाष्टक्यवर्मातिदेशपरतया तेन व्याख्यानात् । कातायसूत्र प्रथमाष्टकापक्षोऽष्टम्यामित्युक्तेरष्टकाया इह कर्त्तव्यत्वप्रतीतेः । कातीयैरष्टक्यां करिष्य इति संकल्प कार्यः । अस्यामेवाष्टम्यां श्राद्धं गयाश्राद्धतुल्यफलम् तथा च ब्रह्माण्डे––

"आषाढ्याः पंचमे पक्षे गयामघ्याःष्टमी स्मृता ।
त्रयोदशी गजच्छाया गयातुल्ये तु पैतृकः ।।" इति ।

अत्रैव नवम्यामन्वष्टकाश्राद्धं, तत्र कात्यायनः––

"अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् ।
पित्रादिमातृमध्यं च ततो मातामहान्तकम् ।। इति ।

हेमाद्रौ छागलेयः––

"केवलास्तु क्षयेद्यर्या वृद्धावादौ प्रकीर्तिताः ।
अन्वष्टकासु मध्यास्था नान्त्याः कार्यास्तु मातरः ।।"

दीपिकायां तु मातृश्राद्धमादौ कार्यमित्युक्तम् । मातृपूजनमन्वष्टकात्वादिति इति । एतच्च जीवत्पितृकविषयम् । तस्य पितृपार्वणाभावादिति केचित् । क्रमानुपपत्तेःपितृश्राद्धाभावे मातृश्राद्धस्यैव सत्वेन क्रमविधायकवचनाप्रवृत्तेरिति भावापत्तेः । अत्र तत्तद्गृह्यानुसारिण व्यवस्था ।

"बह्वल्पं वास्वगृह्योक्त यस्य कर्मप्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ।।" इति ।

---

[1] पिण्डार्घादि विहीनं इति ख पाठः ।

[2] देश परतया व्याचख्यौ । जयन्त मतेव तु नाष्टकाधर्मातिदेशः । मासि मासि चैवमिति सूत्रेण प्रतिमासमपरपक्षे इत्यन्तः 'ख' पाठः अधिकः ।

शास्त्र्यन्तरात् तत्राप्याश्वलायनादीनां पितृपूर्वकं तत्सृजेत्तथाम्नानात्। अन्येषां तु मातृपूर्वकम्। यत्तु—

"तमिस्रपक्षे नवमी पुण्या भाद्रपदे हि या।
चत्वारः पार्वणाः कार्याः पितृपक्षे मनीषिभिः॥" इति।

तद्देशाचारतो व्यवस्थितं ज्ञेयमिति निर्णयसिन्धौ, श्राद्धकाशिकायां तु अन्वष्टकास्विति बहुत्वमुक्तम्। तस्य त्रित्वे पर्यवसायित्वात्साग्निककर्त्तृकनवदैवत्यमन्वष्टकाऽत्र विहितं भवितुमर्हति नापरपक्षनवमीविषयमतो द्वादशदैवत्यमपस्त्वमीविषयमिति। मयूखे तु पार्वणचतुष्टयविधायकानि वचनान्यनाकराणीत्युक्तम्। इदं च जीवत्पितृकेणापि मृतमातृकेणावश्यं कार्यम्।

"आन्वष्टक्यं गया प्राप्तौ सत्यां यच्च मृतेऽहनि।
मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति॥" इति

मैत्रायणीयपरिशिष्टात्। यद्यपि जीवत्पितृकस्येयं चाप्यन्वष्टका अवश्यं कर्त्तव्यास्तथाऽप्यशक्तस्येयमावश्यकी प्रौष्ठपद्यष्टकाभूयः पितृलोके भविष्यतीति हेमाद्रौ पाद्मोक्तेरिति केचित्। कालतत्त्वविवेचने तु नवम्यां क्रियमाणं मातृश्राद्धं महालयापरपक्षनिमित्तकमेवेति सप्रपंचं निरूपितम्। अत्र स्वमातरि जीवत्यां अपि सपत्नमातृभ्यो दद्यात्।

"सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ।
नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरायतः॥" इति।

सूत्रोक्तौ सर्वासामिति कथनात्। अत्र सर्वासां नामनिर्देशेनैको ब्राह्मणोऽर्घः पिण्डश्च नामैक्ये तु द्विवचनादिप्रयोग इति वृत्तिकृत्। अन्वष्टका श्राद्धं तद्योगश्च गोभिलीयानां मध्यमायामेव न सर्वासु। आन्वष्टक्यं मध्यमायामिति गोभिलगौतमाविति छन्दोगपरिशिष्टात्। अत्र भर्त्तृमरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यम्।

'श्राद्धं नवम्यां कुर्यात्तन्मृते भर्त्तरि लुप्यते" इति।

वचनादिति केचित्। अन्ये त्वेतद्वचनस्य निर्मूलत्वात्कर्त्तव्यमित्याहुः। कालतत्त्वविवेचनकारास्तु मृतपितृकेण पितृश्राद्धदिन एव पृथगपृथग्वा मातृतृप्तेरपि संपादितत्वाज्जीवत्पितृकेणैव कर्त्तव्यमित्याहुः। एतन्मतेऽपीदं मृतमातृकस्य जीवत्पितृकस्यावश्यकं, पितृमरणोत्तरं मातुः श्राद्धकरणे, विधवाया अपि मातुः श्राद्धानुष्ठानेऽभ्युदयोऽस्त्येवेति बोध्यम्। सर्वासामेव मातॄणामिति वचने विधवाऽविधवासाधारण्येन मातॄणां श्राद्धविधानात्। कौस्तुभेऽप्येवम्।

इदं जीवत्पितृकेणापि सपिण्डं कार्यम्।
अन्वष्टकासु हेमाद्रौ विष्णुधर्मोत्तरे च स्त्रीणां श्राद्धं कार्यं तथैव च॥"

इत्युपक्रम्य

"पिण्डनिर्वपणं कार्यम् तस्या पितृसत्तमः" इत्युक्तत्वात् । तस्यामन्वष्टकायामित्यर्थः । अपि शब्देन तीर्थमहालयप्रत्याब्दिकादीनां ग्रहणं तेन गुर्विणीपतेरप्येतेषु पिण्डदानं भवत्येव । अत्रातिदेशादेव पिण्डदाने प्राप्ते गुर्विणीपतित्वादिप्रयुक्तनिषेधप्रतिप्रसवार्थत्वाद्वचनस्य । अन्ये तु यथेदं विष्णुधर्मोत्तरवचनं जीवत्पितृकत्वगर्भिणीपतित्वादिनिमित्तकपिण्डदाननिषेधापवादार्थम् । तथा जीवत्पितृकस्यासपत्नमातुः पृथक्पिण्डदानप्राप्त्यर्थं चेति वदन्तः प्रत्येकब्राह्मणभोजनपिण्डदाने प्राहुः ' इदं चानुमनीतेनापि कार्यम । अमावस्यान्वष्टक्यादिश्राद्ध प्रकृत्यंतच्चानुपनीतोऽपि कुर्यात । सर्वेषु पर्वसु

"श्राद्धं साधारणं नाम सर्वकर्मफलप्रदम् ।
भार्याविरहितोऽप्येतत्प्रवासस्थाऽपि नित्यशः ।
शूद्रोऽप्यमंत्रवत्कुर्यादनेन विधिना बुधः ॥" इति ।

शूलपाणौ मात्स्योक्तेः । एतेनसाग्नेरेवेदमिति केषांचिदुक्तिः परास्ता । गोविन्दार्णवेऽप्येवम् निर्णयसिन्धौ—अन्वष्टकातः पृथगिदं मातुः श्राद्धम् । लाघवेन मूलैक्यादन्वष्टकापदाविशेषाच्च । तेनान्यत्रान्वष्टकाश्राद्धस्यांगस्यापि[1] अष्टकाया इति शेषेऽप्यत्र प्रधानत्ववचनात् । अत्राष्टकान्वष्टकापदे पूर्वानुरोधादिति । मयूखेऽपि अन्वष्टकाश्राद्ध स्वतन्त्रं प्रधानं, नान्वष्टकांगम् ।

'अमावस्याष्टकास्तिस्रः पौषमासादिषु त्रिषु ।
तिस्रश्चान्वष्टकाः पुण्या माघी पंचदशी तथा ॥" इति ।

कौर्मवचनात् पूर्वेद्युः श्राद्ध त्वष्टकांगम् । फलवत्सन्निधावफलम् । तदंगमिति न्यायात् । द्वैतनिर्णयेऽप्येवम् । जीवत्पितृकोऽपि सपत्नमातुः पार्वण कुर्यात् । सर्वासामेव मातॄणामित्यत्र सर्वासामित्युक्तिबलेन जीवत्पितृकनिर्णये तथा निर्णीतत्वात् ।

"आन्वष्टक्यं च यन्मातुर्गयाश्राद्धं महालयम् ।
पितृपत्नीषु यच्छ्राद्ध सर्वं पार्वणवद्भवेत् ॥" इति ।

श्राद्धदीपकलिकायां मनूक्तेः । अत्रैव महालयग्रहणादजीवत्पितृकस्यापि जीवन्मातृकस्य पार्वणविधिनैव सपत्नमातुः श्राद्ध भवतीति प्रतीयते । श्राद्धकल्पलतयान्तु जीवन्मातृकेण सपत्नमातृमुख्यत्वमधिकृत्य मातृपार्वणं न कार्यम् । मुख्यत्वं हि जनन्या एव । तेनैव पुत्रिणीत्वेऽपि पितरि जीवति पितृव्यस्यैव तस्या-

---

[1] स्याप्यत्र प्रधानत्ववचनात् इति ख पाठः ।

नमुख्यत्वम् । क्षयाहे त्वेकोद्दिष्टं कार्यमेवेत्युक्तम् । अत्र यथाचारपार्वणैकोद्दिष्टयोर्व्यवस्था ज्ञेया । मातृभिन्नानामपि कासांचिन्नवम्यां श्राद्धं कर्त्तव्यमित्युक्तम् । श्राद्धादपक्ककलिकायां ब्राह्मे—

"पितृमातृकुलोत्पन्ना याः काश्चित्तु मृताः स्त्रियः ।
श्राद्धार्हा मातरो ज्ञेयाः श्राद्धं तत्र प्रदीयते ।।"

अत्र या कॉश्चिन्मृताः स्त्रियः श्राद्धार्हा मातरो ज्ञेयास्तद्देशेन श्राद्धं तत्र प्रदेयमिति वाक्यार्थपर्यवसानात्पितृमातृकुलोत्पन्ना इत्युपलक्षणम् ततश्चापुत्राया मातामह्या इव पत्न्या अपि सग्रहाच्छिष्टारोऽप्यनुसृता भवति । अत्र सुवासिनी भोजनमुक्तम् मार्कण्डेय पुराणे—

"मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः सहभोजनम् ।
सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत् ।।"
"भर्त्तुरग्रे मृता नारी सह दाहेन वा मृता ।
तस्याः स्थाने न युञ्जीत विप्रैः सह सुवासिनीम् ।।"

तत्रैव मदालसा वाक्यम—

"स्त्रीश्राद्धे पुत्रदेयाः स्युरलंकाराश्च योषिते ।
मंजीरमेखला दाम कर्णिका कंकणादयः ।" इति ।

इदं च श्राद्धं नित्यम् ।

"अमावास्याव्यतीपातपौर्णमास्यष्टकासु च ।
विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ।।" इति ।

हेमाद्रौ पितामहवचनात् । अत्राशक्तावनुकल्पमहाश्वलायनः—

"अनड्होपवसमाहरेदग्निना वा,
कक्षमुपोषेदेषामष्टकेऽतिनत्वे वाऽनष्टकः स्यात्" इति ।

यवसमार्द्रं तृणं कक्षं शुष्कतृणमेतदकरणे च प्रायश्चित्तमुक्तं ऋग्विधाने ।

"एभिर्द्युभिर्जपेन्मंत्रं शतवारं तु तद्दिने ।
आन्वष्टक्यं तदा शून्यं संपूर्णं याति सर्वथा ।।" इति ।

मन्त्रश्च—"एभिर्द्युभिः

---

१. नियुञ्जीत इति ख पाठः ।

"[1]सुमतां एभिरिन्दुभिर्निरुध्यते नो अर्यति गोभिरश्विना ।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेष सः सामिषारभेमहि ।।"

इत्यष्टकान्वष्टकाश्राद्धनिर्णयः ।

अथद्वादशीश्राद्धनिणयः ।

वानप्रस्थानां वैष्णवानां च महालयश्राद्धं द्वादश्यां कार्यम् ।

"यतीनां च वनस्थानां वैष्णवानां विशेषतः ।
द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः ।।" इति ।

प्रतापमार्तण्डे सग्रहोक्तेः ।

"सन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथा विधिः ।
महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं तु तत् ।।" इति ।

तत्रैव वायवीयाच्च । अत्र द्वादश्यामित्यत्र नियमानुपादानेऽपि कालादर्शे नियममप्यभिहितम्, यथा–

"श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये ।
द्वादश्यामेव कुर्वीत यतेरिति विनिर्णयः ।।"

इति शस्त्रहतस्य पितुश्चतुर्दश्यामेकोद्दिष्टे कृतेऽपि दिनान्तरे पार्वणं कार्यम् । एकोद्दिष्टेन पिताभहादेरतृष्णसिद्धेरिति वक्ष्यते । अत्र तु पार्वणेन पितामहादानामपि तृप्ते. सिद्धत्वान्नदिनान्तरे श्राद्धं कर्त्तव्यमित्यभिप्रायः । तेन सर्वोद्देशेन द्वादश्यामेव श्राद्धं कर्त्तव्यमिति । अत्र द्वादश्यां मृतस्य यतेराब्दिकश्राद्धस्यापरपक्षिश्राद्धेन प्रसगसिद्धिर्द्रष्टव्या । इति द्वादशीश्राद्धनिर्णयः ।

अथ त्रयोदशीश्राद्ध निर्णीयते । मनुः—

"यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद्वर्षासु च माघसु च ।।" इति ।

याज्ञवल्क्यः –

"यद्ददातिगयास्थश्च सर्वमानन्त्यमश्नुते ।
तथा वर्षात्रयोदश्यां मघासु च विशेषतः ।।" इति ।

विष्णुधर्मोत्तरे·

"प्रौष्ठपद्यामतीतायां माघयुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं प्रकर्त्तव्यं मधुना पायसेन वा ।।"

---

[1] सुमना एभिरिन्दुभिर्निरुधानो अमर्तिर्गोभिरश्विना इति ख पाठः ।

अत्र यद्यपि वचनेषु मघायुतैव त्रयोदशी श्राद्धकालत्वेन प्रतीयते । तथापि—

"प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी।"

इत्यादि मघापदरहितवचनेभ्यः केवलापि त्रयोदशी मघासु चेति चकारात्तथा[1] याज्ञवल्क्योक्तेश्च । केवलमघाऽपि श्राद्धकालः । द्वयोर्योगे तु फलाधिक्यमात्रम् । तथा च स्मृतिचंद्रिकायाम् स्मृत्यन्तरे—

"त्रयोदशी भाद्रपदी कृष्णा मुख्या पितृप्रिया ।
तृप्यन्ति पितरस्तस्यां स्वयं पंचशतं समाः ॥
मघायुतायां तस्यां तु जलाद्यैरपि तोषिताः ।
तृप्यंति पितरस्त्यब्दवर्षाणामयुतायुतम् ॥" इति ।

अपीत्यनुकल्पः । एतेन मघायुतैव त्रयोदशीश्राद्धकालो न शुद्धा त्रयोदशी नापि केवलमघेतिशूलपाणिव्याख्यानमपास्तम् । अत्र त्रयोदशीश्राद्धं नित्यमन्यत्काम्यम् ।

"प्रौष्ठपद्यामतीतायां तथा कृष्णात्रयोदशी" इति ।

कालानुक्त्वा

"श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते" इति ।

कालहेमाद्रौ विष्णुधर्मोत्तरात् । मघाश्राद्धं च त्रयोदशीश्राद्धेव पृथक्त्वोपस्थितमविभक्ता अपि भ्रातरः पृथगेव कुर्युः ।

"विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक्तु ताः ।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना ॥"

इति प्रयोगपारिजाते वचनात् । मघाश्राद्धादन्यत्र पृथक्त्वं विना नाधिकार इत्यर्थः । आश्विनेऽधिमासे सति मघात्रयोदशीयोगोऽधिमासे चेद्भवेत्तदा तत्रापि श्राद्धं कार्यम् ।

"मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम् ।
अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे ॥"

इति काठकगृह्यात् । [2]इयमेव योगविशेषेण गजच्छाया । तदुक्तं ब्राह्मे —

---

[1] वर्षा त्रयोदश्यां मघासु च विशेषतः इति ख पाठोऽधिकः ।

[2] केवलमघा प्रयुक्तं केवल त्रयोदशी प्रयुक्तं तु न भवति । शुद्धमासेऽपि तयो सम्भवेन सगतिकत्वात् इति अधिकः ख पाठः ।

"योगो मघात्रयोदश्याः कुंजरच्छायसंज्ञकः ।
भवेन्मघायां संस्थे च शशिन्यर्के करे स्थितः ॥" इति ।

मघायुतत्रयोदश्यां ससन्तानेन पुंसा सपिण्डकं श्राद्ध न कार्यम् ।

"मघायुक्तत्रयोदश्यां पिण्डनिर्वापणं द्विजः ।
ससन्तानो नैव कुर्यान्नित्यं ते कवयो विदुः ॥"

इति बृहत्पराशरवचनात् । अत्र निषेधवचनानि स्मृतिपुराणेषु दृश्यन्ते । तत्र वामनपुराणे—

"गृही त्रयोदशीश्राद्धं न कुर्यात्पुत्रवानपि ॥" इति ।

स्कांदे नागरखण्ड—

"यो वांछति नरो मुक्तिं पितृभिः सह चात्मनः ।
असंतानश्च यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ।
सतानयुक्ता यः कुर्यात्तस्य वंशक्षयो भवेत् ॥" इति ।

अत्र केषुचिद्वचनेषु त्रयोदशी सामान्यग्रहणान्महालयभिन्नत्रयोदशीविषयो निषेध इति केचित् । तदसत् ।

"अतः श्राद्धं विना देयं तद्दिने मधुपायसम्" इत्यादि ।

महालयत्रयोदशीं प्रकृत्य पठितस्य नागरखण्डस्य निषेधवाक्यस्यप्रकरणामहालयत्रयोदशीविषयत्वप्रतीतेः । केचिन्निषेधवचसा काम्यश्राद्धविषयत्वमाहुः । तदपि न काम्यश्राद्धस्य विहित्वेननित्यश्राद्धस्येव काम्यश्राद्धस्यापि निषेधानर्हत्वात्पुत्रवत्पर्युदासस्योभयत्रसंभवाच्च । अन्ये तु मघायुक्तत्रयोदश्यामिति प्रतापमार्तण्डस्थबृहत्पराशरवचनादयनद्वितये श्राद्धमिति पुलस्त्यवचनाच्च । सपिण्डकश्राद्धवचनानि निषेधविषयाणि आहुः । तदपि मदयुगाद्यन्तर वदिहापि सामान्यनिषेधेनैव पिण्डत्वे सिद्धे निषेधवैयर्थ्यापत्तेरपुत्रस्यापि युगादित्वप्रयुक्तपिण्डनिषेधावश्यम्भावेन पुत्रवन्तं प्रति विशेषतस्तन्निषेधस्य वैयर्थ्याच्च । तस्मात्संक्रान्त्युपवासादाविवेहापि पुत्रवतः श्राद्धपर्युदासान्नैव पुत्रवता श्राद्धं कार्यम् । श्राद्धविधिं विनैव पितॄनुद्दिश्य ब्राह्मणेभ्यः पायसाद्यन्न दानमात्रं कार्यम । अपुत्रेण तु युगादिप्रयुक्त सङ्कल्पश्राद्धविधिना पिण्डरहितं श्राद्धं कर्त्तव्यम् ।

पर्युदासस्यापि प्राप्तिसापेक्षत्वेन यस्य श्राद्धप्राप्तिसापेक्षत्वेन यस्य श्राद्धप्राप्तिस्तं प्रत्येव पिण्डदाननिषेधसाफल्यात् । एतच्च त्रयोदशीमात्रप्रयुक्तश्राद्ध-

---

१. वाक्यानि इति ख पाठः ।

विषयं तेनापरपक्षेऽन्वहं श्राद्धकर्त्तुरतद्दिने पिण्डदानादिसहितसकलेति वक्तव्यताकश्राद्धकरणेऽपि न दोषः। हेमाद्र्यादयस्तु श्राद्धं न चैकवर्गस्य त्रयोदश्यामुपक्रमेत्।

“न तृप्तास्तत्र ये यस्य प्रजां हिंसन्ति तस्य ते” इति।

काष्र्णाजिनीस्मृतेस्त्रयोदशीश्राद्धनिषेधवचनान्येकवर्गश्राद्धनिषेधपराणि। यद्यपि पितरो यत्र पूज्यन्ते तत्र मातामहा अपीति धौम्योक्तेरमाश्रावदिहपि मातामहवर्गस्य प्राप्तत्वेन न केवलपितृवर्गस्य प्रातिस्तथापि व्यामोहादिप्राप्तनिषेधोंऽयमित्याहुः। अत्र केचित्—भ्रमेण प्राप्तं यदेकवर्गश्राद्धं तन्निषेधवचनस्येति समासः, (भय प्राप्त) निषेधावचनत्रैयर्थ्याज्जीवन्मातृमातामहवर्गकं प्रत्ययं निषेध इत्याहुः। तदसत् न तृप्ता इत्यर्थवादासंगतेः। तं प्रति तच्छ्राद्धप्राप्तेरभावात्। वस्तुतस्तु दर्शश्राद्ध एव मातामहश्राद्धानावश्यकत्वस्य मिताक्षरायामुक्तत्वात्केषुचिदाश्वलायनीयादिगृह्येषु पितृपार्वणस्यैव श्राद्धविधानाद्बह्वल्पं वा स्वगृह्योक्तमिति शास्त्रावलम्बेनैवामावस्याश्राद्ध[1] विशेषवचनरहितासु यदिकृतिषु च केवलपितृपार्वणमेव यः कर्त्तुमिच्छति तं प्रति निषेधस्य सार्थक्यं द्रष्टव्यम्। यच्च हेमाद्रौ निषेधवाक्यम्,

“नेच्छेत्त्रयोदशीश्राद्धं पुत्रवान् यः सुतायुषे।
एकस्यैव न कुर्यात्स पार्वणं तु समाचरेत्।” इति।

अत्रैकस्यैव वर्गस्य पार्वणे पर्वणि दर्शे क्रियमाणेनामावस्याश्राद्धेन सदृशंषट्दैवत्यथ इति कृत्यरत्नावल्याम्। केचित्तु न तृप्तास्तत्र ये यस्येति दोषश्रवणात्पितृव्यादिपितृव्यादीनामपि महालयवत्त्रयोदश्यां श्राद्धं कर्त्तव्यमिति वदन्ति, तदसत्। पितृमहालयश्राद्धदिन एव पितृव्यादितृप्तेरपि सम्पादितत्वान्न तृप्ता इति हेतूपन्यासासंगतेः। अत्र मघात्रयोयशो युगादिश्राद्धानां तन्त्रता। तत्रैव महालयश्राद्धानुष्ठाने तु तेनैवैषांप्रसंगसिद्धि द्रष्टव्या। बहुदैवत्यत्वसपिण्डत्वादिभिर्विशेषग्रहणात्। महालयश्राद्धस्यापि तन्त्रत्वोक्तिस्त्वसगत्वादुपेक्ष्या इति त्रयोदशीश्राद्धनिर्णयः। अथ चतुर्दशी, तस्यां विषसर्पादि मृतानां श्राद्ध कर्त्तव्यम्। तथा च मरीचिः—

“विषसर्पश्वापदा हि तिर्यग्ब्राह्मणघातिनाम्।
चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हितेति॥

---

१. शास्त्रावलम्बेपामावस्या इति खः पाठ।

विषादिभिर्ब्राह्मणान्तैर्घातो येषां तेषामित्यर्थः । विषादिग्रहणं शस्त्रादीनामप्युपलक्षणम् ।

"अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ।
उपसर्गमृतानां च[1] शृंगैरुद्बन्धनैरपि ।
श्राद्धं तेषां प्रदातव्यं चतुर्दश्यां नराधिप ।।"

इति नागरखण्डात् । अपमृत्युरकालमृत्युः । अत एव मार्कण्डेये—

"युवानः पितरो यस्य मृताः शस्त्रेण वा हृताः ।
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सिता ।।" इति ।
उपसर्गो ग्रहभूताद्यावेशः शृगैः शृंगिभिः ।

अत्र सर्पादिसाहचर्याज्जलाग्न्यादयोऽप्येनानुज्ञाता एव ग्राह्याः । अतएव नागरखण्डे—

"दुर्मृत्युना मृता ये च संग्रामेषु हताश्च ये ।" इति ।

एवं च भर्तृमरणानिमित्तवह्निप्रवेशेन मृतानां स्त्रीणामसाध्यव्याधाद्यभिभूतानां चाग्निप्रवेशादिमृतानामिह श्राद्धं न भवति । प्रायोऽनशनाभ्यां तु विधितोऽपि मृतानां भवति ।

"प्रायोऽनशनशस्त्राग्निविषोद्बन्धनिनां तथा ।"

चतुर्दश्यां भवेच्छ्राद्धं इति ब्रह्मपुराणात् । प्रायो महाप्रस्थानं युद्धमृतानां च भवति । युद्धमृतानां श्राद्धकर्मणि चतुर्दशी प्रशस्तेऽति विष्णुस्मरणात्,

"प्रीयन्ते पितरश्चास्य ये च शस्त्रहता रणे"

इति वृद्धमनुवचनाच्च । यत्तु शाकटायनवचनम्—

"जलाग्निनाश्मा विपन्नानां सन्यासेवामहे पथि ।
श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीम् ।।"

इति तत्प्रायश्चित्तार्थजलादिमृतविषयम् । अत्र शस्त्रहतस्यैव चतुर्दश्यामिति नियमो, न तु चतुर्दश्यामेव शस्त्रहतस्येति ।

"श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये"

---

[1] विषमृत्युरुपेयुषाम्, वह्निना च प्रदग्धानां जलमृत्युमुपेयुषाम्, सर्पव्याघ्र हतानाञ्च इत्यन्तः च पाठोऽधिकः ।

इति कालादर्शाद्वार्षिकादीनामकरणापत्तेश्च । तेन महालये एव दिनं नरे पार्वणं मातामहादितृप्त्यर्थं कार्यमेव । इदं च शस्त्रघातादिनिमित्तं चतुर्दशीश्राद्धं पित्रादीनामप्येकोद्दिष्टमेव भवति, न तु पार्वणम् । तथा च गार्ग्यः—

"चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणात्परम् ।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः ॥" इति ।

पितृमात्रादित्रय्यां द्वयोः शस्त्रादिना मृतावेकोद्दिष्टद्वयं कार्यम् । एकस्मिन् द्वयोर्वैकोद्दिष्टविधिरिति स्मृतेः । अत्रैकस्मिन् पितरि शस्त्रादिना हते द्वयोर्वा शस्त्रादिना हतयोश्चतुर्दश्यामेकोद्दिष्टविधिना प्रत्येकं श्राद्धं कार्यमित्यर्थः । द्वयोरेकोद्दिष्टेन प्रत्येकं श्राद्धे कृतेऽपि प्रपितामहतृप्तिसिद्ध्यर्थं महालये एव दिनान्तरे पार्वणश्राद्धं कार्यम् । एकस्मिन्द्वयोर्वेत्यभिधानात्त्रिषु पितृपितामहप्रपितामहेषु शास्त्रादिना हतेषु चतुर्दश्यां पार्वणश्राद्धमेकमेवानुष्ठेयम् । तदुक्तं बृहत्पराशरेण—

"पित्रादयस्त्रयो यस्य शस्त्रघातास्त्वनुक्रमात् ।
स मृते पार्वणं कुर्यादाब्दिकानि पृथक्पृथक् ॥" इति ।

स्मृत्यन्तरेऽपि—

"एकस्मिन् वा द्वयोर्वाऽपि विद्युच्छस्त्रेण वा हते ।
एकोद्दिष्टं सुतः कुर्यात्त्रयाणां दर्शवद्भवेत् ॥" इति ।

दर्शवत्पार्वणविधिनेत्यर्थः । अपरार्के हेमाद्रौ चैवं कृत्यरत्नावली–कालतत्त्वविवेचनकारादयस्तु त्रिष्वपि शास्त्रहतेषु पृथगेकोद्दिष्टत्रयं कार्यम् । न तु पार्वणमाहत्यवचनाभावात् । यत्त्वाधुनिकग्रन्थेषु क्वचित्पार्वणविधाकवचनं तत्प्रामाणिकग्रथेष्वदर्शनादानकरमित्याहुः । माधवदेवस्वामिप्रभृतयोऽप्येवम् । अस्यां चतुर्दश्यां शस्त्रहतश्राद्धे मघास्वपि पिण्डदानं कार्यम् ।

"प्रेतपक्षे चतुर्दश्यां मघायुक्तं दिनं यदि ।
पिण्डदानं प्रकुर्वीत यस्य शस्त्रहतः पिता ॥ इति ।

पितेत्युपलक्षणमिदं चैकोद्दिष्टं सदैवं कार्यम् ।

"प्रेतपक्षे चतुर्दश्यां एकोद्दिष्टविधानतः ।
दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत् ॥"

इति प्रयोगपारिजातोदाहृतवचनात् । यस्त्वेतस्यामेव चतुर्दश्यां मृतस्तस्य क्षयाहनिमित्तं श्राद्धम् ।

"अमावस्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः ।
सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्वणे विधिः ।।"

इति वचनात्पार्वणमेव कर्त्तव्यम् । चतुर्दशीनिमित्तं तु तदा न भवति, प्रसंगसिद्धेः संक्रान्तिव्यतीपातादिनिमित्तं तु चतुर्दश्यामपि पार्वणमेव भवति । चतुर्दशीनिमित्तं तु तदा पृथग् भवति । सपिण्डापिण्डकत्वप्रयुक्तविरुद्धधर्मकत्वात् । दैवाच्छस्त्रादिहतस्य चतुर्दश्यां श्राद्धाकरणेऽग्रिमपक्षे दिनान्तरे पार्वणेनैव कार्यम् । अत्र चोत्पत्तिपार्वणत्वपराह्णव्यापिन्येव तिथिर्ग्राह्या, नत्वेकोद्दिष्टान्तरवन्मध्याह्नव्यापिनी चतुर्दशीश्राद्धस्यापि महालयान्तर्गतत्वात्तद्भिन्नत्वाभावादित्यर्थः । कर्मान्तरत्वाभावात् चतुर्दश्यां प्राप्ते पार्वणे देवताभूतपित्रादिगतदुर्मरणनिमित्तकस्यैकोद्दिष्टेति कर्त्तव्यताकस्य प्रयोगस्य विधानादिति कौस्तुभे चतुर्दशीनिर्णयः । अमायां विशेषमाहापरार्के यमः—

"हंसे करस्थिते या तु अमावस्या करान्विता ।
सा ज्ञेया कुंजरच्छाया इति बौधायनोऽब्रवीत् ।।"

हसः सूर्यः ।

"वनस्पतिगते सोमे या छाया प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ।।"

भारते—

"अजेन सर्वलोहेन वर्षासु नियतव्रतः ।
हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितम् ।।"

श्राद्धं दद्यादिति शेषः । इति महालयश्राद्धनिर्णयः ।

अथाश्विनी अस्यां कोजागरव्रतमुक्तं लैंगे—

"आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्या लोकैर्विभूतये ।।
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगंधिनिशि सद्वेष अक्षैर्जागरणं चरेत् ।।
निशीथे वरदा लक्ष्मी कोजागर्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ।।" इति ।

तत्र पूर्णिमा प्रदोषनिशीथोभयव्यापिनी ग्राह्या । निशीथ इति चाभिधानात् । यदा तु पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिस्तदा परेद्युः कार्यम् । पूजारूपप्रधानकालव्याप्तिलाभात् । यदा तु पूर्वेद्युर्निशीथव्याप्तिस्तदा पूर्वा ।

"नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते"

इति वचनादिति स्मार्त्ताचार्यचूडामणिप्रभृतयः । तिथितत्त्वकृत्यरत्नावल्योरप्येवं तिथ्यर्के त्वियं निशीथव्यापिनी ग्राह्या । तत्रैव जागराद्युक्तत्वादित्युक्तम् । रात्रौ जागरणं कुर्यान्नृत्यगीतपुरः सरमिति रात्रिश्रवणात्प्रदोषव्यापिनीत्यपि केचित् । अत्र जागरणं प्रधानं, फलसम्बन्धात् । अस्यामेव तिथावाचारप्राप्तं ज्येष्ठापत्यनीराजनादिपरविद्धायां कार्यमिति कौस्तुभे । वस्तुतस्त्वस्य नीराजनाचारस्य रात्रौ दर्शनाद्रात्रिव्यापिन्यां कार्यमिति युक्तम् । अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन—आश्वयुज्यामाश्वयुजीकर्मेति । तत्र पूर्वाह्नव्यापिनी ग्राह्या । देवकर्मत्वात् तत्पर्वद्वैधे शेषपर्वणि कार्यं विकृतित्वात् । आग्रयणं तु पर्वणि कार्यम् ।

शरद्याग्रयणं नाम पर्वणि स्यात्तदुच्यते इति शौनकोक्तेः ।

तत्रापि शेषपर्वणि कार्यम् । तदपि यद्यस्यामेव पौर्णमास्यां क्रियते तदाऽऽश्वयुजी कर्मणा सह तंत्रेण कर्त्तव्यमिति वृत्तिकृत् । तंत्रतायामंगभूतक्रमलोपेनोभयोरपि वैगुण्यप्रसंगादाग्रयणस्य कालान्तरसम्भवेन तदंगीकारस्यानुचितत्वात्कालान्तर एव तत्कर्त्तव्यम् । पर्वान्तरे शुक्लपक्षे देवनक्षत्रेषु वेति कृत्यरत्नावल्याम् । शेषपर्वणि दर्शपूर्णमासाभ्यां तंत्रेणानुष्ठाने दर्शेष्ट्याः परं पौर्णमासेष्ट्याः प्रागनुष्ठयमिति हेमाद्र्यादयः । दर्शेष्ट्याः परमुक्तमाग्रयणकं प्राक्पौर्णमासाच्च तदिति दीपिकोक्तेश्च ।

तच्चाग्रयणं त्रेधा, व्रीह्याग्रयणं, यवाग्रयणं, श्यामाकाग्रयणं चेति ।

एषां कालः श्रुतौ—

"गृहमेधी व्रीहियवाभ्यां शरद्वसन्तयोर्यजेत् ।
श्यामाकैर्नीवारैर्वर्षास्वापत्कालेनान्नेन पुराणैर्वेति ॥"

आपस्तम्बोऽपि—

"वर्षासु श्यामाकैर्यजेत् शरदि व्रीहिभिर्वसन्ते यवैर्यथर्त्तु वेणुयवैरिति ।"

तत्रापि श्यामाकाग्रयणमनित्यमितरे त्वनाहिताग्नेर्नित्ये वा यवाग्रयणं च कार्यमिति स्मार्त्तवृत्तावुक्तत्वात्, सूत्रे व्रीहियवदेवतासम्बद्धानामेव मन्त्राणामाम्नानाच्च । आहिताग्नेस्तु यवाग्रयणस्याप्यनित्यत्वमपि वा क्रियया यवेष्विति सूत्रात्, यद्वा श्यामाकेषु प्रस्तरं कुर्यान्नाग्रयण यदि वा तदपि समानतंत्रमित्यादिनारायणबृत्तौ परिश्रवमतां सुलभम् । इदं च पर्वाभावे कृत्तिकादिविशाखान्तेषु देवनक्षत्रेषु कार्यमिति स्मृत्यर्थसारे आग्रयणाशक्तौ तु नवानां दर्शपूर्णमासौ वा कर्त्तव्यौ । तथा च, शांखायनसूत्रे दर्शपूर्णमासौ वा नवानामिति । यत्त्वापरभवेनोक्तं, अपि वा पौर्णमास्याममावास्यां वा नवैर्यजेतेति । तत्र वा शब्दश्चार्थे ।

यद्वा[1] समानतंत्रमाग्रयणं कुर्यात् । इदं चापदि मलेकार्यमन्यथा न कार्यमित्याद्यन्यत्र द्रष्टव्यम् । अस्याकरणे प्रायश्चित्तमुक्तं कारिकायाम्—

"अकृताग्रयणोऽश्नीयान्नं वान्नं यदि वै नरः ।
वैश्वानराय कर्त्तव्यश्चरुः पूर्णाहुतिस्तु वेति ।।"

ऋग्विधाने तु—

"समिन्द्ररायामंत्रं च वर्षे-वर्षे जपेच्छतम् ।
आग्रयणं यदा न्यूनं तदा सम्पूर्णमेति तत् ।।" इत्युक्तम् ।

एतच्च स्मार्त्ताग्रयणविषयम् अस्यामेव दानविशेषो विष्णुधर्मोत्तरे—

"आश्वयुज्यां कांस्यपात्रं घृतपूर्णं द्विजातये ।
ससुवर्णन्तथा दत्वा दीप्तौजास्त्विह जायते ।।" इति ।

अस्यामेव गजनीराजनमुक्तम् । हेमाद्रावाथर्वणगोपथब्राह्मणे । अथाश्वयुजे मासि पौर्णमास्यामपराह्णे हस्तिनां नीराजनं कुर्यादित्यादिः । अस्यामपि कार्त्तिकस्नानाद्यारंभ इत्युक्तं प्राक् ।

अथ कार्त्तिकी,

इयं मन्वादिः । सा पूर्वाह्णव्यापिनी ग्राह्या । शुक्लपक्षस्थत्वात् । अत्र विशेषो हेमाद्रौ ब्राह्मे—

"पुण्या महाकार्त्तिकोस्याज्जीवेन्दोः कृत्तिकास्थयोः ।"

पाद्मे—

"विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः ।
स योगः पद्मको नाम पुष्करे त्वतिदुर्लभः ।।"
पद्मकं पुष्करे प्राप्य कपिलां यः प्रयच्छति ।
स हित्वा सर्वपापानि वैष्णवं लभते पदम् ।।

यमः—

"कार्त्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते ।"

अन्यत्रापि—

---

[1] समानतंत्रावादर्शपूर्णमासाभ्यामिति शाखायनसूत्राद्दर्शेष्ट्यापूर्णमासेष्ट्या वा इति ख पाठः अधिकः ।

"आग्नेयं तु यदा ऋक्षं कार्त्तिक्यां भवति क्वचित् ।
महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा ॥

यदा याम्यं तु भवति ऋक्षं तस्यां तिथौ क्वचित् ।
तिथिः साऽपि महापुण्या मुनिभिः परिकीर्त्तिता ॥
प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप ।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा ॥" इति ।

अस्यामेव सायंकाले मत्स्यावतारो जातः इत्युक्तं पाद्मे, कार्त्तिकमाहात्म्ये—

"वरान् दत्वा यतो विष्णुर्मत्स्यरूपोऽभवत्ततः ।
तस्यां दत्तं हुतं जप्तं तदक्षयफलं स्मृतम् ॥" इति ।

अत्रैव त्रिपुरोत्सव उक्तो भविष्ये—

"पौर्णमास्यां तु सन्ध्यायां कर्त्तव्यः त्रिपुरोत्सवः ।
दद्यादनेन मंत्रेण सुदीपांश्च सुरालयः ॥ इति ।

त्रिपुरोत्सवाख्ये दीपदाने इयं संध्याकालव्यापिनी ग्राह्या । कर्मकालत्वात् । अत्र कार्त्तिकेयदर्शनं कार्यम् । तदुक्तं काशीखण्डे—

"कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् ।
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥" इति ।

अस्यां दामोदरं सम्पूज्य नक्तं कार्यम् । तदुक्तं कृत्यतत्त्वार्णवे ब्रह्मपुराणे—

"पौर्णमास्यां तु संपूज्यो भक्त्या दामोदरः सदा ।
तस्मिन्नहनि यत्नेन कर्त्तव्यं नक्तभोजनम् ॥" इति ।

अत्रैव वृषोत्सर्ग उक्तो भविष्योत्तरे—

"कार्त्तिक्यां तु वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ।
शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतम् ॥" इति ।

अस्यामेव कार्त्तिकस्नायिभिः कार्त्तिकोद्यापनं कार्यम् । तद्विधिस्तु[1] कल्पद्रुमे द्रष्टव्यः ।

---

[1] उक्तवाक्यं ख पाठे नास्ति ।

अथ मार्गशीर्षी—

अस्यां प्रत्यवरोहणं कार्यम् । तदुक्तमाश्वलायनेन—

"मार्गशीर्ष्यां प्रत्यवरोहणं चतुर्दश्यां पौर्णमास्यां वा" इति ।

तत्राप्यस्तमयव्यापिनी ।

"अस्तमिते पायसं जुहुयाद्"

इत्यस्तमयश्रवणात्

"कृत्वा यथार्हमर्केऽस्तं गते त्वौपासनानलम्"

इति शौनकस्मरणाच्च । दिनद्वये तद्व्याप्तावव्याप्तौ वा श्रवणाकर्मवन्निर्णयः । अत्र विशेषो विष्णुस्मृतौ—मार्गशीर्षशुक्लपंचदश्यां मृगशिरोयुक्तायां चूर्णितलवणस्य सुवर्णनाभं प्रस्थमेकं ब्राह्मणाय प्रतिपादयेत । तेन कर्मणा रूपसौभाग्यभागभिजायत इति । अस्यां दत्तात्रेयोत्पत्तिः । तदुक्तं स्कान्दे सह्यखण्डे—

"मार्गशीर्षे तथा मासि दशमेऽह्नि सुनिर्मले ।
मार्गशीर्षयुते पौर्णमास्यां तस्य[1] च वासरे ॥
जनयामास देदीप्यमानं पुत्रं सती शुभम् ।
ते विष्णुमागतं ज्ञात्वा अत्रिर्नामाकरोत्स्वयम् ।
दत्तवान् स्वस्य पुत्रत्वाद्दत्तात्रेयमितीश्वरम् ॥" इति ।

दशमे मासीत्यन्वयः । इयं पूर्वविद्धा ग्राह्येति[2] । प्रदोषव्यापिनीति निर्णयसिंधौ ।

अथ माघी

अस्यां दानान्युक्तानि भविष्योत्तरे—

"माघ्यां मघासु च तिलैः सन्तर्प्य पितृदेवताः ।
तिलपात्राणि देयानि तिला सपललोदनाः[3] ॥
कार्पासदानमत्रैव तिलदानं च शस्यते ।
कम्बलाजिनरत्नानि कंचुकौ पापमोचकौ ॥
उपानद्दानमत्रैव कथितं सर्वकामदम् ।
यत्र वा तत्र वा स्नानं दानं वित्तानुसारतः ॥"

---

[1] तस्य इति ख पाठः ।
[2] वदन्ति इति ख पाठः अधिकः ।
[3] सपपल इति ख पाठः ।

तथा तत्रैव—

"पौर्णमास्यां तु यो माघे पूजयेद्विधिवच्छिवम् ।
सोऽश्वमेधमवाप्तेह विष्णुलोके महीयते ।।" इति ।

इयमेव योगविशेषेण महामाघी तदुक्तं गार्ग्येण—

"मेषराशौ यदा सौरिः सिंहे चन्द्रबृहस्पतिः ।
भास्करः श्रावणर्क्षे च महामाघीति सा स्मृता ।।"

सौरिः शनैश्चरः । हिमाद्रौ ब्राह्मेऽपि—

"मघास्थयोश्च जीवेन्द्वोर्महामाघीति कथ्यते" इति ।

इयं प्रयागे प्रशस्ता । महामाघी प्रयोग इति गार्ग्यवचनात् । अस्यामेव माघस्नानोद्यापनं कार्यम् । इयं युगादिः । मन्वादिश्चेति केचित् ।

अथ फाल्गुनी पौर्णमासी होलिका—

सा च प्रदोषव्यापिनी भद्रा रहिता ग्राह्या ।

"प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा ।
तस्यां भद्रामुख त्यक्त्वा पूज्या होला निशामुखे ।।"

इति नारदीयवचनात् ।

"निशामुखे[1] तु पूज्येत होलिका सर्वतोमुखैः ।

इति पृथ्वीचंद्रोदये दुर्वासोवाक्याच्च । निर्णयामृते तु—

"सायाह्ने होलिकां कुर्यात्पूर्वाह्ने क्रीडनं गवाम् ।"

इति वचनात्सायाह्नव्यापिनी ग्राह्येत्युक्तम् । सायाह्नोऽत्र प्रदोषः ।

"तपस्य पूर्णिमायान्तु रजन्यां होलिकोत्सवः"

इति वचनादिति मयूखे । वयन्तु कर्मोपक्रमविषयं सायाह्ने होलिकामिति वचनं ब्रूमः । दिनद्वये प्रदोषव्याप्तौ परैव । पूर्वदिने भद्रासत्त्वात्तत्र च होलिकानिषेधात् । तथा च निर्णयामृते मदनरत्ने पुराणसमुच्चये—

"भद्रायां दीपिता होली राष्ट्रभंगं करोति वै ।
नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेद् ।।" इति ।

यदा तु पूर्वदिने प्रदोषे भद्रा भवति परदिने चास्तात्पूर्वमेव पंचदशी

---

[1] निशागमे इति ख पाठः ।

समाप्यते तदा[1] उदित[2]लक्षणमाह कात्यायनः—

"रेखामात्रस्तु दृश्येत्तं रश्मिभिस्तु समन्वितः ।
उदितं तं विजानीयात्पुण्यकर्मसु सर्वदा ॥
सूर्योदयात्पूर्वं भद्रान्तं प्रतीक्ष्य होलिकादीपनी ।
दिनार्धात्परतो या स्यात्फाल्गुनी पूर्णिमा यदि ।
रात्रौ भद्रावसाने तु होलिकां तत्र पूजयेत् ॥"

इति भविष्योत्तरात्

"राकायामद्वयादूर्ध्वं चतुर्दश्यां यदा भवेत् ।
होलां भद्रावसाने च निशीथान्तेऽपि दीपयेत् ॥"

इति पुराणसमुच्चयाच्च । कालतत्त्वविवेचनकृत्यरत्नावली कौस्तुभकारादिभिस्तु शेषसूर्योदया स्मृताइति परिभाषानुसारि सूर्योदयपूर्वंभाविघटिकाद्वयात्पूर्वं होलिकापूजनं कार्यमित्युक्तम् । यत्तु—

"भद्रायां विहितं कार्यं होलिकायाः प्रपूजनम् ।" इति ।

यच्च —

"मध्यरात्रमतिक्रम्यविष्टेः पुच्छं यदा भवेत् ।
प्रदोषे ज्वा येदग्नि सुखसौभाग्यदायकम् ॥
प्रदोषान्मध्यरात्रान्तं होलिकापूजनं शुभम् ॥" इति ।

तदनाकरम् । यदा तु पूर्वत्र प्रदोषव्याप्त्यभावस्तत्सत्त्वेऽपि वा भद्रारहितः कालः सूर्योदयात्पूर्वं न लभ्यते । उत्तरदिने च सूर्यास्तात्पूर्वं न लभ्यते । [3]उत्तरदिने च सूर्यास्तात्पूर्वमेव पूर्णिमा समाप्ता तदा भद्रा चतुर्दश्यनन्तरप्रवृत्तपूर्णिमया सहौदयिकपूर्णिमामेकीकृत्य यावत्परिमिता पूर्णिमा भवति, तस्या अष्टप्रहरान् कृत्वा तृतीयचतुर्थ- प्रहरान्तिमाद्यघटीत्रतयपंचके क्रमात्पुच्छमुखसंज्ञके ज्ञेये । पूर्वदिन एव तत्कार्यम् ।

"पृथिव्यां यानि कार्याणि शुभानि त्वशुभानि च ।
तानि सर्वाणि सिध्यन्ति विष्टिपुच्छे न संशयः ।"

इति लल्लवचनात् ।

---

[1] पूर्वेद्युरेव रात्रौ सूर्योदयात् पूर्वं भद्रान्तं प्रतीक्ष्य होलिका दीपनीया ।
[2] उक्तरेखाङ्कितः पाठः ख पाठे नास्ति ।
[3] उक्तपाठः ख पाठे नास्ति ।

विष्टिपुच्छमुक्तं ज्योतिः शास्त्रे—

"दशम्यामष्टम्यां प्रथमघटिकापंचकपरं,
हरिद्युः सप्तम्यां द्विदशघटिकान्ते त्रिघटिकम् ।
तृतीया राकायां खयमघटिकाभ्यः परभवम्,
शुभम् विष्टेः पुच्छं शिवतिथिचतुर्थ्यों च विरमः ॥" इति ।

४	८	११	१५	३	७	१०	१४	आसु तिथिषु
५	२	७	४	८	३	६	१	एतत् प्रहरादौ घटी ५ भद्रामुखमशुभम्
८	१	६	३	७	२	५	४	एतत् प्रहरान्ते घटी २ भद्रापुच्छं शुभम् ।

यदा त्वस्मिन्नेव विषये उत्तरपौर्णमासीसार्धयामत्रयमिता ततोऽधिका वा, प्रतिपच्चोत्तरदिने वृद्धिगामिनी, तदा पूर्वदिनं परित्यज्य परदिने प्रदोषव्यापिन्यां प्रतिपद्येव होलिकादीपनं कार्यम् । न तु पूर्वरात्रौ । विष्टिपुच्छे—

"सार्धयामत्रयं पूर्णा, द्वितीये दिवसे यदा ।
प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृता ॥"

इति भविष्यवचनात् । यत्तु—

"वह्नौ वन्हौलिकायां वह्निप्रतिपद्वर्जयेत्" इत्यर्थः ।

"वह्नौ वह्नि परित्यज्ये" दिति भविष्यन्तदेतद्भिन्नविषयम् । निर्णयसिन्धौ तु—

"अन्ये तु न दिवा पूजयेत् ढुण्ढां" इति वचनाद् ।

"वह्नौ वह्नि परित्यजे" दिति निषेधाच्चैतादृशस्थले पूर्वदिन एव भद्रामुखं विहाय होलिका कार्या । शिष्टाचारोऽप्येवमेवेत्युक्तम् । या तूत्तरदिने प्रदोषैकदेशेऽस्ति । पूर्वरात्रौ च भद्रारहिता नैव लभ्यते, सा सुतरामुत्तरैव । पूर्वव्याप्तौ[1] भद्राव्याप्तत्वादुत्तरत्र प्रदोषे लाभाच्च । पूर्वोक्तं पूर्वविद्धाग्राह्यत्वमुत्तरत्र प्रदोषास्पर्शे वृद्ध्यभावे च ज्ञेयम् ।

---

[1] रात्रौ इति ख पाठः ।

यदा तु प्रतिपत्क्षये दिनद्वयेऽपि पूर्णिमायाः प्रदोषस्पर्शाभाव उक्तसमये भद्रापुच्छालाभो वा तदा सर्वत्रैव भद्रायामपि कार्यं न तु परत्र सायाह्नादेः,[1]

"अपूर्वविद्धा प्रकर्त्तव्या फाल्गुनी पूर्णिमा सदा"

इति शिवरहस्योक्तेः । श्रावणीदुर्गानवमीति बृहद्यमोक्तेश्च उक्तविषय एवेदृशवचः साफल्यात् ।

"दिवा भद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा ।
सा भद्रा भद्रा यस्माद्भद्रा कल्याणकारिणी ॥"

इति ज्योतिः शास्त्रोक्तेश्च । यदा पूर्वदिने रात्रिः सर्वा भद्रायुक्ता, उत्तरदिने प्रदोषश्च पौर्णमासोशेषयुक्तोऽपि ग्रस्तचन्द्रोदयाद्रात्रिः प्रथमघटिकायां अथवा[2] चंद्रग्रासाद्ग्रहणाक्रान्तस्तदा सूर्यास्तोत्तरं भद्रासत्त्वेऽपि पूर्वदिने एव कार्यम् । दिवाभद्रा यदा रात्राविति ज्योतिषिकवचनादि केचित् । वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्त्वे कर्मकालस्पर्शे गौणकालग्रहणे मानाभावाद्भद्राभावाच्च ग्रहणकाल एव स्नात्वा होला कार्या ।

"स्नात्वा कर्माणि कुर्वीत भृतमन्नं विवर्जयेदिति" वचनात् ।
"फाल्गुनो मलमासश्चेच्छुद्धे मासि होला कार्या ।
स्पष्टमासविशेषाख्या विहितं वर्जयेन्मल ॥" इति वचनात् ।

इयमपि मन्वादिः । अत्रापि दोलोत्सव उक्तः कृत्यचिन्तामणौ ब्राह्मे—

"नरो दोलागत दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥" इति ।

अत्र फाल्गुन्यामिति फाल्गुनीविद्धप्रतिपल्लाभार्थम् । वत्सरादौ वसन्तादाविति बृहद्वसिष्ठादिवचः संवादादिति कौस्तुभे । एतासां पौर्णमासीनां स्थानविशेषयोगेन पुण्यतमत्वमुक्तं गार्ग्येण—

"महामाघी प्रयागे तु नैमिषे फाल्गुनी तथा ।
शालग्रामे महाचैत्री कृताः स्युः पुण्यहेतवः ॥
गंगाद्वारे तु वैशाखी ज्यैष्ठी च पुरुषोत्तमे ।
आषाढी वै कनखले केदारे श्रावणी तथा ।

---

[1] सायाह्नादौ इति ख पाठः ।

[2] एव वा इति ख पाठः ।

बदर्यां च पौष्ठपदी कुब्जाद्रौ तु महाश्विनी ।।
पुष्करे कार्त्तिकी कान्यकुब्जे मार्गशिरी तथा ।
अयोध्यायां महापौषी कृताः स्युस्ता महाफलाः ।।" इति ।

प्रयागादिव्यतिरिक्तस्थानेष्वपि महाचैत्र्यादिषु श्राद्धदानोपवासादिकमनन्तफलं भवति ।

"आसु यत्क्रियते श्राद्धं यच्च दानं यथाविधिः ।
उपवासादिकं यच्च तदन्तफलं स्मृतम् ।।"

इति गार्ग्योक्तेः ।

इति विश्वेश्वररचिते प्रतापभूपाज्ञया प्रतापार्के विद्वद्विनोदकन्दे
गतो मयूखोऽत्र तिथ्याख्यः

◆

अथामावास्या-निर्णय:

सा सर्वत्र व्रतोपवासादौ प्रतिपद्युतैव ग्राह्या । प्रतिपद्यप्यमावास्येति युग्मवाक्यात्

"अमावास्या तृतीया च ता उपोष्या: परान्विता:"

इति स्मृतेश्च । अत्र श्राद्धं नित्यम । अमावास्या व्यतीपातेतिपितामहोक्तेः । श्राद्धीयामावास्यानिर्णयस्त्वग्रे वक्ष्यते ।

अथामावास्याविशेषनिर्णय:

तत्र चैत्रामा मन्वादि: । फाल्गुनस्य त्वमावास्येति मात्स्यात् । अत्र फाल्गुनशुद्धोऽमा[1]न्तमासाभिप्रायेण । वैशाखामावास्या कल्पादि: । ज्येष्ठामावास्यायां निर्णयामृतादौ वटसावित्री व्रतमुक्तम् । तन्निर्णयस्तु ज्येष्ठपूर्णिमाप्रकरणे द्रष्टव्य: । अस्यामेव भावुकापूजनमुक्तं भविष्ये—

"भावुकापूजनं कुर्यादमायां वृषभे रवौ ।
तस्मिन् कृते पुत्रपौत्रसस्यवृद्धिर्भवेदिति ।।"

आषाढी[2] अमा चंत्रकल्पादि: । श्रावणी अमा मन्वादिरिति केचित् । भाद्रपदामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन—

"मासे नभस्यामावास्या तस्यां दर्भोच्चयो मत: ।
अयातयामास्ते दर्भा विनियोज्या पुन: पुन: ।।"

नभा: श्रावण: । तेन दर्शान्तमासे जन्माष्टम्यनन्तरं दर्शो लभ्यते । मदनरत्ने तु—

"मासे नभस्येऽमावास्ये" ति मरीचिवाक्यमुक्तम् ।

---

[1] शब्दो इति ख पाठ: ।

[2] आषाढामावास्या इति ख पाठ: ।

नभस्यो भाद्रपदः। तेन महालयान्तर्गतदर्शो लभ्यते। गौणमुख्यचान्द्राभ्यां एक एव दर्श इत्यन्ये। आश्विनामावस्या योग वशेषेण कुंजरच्छाया। तत्र श्राद्धं प्रशस्तमित्युक्तम्। कार्त्तिकामावास्यायां प्रत्यूषेऽभ्यंग उक्तः। कालादर्शे—

"प्रत्यूष आश्वयुग्दर्शे कृताभ्यंगादिमंगलः।
भक्त्वा प्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये॥"

आश्वयुग्दर्शं इत्यमान्तमासाभिप्रायेण। पौष्करे तु—

"स्वातिस्थितेरवाविन्दुर्यदि स्वातियुतो भवेत्।
पंचत्वमुदकस्नायी कृताभ्यंगविधिर्नरः।
नीराजितो महालक्ष्मीमर्चयञ्श्रियमश्नुते॥"

इति स्वातियोगेऽभ्यंगस्नानमुक्तं निर्णयसिन्धौ। कश्यपसंहितायां तु—दीपावली दर्शं प्रक्रम्य।

"इन्दुक्षयेऽपि संक्रान्तौ रवौ पाते दिनक्षये।
तत्राभ्यंगो न दोषाय प्रातः पापापनुत्तये॥"

मात्स्ये—

"दीपैर्नीराजनादत्र सैषा दीपावली स्मृता"

अत्र कृत्यान्तर हेमाद्रावादित्यपुराणे—

"एवं प्रभातसमये अमयां च नराधिप।
स्नात्वा देवान् पीतॄन् भक्त्या संपूज्याथ प्रणम्य च॥
कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृतादिभिः।
दिवा तत्र न भोक्तव्यमृते बालातुराजनान्[1]॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपवृक्षास्तथा कार्याः शक्त्यादेव गृहेषु च॥
ब्राह्मणान् भोजयित्वादौ संभोज्य च बुभुक्षितान्।
अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिताः[2]॥"

यत्तु भूताष्टम्योर्दिवा भुक्तेत्यनेनामायां रात्रौ भोजनं निषिद्धं तद्रागप्राप्तं[3] न वैधां विधिस्पृष्टे निषेधानवकाशात्।

---

[1] राज्जनात् इति ख पाठः।
[2] शोभिना इति ख पाठः।
[3] तद्रागप्राप्तं इति ख पाठः।

"दयिताभिश्च सहितैर्नेया सा च भवेन्निशा"

इति वचनादस्यां पर्वं प्रयुक्तम्, स्त्रीसंगदोषोऽपि न। इयमेव रात्रिः सुखरात्रिः। अत्र सर्वदेवानां सुखशयनमुक्तम्। तत्रैव

"अमायां चैव देवास्तु कार्त्तिके मासि केशवात्।
अभयं प्राप्य सुप्तास्तु सुखं क्षीरोदसानुषु॥
लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ताऽम्बुजोदरे।
अतोऽर्थं विधिवत्कार्या मनुष्यैः सुखसुप्तिका॥" इति।

अत्र प्रदोषस्य कर्मकालत्वोक्तेस्तद्व्यापिन्यमा ग्राह्या। दिनद्वये प्रदोषव्याप्तौ परैव युग्मवाक्याद्

"दण्डैकरजनी योगो दर्शस्य स्यात्कदाचन।
तदा विहाय पूर्वेद्युः परेऽह्नि सुखसुप्तिका॥"

इति तिथितत्त्वे ज्योतिर्निबन्धवचनाच्च। उभयदिने प्रदोषव्याप्त्यभावेऽर्द्धरात्रव्यापिनी ग्राह्या।

"अर्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहात्।
अतः स्वलंकृता लिप्ता दीपैर्जाग्रज्जनोत्सवा।
सुधाधवलिताः कार्याः पुष्पमालोपशोभिताः॥"

इति ब्राह्मवचनात्तस्य लक्ष्म्यागमनकालत्वात्। दिवोदासीये तु—प्रदोषस्य कर्मकालत्वादर्धरात्रस्य च लक्ष्म्यागमनकालत्वात्प्रदोषार्धरात्रव्यापिनी मुख्या। एकैकव्याप्तौ परैव। प्रदोषस्य मुख्यत्वादर्धरात्रेऽनुष्ठेयाभावाच्चेत्युक्तम्। यथा पूर्वेद्युरेव प्रदोषव्यापिन्यमा श्राद्धयोग्या च द्वितीयदिने तदा पूर्वेद्युरेव प्रदोषे लक्ष्मीं सम्पूज्य दीपदान कार्यम्। श्राद्धन्तु परदिनेऽपराह्णे। यस्तु—

"अपराह्णे प्रकर्त्तव्यं श्राद्धं पितृपरायणैः।
प्रदोषसमये राजन् श्राद्धन्तु परदिनेऽपराह्णे॥" इति क्रमः।

स सम्पूर्णतिथ्यभिप्रायेणानुवादो न विधिः। तत्तत्कर्मकालव्याप्तेर्वलवत्त्वात्सम्पूर्णतिथौ प्राप्त्या खण्डतिथावप्राप्त्या विध्यनुवादविरोधाच्च। उल्कादानमपि प्रदोषव्यापिदर्श एव। प्रदोषे भूतदर्शयोः, उल्काहस्ता नराः कुर्युरिति पूर्वोक्तेः अत्रैव [1]दर्शोऽपररात्रेऽलक्ष्मी निःसारणमुक्तं मदनरत्ने भविष्ये—

---

१. दर्शेऽपररात्रे इति ख पाठः।

"एवं गते निशीथे तु जने निद्रान्ध लोचने ।
तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः ।
निष्क्रास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् ॥"

अस्यामेव दाक्षिणात्याः केदारगौरीव्रतमाचरन्ति ।

"आश्विनस्यासिते पक्षे अमावस्या यदा भवेत् ।
तस्यां व्रतमिदं कार्यं यथोक्तं शम्भुना पुरा ॥"

इति पद्मपुराणात् । इयमत्र सामान्यनिर्णयात् परा ग्राह्या ।

"मघाऽमायां ब्रह्माणं सम्पूज्य नवनीतं धेनुं दद्यात्"

इत्युक्तं निर्णयामृते ब्रह्मपुराणे

"अमायां माघमासस्य पूजयित्वा पितामहम् ।
गायत्र्या सहितं देवं वेदवेदांगभूषितम् ।
नवनीतमयीं धेनुं ब्राह्मणाय निवेदयेत् ॥" इति ।

अत्रैवार्धोदयो नाम योगविशेषो मदनरत्ने भारत उक्तः—

"अमार्कपातश्रवणैर्युक्ता चेत्पुष्यमाघयोः ।
अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः ॥" इति ।

निर्णयामृते तु—

"दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन"

इत्यर्धाधिकं पठितम् । पुष्यमाघयोर्मध्यवर्त्तिनी अमा पौष्यनन्तराऽमःवास्येत्यर्थ इति नारायणभट्टाः । अतः हेमाद्रौ स्कांदे—

"माघामायां व्यतीपाते आदित्ये विष्णुदैवते ।
अर्धोदयन्तदित्याहुः सहस्रार्कग्रहैः समम् ॥" इति ।

अत्र पूर्णिमान्तमासेनामावास्येति मदनरत्नः । कालादर्शे मदनरत्ने च पुष्यस्य माघस्य चेत्युक्तं तत्रैव—

"अर्धोदये तु संप्राप्ते सर्वं गंगासमं जलम् ।
शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसन्निभाः ॥"
"यत्किंचिद्दीयते दानं तद्दानं मेरुसंनिभम् ।" इति ।

फाल्गुनामा युगादिः । दर्शे तु माघमासस्येति भविष्योत्तरात् । माघोऽत्रामान्तः । अत्रापिण्डं श्राद्धं कार्यम् । प्रकृतिपार्वणेन सह तंत्रेण प्रयोगोऽपीति कौस्तुभे । इयं मन्वादिरपि । अस्यामेव रुद्रादिपूजोक्ता लैंगे फाल्गुनप्रक्रमे—

"अमावस्यायां पूज्याश्च रुद्रोऽग्निर्ब्राह्मणास्तथा ।
मांसोदनैः पोलिकाभिः पूज्यश्चात्मा स बान्धवः ।।" इति ।

चैत्रामा[1] मन्वादिः । फाल्गुनस्य त्वमावास्येति मात्स्यात् । फाल्गुनोऽत्रामान्तः । अथ योगविशेषेणामायां कर्त्तव्यविशेषो हेमाद्रौ शातातपेनोक्तः ।

"अमायां तु भवेद्वारो यदा भूमिसुतस्य वै ।
जाह्नवीस्नानमात्रेण गोसहस्रफलं भवेत् ।।"

महाभारते—

"अमा सोमे तथा भौमे गुरुवारे यदा भवेत् ।
तत्पर्व पुष्करं नाम सूर्यपर्वशताधिकम् ।।" इति ।

चैत्रामावास्या मन्वादिः । फाल्गुनोऽत्रामान्तः । यस्यां कस्याममायां योगविशेषैः पारिभाषिको व्यतीपात उक्तो भारते—

"श्रवणाश्विधनिष्ठार्द्रा नागदैवतमस्तकैः ।
अमा चेद्रविवारेण व्यतीपातः स उच्यते ।।
तत्र जप्तं हुतं दत्तं सर्वं कोटिगुणं भवेत् ।
नागदैवतमाश्लेषा मस्तकं मृगशीर्षकम् ।।"

केचित्तु 'मस्तके' इति पाठमंगीकृत्य मस्तके प्रथमचरणे एतच्च श्रवणादिभिः प्रत्येकं सम्बध्यत इत्याहुः । शंखः—

"अमावस्या तु सोमेन सप्तमी भानुना तथा ।
चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ।।
चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसन्निभाः ।
स्नानं दानं तथा श्राद्धं सर्वं तत्राक्षयं भवेत् ।।" इति ।

---

[1] उक्त पाठः ख पाठे नास्ति ।

इयं सोमवारयुता कपिलतीर्थे श्राद्धादावतिप्रशस्ता । तदुक्तं काशीखण्डे—

"अमा सोमसमा योगे श्राद्धं यद्यत्र लभ्यते ।
तीर्थे कपिलाधोरऽस्मिन्नायया पुष्करेण किम् ।।" इति ।

अयं च योगो [1]दिग्धर्मप्रवृत्तौ ।

"तिथिवासरयोर्योगो यथाकालो भवेद्यदि ।
प्रभाते वाऽथ मध्याह्ने पुण्यकालः स नान्यथा ।।"
चैव शस्त इति शिष्टाः ।

इति पौण्डरीकयाजिविश्वेश्वरविरचिते प्रतापार्के प्रतापभूपाज्ञया तिथिपुण्डरीके अमावास्याव्रतानि ।

◆

---

[1] दिग्धर्मं इत्यतः स चान्यथा इत्यन्तः, पाठः ख पाठे नास्ति ।

अथ श्राद्धीयामावस्या-निर्णीयते

तत्र येषां साग्निकानामन्वाधानपिण्डपितृयज्ञ-दर्शश्राद्धान्येकदिनकर्त्तव्यत्वेन नियतानि ।

"पक्षान्तं कर्मनिर्वर्त्य वैश्वदेवं तु साग्निकः ।
पिण्डयज्ञन्ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥"

इति वचनात्तैस्त्रेधाविभक्तदिनतृतीयांशरूपापराह्णव्यापिन्याममावास्यायां श्राद्धं कर्त्तव्यम् ।

'पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयांशेऽनातिसन्ध्या समीपतः ॥"

इति छन्दोगपरिशिष्टात् । पिण्डान्वाहार्यकमिति पिण्डपितृयज्ञानन्तरं क्रियमाणं अमावस्या-श्राद्धम् । तत्रापि चन्द्रक्षयकालः प्रशस्तः ।

"क्षीणे राजनि शस्यते" इति वचनात् ।

स च कालस्तत्रैवोक्तः ।

"अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमा ।
अमावस्याष्टमांशे च पुनः किल भवेद्रणः[1] ॥" इति ।

इयमाहिताग्निविशेषं प्रतिदिवसतृतीयभागरूपापराह्णस्य दर्शकालत्वे स्थिते कालव्याप्तिविषयपक्षषट्कमध्ये त्रिमुहूर्त्ताधिकवृद्धिक्षयाभावेन दिनद्वये कृत्स्ना कालव्याप्तिः । तदस्पर्शपक्षयोरसंभवाच्चत्वार एव पक्षाः पूर्वेद्युरेव कात्स्न्र्येनैकदेशेन वा व्याप्तिः, परेद्युरेव कात्स्न्र्येनैकदेशेन वासा । दिनद्वयेऽपि साम्येन वैषम्येण वा एकदेशव्याप्तिरिति । तत्र या पूर्वेद्युरेव कृत्स्नकर्म-

---

[1] भवेदणुरिति ख पाठः ।

कालव्यापिन्युत्तरत्रतदेकदेशमपि न स्पृशति सा पूर्वैव । या पूर्वदिने कृत्स्नकर्मकालव्यापिनी सत्युत्तरदिने तदेशदेशव्यापिनी, साऽपि पूर्वैव । यदि यजनीयदिने यागस्तदा[1] न्वाधानानुरोधेन श्राद्धस्यैकदेशव्याप्तिदिन एव भवति । त्रयाणामेककालत्वनियमात् । त्वेकदेशमपि पूर्वेद्यु रेव स्पृशति सा पूर्वैव । तथा च परिशिष्टे—

"यदा चतुर्दशीयामं तुरीयमनुपूर्येत् ।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते ।" इति ।

चतुर्दशीदिवसस्य चतुर्थयाम मावास्या अनुपूरयेत्तत्र प्रविशेदित्यर्थः । क्षीयमाणायागदिन चंद्रदर्शनप्रयोजकक्षयवती । अतएव दिनद्वयेऽपि क्षयेण समैकदेशव्याप्तौ पूर्वैव या तूत्तरैव कृत्स्नकर्मकालव्यापिनी पूर्वेद्यु स्तदस्पर्शिनी सोत्तरैव । उत्तरस्यां कालव्याप्तिलाभात्पूर्वेद्युरेकदेशस्पर्शस्याप्यभावादह्निदर्शप्रवेशाभावाच्च । या तु तादृशी पूर्वेद्यु रेकदेशस्पर्शिनी साऽप्युत्तरैव । उत्तरदिने प्रतिपत्प्रवेशाभावेन यागासम्भवादन्वाधानादेरेव तत्रानुष्ठातुमुचितत्वात्

"वर्धमानाममावास्यां लभेच्चेदपरेऽहनि ।
यामांस्त्रीनधिकान्वापि पितृयज्ञस्ततो भवेत् ।।"

इति परिशिष्टाच्च । या तूत्तरेवैकदेशव्यापिनी साऽप्युत्तरैव । पूर्वदिनेऽमावास्याप्रवेशाभावात् । दिनद्वये वैषम्येणैकदेशव्याप्तौ—

"तदाधिक्यवती ग्राह्या० ।"

तत्र पूर्वस्यास्तथात्वे सम्यगेव । यद्युत्तरत्रयागदिगतचन्द्रादर्शनप्रयोजिका वृद्धि र्भवति, तदा वर्धमानवाक्यादुपवासानुरोधाच्चोत्तरैव । उत्तरस्यास्तथात्वे यदि तदुत्तरदिने चन्द्रदर्शनं न भवति, तदोत्तरैव । अन्यथा पूर्वा । एवं तिथिसाम्येनापि कालैकदेशस्य वैषम्येण व्याप्तौ चंद्रदर्शनप्रयुक्तोऽधिकाग्रहणस्यापवादो ज्ञेयः । या च दिनद्वयेऽपि साम्येनैकदेशव्यापिनी, सा यदि क्षयेण तदा क्षीयमाणा वाक्यात्पूर्वा यदि वृद्ध्या तदा वर्धमाना वाक्यात्परा । चंद्रादर्शनतद्दर्शनप्रयुक्तस्तयोरपवादः पूर्ववदेव । यदि साम्येन तदा यागदिने चंद्रादर्शने परा तद्दर्शने पूर्वेत्यन्वाधानपिण्डपितृयज्ञश्राद्धानामेकदिनकर्त्तव्यतानियमयुक्तान् साग्निकान् प्रत्यमावास्यानिर्णयः ।

अथ तादृशनियमरहितानाश्वलायनाप–
स्तम्बान्निरग्निकाँश्च प्रत्यमावास्या निर्णीयते ।

---

[1] कृत्स्नकालव्याप्ति लाभाच्चन्द्रक्षयलाभाच्च । यदा त्वेतस्मिन्नेव विषये वृद्ध्या चन्द्रादर्शनात् प्रतिपद्येव इत्यन्तः ख पाठः अधिकः ।

तेषां पञ्चधाविभागपक्षः अपराह्ण एव प्रशस्तः। श्राद्धकाल इति तद्व्याप्त्यैवामावास्या निर्णेतव्या।

कर्मणो यस्य यः काल०" इति वचनात्—
"यस्यां संध्यागतः सोमो मृणालमिव दृश्यते।
अपराह्णे तु या तस्यां पिण्डानां करणं ध्रुवम्॥"

अपराह्णे—

पितृणां यु याऽपराह्णानुयायिनी सा ग्राह्या।
"पितृकार्ये तु न पूर्वास्तुयायिनी" इति हारीतवचनाच्च।

एवं या पूर्वैवापराह्णव्यापिनी, सा पूर्वस्यां संध्यागत इति अौर्वंवचनात्[1]। उत्तरैवापराह्णव्यापिन्युत्तरातु[2] अपराह्णः पितृणामिति वचनात् तथा च सति

"सूतविद्धाममावास्यां मोहादज्ञानतोऽपि वा।
श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते॥"

इति कार्ष्णाजिनि वचनमप्युत्तरस्या एवापराह्णव्यापित्वे उपोद्बलकं दिनद्वयेऽपि सकलापराह्णव्याप्तावुत्तरतिथेर्वृद्धिसाम्ययोरुत्तरैव। उपक्रम समारभ्य सम्पूर्णकालव्यापित्वादुत्तरतिथेः क्षये पूर्वा अमावास्या तु या हि स्यादपराह्णद्वयेऽपि सा

"क्षये पूर्वा परावृद्धौ साम्येऽपि च परा स्मृता"

इति माधवोदाहृतशिवराघवसम्वादात्। नचैतत्पूर्वादिवाक्यवद्दिनद्वयगतसमैकदेशव्याप्तिविषयमेकदेशपदानुपादानेन स्वरसतः सकलव्याप्तेरेव प्रतीतेः। तेन क्षयादयोऽत्र परतिथेरेव। तिथिक्षये—

"सिनीवाली तिथिवृद्धौ कुहूः स्मृता।
साम्येऽपि च कुहुर्ज्ञेया सा हि वेदांगवेदिभिः॥"

इत्यपि वचनमेतत्समानार्थमेव। दिनद्वयेऽपि वैषम्येणैकदेशव्याप्तावधिकापराह्णव्यापिनी ग्राह्या। कालशास्त्रात्

"अपराह्णद्वयव्यापिन्यमावास्या यदा भवेत्।
तत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणि॥"

---

[1] पूर्ववचनात् इति ख पाठः।

[2] उत्तरापराह्णपितृणामिति उत्तरवचनाच्चेति ख पाठः।

इति कालमाधवाद्युदाहृतवचनाच्च । याऽधिकव्यापिनी सा ग्राह्येत्यर्थः । दिनद्वयेऽपि साम्येनैकदेशव्यापिन्याः क्षयवृद्धिसाम्यैः सम्भवात्वर्वादिवाक्या[1]त्तिथिक्षये सिनोवालोत्यादिवचनाच्च निर्णयः । सिनीवालो चतुर्दशोयुक्ता अमा । प्रतिपद्युक्ता कुहूः ।

"दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूर्मता"

इति व्यासवचनात् । दिनद्वयेऽपि अपराह्णास्पर्शिन्यां साग्न्यनग्निभेदेन व्यवस्थामपि जाबालिः—

"अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्ने सिनीवाली निरग्न्यादेः कुहूर्मता ।।" इति ।

लौगाक्षिरपि—

"सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ।।" इति ।

हेमाद्रिणा तु—निरग्न्यादिभिः कुतपव्यापिन्यमा ग्राह्या ।

"भूतविद्धाऽप्यमावास्या प्रतिपन्मिश्रिताऽपि वा ।
पित्र्ये कर्मणि विद्वद्भिः कार्या कुतपकालिकी ।।"

इति हारीतोक्तेः कुतपश्च—

"अह्नोः मुहूर्ता विख्याता दशपं चैव सर्वदा ।
अत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ।।"

इति मात्स्योक्ते । माधवीये तु कुतपकालिक्या ग्राह्यत्वाभिधानमेकोद्दिष्टविषयं, तस्यैकोद्दिष्ट तु मध्याह्न इत्यादिवचनेन कुतपकालत्वाभिधानात् । यद्वा प्रतिपन्मिश्रायामप्यपराह्णव्यापित्वाभावे निरग्निकैरपि हेयत्वाशंकायां ग्राह्यत्वे कुतपव्याप्तिरनुकल्पत्वेनाभिधीयते । अपराह्णव्याप्तिः पार्वणे मुख्यः कल्पः । कुनपव्याप्तिरनुकल्पनीया[2] । तथा च मुख्यासंभवेऽनुकल्पस्योपादेयत्वान्निरग्निकैः प्रतिपन्मिश्रिता गृहीतुं शक्यते इति । निर्णयसिंधावप्येवम् । अमाश्राद्धं चानुपनोतोऽपि कुर्यात् । श्राद्धशूलपाणौ—

"अमावास्याऽष्टका कृष्णपक्षपंचदशीषु च"

---

[1] सम्भवात्खर्वादिवाक्यादिति 'ख' पाठः ।
[2] कुतुपव्याप्तिरनुकल्प इति ख पाठः ।

इत्युपक्रम्य ।

"एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु पर्वसु ।
श्राद्धं साधारणं नाम सर्वकामफलप्रदम् ॥
भार्याविरहितोऽप्येतत्प्रवासस्थोऽपि नित्यशः ।
शूद्रोऽप्यमंत्रकुर्याद्दिनेन विधिना बुधः ॥" इति मात्स्योक्तेः ।

अमाश्राद्धातिक्रमे प्रायश्चित्तमुक्तमृग्विधाने—

"न्यूषु वाचं जपेन्मंत्रं शतवारं तु तद्दिने ।
अमाश्राद्धं यदा नास्ति तदा सम्पूर्णमेति तत् ॥" इति ।

इत्यमावास्याश्राद्धकालनिर्णयः ।

अथात्रप्रसंगात् क्षयाहश्राद्धकालनिर्णयोलिख्यते ।

तत्र क्षयाहस्वरूपं स्मृतावुक्तम् ।

"मासपक्षतिथिस्पृष्टे यो यस्मिन् म्रियतेऽहनि ।
प्रत्यब्दं तु यथाभूतं क्षयाहं तस्य तं विदुः ॥"

इति मासश्चांद्र एवात्र ग्राह्यः ।

"आब्दिके पितृकार्ये च मासश्चांद्रमसः स्मृतः"

इति व्यासवचनात् । यत्तु—

"यस्मिन् राशौ गते सूर्ये विपत्ति याति मानवः ।
तद्राशावेव कर्त्तव्यं पितृकार्यं मृतेऽहनि ॥"

इति वचनं तदधिमासमृतविषयम् ।

"अधिमासमृतानां तु सौरं मासं समाश्रयेत् ।
स एव दिवसस्तस्य श्राद्धपिण्डोदकादिकः ॥"

इति स्मृत्यन्तरवचनात् । एतन्मृति मासस्यैवाधिक्ये ज्ञेयम् । ब्राह्मे—

"प्रतिसम्वत्सरं कार्यं मातापित्रोर्मृतेऽहनि ।
पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि ॥"

अपुत्रस्येति भ्रात्राऽप्यन्वयः । ज्येष्ठस्येति कनिष्ठस्यानावश्यकत्वार्थे । एतच्च द्विविधम् । एकोद्दिष्टं पार्वणं च । आद्यमाह यमः ।

"सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः ।
मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेऽहनि ।।" इति ।

अन्त्यमाह शातातपः—

"सपिण्डीकरणं कृत्वा कुर्यात्पार्वणवत्सदा ।
प्रतिसंवत्सरं श्राद्धं छागलेयोदितो विधिः ॥
यः सपिण्डीकृतं प्रेतं पृथक् पिण्डे नियोजयेत् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ।।" इति ।

अनयोः पक्षयोर्देशाचाराद् व्यस्थोक्तं सर्वनिबन्धसिद्धान्तः । तच्च क्षयाहश्राद्धमेकोद्दिष्टम् चेत्क्रियते, तदा तन्मध्याह्ने कार्यम् ।

"मध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टा तिथिर्भवेत् ।
अपराह्णव्यापिनी या च पार्वणे सा तिथिर्भवेत् ।।"

इति गौतमवचनात । एकोद्दिष्टस्य च स्वरूपमुक्तं व्यासेन—

"एकमुद्दिश्य यच्छ्राद्धं दैवहीनं विधीयते ।
एकोद्दिष्टं तु तत्प्रोक्तं मध्याह्ने तत्प्रकीर्तितम् ।"

इति मध्याह्नश्च पंचधा विभक्ते दिने तृतीयो भागः । तत्रापि कुतपादिमुहुर्त्तद्वये ज्ञेयम् ।

"प्रारभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेत् ।।"

इति गौतमोक्तेरेतत्परत्वात् । रौहिणो नवमो मुहूर्त्तः दीपिकाऽपि एकोद्दिष्टमुपक्रमेत कुतपे इति । व्यासोऽपि—

"कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् ।
आवर्तनसमीपे वा तत्रैव नियतात्मवान् ।।" इति ।

तत्रैव–कुतपे निर्णयः पार्वणतिथिवत् । तत्रान्यतर[1] एव तद्व्याप्तौ न कोऽपि सन्देहः । दिनद्वये तद्व्याप्तावव्याप्तौ च पूर्वा परविद्धा-निषेधात् । अंशतः सप्तव्याप्तौ च पूर्वा । माधवस्त्वत्र खर्वादिवाक्येन निर्णय इत्याह । विषयव्याप्ताधिक्येन निर्णयः । पार्वणं त्वपराह्णे कार्यम् । पूर्वोक्तगौतमवचनात्–

---

[1] उपतरेखाङ्कितः पाठः ख पाठे नास्ति ।

"पराह्णव्यापिनी या पार्वणे सा तिथिः स्मृता ।
पूर्वस्यां निर्वपेत्पिण्डमित्यादिऋषिभाषितम् ।।" इति वचनाच्च ।

कालतत्त्वविवेचनकारादयस्तु

"ऊर्ध्वं मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयम् ।
मुहूर्त्तपंचकं ह्येतत्स्वधाभवनमिष्यते ।।"

इति वचनात्कुतपादिमुहूर्त्तपंचकं पार्वणकालः । एवं च सति मुहूर्त्तपंचकव्यापिनी यदि लभ्यते, तया सम्यगेव नो चेत्केवलापराह्णव्यापिन्यपि ग्राह्या । निर्णयश्च तद्व्याप्तौ कार्यस्तत्रैव कालव्याप्तिषट्पक्षसम्भवात् इत्याहुः । प्रपितामहा अप्येवम् । तत्र पूर्वेद्युरेव परेद्युरेव वाऽपराह्णव्याप्तौ सैव ग्राह्या । दिनद्वये वैषम्येण तदेकदेशव्याप्तौ तदाधिक्यवती ग्राह्या ।

"[1]अपराह्णव्यापिनी स्यादाब्दिकस्य यदा तिथिः ।
महती यत्र तद्दिद्धां प्रशंसन्ति महर्षयः ।।"

इति मरीचिस्मृतेः । दिनद्वयेऽपि समग्राऽपराह्णव्याप्तौ साम्येनैकदेशव्याप्तौ च पूर्वैव ।

"दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनम् ।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ।।"

इति नारदोक्तेरिति निर्णयसिन्धुकारादयः माधवस्तु—

"क्षये पूर्वा वृद्धौ परा" ।

खर्वदर्पौ परौ पूज्यावित्युक्तेरपराह्णद्वयव्यापिन्यतीतस्य यदा तिथिः । क्षये पूर्वा च कर्त्तव्या वृद्धो कार्या तथोत्तरे ति बौधायनोक्तेश्चेत्याह । वृद्धिक्षयौ चात्र परतिथेर्न तु ग्राह्यतिथेः तस्याः क्षयेऽपराह्णद्वयव्याप्तेरसंभवात् । तदाह माधवः—न ग्राह्यतिथिगौवृद्धिक्षयादूर्ध्वं तिथेस्तुताविति । यदा तु दिनद्वयेऽप्यपराह्णसम्बन्धाभावस्तदा पूर्वैव । तदाह मनुः—

"न द्वयाह्व्यापिनी चेत्स्यान्मृताहस्य यदा तिथिः ।
पूर्वविद्धैव कर्त्तव्या त्रिमुहुर्त्ताऽपि या भवेत् ।।" इति ।

श्राद्धं त्वेकभक्तादिवत्स्वकाल एव तत्र तत्तिथ्यभावेऽपि कर्त्तव्यम् । "तिथ्यादौ च भवेद्यावा" निति वचनात्तत्तिथिक्षयस्य पूर्वतिथौ प्रक्षेपेण यां तिथिं

---

१. द्वयपराह्णव्यापिनीति ख पाठः ।

समनुप्राप्यास्तं यातीति साकल्यवचनेन च तत्र तत्तिथेः सत्त्वात् । पूर्वेद्युः सायं त्रिमुहुर्त्ताभावे तु परैव ।

"त्रिमुहूर्त्ता न चेद् ग्राह्या परैव कुतुपे हि सा"

इति कालादर्शे गोभिलोक्तेः । तदेतत्क्षयाहश्राद्धमवश्यं कर्त्तव्यम् तथा च भविष्यपुराणे—

"मृतेऽहनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात् ।
मातुश्च खगशार्दूलवत्सरान्ते मृतेऽहनि ।।" इति[1] ।

यदा विघ्नवशाद्दिने सांवत्सरं श्राद्धं न कृतं तदा रात्रावपि कार्यम् ।

"मृताहं समतिक्रम्य चण्डालेष्वभिजायते"

इति मरीचिना मृताहातिक्रमे दोषोक्तेः न च नक्तं श्राद्धं कुर्वीतारब्धे-चाभोजनसमापनमित्यापस्तम्बेन गौणकालतोक्तेश्चेति माधवः । आरब्धे श्राद्धे विघ्नवशाद्रात्रिपाते भोजनसमाप्त्यन्तं रात्रौ कार्यम् । शेषसमाप्तिः परदिन एवेति हरदत्तः । ग्रहणदिने वार्षिकप्राप्तौ भोक्तृब्राह्मणस्यालाभे तद्दिन एवामाऽन्नादिना कर्त्तव्यम् । तदुक्तं गोभिलेन—

"दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् ।
अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुतः ।।"

इति दर्शे पित्रोः सुतः रवीति च सर्वमविवक्षितमुपलक्षणम् । आमपदेन च वितुषं तण्डुलादि गृह्यते न तु सतुषम् ।

"सस्यं क्षेत्रगतं प्राहुः स तु संधान्यमुच्यते ।
आमं तु वितुषं प्रोक्तं स्विन्नमन्नमुदाहृतमिति ।।"

वसिष्ठवचनात् । दर्शे वार्षिकं चेत्तदा,

"पूर्वं वार्षिकं कृत्वा ततः पिण्डपितृयज्ञो दर्शश्राद्धम्"

चेति निर्णयदीपे क्रम उक्तः स्मृतिसारेऽपि ।

"दर्शे क्षयाहे संप्राप्ते कथं कुर्वन्ति याज्ञिकाः ।
आदौ क्षयाहं निर्वर्त्य पश्चाद्दर्शो विधीयते ।।"

इति युक्तं त्वेवं तद्वचने मूलाभावात् ।

"पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः"

---

[1] नाहं तस्य खगश्रेष्ठ पूजां गृह्णामि नो हरिः । ब्रह्मा न च वै रुद्रो ना चान्ये देवता गणाः । तस्मात् यत्नेन कर्त्तव्यं वर्षे वर्षे मृतेहनि इत्यन्तः पाठः ख पाठेऽधिकः पाठः ।

इति दर्शश्राद्धे पिण्डपितृयज्ञानन्तर्यात्तस्याब्दिकेऽप्यतिदेशात्प्राप्तेः पितृयज्ञानन्तरं वार्षिकं, ततो दर्शश्राद्धमिति । कालादर्शेऽपि—

"निर्मित्ता नियतिश्चात्र पूर्वानुष्ठानकारणम्" इति ।

सर्वान् प्रत्यैक्यरूप्याभावात्क्षयाहनिमित्तस्यानियतत्वम्[1] । एवं मासिकादिष्वपि ज्ञेयम् ।

"प्रत्यब्दं यो यथा कुर्यात्सतान्यपि" इति सर्वातिदेशात् ।

यानि तु—

"ग्रहणात्तु द्वितीयेऽह्नि रजोदोषात्तु पंचमे"

तथा—

"ग्रस्तोदये यदा चंद्रे प्रत्यब्दं समुपस्थितम् ।
तद्दिने चोपवासः स्यात्प्रत्यब्दन्तु परेऽहनि ॥"

इत्यादि वचनानि, तानि महानिबन्धेष्वपि क्वाप्यनुपलम्भान्निर्मूलानि । अमावास्यादिश्राद्धन्तु तत्रामेनैव भवति ।

"श्राद्धविघ्ने द्विजातीनामश्राद्धं प्रकीर्त्तितम् ।
अमावास्यादिनियतं मासः संवत्सरादृतः ॥"

इति हारीतवचनात् । श्राद्धस्य पाकश्राद्धस्य । विघ्ने असंभवे । मासः मासिकम् । संवत्सरः सांवत्सरिकम् । एतदुभयभिन्नं नियतं नित्यममावास्यादि आमश्राद्धं कर्त्तव्यमित्यर्थः । आदिशब्देन संक्रान्त्यादिसाधारणनिमित्तकानि गृह्यन्ते । सूतकेनाब्दिकश्राद्धेऽन्तरिते सूतकानन्तरदिने तत्कुर्यात् । तदाह ऋष्यशृंगः—

"आब्दिके चैव सम्प्राप्ते आशौचं जायते यदि ।
आशौचे च व्यतिक्रांते तत्र श्राद्धं विधीयते ॥" इति ।

आशौचानन्तरदिनेऽपि करणासम्भवेऽमावास्यायां कुर्यात्तदाह गोभिलः—

"दैवात्प्रत्याब्दिके श्राद्धे त्वन्तरामृतसूतके ।
आशौचानन्तरं कुर्यात्तन्मासेन्दुक्षयेऽपि च ॥" इति ।

मरीचिनैकादश्यप्युक्ता—

"श्राद्धविघ्ने समुत्पन्नेऽप्यविज्ञाते मृतेऽहनि ।
एकादश्यां तु कर्त्तव्यं कृष्णपक्षे विशेषतः ॥" इति ।

---

[1] देव जानीयेऽप्येवं इति अधिकः ख पाठः ।

शुक्लायां अपि । आशौचेतरविघ्ने एतदिति माधवपृथ्वीचन्द्रौ । केचित्त्वाशौचान्तरं पुनः क्षयाहतिथावेव कार्यमित्याहुः । यथाहात्रिः—

"तदहश्चेत्प्रदुष्येत केनचित्सूतकादिना ।
सूतकानन्तरं कुर्यात्पुनस्तदहरेव च ॥" इति ।

अत्र सूतकपदं विघ्ननिमित्तस्योपलक्षणम् । सूतकानंतरमिति सामान्योपादानेऽपि सूतके एकादशे दिवसे मृतके त्रयोदशे इति ।

"मृते त्रयोदशे श्राद्धं वृद्धावेकादशेऽहनि ।"

इति श्राद्धकर्मत्वे[1]ऽभिधानात् । धर्मप्रदीपेऽपि—

"सूतकान्तरितं श्राद्धं प्रमादादकृतं तथा ।
तद्दिने द्वादशाहे वा कर्त्तव्यं वाऽपि पर्वणि ॥"

द्वादशेऽहनि सूतक इति द्रष्टव्यम् । [2]व्याध्यादौ विस्मरणे चैवं ज्ञेयम् । यद्वा शौचान्तो मलमासश्चेत्तर्हि तत्राप्यन्तरितं श्राद्धं कार्यम् ।

"प्रतिसम्वत्सरश्राद्धमाशौचात्पतितं च यत् ।
मलमासेऽपि तत्कार्यमिति भागुरभाषितमिति ॥"

भृगुवचनात् । चकारस्त्वर्थे पत्न्यां रजस्वलायां तु क्षयाहश्राद्धम् । तद्दिन एव पक्वान्नेनैव कार्यम् ।

"पुष्पवत्स्वपि दारेषु विदेशस्थोऽप्यनग्निकः ।
अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचित् ॥"

इतिलौगाक्षिवचनात् । एवं मासिकेऽपि । यत्तु हेमाद्र्यादिपरिधृतं वचनम्,

"मृतेऽहनि तु सम्प्राप्ते यस्य भार्या रजस्वला ।
श्राद्धं तत्र न कर्त्तव्यं कर्त्तव्यं पंचमेऽहनि ॥" इति ।

तदपुत्रस्त्रीकर्त्तृकश्राद्धविषयम् । तथा च यस्य भार्या रजस्वलेत्यस्यायमर्थः । यस्य मृतस्य श्राद्धकर्त्री भार्या रजस्वलेति । तथाह गौतमः,

"अपुत्रा तु यदा भार्या संप्राप्ते भर्त्तुराब्दिके ।
रजस्वला भवेत्सा तु तत्कुर्यात्पंचमेऽहनि ॥"

---

[1] श्राद्धकर्मत्वेऽभिधानात् इति ख पाठः ।

[2] एतन्मासिकविषयमित्यन्ये इति विशेषः ख पाठः ।

[1]भार्याया अपि श्राद्धे सहाधिकारात्तस्यां रजस्वलायामशुचित्वेनानधिकारे व्यासज्यवृत्ते भर्त्तृगतस्याप्याधिकारस्य विधानात्पंचमदिन एव श्राद्धं युक्तम् । तदर्थं यस्य श्राद्धकर्त्तुरित्येवार्थो मृताहनीति वचनस्य पुष्यवत्स्वपि दारेष्वित्यादीनि वचनानि सहाधिकृतभार्यान्तरविषयाणीत्याह,

"तन्मन्दं जायापती अग्निमादधीयाताम्"

इत्यादिनाऽऽधाने सहाधिकृतदाराधानसिद्धाग्निसाध्यकर्मस्वपि सहाधिकारसिद्धेः पाणिग्रहणाद्धीतिवचनप्रणीतस्य सहाधिकारस्योभयसयोगोत्पन्न श्रौतस्मार्त्ताग्निसाध्यकर्मस्वेवन्याय्यत्वाच्छ्राद्धकर्मणि निरग्नीनामप्यधिकाराच्छ्राद्धकर्मणः पत्नीसाध्यकर्माघटितत्वाच्च तस्मादेकभार्यः साग्निकोऽपि तस्यां रजोवत्यामन्नेनैव मृताह एवाब्दिकमासिकश्राद्धं कुर्यात् । श्राद्धकर्त्री स्त्री चेद्रजस्वला तदाब्दिकं मासिकं च पंचमदिनादौ कुर्यात् । केचिद्हेमाद्र्यनुसारिणो मृताहनीति वचनात्कर्त्तुर्भार्यायां रजस्वलायां सत्यां पंचमदिन एव क्षयाहश्राद्धकार्यम् । पुष्पवत्स्वपि दारेष्विति वचनानि तत्पराण्येव इत्याहुः । दर्शश्राद्धं तु भार्यारजस्यां न कार्यम् । श्राद्धविघ्ने द्विजातीनामिति हारीतोक्तेर्दर्शे तु भार्यार्तवेऽप्यामश्राद्धविधिमिति दीपिकोक्तेश्च । आमाभावे तु मयूखे व्यासः—

"द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।
हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ॥" इति ।

निर्णयसिंधौ तु—

"पाकाभावे विजातीनामामश्राद्धो विधीयते" इति सुमन्तूक्तेः ।

पाककर्त्रे सत्यन्नेनान्यथामे नेति युक्तम्—

"मासिकानि सपिण्डानि अमावास्या तथाब्दिकम् ।
अन्नेनैव तु कर्त्तव्यं यस्य भार्या रजस्वला ॥"

इति कलिकायां वचनाच्चेति । कालादर्शे तु—

"स्त्रिया रजोदर्शने दर्शश्राद्धं पंचमेऽहनि"

इति पक्षान्तरमुक्तम् । पारिजातेऽप्येवम् । एवं महालययुगादावपि । आब्दिकादिदिने द्रव्याद्यभावाच्छ्राद्धकरणासम्भवे पिण्डदानमात्रं कुर्यात् । तस्याप्यसंभवे उपवासं कुर्यात् । तदुक्तम्—

---

१. इति, हेमाद्रिभिन्नसर्वनिबन्धसिद्धान्तः । हेमाद्रिस्तु पाणिग्रहणाद्धि सहत्वं कर्मस्विति वचनेन इत्यधिकः ख पाठः ।

२. रजस्यामे न कार्यम् इति ख पाठः ।

"पिण्डमात्रं प्रदातव्यं अभावे द्रव्यविप्रयोः ।
श्राद्धाहनि तु सम्प्राप्ते भवेन्निरशनोऽपि वा ।।" इति ।

पात्राभावे तु विशेषः स्मृत्यन्तरे प्रोक्तः—

'पात्राभावे परं कृत्वा पितृयज्ञविधिं नरः ।
निर्दिश्याऽप्यन्नमुद्धृत्य यत्र[1] पात्र ततो नयेत् ।।" इति ।

[2]अन्यत्र,

"सर्वाभावे क्षिपेदग्नौ गवे दद्यात्तथाऽप्सु वा ।
न तु प्राप्तस्य लोपोऽस्ति पैतृकस्य विशेषतः ।।"

इतिसर्वस्योक्तस्यानिषिद्धस्या च पात्रस्य भाव इत्यर्थः । अति दरिद्रस्य तर्पणमात्रं पर्याप्तम् । तिलाद्यभावे वृद्धवसिष्ठेन—

"अग्नि[3]नावाहयेत्कक्षे श्राद्धकाले समागते ।
तस्मिन्नुपवसेदह्नि जपेद्वा श्राद्धसंहिताम् ।।" इति ।

कक्षं तृणसमूहम् । विष्णुपुराणे तु—

"सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः ।
सूर्यादिलोकपालानामिदं उच्चैः पठेत्ततः ।।
"न मेऽस्ति वित्तं न धनं न चान्य
च्छ्राद्धोपयोगिह्यपि तन्नतोऽस्मि ।
तुभ्यं[4] तु भक्त्या पितरौ मयैतौ,
भुजौ कृतौ वर्त्मनि मारुतस्य ।।"
इत्येतत्पितृभिर्गीतं भावाभावप्रयोजकम् ।
यः करोति कृतं तेन श्राद्धं भवति पार्थिवः ।।" इति ।

इत्याब्दिकश्राद्धतिथिनिर्णयः ।

अथेष्टिकालो निरूप्यते ।

सा च पर्वप्रतिपत्संधौ कार्या । तदाह गोभिलः—

---

१. पत्रपात्रं इति ख पाठः ।
२. पितृयज्ञ विधिं श्राद्धविधिम् इति 'ख' पाठोऽधिकः ।
३. अग्निना वा दहेत् कक्षं इति ख पाठः ।
४. तृप्यन्तु इति ख पाठः ।

"पक्षान्ता उपवास्तव्याः पक्षादयो यष्टव्याः सधिमभितो यजेत" इति।

उपवासोऽन्यन्वाधानम्। तत्रातिसूक्ष्मतरे संधौ यागानुष्ठानस्याशक्यत्वात्पूर्वंदिने पर्वणि आरम्भः, उत्तरदिने च प्रतिपदि समाप्तिः। तथा च श्रुतिः,

"पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्यजति"

इति पूर्वेद्युरिध्याबर्हिः करोति यज्ञमेवारभ्य गृहीत्वोपवसतीति। तत्रापि न सम्पूर्णं पर्वान्वाधानकालो, नापि संपूर्णप्रतिपद्यागकालः। किन्तु पर्वणोंऽशोऽत्रयमन्वाधानस्य कालः। तच्चतुर्थांशसहितं प्रतिपद आद्यमंशपंचयागस्य। तथा च लौंगाक्षिः--

"त्रीनंशानोपवस्तस्य यागस्य चतुरो विदुः।
द्वावंशावुत्सजेदन्त्यौ यागे च व्रतकर्मणि॥"

इति प्रतिपत्पर्वणो अन्त्यावंशौ यथाक्रमं यागोपवासयोस्त्याज्यावित्यर्थः। [1]आद्यमशत्रयं च यागस्य। तथा च लौगाक्षिः--"त्रीनंशान्नोपवस्तस्य यागस्य चतुरो विदुः०" इत्यादि। अन्वाधाने पर्वचतुर्थांशवर्जंन च सद्यःकालव्यतिरिक्तविषयम्। सद्यःकालतायां तत्रैव तदनुष्ठानात् तान् इमान् यागस्य चतुरोंऽशान् विवृणुतो यज्ञपार्श्वशातातपौ—

पंचदश्याः परः पादः पक्षादेः प्रथमास्त्रयः।
कालः पर्वणि योगस्यादन्यथा तु न विद्यते॥
पर्वणो यश्चतुर्थांश आद्या प्रतिपदस्त्रयः।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः॥ इति।

अत्र प्रातरिति विशेषणात्, सूर्योदयस्योपरि मुहूर्त्तत्रयं यागकाल इत्युक्तं भवति, प्रतिपदश्चतुर्थांशनिषेधेति तत्रैव कात्यायनः—

"न यष्टव्यं चतुर्थेंऽशे यागै! प्रतिपदः क्वचित्।
रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनी॥ इति।

पूर्वाह्णमध्याह्नयोः संधिविषयोऽयं निषेधो, नापराह्णः संधिविषयः।
संधिर्यद्यपराह्णे स्याद्यागं प्रातः परेऽहनि।
कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति॥"

---

[1] उक्तपाठः पुनरुक्तः।

इति कात्यायनोक्तेः । तत्र पर्वप्रतिपदोः सूर्योदयास्तमयस्पर्शित्वे पर्वण्यन्वाधानं प्रतिपदि यागः । तयोः खण्डत्वे तु निर्णयमाह गोभिलः—

"आवर्तने यदा संधिः पर्वप्रतिपदो भवेत् ।
तदह्नर्याग इष्येत परतश्चेत्परेऽहनि ॥
पर्वप्रतिपदोः संधिरर्वागावर्तनाद्यदि ।
तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः ॥
आवर्तनात्परः संधिर्यदि तस्मिन्नुपक्रमः ।
परेद्युरिष्टिरित्येष पर्वद्वयविनिश्चयः ॥ इति ।

आवर्तनं दिनमध्यम् । अत्र च द्वेधा विभागः—

"आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः ।
मध्याह्नस्तु तयोः संधिर्यदावर्त्तनमुच्यते ॥

इति मदनरत्नवचनात् । वाजसनेयिनां तु विशेषमाह भाष्यार्थसंग्रहकारः–

"मध्यन्दिनात्स्यादहनीह यस्मिन्, प्राक् पर्वणः संधिरियं तृतीया ।
सा खर्विका वाजसनेयिमत्या, तस्यामुपोष्याऽथ परेद्युरिष्टिः ॥" इति ।

आवर्तनोर्ध्वमस्तादर्वाकासमाप्तैका रात्रौ समाप्ता द्वितीया मध्याह्नादर्वाक्समाप्ता तृतीया खर्विकेत्यर्थः । शाखान्तराध्यायिनामीदृशे विषये पूर्वेद्युरन्वाधानादिकं सन्धितिथावष्टिः । वाजसनेयिनां तु संधितिथावन्वाधानं उत्तरतियाविष्टिः । एवं सति वाजसनेयिनां न क्वापि संधिदिनात्पूर्वेद्युरन्वाधानादिकमस्तीतिविशेषः । एतद्वचनं पौर्णमासीपरमिति मदनरत्ने । एतत्तु नाद्रियन्ते वृद्धा इत्युक्तं निर्णयसिन्धौ । कदाचित् पौर्णमास्यां । विशेषमाह कात्यायनः –

"संधिश्चेत्संगवादूर्ध्वं प्राक्चेदावर्त्तनाद्रवेः ।
सा पौर्णमासी विज्ञेया सद्यः कालविधौ तिथिः ॥" इति ।

अमायां विशेषमाह वृद्धशातातपः—

"द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपद्यापराह्णिकी ।
अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात् ॥"

इति बौधायनोऽप्येवम् । चन्द्रदर्शनोपेतायां शुक्लप्रतिपदियागानुष्ठाने प्रायश्चित्तमाह कात्यायनः ।

"यजनीयेऽह्निसोमश्चेद्वारुण्यां दिशि दृश्यते ।
तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातये ॥" इति ।

वण्डं दक्षिणाम् । ब्रह्मवंडमितिमदनरत्ने । एतच्च बौधायनवाजसनेयिविषयम् । तैत्तिरीयब्राह्मणे तु चन्द्रदर्शनदिनेऽपि याग उक्तः । एषा वै सुमनानामिष्टिर्यमद्यजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवासौ[1] लोकेऽर्धुकं भवतीति । श्रुत्यन्तरेऽपि यदहःपश्चाच्चन्द्रमा अभ्युदयति तदहर्यंजन्निमाँल्लोकानभ्युदेति इति । मदनरत्न–आपस्तम्बसूत्रभाष्यार्थसंग्रहादिष्वप्येवम् । अत्र पक्षद्वये स्वस्वसूत्रानुसारेण व्यवस्था ज्ञातव्या । शेषपर्वणोष्टौ विशेषमाह गार्ग्यः ।

"प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते ।
पुनः प्रणीय कृत्स्नेष्टिः कर्त्तव्या यागवित्तमैः ॥" इति ।

अत्र च प्रातरारभ्य सर्वं कर्म निर्वर्त्यं विष्णुक्रमादिकः समाप्तिपदार्थः, प्रतिपदंशेकर्त्तव्यम् मिति मदनरत्ने । प्रतिपदि प्रविष्टायां ब्राह्मणभोजनमन्त्यपदार्थः समाप्तिः कर्त्तव्येति हेमाद्रौ । गृह्याग्नेर्नाऽयं नियम इति मदनपारिजाते । परिशिष्टे तु पक्षादिचरोपक्रमोऽपि पक्षे प्रतिपदं प्रतीक्ष्यैव कर्त्तव्य इत्युक्तम् ।

"पक्षावावेव कुर्वीत सदा पक्षादिकं चरुम् ।
पूर्वाह्ण एव कुर्वन्ति विद्धेऽप्यन्ये मनीषिणः ॥" इति ।

विद्धे पूर्वविद्धे । अयं च पर्वसंधिस्तिथिसाम्ये ज्योतिःशास्त्रानुसारेणैव ग्राह्यः । वृद्धिक्षययोस्त्वस्मिन्विशेषमाह कात्यायनः—

"परेऽह्नि घटिका न्यूनास्तथैवाभ्यधिकाश्च याः ।
तदर्धंक्लृप्त्या पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेद् ॥" इति ।

लौगाक्षिरपि,

"तिथेः परस्य घटिकास्तु याः स्युर्न्यूनास्तथैवाभ्यधिकाश्च तासाम्
अर्धं वियोज्यं च तथा प्रयोज्यं, ह्रासे च वृद्धौ प्रथमे दिने तत् ॥" इति ।

अत्रोदयमारभ्य प्रर्वणो यावत्यो घटिकास्तत्संख्यापेक्षयोदयमारभ्य प्रवृत्तायाः प्रतिपदो यावत्य अधिका घटिका यावत्यश्च न्यूना घटिकास्तदर्धयोजनवियोजनाभ्यां पर्वविद्धक्षयौ प्रकल्प्याविति माधवानुसारिणो बहवः पर्वदिनात्पूर्वदिने चतुर्दश्यनन्तरं प्रवृत्तपर्वणा सहौदयिकपर्वैकीकृत्य यावद्घटिकापरिमितं भवति, ततो दिनद्वयस्य प्रतिपदेकोकरणेन तद्घटिकासंख्याया वृद्धौ क्षये वा तदर्धं पर्वणि निक्षिप्य पर्ववृद्धिक्षयौ प्रकल्प्याविति मयूखकौस्तुभकारप्रभृतयः । अयमेव पक्षो ज्यायान् । योऽयमिष्टिकालनिर्णयः स स्मार्त्तस्थाली-

---

१. एवास्मै इति ख पाठः ।

पाकेऽप्यवगन्तव्यः तत्रेष्टिस्थालीपाकावाधानगृहप्रवेशनीयं होमानन्तरभाविन्यां पौर्णमास्यामारम्भणीयौ, न तु दर्शे। यद्यारंभकाले मलमासपौषशुक्रास्तादि भवति, तदाऽप्यारंभः कार्यः। यानि तु,

"उपरागोऽधिमाश्च यदि प्रथमपर्वणि ।
तथा मलिम्लुचे पौषे नान्वरंभणमिष्यते ।।"

गुरुभार्गवयोर्मौढ्ये चंद्रसूर्यग्रहे तथा। इत्यादिसंग्रहवचनानि तान्यालस्यादिनाऽतिक्रान्तशुद्धकालप्रारम्भविषयाणि,

"नाम कर्म च दर्शेष्टिं यथाकालं समाचरेत् ।
अतिपाते सति तयोः प्रशस्ते मासि पुष्यभे ।।"

इत्यपरार्के गर्गवचनादिति प्रयोगपारिजाते उक्तं चैतत्प्रयोगरत्नभट्टैः। मयूखे,

"त्वाधानान्तरा पौर्णमासी चेन्मलमासगा ।
तस्यामारम्भणीयादि न कुर्वीत कदाचन ।।"

इति मण्डनवचनादन्वारम्भणीया मलमासोत्तरं शुद्धे काले कार्या। तत्र कालातिक्रमनिमित्ताविभ्रष्टेष्टिरप्यादौ कार्येति केचित्। तन्न, पुरुषापराधकृतकालातिक्रमरूपविभ्रष्टेष्टिनिमित्ताभावादिति। याज्ञिकास्तु पूर्वोक्तत्रिकाण्डमण्डन वचनाच्छुद्धकाल एव विभ्रष्टेष्टिं कृत्वाऽऽरम्भं कुर्वीत इत्याहुः। कालादर्शे स्मृतिसंग्रहयोरपि—

"आरंभ दर्शपूर्णेष्ट्योरग्निकालश्च आदिमम् ।
प्रतिष्ठा पंचकर्माद्या[1] मलमासे विवर्जयेत् ।।" इति।

एवं प्रकृतिकालो निर्णीतः। विकृतयस्तु पर्वण्येव कर्त्तव्याः। यदीष्ट्या यदि पशुना यदि सोमेन यजेत सोऽमावास्यायां पौर्णमास्यां वेति श्रुतेः। माधवोऽपि—

"इष्ट्यादिविकृतिः सर्वा पर्वण्येवेति निर्णयः" इति।

अत्र पौर्णमास्यमावास्याशब्दाभ्यां तदन्त्यक्षणो गृह्यते। तेन तद्वत्यहोरात्र इत्यर्थमाह रामाण्डार इति निर्णयसिन्धौ। तत्र पर्वणः सम्पूर्णत्वे पर्वणि विकृति-

---

[1] कूर्माद्या इति ख पाठः।

यागं कृत्वा तत्रैव पश्चादन्वाधाय प्रतिपदि प्रकृतीष्टिः कर्त्तव्या। खण्डपर्वणि तु विशेषमाह कात्यायनः—

"आवर्त्तनात् प्राग्यदि पर्वसंधिः,
कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः।
तत्रैव यागः परतो यदि स्यात्,
तस्मिन्विकृत्याः प्रकृतेः परेद्युः ॥"

इति धूर्त्तस्वाम्यादयोऽप्येवमाहुः। यदीष्ट्येति संगायाविकृतेः पर्वकालत्वादावर्तनात्प्राक्सन्धौ संधिप्रभितो यजेत" इति प्रकृतेः प्रतिपदि समाप्तिनियमात्प्रकृत्यन्तरं प्रतिपदिविकृत्ययोगात्पूर्वेद्युर्विकृतिरित्युक्तं तन्त्ररत्ने पार्थसारथिना। यद्यपि प्रकृतेः पूर्वत्वादपूर्वमन्ते स्यादित्यापस्तम्बेनोक्तं तथापि हेतुवादेन श्रुतिमूलत्वाभावादंगं वा समभिव्याहारादितिवदप्रामाण्यमिति तदाशयः। अन्वारम्भणीया तु चतुर्दश्यां कार्येति हिरण्यकेशिवृत्तौ मातृदत्तीये। अन्येषां पर्वण्येव। पशौ कालनिर्णयमाह गोविन्दार्णवे कात्यायनः—

"अर्धादह्नो भवति नियतः पर्वसंधिः पुरस्तात्,
कृत्वा तस्मिन्नहनि तु पशुं सद्य एव द्व्यहं वा।
आरभ्याथ प्रकृतिरथ चेत्पर्व संधिः पुरस्तात्,
कृत्वा तस्मिन् प्रकृतिमथ तु स्यात्पशुः सद्य एव ॥"

बौधायनेन त्वामावास्येनवाहविषेष्ट्वा नक्षत्रे वेति शुक्लपक्षे कृत्तिकादिविशाखान्तेषु देवनक्षत्रेषु निरूढपशुबन्धं कुर्यादित्युक्तम्। अधिकारपशुस्त्वग्नीषोमीयेण सवनीयेन वा समानतन्त्रः कार्य इति त्रिकाण्डमण्डनः। चातुर्मास्येष्वपि द्वादशाह यथा प्रयोगपक्षयोर्नक्षत्रेष्वप्यारंभो यावज्जीवसांवत्सरप्रयोगयोस्तु फाल्गुन्यां चैत्र्यां वाऽऽरम्भः।

आग्रयणे तु विशेषः

प्रागेवोक्तः। सोमे त्वाहापस्तम्बः—

"अमावास्यायां दीक्षा यजनीयेवऽमावास्यायां यजनीये[1] वासु मत्यमहः।
पौर्णमास्यां दीक्षा यजनीयेव पौर्णमास्यां यजनीये वासुमत्यमहरिति ॥"

लाट्यायनसूत्रेऽपि—

पूर्वपक्षस्य प्रथमेऽहनि दीक्षेत नक्षत्रयोगे वेति।

---

१. वा सुत्यमहः इति ख पाठः।

पूर्वपक्षः शुक्लपक्षः। नक्षत्रयोगे वेत्ययमर्थः। चैत्र्यादिपूर्णिमायाश्चित्रादिनक्षत्रयोगे दीक्षेतेति। कालतत्त्वविवेचन खण्डपर्वणि तु पशौ सोमेऽपि मीमांसकमते तिथेरेवांगत्वेनोपदेशात्तस्याश्च निकृष्टयोरावर्तनतत्वपूर्वसन्ध्योः पूर्वेद्युभूं ८.: प्रयोगैकदेशक्ताप्तिलाभाविकृतीष्ट्यादिवत्तयास्त्रयोस्तत्रैवानुष्ठानम्। याज्ञिकमते तु पौर्णमास्यमावास्याशष्ट्योस्तिथिवचनत्वेऽपि वचनबलादेवेष्ट्यादिवदेव पशुसोमयोरपि परेद्युरनुष्ठानम्। तयोः सन्ध्योः, तद्वियकमपि क्वचित्प्रामाणिकयाज्ञिकग्रन्थे—

"खण्डे पर्वणि सोमश्चेत्प्रतिपन्मिश्रपर्वणि।
सोमसुत्या प्रयोक्तव्येत्याह कौषीतकी श्रुतिः॥'

इति त्रिकाण्डवचनम्। एतेन सोमकालो व्याख्यात इति दर्शपूर्णमासविकृतिकालनिर्णयप्रकारातिदेशकं सङ्कर्षकाण्डसूत्रवचन च लिखितम्। संधिवचनत्ववादिनां तु याज्ञिकानां तद्वदहोरात्रलक्षणाया आवश्यकत्वान्यायोऽप्येतद्वचनानुग्राहको लभ्यत इति सुतरां तथानुष्ठानं युक्तम्। याज्ञिकाचारोऽप्येवमेवेति।

आधानं तु पर्वणि नक्षत्रेषु चोक्तं तत्र पर्वनक्तम्,
गार्हपत्यमादधाति इत्यादिकर्मकालव्यापिग्राह्यम्।

दिनद्वये तत्वे परं ग्राह्यम्। संकल्पस्य पर्वणि लाभात्। पूर्वत्र नक्षत्रयोगे तदेव ग्राह्यम् यत्र त्रीणिसन्निपतितान्यृतुं नक्षत्रं पर्व तत्समृद्धं विप्रतिषेधे नक्षत्रं बलीय इति हिरण्यकेशिसूत्रात्। ऋतुस्तु वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यादिः। रेणुकारिकायां तु,

"माघादिपंचमासेषु श्रावणे वाश्विने तथा।
मार्गशीर्षे शुक्लपक्ष आधानमथ कारयेत्॥" इत्युक्तम्।

अत्र मूलं मृग्यं, आधाननक्षत्राणि त्वापस्तम्बसूत्रे—
कृत्तिकारोहिणीमृगशीर्षपुनर्वसुपूर्वोत्तरा,
हस्तचित्रा विशाखानुराधाश्रवणोत्तराभाद्रपदा इति।

ज्योतिःशास्त्रे तु पुष्यरेवाप्युक्तम्। सोमपूर्वाधाने विशेषमाहापस्तम्बः—
"सोमेन यक्ष्यमाणो नर्त्तून् सूर्क्ष आदरे,
धातुसूर्क्षेन्न नक्षत्रमितिनर्तूं पृच्छेदित्याश्वलायनसूत्रे।

अत्र प्रकरणा[1]दाधानकालबाधः। तेन सोमस्य वसंतकालता न बाध्यत

---

[1] आधानकालत्वेन प्राप्तवसन्तादीनां बाधेऽपि स्वकालत्वेन प्राप्तवसन्तादीनां बाधेमानाभाव इति भावः इति ख पाठोऽधिकः।

इति रुद्रदत्तवृत्तौ चोक्तम। धूर्तस्वामी तु सोमस्यापि नर्त्तूनसूर्क्षेदित्युल्लेखादुभयकालबाध मन्यते। श्री-रामाण्डारस्तु कालान्तरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्तवान्। तत्राद्ये कृत्तिकादिकालान्तरस्य यथाधाने वसन्ताद्यबाधेन विधानम। तथा सोमेऽप्युदगयनपूर्वपक्षपुण्याहसन्निपाते यज्ञकालेनादेशे[1] इति। छन्दोगसूत्रोक्तोदगयनाबाधेन सोमाभिसंधिरूपकालान्तरविधानादुदगयनं त्वपेक्ष्यत इत्युक्तम। द्वितीयपक्षे तु यदैवेन श्राद्धोपनमेदिति सर्वकालानादर उक्त इति भरद्वाज सूत्रात्सर्वशब्दस्य च विश्वजित्सर्वपृष्ट इति वद् द्वयोरप्रयोरगात् सर्वकालबाध इति तेन दक्षिणायनेऽपि भवतीत्युक्तं षड्गुरुभाष्ये दिवत्राख्ये तंत्ररत्ने च षट्स्वपि ऋतुषु भवतीत्युक्तमिति दिक्। पिण्डपितृयज्ञस्तु कात्यायनेर्यागदिनात्पूर्वेद्युः कार्यः। पूर्वोवाऽङ्गत्वात्पिण्डपितृयज्ञ इति तत्सूत्रात् व्याख्यातं चैतत्कर्काचार्यैः। पूर्व एव दर्शात्पिण्डपितृयज्ञेति [2]तत्सूत्रात्, न पश्चात्। कुतः—[3]श्रृंगत्वात्। तथा च श्रुतिः—

> "तस्मात् पूर्वेद्युः पितृभ्यः क्रि-न्त उत्तरमहर्देवान्यजन्त इति
> पूर्वेद्युः पितृभ्यो यज्ञं निपृणीय प्रातर्देवेभ्यः प्रतनुत इति च।

तेन कर्कमते च पिण्डपितृयज्ञोऽन्वाधानविशिष्टयागांगमिति कर्कमतम्। तेनान्वाधानदिनात्पूर्वदिने भवति। केवलयागांगमित्यनन्तभाष्यमतोऽन्वाधानदिने पितृयज्ञ इत्याशयः। चतुर्दशीयुक्तदर्शे पिण्डपितृयज्ञ इति। श्री अनन्तभाष्ये तु परेद्युरित्युक्तं अत्र द्वेधाऽप्याचारो दृश्यते। आपस्तम्बानां तु परदिने मुहूर्त्तमपि दर्शसत्त्वे तत्रैव पितृयज्ञः। [4]अमावास्यायां यदहश्चन्द्रमसं न पश्यन्ति, तदहः पिण्डपितृयज्ञ कुरुत इति। अस्य रुद्रदत्तीया व्याख्या— पिण्डैर्युक्तः पितृयज्ञः पिण्डपितृयज्ञः, स च कर्मान्तरं न तु दर्शशेषः। यथा वक्ष्यति पितृयज्ञः स्वकालविधानानङ्गं स्यादिति। तं च यदहश्चन्द्रमसं न पश्यन्ति, पंचदश्यां प्रतिपदि वा तदहः कुरुते यदहस्तयोः सन्धिस्तदहरित्यर्थं इति श्रीरामाण्डारोऽप्याह—पिण्डपितृयज्ञस्तु पर्वसंधिमदहोरात्रापराह्ण इति। अतः पर्वसंधिदिने पितृयज्ञः। शतपथश्रुतिरपि -

> "यदेवैष न पुरस्तात् ददृशे न पश्चात् अथ पितृभ्यो निर्वपति" इति।

पर्वसंधिदिने हि पूर्वतः पश्चाद् वा चन्द्रो न दृश्यत एव अतोऽमावास्यातिथेरपराह्णव्याप्त्यभावेऽप्यन्त्यक्षणावच्छिन्नाहोरात्र एव, पितृयज्ञः पूर्व-

---

१. यज्ञाकालोऽनादेश इति ख पाठः।

२. पितृयज्ञो न पश्चात् इति 'ख' पाठः।

३. अङ्गत्वात् इति 'ख' पाठः।

४. तदाहापस्तम्बः इति अधिकः ख पाठः।

दिनापराह्णव्याप्तेस्त्वनादर इत्याश्वलायनापस्तम्बवृत्तिभाष्यकाराः । आश्वलायनानामपि शेषपर्वणि पिण्डपितृयज्ञः । तथा च सूत्रम्—अमावस्यायामपराह्णे पिण्डपितृयज्ञ इति । अत्र नारायणवृत्तिः—अमावस्या शब्दः प्रतिपत्पंचदश्योः संधिवचनोऽप्यत्रापराह्णशब्दसमन्वयात्तद्वदहोरात्रे वर्तते । तस्यापराह्णेऽह्नस्तुर्ये भागे पिण्डपितृयज्ञः कार्यः । औपवसथ्ये यजनीये वाऽहनि । यदा त्वहोरात्रसन्धौ तिथिसन्धिः स्यात्तदौपवसथ्य एवाहनि क्रियत इति । अतएव

"मुहूर्त्तं स्यु[1]रमावस्यां प्रतिपद्यपि चेद्भवेत् ।
तद्दत्तं अक्षयं ज्ञेयं पर्वशेषं तु पर्ववत् ।।"

इति हेमाद्रौ वचनं पिण्डपितृयज्ञपरमुक्तं प्रयोगपारिजाते । अयं च स्मार्त्ताग्निमंता । सम्पूर्णे दर्शे श्राद्धो व्यतिषंगेण कार्यः । व्यतिषंगो नामोभयोः सहानुष्ठानम् । एतच्च स्थालोपाकेन सह पिण्डार्थमुद्धृत्येति सूत्रं वृत्तिकृतोक्तम् । खण्डपर्वणि तु पूर्वदिने केवलं श्राद्धं, परदिने तु केवलं पितृयज्ञः । कालभेदेन तंत्र न्यायप्रवृत्तेः । अतएवोक्तं वृत्तिकृता—

"नात्रापूर्वः स्थालोपाकश्चोद्यते" ।

सर्वश्राद्धेषु प्रसंगादिति । आहिताग्निना तु सर्वाधानिना च सम्पूर्णे खण्डे वा दर्शे श्रौताग्नौ पृथगेव पितृयज्ञः कार्यो न तु दर्शश्राद्धम् । व्यतिषंगेणासम्पूर्णे दर्शे च विषयमाह लौगाक्षिः—

"पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोन्वाहार्यंको बुधः ।।" इति ।

पक्षान्तं कर्मान्वाधानम् । अन्वाहार्यकं दर्शश्राद्ध पिण्डपितृयज्ञाकरणे प्रायश्चित्तमाह पराशरमाधवीये कात्यायनः—

"पितृयज्ञात्यये चैव वैश्वदेवात्ययेऽपि च ।
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ।।" इत्यलम् ।

इति पर्वसंधिनिर्णयः । अथ ग्रहणकालनिर्णयः । माधवीये वृद्धगार्ग्यः—

"पूर्णिमाप्रतिपत्सन्धौ राहुः सम्पूर्णमण्डलम् ।
ग्रसते चन्द्रमर्कं च दर्शप्रतिपदन्तरे ।।" इति ।

तत्र पर्वणोऽन्त्यभागः स्पर्शकालः । प्रतिपद आद्यभागो मोक्षकालः । तदुक्तं ब्रह्मसिद्धान्ते—

---

[1] मुहूर्तं स्पृगमावास्याम् इति ख पाठः ।

"यावान्कालः पर्वणान्ते तावान् प्रतिपदादिमः ।
रवीन्दुग्रहणानेहा सपुण्यो मिश्रणाद्भवेत् ॥"

ग्रहणानेहा राहुग्रहणकालः । तत्र कर्त्तव्यमुक्तं हेमाद्रिमाधवाद्युदाहृतायां स्मृतौ—

'ग्रस्यमाने भवेत्स्यनानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ॥" इति ।

अन्यदपि कर्त्तव्यं महाभारते—

"गंगास्नानं प्रकुर्वीत ग्रहणे चंद्रसूर्ययोः ।
महानदीषु चान्यासु स्नानं कुर्याद्यथाविधिः ॥" इति ।

गंगाया अलाभेऽन्यासु स्नानादि कुर्यादित्यर्थः । महानद्यसम्भवे शंखः वापीकूततडागेषु गिरिप्रस्रवणेषु च ।

"नद्यां नदे देवखाते सरसीषूद्धृताम्बुनि ।
उष्णोदकेन वा स्नायाद्ग्रहणे चन्द्रसूर्ययोः ॥"

इह पूर्वाभावे उत्तरोत्तरोऽनुकल्पः । उष्णोदकमातुरविषयम् ।

"आदित्यकिरणैः पुतं पुनः पूतं च वाह्निना ।
अतो व्याध्यातुरः स्नायाद् ग्रहणेषूष्णवारिणा ॥"

इति व्यांघ्रोक्तेः । मासभेदेन नदीनां पुण्यत्वं देवीपुराणे—

"कार्त्तिके ग्रहणं श्रेष्ठं गंगायमुनसंगमे ।
मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा ।
फाल्गुने वरुणा प्रोक्ता चैत्रे पुण्या सरस्वती ॥
वैशाखे तु महापुण्या चंद्रभागा सरिद्वरा ।
ज्येष्ठे तु कौशिकी पुण्या आषाढेताम्बिका नदी ।
श्रावणे सिंधुनामा तु तथा भाद्रे तु चंद्रिका ।
आश्विने सरयूः श्रेष्ठा तथा पुण्या च नर्मदा ॥"

तत्रैव—

"गोदावरी महापुण्या चंद्रे राहुसमन्विते ।
सूर्ये च राहुणा ग्रस्ते तपोसूते महामुने ।
नर्मदातोयसंस्पर्शे कृतकृत्या भवन्ति ते ॥"

क्षेत्रविशेषोऽपि—

"गंगा कनखलं पुण्यं प्रयागं पुष्करन्तथा।
कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे ॥"

वारविशेषयोगेन च ग्रहणे फलविशेषो व्यासेनोक्तः—

सूर्यवारे रवेर्ग्रासः सोमे सोमग्रस्तथा ।
चूडामणिरिति स्यातस्तत्रानन्तफलं लभेत् ॥
वारेष्वन्येषु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः ।
तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतम् ॥" इति ।

अत्र स्नानमावश्यकम् ।

"ग्रहणे संक्रमे चैव न स्नायाद्यदि मानवः ।
सप्तजन्मानि कुष्ठी[1] स्याद्दोषभाग्वाऽथ जायते ॥"

इति वृद्धवसिष्ठवचने प्रकरणे प्रत्यवायस्मरणात् ।

"उषस्युषसि यत्स्नानं संध्यायामुदिते रवौ ।
चंद्रसूर्योपरागे च प्राजापत्येन तत्समम् ॥"

इति दक्षवचने फलश्रवणात्काम्यमपि । तच्च स्नानमाद्यम्[2] । अन्ते च कार्यम् । ग्रस्यमान इति स्मृतेः ।

"विमुक्ते यदि न स्नायाच्चन्द्रसूर्यग्रहे तथा ।
तस्य स्यात्तावदाशौचं यावदन्यः परोग्रहः ॥"

इति तत्रैव मुक्त्यस्नाने दोषश्रवणाच्च । उभयमपि सचैलम् ।

'ग्रहणे शावमाशौचं विमुक्तौ सौतिकं स्मृतम् ।
तयोः संपत्तिमात्रेण उपस्पृश्यक्रियाक्रमः ॥

इति ब्रह्माण्डपुराणे—स्पर्शं सपिण्डमरणवदाशौचनिमित्तत्वोक्त्या मुक्तेश्च प्रसववत्तदुक्त्या यथा जननमरणाशौचयोः । सचैलस्नानादेव निवृत्तिस्तदुत्तरमेव च कर्माधिकारस्तथात्रापीत्यस्यार्थस्य प्रतिपादनात्तु,

"सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
सचैलं च भवेत्स्नानं सूतकान्नं च वर्जयेत् ॥"

---

[1] सप्तजन्मानि कुष्ठीस्यादिति च पाठः ।

[2] आद्यन्तयोः कार्यमिति च पाठः ।

इति वृद्धवसिष्ठोक्तेश्च। सचैलमिति मुक्तिस्नानपरमिति मदनरत्ने। ग्रहणकाले ततः प्राग्वा पक्वमन्नं सूतकान्नं तत्पश्चात् न भुंजीतेत्यर्थः। इदं च स्नानंममन्त्रकं कार्यमिति रत्नावल्याम्। केषुचित्प्रतिप्रसवः।

"आरनालं तथा क्षीरं किलाटं घृतसक्तवः।
स्नेहपक्वं च तैलं च न कदाचित् प्रदुष्यति॥" इति।

तत्र विशेषो वचनान्तरे—

"आरनालं च तक्रं च ह्यादेयं घृतपाचितम्।
उदकं च कुशच्छन्नं न दुष्येद्राहुदर्शनम्।" इति।

मणिकस्थोदकं चैवेति पाठान्तरम्। जलेत्वदोषो गांगविषयः।

'ग्रहोऽपि तं जलं पीत्वा पादकृच्छ्रं समाचरेत्'

इति चतुर्विंशतिमते जलस्य दोषोक्तम्। अत्र स्नानवच्छ्राद्धकर्मापि नित्यं काम्यं च।

"सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने।
अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदति॥"

इति प्रत्यवाय श्रवणा,—

"च्चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्।
तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे॥"

इति ऋष्यशृंगोक्तेश्च चन्द्रग्रहणनिमित्तकं स्नानदानश्राद्धदिः रात्रावपि भवति।

"ग्रहणोद्वाहसंक्रान्तियात्राभिप्रसवेषु च।
दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते॥"

इत्यपरार्के व्यासोक्तेः।

"चंद्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यते"

इति देवलोक्तेः।

"संध्या रात्रौ न कर्त्तव्यं श्राद्धं खलु विचक्षणैः।
द्वयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम्॥"

इति णूषविक्तेश्च। इदं च श्राद्धमामेन हेम्ना वा कर्त्तव्यम्।

"आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा ।
आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वा ।।"

इति शातातपवचनात् । इत्थमेव निर्णीतवन्तो हेमाद्रि-माधव-मदन-रत्नादयो निखिलनिबन्धकाराः । अपरार्कस्त्वतद्

"द्विजानां पाकाभावे द्रष्टव्यं तीर्थश्राद्धवत् ।
पाकाभावे द्विजातीनामामश्राद्धो विधीयते ।।"

इति सुमन्तूक्तेः । सैंहिकेयो यदा सूर्यमित्युपक्रम्य,

"घृतं[1] न भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत्"

इति वायवीयोक्तेश्चाह रत्नावल्याम्—

"पुत्रेजाते व्यतीपाते ग्रहणे चंद्रसूर्ययोः ।
श्राद्धं कुर्यात्प्रयत्नेन पिण्डनिर्वपणादृते ।।" इति ।

श्राद्धकाशिकायां तु मत्स्योक्तिः—

"ततः प्रभृति संक्रान्तावुपरागादिपर्वसु ।
त्रिपिण्डमाचरेच्छ्राद्धमेकोद्दिष्टं मृताहनि ।।"

अत्र ग्रहणनिमित्तकश्राद्धे नैवामासंक्रान्त्यादि निमित्तकानां सिद्धिः । दर्शकालव्ययोरपि इति कालादर्शोक्तेः । ग्रहणदिने वार्षिकश्राद्धप्राप्तौ तु प्रयोगपारिजाते गोभिलः—

"दर्शे रविग्रहे पित्रोः प्रत्याब्दिक उपस्थिते ।
अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुतः ।।" इति ।

तेन चंद्रग्रहेऽपि सपिण्डादिवार्षिकमन्नादिना तद्दिन एव कार्यमिति मदनपारिजाते व्याख्यातम् । पृथ्वीचंद्रोदतेऽप्येवम् । तेन

"आमश्राद्धं प्रकुर्वीत माससंवत्सरादृते ।" इति ।
"अन्नेनैवाब्दिकं कुर्याद्धेम्ना चामेन न क्वचित्"

इति मरीचिलौगाक्ष्यादिवचनानि ग्रहणदिनातिरिक्तविषयाणि । निर्णयामृतेऽप्येवम् । यनि तु—

---

[1] प्रते वइति ख पाठ

"ग्रहणात्तु द्वितीयेऽह्नि रजो दोषास्तु पंचमे"

इत्यादीनि वचनानि तनि महानिबंधेषु क्वाप्यनुपलंभान्निर्मूलानि । प्रत्युत पूर्वोक्त निबन्धेषु तद्दिने एव श्राद्धमुक्तमित्यलम् । किंचिद्दानं चात्र नित्यम् ।

"अयनादौ सदा देयं द्रव्यमिष्टं गृहेषु यत् ।
षडशीतिमुखे चैव विमोक्षे चंद्रसूर्ययोः ।।"

इति शातातपीये सदा शब्दश्रवणात् । नित्यत्वादेव च मलमासेऽपि तद्भवतीति मात्स्ये ।

"चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि ।
मलमासेऽपि देयं स्याद्दत्तमक्षयकारकम् ।।" इति ।

काम्यमपि—

"भूमिर्गावः सुवर्णं वा धान्यं वा यद्यदीप्सितम् ।
तत्सर्वं ग्रहणे, देयमात्मनः श्रेय इच्छता ।।"

इति महाभारतवचनात् । एतद्दानं सत्पात्रे देयमित्युक्तम् । तत्रैवोक्तम्,

"अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ।
पात्रभूतार्थं भूमिं च तदा दद्यात्सदक्षिणाम् ।।" इति ।

पात्रलक्षणमाह याज्ञवल्क्यः—

"न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ।।" इति ।

एतादृशपात्राभावे बौधायनः—

"अश्रोत्रिय. श्रोत्रियो वा पात्रं चापात्रमेव वा ।
विप्रब्रुवोऽपि वा विप्रो ग्रहणे दानमर्हति ।।" इति ।

आदिमध्यावसानेषु यद्यद्विहित तस्य तस्य फलातिशय उक्तो ब्रह्मपुराणे—

"उपमर्दे लक्षगुणं ग्रहणे चंद्रसूर्ययोः ।
पुण्यं कोटिगुणं मध्ये मुक्तिकाले त्वनंतकम् ।।" इति[1] ।

ग्रह . काले जननमरणनिमित्ताशौचसत्त्वेऽपि स्नानादिभवत्येव,

"सूतके मृतके चैव न दोषो राहुदर्शने ।
तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ।।"

---

[1] प्रयोग पारिजति संक्रान्ति निमित्तक स्थानादावपि नाशौयं इत्युक्तम् इति अधिकः ख पाठः ।

इति वृद्धवसिष्ठोक्तेः ।

"स्मार्तं कर्मपरित्यागो राहोरन्यत्र सूतके ।"

इति व्याघ्रपादोक्तेश्च । कालादर्शे—

"सर्वे वर्णाः सूतकेऽपि मृतके राहुदर्शने ।
स्नात्वा श्राद्धं प्रकुर्वीरन् दानं शाठ्यविवर्जितम् ।।"

मदनपारिजातेऽप्येवम् । तेन,

"स्नानमात्रं प्रकुर्वीत दानं श्राद्धविवर्जितम्"

इति निर्मूलं वदन्तो गौडाः परास्ताः । इयं च शुद्धिरविशेषान्मंत्रदीक्षापुरश्चरणादि सर्वस्मार्त्तकर्म्मविषया । रजस्वलाया विशेषो मिताक्षरायाम् ।

"स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेत् ।।" इति ।

व्रतं रजस्वलाधर्मरूपम् । यत्तु ग्रहणनिमित्तमाशौचं तत्स्नानेन निवर्त्यम् । तदुक्तं ब्रह्माण्डपुराणे—

"आशौचं जायते नृणां ग्रहणे चंद्रसूर्ययोः ।
राहुस्पर्शे तयोः स्नात्वा दानादौ कल्पते नरः ।।" इति ।

ग्रहणे पुण्यकालमाह जाबालिः—

"संक्रान्तौ पुण्यकालस्तु षोडशोभयतः कलाः ।
चंद्रसूर्योपरागे तु यावद्दर्शनगोचर ।।" इति ।

अत्र दर्शनगोचर शब्दश्चाक्षुषज्ञानवचनः गोचरं योग्यपरत्वम् । तेनोपरागो यस्मिन् देशे यावत्कर्मपर्याप्तश्चाक्षुषज्ञानयोग्यः । स तस्मिन् देशे तावत्सु कर्मसु निमित्तम् ।

"सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा ।
तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचित् ।।"

इति षड्विंशन्मते[1] द्वीपान्तरस्थस्य निमित्तत्वं, पर्युदासात्तु ततश्च तद्देशावच्छिन्नचाक्षुषज्ञानयोगे ग्रहे मेघाच्छादनेनांधादिभिश्चादृष्टेऽपि स्नानादिर्भवत्यैव । निमित्तसत्त्वात् दृष्ट्वा स्नायादित्यत्र तु दृष्ट्वेत्यनेन शास्त्रीयज्ञानस्यैव स्नानसमानकर्त्तृकत्वमुच्यते, न तु चाक्षुषज्ञानस्येति निर्णयसिंधुमदनपारि-

---

[1] "षडर्भिशत्" इति ख पाठः

जात कालतत्त्वविवेचनमयूखादिदाक्षिणात्यनिबन्धेषु दर्शन चाक्षुषम् । तच्च स्वकीयमेव निमित्तं, न तु सा, [1]अतोऽवगतिरिति निर्णयामृतकल्पतर्वादिमतनिरासपूर्वं सप्रपंचं निरूपितम् । सूर्यग्रहणे यस्मिन् यामे ग्रहणं तस्मात्पूर्वं यामचतुष्टयं आश्नीयात् । एवं चन्द्रग्रहणे यामत्रयम्,

"सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् ।
चंद्रग्रहे तु यामांस्त्रीन् बाल वृद्धातुरैर्विना ।।"

इति वृद्धगौतमोक्तेः । बालवृद्धातुराणां ग्रहणात्पूर्वमेको यामो भोजने निषिद्धः ।

"सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनम् ।
अपराह्णे न मध्याह्ने मध्याह्ने न संगवे ।
भुंजीत संगवे चेत्स्यान्नपूर्वं तु भुजिक्रिया ।।"

इति मार्कंण्डेयोक्तेः । चंद्रस्य ग्रस्तोदये विशेषमाह वृद्धवसिष्ठः—

"ग्रस्तोदयविधोः पूर्वं नाहर्भोजनमाचरेत् ।" इति ।

चंद्रसूर्ययोर्ग्रस्तास्ते विशेषमाह गार्ग्यः—

"संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ ।
तदहर्नैव भुंजीत रात्रावपि कदाचन ।।"

सायं सूर्यस्य ग्रस्तास्ते पूर्वेऽह्नि रात्रौ च न भोक्तव्यम् । प्रातः संध्यायां चंद्रस्य ग्रस्तास्ते, उत्तरेऽह्नि पूर्वरात्रौ च न भोक्तव्यमित्यर्थः । चंद्रग्रस्ते द्वितीयदिने भोजननिषेधो, न तु संध्यास्नानादावित्याहोशनाः—

"ग्रस्ते चास्तंगते त्विन्दौ ज्ञात्वा मुक्त्यवधारणम् ।
स्नानहोमादिकं कार्यं भुंजीतेन्दूदये पुनः ।।" इति ।

क्वचित्तु स्नात्वा पाकादिकं कार्यमिति तृतीयचरणः । इन्दुपदं रवेरुपलक्षणम् । तेन सायं संध्यादिसिद्धिः । विधोः ग्रस्तोदये सूर्यस्य ग्रस्तास्ते चाहिताग्निना भोक्तव्यमेव । अपराह्णे व्रतोपायनीयमश्नीते इति कात्यायनोक्तेर्व्रतस्य श्रौतत्वेन विहितत्वेन च प्रबलत्वात् । निर्णयदीपे तु—अद्भिर्व्रतं कुर्यादित्युक्तम् । राग प्राप्ते भोजने कालनियमोऽयम् । तेन ज्वरादाविव न भोजनमिति कर्काचार्याः । अथ[2] काम्योपवासे दक्षः—

---

१. न तु शास्त्रतोऽवगतिरिति 'ख' पाठः

२. अभ च इति 'ख' पाठः

"अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ।
स्नात्वा दत्त्वा च विधिवन्मोदते ब्रह्मणा सह ।।" इति ।

पुत्रवद् गृहस्थस्य तु न भवति । तदुक्तं नारदेन—

"संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे ।
चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही ।।" इति ।

अत्र हेमाद्रिः—

यदा रवेर्ग्रस्तास्तस्तदा पुत्रिणः प्रहरद्वयम् ।
हित्वा बालादिवद्भोजनं न तूपवासः ।।"
"सायाह्ने ग्रहणं चेत्स्या"—

दिति मार्कण्डेयवचनात्,

"सायाह्ने संगवेऽश्नीयाच्छारदे संगवादधः ।
मध्याह्ने परतोऽश्नीयान्नोपवासो रविग्रहे ।।"

इति स्मृतेश्चेत्याह । शारदोऽपराह्णः । माधवमते तु पुत्रिणोऽपि तत्रोपवास एव ।

"अहोरात्रं न भोक्तव्यं चन्द्रसूर्यग्रहो यदा ।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम् ।।"

इति भविष्योत्तरीयनिषेधस्य तेनापि पालनीयत्वात् । उपवासनिषेधस्तु व्रतरूपोपवासपरः कृष्णैकादशीनिषेधवदिति । मदनरत्नेऽप्येवम् । इदमेव च युक्तम् । मांगल्यकृत्येषु वेधविशेषो हेमाद्रौ—

"त्रयोदश्यादितोवर्ज्यं दिनानां नवकं ध्रुवम् ।
मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोः ।।"

प्रकारान्तरं तत्रैवोक्तम्—

"द्वादश्यादितृतीयान्तो वेध इंदुग्रहः स्मृतः ।
एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्तित ।।"

इदं च पूर्णग्रासे त्र्यहं खण्डग्रहे तयोरिति तत्रैवोक्तेः । इदं च ग्रस्तास्ते त्रिदिनं पूर्वमिति नारदेन ग्रस्तास्ते विशेषोक्तेर्ग्रस्तास्तभिन्नग्रहणपरं ज्योतिर्निबन्धे च्यवनः ।

"ग्रहणोत्पातभं त्याज्यं मंगलेषु ऋतुत्रयम् ।
यावच्च रविणा भुक्तं पातभं दग्धकाष्ठवत् ।।"

अन्यच्च वर्णविकारादि तत्फलं च दैवज्ञेभ्यो ज्ञेयम् । ग्रहणान्तरित्तस्य पूर्वंसंकल्पितद्रव्यस्य द्वगुण्यं भवतीति शिष्यः पठन्ति । च लघु ब्रह्मवैवर्त्ते--

"दातव्यमिति नो काश्यां वक्तव्यं कुत्रचि त्क्वचित् ।
दशोत्तरं पर्वसु स्याच्छतं चंद्रग्रहे भवेत् ।
सूर्यग्रहण सहस्रं तन्मरणेऽनतकं स्मृतम् ।।" इति ।

अत्र मूलं चिन्त्यमिति निर्णयसिंधौ । ग्रहणतत्पूर्वनिषिद्धकालयोर्भोजने प्रायश्चित्तं षट्त्रिशन्मतेऽभिहितम् ।

"सूर्यचंद्रग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति ।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुद्ध्यति ।।" इति ।

त्रिरात्रेण त्रिरात्रोपवासेन । तेन प्राजापत्यार्धमुक्तं भवति । प्राजापत्यस्य षडुपवासतुल्यत्वात् । ग्रस्तास्तोत्तरनिषिद्धकालभोजनेऽपि त्रिरात्रमेव । तस्मिन्दिन इत्यविशेषाभिधानात् । स्त्रीबालवृद्धादीनां तत्तदर्धं ब्रह्मसिद्धान्ते,

"सर्वैः पटस्थितं वीक्ष्यं स्वस्थैः तैलाम्बुदर्पणैः ।
ग्रहणं गुर्विणो जातु न पश्येतपटंविना ।।"

ज्योतिषे--

"त्रिषड्दशायोपगतं नराणां, शुभप्रदं स्याद् ग्रहणं रवीन्द्वोः ।
द्विसप्तनन्देषु मध्यमं स्याच्छेषेष्वनिष्टं कथितं मुनीन्द्रैः ।।" इति ।

आय एकादशम्, नन्दा नव, इषु पंच, ग्रहणादिसप्तदिनपर्यन्तं रामगोपालायागमदीक्षोक्ता रामार्थनचन्द्रिकायां ज्ञानार्णवे ।

मंत्राद्यारम्भणं कुर्याद् ग्रहणे चंद्रसूर्ययोः ।
ग्रहणाद्वापि देवेशि ! कालः सप्तदिनावधिः ।।" इति ।

रत्नसागरे--

"सतीर्थेऽर्कविधुग्रासे तं तु दामनपर्वणि ।
मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्नशोधयेत् ।।"

अत्र सूर्यग्रहणमेव मुख्यम्

"सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत् ।
सूर्यग्रहणकालेन समो नान्यः कदाचन ।
न मासतिथिवारादिशोधनं सूर्यपर्वणि ।।"

इति तत्रैव कालोत्तरवचनात् ।

---

१. रवस्य इति ख पाठः ।

“चंद्रगृहे तु या दीक्षा या दीक्षा व्रतचारिणाम् ।
वनस्थस्य च या दीक्षा दारिद्र्यं सप्तजन्मसु ।।”

इति तत्रैव योगिनीतंत्रे निषेधाच्च । पुरश्चरणचंद्रिकायां—

“चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः ।
स्पर्शादिमोक्षपर्यन्तं जपेन्मंत्रं समाहितः ।।
जपाद् दशांशतो होमस्तथा होमात्तु तर्पणम् ।
तर्पणस्य दशांशेन मार्जनं कथितं किल ।।
मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत् ।।”

तथा

“होमाशक्तौ जपं कुर्याद्धोम संख्या चतुर्गुणम् ।
एवं कृते तु मंत्रस्य जायते सिद्धिरुत्तमा ।।” इति ।

एतच्च रहस्यपुरश्चरणं ग्रस्तोदये ग्रस्तास्ते च न भवति । स्पर्शादिमोक्षपर्यन्तमित्यभिधानात् । स्पर्शमुक्तयोश्च यावद्दर्शनगोचर इत्युक्ता दर्शनयोग्यतापेक्षणादित्यलम् । इति ग्रहणनिर्णयः ।

अथ संक्रान्ति निर्णयः ।

तत्र नागरखण्डे—

“रवेः संक्रमणं राशौ संक्रान्तिरिति कथ्यते ।
स्नानदानतपः श्राद्धहोमादिषु महत्फलम् ।।”

एतत्स्वरूपमुक्तं दीपिकायाम्—

हर्यंघ्रिवृषसिंह वृश्चिकघटेष्वर्कस्य यः संक्रमः ।
कन्यामीन धनुर्नृयुक्षु षडशीत्यास्यं तुलामेषयोः ।
प्रोक्तं तद्विषुवं [1]ऋषेऽयनमुदक्कर्काटके दक्षिणम् ।।” इति ।

हर्यंघ्रिर्विष्णुपदं, नृयुङ् मिथुनं, वारर्क्षभेदेन संज्ञाभेदो रत्नमालादीपिकयोः—

“घोरारवौ ध्वांक्ष्यमृतद्युतौ च, संक्रान्तिरारे च महोदरी स्यात् ।
मंदाकिनिज्ञे च गुरौ च मन्दा मिश्रा भृगौ राक्षसि कार्कपुत्रः ।।” इति ।

---

[1] विषुवंसषे इति ‘ख’ पाठः ।

"सर्वास्वृक्षविशेषतः पुनरिमाः संक्रान्तयः सप्तधा
मंदा स्याद्द्विधिभोत्तरात्रयगता मंदाकिनी रेवती ।
चित्रामित्रमृगेष्वथाश्विकथयोः पुष्ये भवेद् ध्वांक्षिका
स्यात्पूर्वात्रितयो मघायमभयोर्घोरा धनिष्ठा पुन- ।।
र्वस्वोर्विष्णनिलर्क्षयोः शतभिषा सूक्ता महोदर्यथ
ज्येष्ठार्घोरगमूलभेषु कथिता राक्षस्ययो मिश्रिता ।
राधा कृत्तिकयोः क्रमेण घटिकास्तासु स्मृताः सप्तसु
पुण्याख्यास्त्रिचतुः शर्षिवसुसंमेया नव द्वादश ।।"

इति वसिष्ठः ।

अयने कोटिपुण्यं च लक्ष्यं विष्णुपदीफलम् ।
षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः ।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम् ।।" इति ।

हेमाद्रौ विष्णुधर्मे--

"श्राद्धं संक्रमणे भानोः प्रशस्तं पृथिवीपते ।"

संवर्त्तः—

"अमावास्या द्वादशी च संक्रांतिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ।।
अत्र स्नानं जपो होमो देवतानां च पूजनम् ।
उपवासस्तथा दानं एकैकं पावनं स्मृतम् ।।"

इति शातातपः ।

"रविसंक्रमणे प्राप्ते न स्नायाद्यस्तु मानवः ।
सप्तजन्मातिरोगी[1] स्यान्निर्धनश्चैव जायते ।।"

पापक्षयादिकामस्य संक्रान्तिनिमित्ताहोरात्रोपवासोऽयनविषुवयोस्त्रिरात्रोपवासश्च विहितो वसिष्ठेन ।

"उपोष्यैव तु संक्रान्तौ स्नातो योऽभ्यर्चयेद्धरिम् ।
प्रातः पंचोपचारेण सः काम्यं फलमश्नुते ।।"

हरिं सूर्यम् ।

---

[1] सप्तजन्मानि रोगी स्यादिति ख पाठः ।

"प्राच्यह्नां त्रितयेऽथवोपवसनं कार्यं फलाकांक्षिभिः" इति ।

अशक्तावाहापस्तम्बः—

"अयने विषुवे चैवत्रिरात्रोपोषितो नरः ।
स्नात्वा यः पूजयेद्भानुं सर्वान् कामान् स चाश्नुते ।।" इति ।

इदं च त्रिरात्रं पूर्वमेव । तदुक्तं दीपिकायां—

"अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ।
अहोरात्रोषितः स्नातः सर्वपापैः प्रमुच्यते ।।" इति ।

पुत्रवता गृहस्थेन तु सकामेनापि संक्रान्तिनिमित्तोपवासो न कार्यः ।

"आदित्येऽहनि संक्रान्तौ ग्रहणे चंद्रसूर्ययोः ।
उपवासो न कर्त्तव्यो गृहिणा पुत्रिणा तथा ।।" इति वचनात् ।

संक्रान्त्यामुपवासं चेति नारदवचनाच्च । एकोपवासपक्षे संक्रान्तिदिने उपवासे दानादि तु पुण्यकालदिने इत्याचार्य चूडामणिः । विधिलाघवात्पुण्यकालदिन एवोभयमिति वृद्धाः । अत्र श्राद्धमुक्तं विष्णुधर्मोत्तरे—

"श्राद्धं संक्रमणे भानोः प्रशस्तं पृथिवीपते" इति ।

तच्च नित्यम् । तदाहापरार्के विष्णुः—

"आदित्यसंक्रमणं विशेषेण,
विषुवद्द्वयमयनद्वयं व्यतीपातो जन्मर्क्षमभ्युदयश्च ।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।।" इति ।

तच्चापिण्डं कार्यमित्युक्तं मात्स्ये ।

"अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
संक्रान्तिषु च सर्वासु पिण्डनिर्वपणादृते ।।"

इति संक्रान्तिकालस्य चातिसूक्ष्मस्य दुर्ज्ञानत्वेन तत्र स्नानादिकर्मानुष्ठानासंभवात्तत्तत्संन्निहितपुण्यकाले स्नानादिकं कार्यम् । पुण्यकालो देवलेन दर्शितः—

"संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः ।
तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः ।।" इति ।

अधस्त्रिंशदूर्ध्वं च त्रिंशदिति माधवः । हेमाद्रिस्त्वधः पंचदश उर्ध्वं पंचदशेत्येवं मिलित्वा त्रिंशदिति व्याचख्यौ । इदमेव युक्तं, तथा च देवीपुराणे—

"अतीतानागतो भोगो नाड्यः पंचदश स्मृताः" इति ।

भोगोविहितस्नानाद्यनुष्ठानम् । जाबालिः—

"संक्रान्तौ पुण्यकालस्तु षोडशोभयतः कला ।"

इति कलानाड्यः । अत्र चाल्पकालोक्तिः पुण्यातिशयोक्त्यथ न पुनर्नियमाय । अतएव शातातपः—

"या याः संनिहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता" इति।

इद सामान्यतः सर्वसंक्रान्तिविषयम् । विशेषमाह वसिष्ठः—

"मध्ये तु विषुवे पुण्यं प्राग्विष्णौ दक्षिणायने ।
षडशीतिमुखेऽतीते अतीते चोत्तरायणे ॥" इति ।

मध्ये उभयत इत्यर्थः । त्रिष्णौ विष्णुपद्यां स्कांदे—

"कुलीरे विंशदेवाद्या मकरे विंशदुत्तरा" इति ।

कुलीरः कर्कटः । ब्रह्मवैवर्त्ते—

"त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः ।"

दशाधिकाश्चत्वारिंशदित्यर्थः ।

"त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः परा" इति ।

वृद्धवसिष्ठोक्तेः पाठात्तथा—

"वर्त्तमाने तुलामेषे नाडयस्तूभयतो दश"

तथा—

"पुण्याख्या विष्णुपद्याश्च प्राक् पश्चादपि षोडश ।
तत्रापि पराः पुण्याः पूर्वाः पुण्यतमा इति ॥"

व्यवस्था द्रष्टव्या । याम्यायने विष्णुपदे तथादावित्याद्यनेकवचनेषु पूर्वकालस्य पुण्यतमत्व प्रतिपादनात् । वृद्धवसिष्ठः—

"षडशीत्यां षष्ठिरुक्तास्तु नाडिकाः" इति ।

तत्र प्रत्येकं पंचदशेत्येवं मिलित्वा षष्टिरिति हेमाद्रिः । तथा च स्कान्दे—

"षडशीतिमुखेऽतीते नाड्यः पंचदशस्मृताः" इति ।

अन्यैस्त्वष्टिरितिपाठमवलम्ब्य तच्छन्दसः, षोडशाक्षरपादत्वात्प्रत्येकं षोडशेत्यर्थं इत्युक्तम् । यदा पूर्वभोगिनी संक्रान्तिः सूर्योदयोत्तरमुदयान्तरभोगिनी[1]

---

[1] सूर्योदयोत्तरमुत्तरभोगिनी इति च पाठः ।

सूर्यास्तादव्यवधानेन द्वित्रिपलव्यवधाने नवा पूर्वं भवति तदा पुण्यकालमाह वृद्धवसिष्ठः ।

“अह्नि संक्रमणे कृत्स्नामहः पुण्यं प्रकीर्तितम्” इति ।

रात्रौ संक्रमणे विशेषमाह—

“रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः ।
अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपपरिक्रिया ॥
ऊर्ध्वसंक्रमणे चोर्ध्वं उदयात्प्रहरद्वयम् ।
रात्रिद्वितीयप्रहरान्तिमपलाच्चिन्न[1] उदेच्च तत् ॥” इति ।

पीयूषधारायां—

“द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिकेत्येवं रूपम् ।

इति माधवः ।

“पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः ।
प्राहुर्दिनद्वयं पुण्यमुक्त्वा मकरकर्कटौ ॥” इति ।

अत्र दिनद्वयशब्देन दिनद्वयार्धं गृह्यते । उपक्रमे—

“रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः”

इति सामान्यतो रात्रिसंक्रमणे दिनार्धस्य पुण्यत्वाभिधानादिति मदनरत्नकालतत्त्वविवेचनादयः ।

माधवस्तु—

“संक्रमस्तु निशीथे स्यात्षड्यामाः पूर्वपश्चिमाः ।
संक्रान्तिकालो विज्ञेयः तत्र स्नानादिकं चरेत् ॥”

इति भविष्योत्तरवचनाद्दिनद्वयशब्देन कृत्स्नं दिनद्वयं ग्राह्यमित्याह । एवमर्धरात्रसंक्रमणे दिनद्वयार्धस्य विकल्पेन ग्राह्यत्वे प्राप्ते व्यवस्था कृता देवीपुराणे—

“आदौ पुण्यं विजानीयाद्यद्यभिन्ना तिथिर्भवेत् ।
अर्धरात्रे व्यतीते तु विज्ञेयमपरेऽहनि ॥”

इति निशीथे यस्यां तिथौ संक्रमणं सा चेत्पूर्वदिनतिथ्यभिन्ना तदा पूर्वदिनार्धं पुण्यम् । अर्थात् तयोर्भेदे उत्तरदिनार्धमिति तृतीयचरणानन्तरं द्वितीया-

---

[1] अपलावच्छिन्ना इति ‘ख’ पाठः ।

नुषंग: । ततश्च निशीथोत्तरं संक्रमणतिथे: पूर्वतिथ्यभेदेऽप्युत्तरदिनार्धस्यैव पुण्यत्वमिति । यदा तु निशीथसक्रमणात्[1] थ्यास्तु–

"कार्मुकं तु परित्यज्य झषं याति दिवाकर: ।"

इत्यादि भविष्योत्तरादिवाक्यं अंगीकृत्य रात्रौ भोजननिषेधात् पुत्रवद्गृहिण उपवासनिषेधाद्रात्रौ श्राद्धदानादेर्निषेधाच्च परदिन एव कुर्वन्ति। तत्रापि नारदोक्तसन्ध्याकालसंक्रमे विशेषोऽर्घ्ये य: इति मिताक्षरायाम् । एवमयनव्यतिरिक्तरात्रिसंक्रान्तिषु यथायथं पूर्वोत्तरदिनार्द्धस्यायने च पूर्वोत्तरदिनयो: पुण्यत्वे सत्यपि पूर्वदिनस्यान्त्या: पंचघटिका उत्तरदिनास्याद्याश्च पंचघटिका यथायथं पुण्यतमा: । तदुक्तं निगमे––

"विष्णुपद्यां धनुर्मीने नृयुक्कन्यासु वै यदा ।
पूर्वोत्तरगतं रात्रौ भानो: संक्रमणं भवेत् ।।
पूर्वाह्णे पंचनाड्यस्तु पुण्या: प्रोक्ता मनीषिभि: ।
अपराह्णे तु पंचैव श्रौते स्मार्त्ते च कर्मणि ।।" इति ।

अत्रायनव्यतिरिक्तासु दशसु संक्रान्तिषु रात्रौ स्नानश्राद्धादि न कार्यम् ।

"अह्निसंक्रमणे पुण्यम्"—

इति वृद्धवसिष्ठादिवचनैरह: पुण्योक्त्या—

---

१. यदा तु निशीथसंक्रमतिथि: पूर्वोत्तरोयमदिनं प्रविष्टा भवति तदा पूर्वभोगिषु पूर्वदिनोत्तरार्द्धमुत्तरभोगिनीषूत्तरदिनं पूर्वार्द्धं पुण्यमुभयतो भोगिनी स्वैच्छिको विकल्प: । कौस्तुभे तु दिनद्वयवृत्ति तिथ्यमेवेऽप्ययनव्यतिरिक्तसर्वसंक्रान्तिषु पूर्वदिनार्द्धमेव पुण्यमिति युक्तमित्युक्तम् । रात्रावयने तु विशेषो भविष्योत्तरे । मिथुनात् कर्कसंक्रान्ते यदि स्यादंशुमालिन: प्रभाते वा निशीथे वा कुर्यादहरि पूर्वत: । प्रभाते उदयात् प्राक् कार्मुकं तु परित्यज्य वृषं संक्रमते रवि:, प्रदोषे वार्धरात्रे वा स्नान दानं परेऽहनि । बौधायनोऽपि—अर्द्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रवि: । अस्तङ्गते सवितरि मकरं याति भास्कर: प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेऽहनि इति । नारदस्तु विशेषमाह—अर्द्धास्तमनसं ध्यायी घटिकाक्रम संमिता तथैवार्धोदयात्प्रात: घटिकात्रयसंमिता । सूर्यस्योदयसन्ध्यायां यदि याम्यायनं भवेत् तदोदयादहपुण्यं पूर्वाह्णपूर्वतो यदि । सूर्यास्तमनसन्ध्यायां यदि सौम्यायनं भवेत् तदह: पुण्य: काल: स्यात् परतश्चेत् परेऽहनि इति । एवं इत्यन्त पाठ: ख पाठेऽधिक: ।

२. उक्त पाठ: ख पाठे नास्ति ।

"रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु तत्क्रियाम् ।
पूर्वस्मात्परतो वापि प्रत्यासन्नस्य तत्फलम् ॥"

इति वसिष्ठवचनाच्च अर्थाद् रात्रौ स्नानादिनिषेधप्रतीतेः । यानि तु—

"विवाहव्रतसंक्रान्तिप्रतिष्ठा ऋतुजन्मसु ।
तथोपरागपातादौ स्नाने दाने निशा शुभा ॥" इति ।
"राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्युः निशिकाम्यव्रतेषु च ॥"

इत्यादीनि विष्णुगोभिलादिवचनानि, तानि मकरकर्कसंक्रान्तिविषयाणि । उक्त्वा मकरकर्कटाविति तयोर्दिवानुष्ठानस्य पर्युदस्तत्वादिति हेमाद्रिमाधवादयः कथंचिद्दिवा स्नानादावकृते रात्रावपि तत्प्राप्त्यर्थानि विवाहव्रतेत्यादीनीत्यनन्तभट्टादयः । वस्तुतस्तु प्रागुक्तवचनेन तयोर्दिनद्वयपुण्यत्वादेरेव पर्युदासान्मकरकर्कयोरपि 'स्नानं दानं परेऽहनि' इत्यादिभिरह्नः पुण्यत्वोक्तेरह्नः पुण्यत्वानुपपत्त्या कल्प्यः रात्रिनिषेधस्य च प्रत्यक्ष[1]रात्रिनिषेधस्य च प्रत्यक्षरात्रिविधानाबाधात्सर्वसंक्रान्तिषु रात्रावनुष्ठानविकल्पः । स च देशाचाराद् व्यवतिष्ठत इति युक्तः पन्थाः । संक्रान्तिप्रयुक्तयात्रादिनिषेधेष्वपि स्नानादिविहितकाला एव तारतम्येन ग्राह्याः । तथा च लौगाक्षिः—

"यात्रानिषेधा अपि सूक्ष्मकाले,
पदं स्थिरीकर्त्तुमशक्नुवन्तः ।
आलोच्य तत्तुल्यतयोपदिष्टम्,
भवन्ति नित्यं परिपूर्णकामाः ॥" इति ।

अयनविषुवप्रयुक्तानध्याये विशेष उक्तः स्मृत्यन्तरे ।

"अह्नि चेद्रात्रियुग्मं स्याद्रात्रौ चेद्वासरद्वयम् ।
संक्रान्तिः पक्षिणी ज्ञेया दानाध्ययनकर्मसु ॥"

दानं वेदानामध्यापनमिति यावत् । संक्रान्तिषु यः पुण्यकालः स तदयनेऽपि ज्ञेयः इत्याह जाबालिः—

'संक्रान्तिषु यथा काल स्तदोयेऽध्ययने तथा ।
अयने विंशतिः पूर्वा मकरे विंशतिः परा ॥" इति ।

---

[1] उक्तवाक्यं ख पाठे नास्ति ।

अयने मकरायने। पूर्वा विंशतिर्नाड्यः पुण्याः मकरे मकरसंक्रान्तौ पराः पुण्याः। अन्यत्रायने तत्संक्रान्तिवदित्यर्थः। आदित्यस्य राशिसंक्रमवन्नक्षत्रसंक्रमे ग्रहोत[1] एषा राशिनक्षत्रसंक्रमेऽपि स्नानदानादिकं कार्यम्। तदाह जैमिनिः--

"नक्षत्र राश्योरविसंक्रमे स्युरर्वाक्परत्रापि रसेन्दुनाड्यः।
पुण्या स्तथेन्दोस्त्रिघरा पलैर्युगे एकैव नाडी मुनिभिः शुभोक्ता॥"
"नाड्यश्चतस्रः सपलाः कुजस्य, बुधस्य तिस्रो मनवः पलानि।
सार्धश्चतस्रः पलसप्तयुक्ता, गुरोश्च शुक्रे सपलाश्चतस्रः॥"
"द्विनागनाड्यः पलसप्तयुक्ताः, शनैश्चरस्याभिहिताः सुपुण्याः।
आद्यन्तमध्ये जपदानहोमम्, कुर्वन्नवाप्नोति सुरेंद्रधाम॥" इति।

ग्रहान्तस्य यदेव संक्रमस्तदेव पुण्यकालो न तु दिवैव, तत्रापवादाभावात्। अत्र तु स्नानादिः काम्यम्। फलश्रवणान्नित्यत्वावेदकवचनाभावाच्च। ब्रह्मपुराणे--

"शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः।
महाजया तदा सा वै सप्तमी भास्करप्रिया॥

स्नानं दानं तपो होमः पितृ देवादिपूजनम्।
सर्वं कोटिगुणं प्रोक्तं तपनेन महौजसा॥

यस्त्वस्यां मानवो भक्त्या घृतेन स्नापयेद्रविम्।
सोऽश्वमेधफलं प्राप्य ततः सूर्यपुरं व्रजेत्॥

मंगलकृत्येषु ज्योतिर्निबन्धे नारदः--

"त्याज्याः सूर्यस्य संक्रान्तेः पूर्वतः परतस्तथा।
विवाहादिषु कार्येषु नाड्यः षोडशः स्मृताः॥" इति।

एतत्पुण्यकालोपलक्षणम्। मेषादिसंक्रमे दानविशेषमाह विश्वामित्रः--

मेषसंक्रमणे भानोर्मेषदानं महाफलम्।
वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च॥

वस्त्रान्नपानदानानि मिथुने विहितानि तु।
घृतधेनुप्रदानं तु कर्कटे परिशस्यते॥

ससुवर्णं पात्रदात्रं सिंहे च विहितं सदा।
कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च॥

---

[1] ग्रहान्तराणां इति 'ख' पाठः।

तुला प्रवेशे धान्यानां बीजानामेव चोत्तमम् ।
कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च ॥"

कीटो वृश्चिकः ।

"धनुः प्रवेशे[1] दानं तु गवामम्बुतृणस्य च ।"

मीनप्रवेशे स्थानानां माल्यानामपि चोत्तमम् । दाद्यान्यथैतानि मया द्विजेन्द्राः । प्रोक्ताः काले तु वरः प्रदत्त्वा, प्राप्नोति कामं मनसस्त्वभीष्टम् ॥ प्रशंसन्ति हि कालदानम् । सिंह संक्रान्तौ विशेषोद्भूतसागरे नारदेनोक्तः । ततः प्रवक्ष्यामि येन संपद्यते शुभम् । सिंहगते चैव यस्य गौः सम्प्रसूयते । मरणं तस्य निर्दिष्टं षड्भिमासे न संशयः । प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ।' इति । मकरसंक्रान्तौ विशेषो विष्णुधर्मोत्तरे--

"उत्तरे त्वयने विप्रा वस्त्रदानं महाफलम् ।
तिलपूर्णमनड्वाहं दत्वा रोगैः प्रमुच्यते ॥" इति ।

विष्णुरहस्येऽपि ।

तस्यां कृष्णतिलैः स्नानं कार्यं चोद्वर्त्तनं तिलैः ।
तिला देयाश्च विप्रेभ्यः सर्वदैवोत्तरायणे ॥
तिलांश्च भक्षयेत्पुण्यान् होतव्याश्च तथा तिलाः ।
तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः ॥
होमं तिलैः प्रकुर्वीत सर्वदैवोत्तरायणे ॥" इति शिवम् ।
प्रीयतां जानकीजानिरनेन सुकृतेन मे ।
सर्वान्तरात्मा सर्वज्ञो रामो नोऽभीष्ट दैवतम् ॥

इति विश्वेश्वररचिते प्रतापार्के प्रतापभूपाज्ञया विद्वद्विनोदकन्दे
गतो मयूखः कलासंख्यः ।

इति श्रीमद्वाजपेयपौण्डरीकाद्यनेकक्रतुयाजिमहाशब्दोपाख्यरत्नाकरभट्टात्मजश्रीगंगारामभट्टसूनुश्रो रामेश्वरभट्टपुत्रेण विश्वेश्वरेण रचितः प्रतापार्कः समाप्तः ॥

सम्वत् १८४८

---

[1] वस्त्राणां यानानाञ्च महाफलम्, वृषप्रवेशे दारुणां दानमग्नेस्तथैव च कुम्भप्रवेशे इति च पाठोऽधिकः ।

२. मदनरत्ने गर्भस्तु दिवा प्रसूता वडवा श्रावणे च विशेषतः माघमासे बुधे चैवप्रसवेन्महिषी यदि, सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायिकाः इति च पाठोऽधिकः ।

SANSKRIT
17727
11-7-96

परिशिष्टम्–1

ग्रन्थोद्धृताचार्याणामकारादिक्रमेण नामसूची

‘अ’ पृष्ठ सं०

अनन्तभट्ट 63
अत्रिः 268

‘आ’

आपस्तम्ब 30

‘उ’

‘उशना’ 285

‘ऋ’

ऋष्यश्रृंग 7

‘क’

कश्यपः 25
कात्यायनः 37
कार्ष्णाजिनिः 220
कौण्डिन्य 226

‘ग’

गंगाराम भट्टः 2
गालवः 12
गोभिलः 24
गार्ग्यः 207
गौतमः 222

'छ'

छागलः 34

'ज'

ज्योतिर्गर्गः 6
जाबालिः 8
ज्योतिबृहस्पतिः 8
जैमिनिः 139
जातुकर्ण्यः 228

'द'

देवभट्टः 2
दक्षः 10
दिवाकरः 28
दिवोदासः 50
देवलः 52

'ध'

धौम्यः 89
धूर्तस्वामी 277

'च'

च्यवनः 286
चूडामणिः 290

'न'

नारदः 30
नीलकण्ठ भट्टः 27

'प'

पैठीनसि 9
पुलस्त्यः 6६
प्रयोगरत्न भट्टः 274
पार्थसारथिः 275

'ब'

ब्रह्मपुरी 2
बादरायणः 3
बृहद्यमः 219
बृहन्मनुः 220
बोपदेवः 229
बोधायनः 78
बृहस्पतिः 69

'भ'

भृगुः 7
भल्लः 18
भर्गः 227

'म'

माधवाचार्यः 4
माण्डव्यः 18
मार्कण्डेयः 138
मनुः 206
मरीचिः 331
मदालसा 236

'य'

यमः 12
यास्कः 25
याज्ञवल्क्यः 33

'र'

रत्नाकर भट्टः 2
रामेश्वर भट्टः 3
रेणुदीक्षितः 66

'ल'

लघुहारीतः 12
लल्लः 18
लौगाक्षिः 262

‘व’

व्याघ्रः 12
वृद्ध वसिष्ठः 13
वृद्ध पराशरः 13
व्यासः 27
वैजवापः 35
विज्ञानेश्वरः 132
वृद्धशातातपः 149
वशिष्ठः 152
व्याघ्रपादः 216
विश्वामित्रः 11
वृद्धगार्ग्यः 278

‘श’

शातातपः 7
शौनकः 18
शाकल्यः 26
शाकटायनः 241

‘स’

सत्यव्रतः 5
सुमन्तु 26
संवर्त्तः 65
सूतः 144

‘ह’

हेमाद्रिः 6
हारीतः 132
हरदत्तः 133

परिशिष्टम्–2

ग्रन्थप्रयुक्तोद्धृतग्रन्थानां पारिभाषिकशब्दानाञ्चाकारादिक्रमेण सूची

‘अ’ पृष्ठ सं०

अष्टका 7
अग्निहोत्रम् 9
अगस्त्यसंहिता 120
अशक्तानुकल्पमहाश्वलायनः 236
अपरार्कः 243

‘आ’

आब्दिकेम् 7
आग्रयणम् 9
आदित्यपुराणम् 66

‘ई’

ईशानसंहिता 193

‘उ’

उपाकर्म 9
उपवासः 24

‘ऋ’

ऋग्विधानम् 65

'ओ'

औपासनम् 9
औपासनहोमः 11

'क'

कूर्मपुराणम् 3
काठकगृह्यसूत्रम् 8
काठकगृह्यपरिशिष्टम् 9
कैमुतिकन्यायः 24
कालिकापुराणम् 36
कृत्यरत्नावली 51
कालादर्शः 5६
कल्पतरुः 84
कृत्यतत्त्वार्णवः 88
कातीयसूत्रम् 218
कार्ष्णाजिनिस्मृतिः 220
कातीयगृह्यकारिका 226
कालशास्त्रम् 261

'ग'

गृह्यपरिशिष्टम् 8
गरुडपुराणम् 34
गौडनिबन्धः 50
गणपतिकल्पः 69
गोविन्दार्णवम् 69
गजच्छाया 11
गृह्यपरिशिष्टम् 209

'च'

चान्द्रसम्वत्सरः 3
चतुर्वर्गचिन्तामणिः 6
चित्रावैधृतियोगः 46
चमत्कारचिन्तामणिः 78
चन्द्रप्रकाशः 176

'ज'

जयसिंहकल्पद्रुमः 2
ज्योतिष् सागरः 7
जातकर्म अन्नप्राशनञ्च 10
ज्योतिर्निबन्धः 295

'त'

त्रिकाण्डमण्डनम् 5
तिथितत्त्वम् 50
तिथ्यर्कः 52
तिथितत्त्वकृत्यरत्नावली 244

'द'

दर्शपूर्णमासौ 9
दीक्षणीयेष्टिः 24
द्वादशमयूखः 27
देवीपुराणम् 31
दक्षस्मृतिः 37
दीपिका 63

'ध'

धर्मप्रदीपः 49
धवलनिबन्धः 130

'न'

निर्णयामृतम् 7
निर्णयसिन्धुः 28
नन्दीपुराणम् 35
नृसिंहप्रसादः 43
निर्णयदीपः 105
निर्णयोद्धारः 107
नृसिंहपरिचर्या 153

'प'

पुण्डरीकक्रतुः 2
पार्वणम् 7
पुत्रेष्टिः 10
पद्मपुराणम् 24
प्रतापमार्त्तण्डः 27
प्रायश्चित्तम् 35
पुराणसमुच्चयः 51
पाराशरस्मृतिः 74
पृथिवीचन्द्रोदयः 103
पुष्करपुराणम् 169
प्रयोगपारिजातः 220
पीयूषधारा 292

'ब'

ब्रह्मसिद्धान्तः 3
बार्हस्पत्यसम्वत्सरः 4
ब्रह्मपुराणम् 33
ब्रह्मवैवर्त्तपुराणम् 36
बौधायन श्रौतसूत्रम् 73
बृहन्नारदीयम् 155
बह्वृचकारिका 208

'भ'

भविष्यपुराणम् 28
भविष्योत्तरपुराणम् 48
भार्गवार्चनदीपिका 66

'म'

मदनरत्नम् 5
मलिम्लुचः 7
मत्स्यपुराणम् 12
महाभारतम् 14
मदनरत्नम् 54

परिशिष्टानि 9

मल्लारिमाहात्म्यम् 83
मोहचूडोत्तरा 166
मिताक्षरा 214
मातृदत्तीयहिरण्यकेशी वृत्तिः 275

‘य’

युग्मवाक्यम् 56
योगिनीतन्त्रम् 288

‘र’

रत्नमाला 17
रूद्रयामलतन्त्रम् 46
रूपनारायणीयम् 130
रत्नकोषः 134
रामार्चनचंद्रिका 58
रेणुका कारिका 218
रूद्रदत्तीया व्याख्या 277
रत्नमालादीपिका 288

‘ल’

लिङ्गपुराणम् 70
लाट्यायनश्रौतसूत्रम् 295

‘व’

वाजपेय 2
वेदाङ्गज्योतिषम् 5
वैखानसधर्मसूत्रम् 5
विष्णुधर्मोत्तरपुराणम् 6
वैश्वदेवः 9
वृषोत्सर्गः 14
वायुपुराणम् 19
वाराहपुराणम् 22

वीरमित्रोदयः 35
विश्वरूपनिबन्धः 50
विष्णुरहस्यम् 63
वह्निपुराणम् 96

'श'

शार्ङ्गधरसंहिता 30
शुद्धितत्त्वम् 36
शिवरहस्यम् 117
श्लोकसंग्रहः 224

'श्र'

श्राद्धचन्द्रिका 13
श्रीरामकल्पद्रुमः 45
श्राद्धसंग्रहः 63
श्राद्धदीपक कलिका 236
श्राद्धशूलपाणिः 161
श्राद्धकाशिका 282

'स'

सौरसम्वत्सरः 3
सावनः 3
संक्रान्ति 7
संसर्पः 8
सीमन्तपुंसवनम्: 10
स्मृतिसंग्रह 12
स्कन्दपुराणे नागरखण्डम् 15
संहिताप्रदीप 17
सूतकः 36

स्मृत्यर्थसारः 63
सौरपुराणम् 65
स्मृतिकौस्तुभम् 80
सम्वत्सरप्रदीपः 75
समयप्रदीपः 105
स्मृतिचंद्रिका 154
सनत्कुमारसंहिता 190

'ह'

हरिवंशपुराणम् 36
हिरण्यकेशिधर्मसूत्रम् 37
होलिका प० 38
हरिभक्तिविलासः 164

* * *

परिशिष्टम–3

अकारादिक्रमेणपर्व–सूची

क्रम संख्या	पर्व नाम	पृष्ठ संख्या
1.	अक्षय तृतीया	62
2.	अगस्त्य व्रतम्	105
3.	अक्षय नवमी	122
4.	अङ्गारक व्रतम्	76
5.	अनन्त चतुर्दशी	185
6.	अपराजिता पूजनम्	134
7.	अशून्य व्रतम्	55
8.	आम्लैकादशी	164
9.	एकादशी व्रतम्	136
10.	ऐन्द्री पूजनम्	122
11.	कज्जली तृतीया	67
12.	करवीर व्रतम्	41
13.	कल्की जयन्ती	54, 83
14.	कार्तिक स्नानम्	168
15.	कार्तिकोद्यापनम्	246
16.	काम पूजनम्	176
17.	काम महोत्सवः	54
18.	काम्योपवासः	151
19.	काल भैरवाष्टमी	113
20.	कुन्द चतुर्थी	75
21.	कुमारी पूजनम्	123
22.	कूर्म जयन्ती	67

23.	केदार गौरी व्रतम्	256
24.	कोकिला व्रतम्	204
25.	कोजागर व्रतम्	243
26.	गङ्गास्नानम्	65
27.	गङ्गोत्पत्तिः	87
28.	गङ्गादशहरा	128
29.	गोपाष्टमी	113
30.	गोविन्द द्वादशी	164
31.	गौरी व्रतम्	43
32.	चन्द्रषष्ठी	83
33.	चम्पा षष्ठी	83
34.	चातुर्मास्यम्	166
35.	जन्माष्टमी व्रतम्	95
36.	तिल चतुर्थी	75
37.	तुलसी विवाहः	126
38.	दमनोत्सवः	165
39.	दशहरा स्नानम्	41
40.	दशावतार जयन्ती	60
41.	दीपावली	189, 254
42.	दुर्गा नवमी	104
43.	दुर्गोत्सवः	111
44.	दुर्गा व्रतम्, दुर्गापूजनम्	123
45.	दूर्वाष्टमी	113
46.	देवीमुत्थापनम्	123
47.	देवोत्थानम्	169
48.	दोलोत्सवः	58
49.	नवरात्रम्	70
50.	नाग पञ्चमी	77
51.	निर्जला एकादशी	161
52.	परशुराम जयन्ती	66
53.	प्रयाग स्नानम्	172
54.	पुष्कर स्नानम्	245
55.	बलभद्र जयन्ती	55
56.	बहुलाष्टमी	117

57.	बालेन्दु व्रतम्	54
58.	बुद्ध जयन्ती	90
59.	भवानी यात्रा	93
60.	भीष्म पञ्चकम्	176
61.	भीष्म पञ्चक व्रतम्	169
62.	भैरवाष्टमी	113
63.	मकर संक्रान्तिः	294–295
64.	मत्स्य जयन्ती	41, 60, 78, 167
65.	मत्स्यावतारः	245
66.	महालक्ष्मी व्रतम्	107
67.	महालक्ष्मी व्रतसमापनम्	108
68.	महाभद्रा व्रतम्	110, 115
69.	महाष्टमी	109, 112
70,	महानवयी	125
71.	महा शिवरात्रिः	191
72.	महिषासुर मर्दिनी पूजनम्	95
73.	माघ स्नानम्	171, 172
74.	माघी पूर्णिमा	113
75.	मित्र सप्तमी	90
76.	मौन व्रतम्	42
77.	यम द्वितीया	55
78.	रक्षाबन्धनम्	216
79,	रथ सप्तमी	173
80.	रम्भा व्रतम्	67
81.	राम नवमी	119
82.	राम यात्रोत्सवः	55
83.	ललिता यात्रा	68
84.	वर्ष प्रतिपदा	38
85.	वट सावित्री	176
86.	वराह जयन्ती	71, 119
87.	विजय दशमी	133
88.	विनायक गौरी व्रतम्	69
89.	विष्णु त्रिरात्र व्रतम्	126
90.	विष्णोः स्वाप महोत्सवः	162

91.	वृषोत्सर्गः	246
92.	वैकुण्ठ चतुर्दशी	189–190
93.	वैशाखी	251
94.	शिवशक्ति महोत्सवः	92
95.	शिवरात्रि व्रतम्	191
96.	(शीतलाष्टमी) शीतला व्रतम्	93
97.	श्रावणी उपाकर्म	205
98.	श्रीपूजा	81
99.	श्रीरामचन्द्र दोलोत्सवः	58
100.	सावित्री व्रतम्	202
101.	सिद्धिविनायक व्रतम्	72
102.	सीताष्टमी	117
103.	सूर्योत्सवः	87–88
104.	संकष्ट चतुर्थी	70
105.	स्कन्द पूजोत्सवः	78
106.	स्कन्द षष्ठी	82
107,	हल षष्ठी	83
108.	हरितालिका	67
109.	होलिका	248
110.	त्रिपुरोत्सवः	246

KENDRIYA SANSKRIT VIDYAPEETHA
Accession No 17727
Date 11-7-94
GURUVAYOOR

CSUGCKL 1
Q2
Acc.No: 17727 17727